अर्जुन उवाच ॐ संन्यासस्य महाबाहो तत्त्वमि
च्छामि वेदितुं त्यागस्य च हृषीकेश पृथक्केशिनि
सूदन १॥ शांकरभाष्यं १

सर्वस्यैव गीताशास्त्रस्यार्थोऽस्मिन्नध्याये उपसंहृत्य सर्वश्च वेदार्थो
वक्तव्य इत्येवमर्थोऽयमध्याय आरभ्यते सर्वेषु ह्यतीतेष्वध्यायेषु उक्तोऽर्थो
अ१८ ऽस्मिन्नध्याये अवगम्यते अर्जुनस्तु संन्यासत्यागशब्दार्थयोरेव विशेषं बु
भुत्सुरुवाच संन्यासस्येति संन्यासस्य संन्यासशब्दार्थस्य इत्येतद्धे महाबाहो तत्त्वं त
स्य भावस्तत्त्वं याथात्म्यमित्येतत् इच्छामि वेदितुं ज्ञातुं त्यागस्य च त्याग
शब्दार्थस्येत्येतत् हृषीकेश पृथक् इतरेतरविभागतः केशिनिषूदन केशि
नामा कश्चित् असुरस्तन्निषूदितवान् भगवान् वासुदेवस्तेन तन्नाम्ना संबो
ध्यतेऽर्जुनेन १॥ आनंदगिरिकृतटीका २

पूर्वैरध्यायैर्विस्तरेण यदुक्तं तद्विविच्य तयोक्तमर्थं संक्षेपतः प्रदर्श्य संक्षे
पेणोपसंहाराभिधानमध्यायान्तरमवतारयति सर्वस्यैवेति उपसंहृत्य व
क्तव्य इति संबंधः किं चोपनिषत्सु यदुक्तं तद्विस्तरेण तस्यार्थस्य बहिर्लोक
स्यार्थमस्मिन्नध्याये संक्षिप्ताभिधानं कर्तव्यमुपनिषदां गीतानां चैकार्थ्यात्
तदिदमाह सर्वश्चेति कथं सर्वोऽपि शास्त्रार्थोऽस्मिन्नध्याये संक्षिप्योपसंह्रि
यते तत्राह सर्वेषु हीति ननु वेदार्थैकदेशस्तत्र संजिहीर्षितस्तर्हि
किमिति त्यागैकदेशे संन्यासयोगादिति च वेदार्थैकदेशविषये प्रश्नप्रति
वचने तत्राह अर्जुनस्त्विति पृथगनयोस्तत्त्वं वेदितुमिच्छामीति विशेष
णाद्द्वयोरर्थयोस्तत्त्वमवगम्यते बुभुत्सितस्य प्रष्टव्यत्वादेकदेशे तदभा
वादप्रश्नोपपत्तिरिति भावः १॥

स्वामिकृतटीका ३

संन्यासत्यागविभागेन सर्वगीतार्थसंग्रहं स्पष्टमष्टादशे प्राह परमार्थवि
निर्णये अत्र सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी संन्यासयोगयुक्ता
त्मेत्यादिषु कर्मसंन्यास उपदिष्टः तथा त्यक्त्वा कर्मफलासंगं नित्यतृप्तो नि
राश्रयः सर्वकर्मफलत्यागं ततः कुरु यतात्मवानित्यादिषु फलमात्रत्यागे

नकर्मानुष्ठानमुपदिष्टं नचपरस्परंविरुद्धं सर्वज्ञः परमकारुणिकोभग
वानुपदिशेत् अतः कर्मसंन्यासस्यतदनुष्ठानस्यचाविरोधप्रकारंबुभुत्सु
रर्जुनउवाच संन्यासस्येति भोहृषीकेश सर्वेन्द्रियनियामकहेकेशिनिसू
दन केशिनाम्नोहिमहतोहयाकृतेर्दैत्यस्यसूदनत्वव्यादंयभवन्यितमा
गच्छतः अहंतेयानेनविवामवाङ्मवेश्यन्तत्त्वमेवविविदिहेनतेनैववा
ड्नाकर्कटिकाफलवन्नेविदार्यनिसूदितवान्अतएवहेमहाबाहो इति
संबोधने संन्यासस्यत्यागस्यचतत्त्वंपृथग्विवेकेनवेदितुमिच्छामि १॥

वैष्णवभाष्यटीका ॥ ४

सर्वेष्वध्यायेषु भगवताबहुशःसंन्यासःत्यागोनिर्दिष्टः अनयोविवेकेनत
योःस्वरूपबुभुत्सयाअर्जुनउवाच संन्यासलक्षणस्यार्थस्यतत्त्वंतज्ज्ञावेवे
दितुमिच्छामिपृथक्त्यागस्यस्वरूपंयाहतेत्यागस्यापिस्वरूपंवेदितुमिच्छामि।
भिकेशिनामकाश्वरूपदैत्यस्यारेर्नारस्तनिसूदितवान्वासुदेवस्तस्यसंबो
धने १॥

रामानुजभाष्यटीका ५

अतीतेनाध्यायद्वयेनाभ्युदयनिःश्रेयससाधनभूतंवैदिकमेवयज्ञतपोदाना
दिकर्मणामहैदिकस्यकर्मणोसामान्यलक्षणंश्रवणाच्चः तत्रमोक्ष।
१८ स्वदयसाधनयोर्भेदस्तत्सङ्गनिर्देशत्वेनमोक्षसाधनंचकर्मफलाभि
संधिरहितयज्ञादिकंतदारंभश्चसर्वेश्वरादेकाद्भवतिसत्वहिंसयास्विका
हारसेवयेत्युक्तं अनन्तरंमोक्षसाधनतयानिर्दिष्टयोस्त्यागसंन्यासयोरै
कांत्यागस्यचस्वरूपंभगवतिसर्वेश्वरेचसर्वकर्मणांकर्तृत्वानुसंधानं
सत्वरजस्तमसांकार्यवर्णनेनसत्वगुणवश्यापादेयत्वंस्ववर्णोचितानां
कर्मणांपरमपुरुषाराधनभूतानांपरमपुरुषप्राप्तिनिर्वर्तनप्रकारःकृ
त्स्नस्यगीताशास्त्रस्यसारार्थोभक्तियोगःइत्येतेःप्रतिपाद्यन्तेतत्रतावत्त्या
गसंन्यासयोःपृथक्त्वैकत्वेनस्वरूपनिर्णयायचार्जुनःपृच्छति अ
र्जुनउवाच संन्यासस्येति त्यागसंन्यासौहिमोक्षसाधनतयाविहितौ नक
र्मणानप्रजयाधनेनत्यागेनैकेनामृतत्वमानशुः वेदान्तविज्ञानसुनिश्चिता
र्थाःसंन्यासयोगाद्यतयःशुद्धसत्त्वाः तेब्रह्मलोकेतुपरान्तकालेपरामृता
त्परिमुच्यन्तिसर्वे इत्यादिषु संन्यासस्यत्यागस्यचतत्त्वंयाथात्म्यंपृथक्
वेदितुमिच्छामिअयमभिप्रायःकिमेतौसंन्यासत्यागशब्दौपृथगर्थौउत

पृथकार्थो यदा पृष्टार्थेन तयोः पृथक्त्वेन स्वरूपं वेदितुमिच्छामि पृथक्त्वेपि त
त्स्वरूपं वक्तव्यमिति ॥ १ ॥ श्रीमन्नवल्लभकृतटीका ६

सर्वस्वकर्मत्यागी स च तु हिमानिति तथा स संन्यासी च योगी च न निरग्निर्न चा
मादिमत संन्यासिसंन्यासिनोर्द्वयोः श्रवणाद्विशेषजिज्ञासोर्यं प्रश्नः ॥ १ ॥

परमार्थप्रपाटीका ७ ॥

दनयोर्भिस्वरूपेणागुरुणा येन दर्शितं निजस्वरूपं तं वन्दे गोविन्दमजमव्ययं सर्वं पंचमाध्याये सर्वकर्माणि मनसा संन्यस्येति तथा संन्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसीत्यादिवाक्यैः कर्मसंन्यासः प्रशंसितः अनन्तरं सर्वकर्मफलत्यागं ततः कुर्वित्यादिना फलमात्रत्यागेन कर्मानुष्ठानमुपदिष्टं तत्परस्परविरुद्धमिति संदेहे तयोस्तत्त्वं जिज्ञासुरर्जुनः पृच्छति संन्यासस्येति भो हृषीकेश सर्वेंद्रियेश स्वामिन् संन्यासफलत्यागस्य च तत्त्वं रहस्यं पृथग्विविदं पृथक्प्रकारेण ज्ञातुमिच्छामि केशिनाम्नो दैत्यस्य हन्तेर्दैत्यस्य मुखे वर्तमानवामबाहु मुखे
प्रसारप्रवेशनेनेनिष्ट दित्तवान् नाशितवान् अतएव महाबाहो इति संबुद्धिः केशपादिमहादैत्यदारणासमर्थस्य तवास्मत्संदेहापाकरणं कियानायासः इत्यर्थः ॥ १ ॥

वनमाली टीका ८ ॥

सर्वाध्याये प्रकीर्णानि ज्ञानानादीन्यब्रवीद्धरिः कृपयाष्टादशेनानि संगृह्णाति रहस्यकृत् पूर्वाध्यायेषु ग्रहादि त्रैविध्यात्कर्मणां त्रैविध्यमुक्तं इदानीं संन्यासत्रैविध्यकथनेन संन्यासिनामपि त्रैविध्यं वाच्यं तत्र तत्त्वबोधानपरं यः फलभूतः सर्वकर्मसंन्यासः स च न दशेषगुणातीतत्वेन व्याख्यानत्वात् सात्त्विकराजसतामसभेदमर्हतीति योगितत्त्वबोधायाम्नाकर्षः सर्वकर्मसंन्यासस्तत्त्वबुभुत्सया वेदान्तवाक्यविचारायभवति सोपि त्रैगुण्यविषयावेदा निस्त्रैगुण्यो भवार्जुनेत्यादिनागुणातीतत्वेन व्याख्यानः यस्त्वसत्त्वबोधनामन्तर्गतं तत २४
बुभुत्सुना च कर्मसंन्यासः स संन्यासी च योगी चेत्यादिना गौणो व्याख्यानस्तस्यैव त्रैविध्यसंभवाद्विशेषजिज्ञासुः पृच्छति संन्यासस्येति श्रुतिष्वामनन्ति ज्ञानविविदिषाणां च कर्माधिकानानामेव किंचित्कर्मपरित्यागोयः संन्यासशब्दोपयोगान्न्यासस्य यो हेनोच्यते पनात्यागः

करणाशुद्ध्यर्थमविहितकर्माधिकारिकर्तृकस्य त्या संस्य केवलचिद्रूपेणा
कर्मत्यागस्य तत्त्वस्वरूपं पृथक्सात्विकराजसतामसभेदेन वेदितुमिच्छा
मि त्यागस्य च तत्त्वं वेदितुमिच्छामि किं त्यागसंन्यासशब्दौ घटपटशब्दा
विव भिन्नजातीयार्थौ किं वा ब्राह्मणपरिव्राजकशब्दाविवैकजातीयार्थौ।
यौ यद्याद्यस्तर्हि त्यागस्य तत्त्वं संन्यासात्पृथग्वेदितुमिच्छामि यदि द्वि
तीयस्तर्ह्यवान्तरोपाधिभेदमात्रेण वक्तव्यं पृथक्त्वाख्यानेनैवोभयं व्याख्या
तं भविष्यति महाबाहो केशिनिसूदनेति संबोधनाभ्यां बाह्योपद्रवनि
वारणस्वरूपयोग्यताफलोपधानं प्रदर्शितं हृषीकेशेत्यन्तरुपद्रवनि
वारणसामर्थ्यमिति भेदः अत्र रागान्संबोधनत्रयं अर्जुनसंदे
हो धर्माधिकारिकर्तृकत्वेन सर्वोक्तप्रकारैस्तावत्कर्मणां संन्यासशब्द
प्रतिपाद्यत्वेन चतुर्णामपि संन्यासरूपसाधर्म्येण त्रैगुण्यसंभवासंभवा
भ्यां संशयः अस्य सबीजं द्वितीयस्य तु संन्यासत्यागशब्दयोः पर्याय
त्वात्कर्मतत्फलत्यागरूपेणावैलक्षण्यापत्तेः संशयः १॥

अत्रभगवज्जयंतीटीका १॥

अष्टादशेऽखिलानर्थान्गीतायास्संस्मरन्प्रभुः अपृष्टेरतिगोप्यत्वमद्य वी
त्यर्थसारस्थितिः पंचेताव्रह्मोपदेशः प्रकृतिपुरुषयोरापायात्मस्वरूपज्ञा
ननिरूपणं च त्रयोदशे जीवात्मनः सत्वादिप्रकृतिगुणयोगात्संसारश्चत्त
द्वियोगान्निवृत्तिश्च पंचदशे प्रकृतिपुरुषात्मकस्य संसारवृक्षस्य मूल
ज्ञानान्निवृत्तिर्भगवत्पुरुषोत्तमज्ञानं वैदिकं च षोडशे शास्त्रीयकर्मक
र्तृणां दैवत्वेन स्वर्गादिफलमशास्त्रीयकर्मकर्तृणामासुरत्वेन नरकादि
फलं सप्तदशे सात्विकश्रद्धावतां शास्त्रीयसात्विकयज्ञादिकर्मकर्तृणां
दैवत्वं राजसतामसश्रद्धावतामशास्त्रीयराजसतामसयज्ञादिकर्म।
कुर्वतामसुरत्वं चेति अनेनैवोक्तानीदानीमष्टादशाध्याये त्यागसंन्यास
योस्स्वरूपनिरूपणं सर्वेषां कर्मणां तत्फलस्य च भगवदर्पणेन सत्वा
दिगुणकार्यवर्णनेन सत्वगुणस्योपादेयत्वं सर्वस्य गीतार्थस्य भक्तिप्र
तिरूपं च सारार्थः इत्येतेनैवानाय भगवता प्रतिपाद्यते तत्र सर्वकर्म।
र्ष णां मनसा संन्यासस्तेन च विंशीत्यादावुक्तस्य संन्यासस्य त्यक्त्वा कर्मफलासं
गं नित्यतृप्तो निराश्रय इत्यादावुक्तस्य त्यागस्य च स्वरूपं ज्ञातुमिच्छुरर्जुनो भ
गवंतं पृच्छति संन्यासस्येति हे महाबाहो पुरुषोत्तम हे हृषीकेश इंद्रियनियंतः

हे केशिनिसूदन केशिनामासुरहंतः संन्यासस्य वेदांतविज्ञानसुनिश्चि
तार्थाः संन्यासयोगाद्यतयश्शुद्धसत्वास्ते ब्रह्मलोके तु परान्तकाले परामृ
तात्परिमुच्यंति सर्वे इत्यादिवाक्यप्रतिपाद्यस्य च शब्देन त्यागस्य च कर्मणा
न प्रजया धनेन त्यागेनैके नामृतत्वमानशुरित्यादिप्रतिपाद्यस्य पृथ
ग्विवेकेन तत्वं याथात्म्यस्वरूपं वेदितुं ज्ञातुमिच्छामि यदि त्यागसंन्यासौ
ऊरूपं त्वावि विसजातीयौ तर्हि तयोरवान्तरोपाधिमात्रभेदेवभिन्न
वास्तवं नाभिन्नमेव रूपं तत्वेदितुमिच्छामि यदि त्वेकत्वं एवं नाविवसजा
तीयौ तर्हि तयोः स्वाभाविकं भिन्नमेव रूपं तच्चापि वेदितुमिच्छामीत्य
भिप्रायः महाबाहो इति संबोधनेन सामर्थ्यकल्याणलक्षितेनाज्ञाननाशकता।
तत्त्वशुश्रूषोर्ममत्वात्सर्वज्ञोऽसि तत्प्रतयोः स्वरूपं वदेति सूचितं हृषीके
शेत्यनेन तत्र सर्वेन्द्रियप्रेरकत्वान्मम बुद्धिमालिन्यं केवलकर्मणि त्वं प्रेर
सं यन तद्वर्जसत्वमां मुक्तीकुर्विति सूचितम् केशिनिसूदनेत्यनेन तथ
यान्त्वं केशिदैत्यं हत्वा देवमनुष्यादीन्निस्सबाधमहासूस्तथा संदेहरूपमसु
रं हत्वा माम संदेहं कुर्विति सूचितम् १ ॥

मधुसूदनी टीका १ ॥

ॐ पूर्वाध्याये श्रद्धात्रैविध्येनाहारयज्ञतपोदानत्रैविध्येन च कर्मणां
त्रैविध्यमुक्तं सात्विकानामादानाय राजसतामसानां च हानाय तदा
नीतं संन्यासत्रैविध्यकथनेन संन्यासिनामपि त्रैविध्यमुक्तं तत्र न
त्वबोधानंतरं यः फलभूतः सर्वकर्मसंन्यासः चतुर्दशाध्याये गुणाती
तत्वेन व्याख्यातत्वान्न सात्विकराजसतामसभेदमर्हति योऽपि तत्व
बोधात्प्राक्तदर्थं सर्वकर्मसंन्यासस्तत्त्वमस्यादिवेदान्तवाक्यवि
चाराय भवति सोऽपि त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुनेत्या
दिना निर्गुणत्वेन च व्याख्यातः यस्त्वनुत्पन्नतत्त्वबोधानामनुत्पन्नत
त्वभक्तानां च कर्मसंन्यासः स संन्यासी च योगी चेत्यादिना गौणो।
व्याख्यातः तत्र त्रैविध्यसंभवात्तद्विशेषं बुभुत्सुः अविदुषामनुप। अर्जुन उवाच
ज्ञानविविदिषाणां च कर्माधिकृतानामेव किंचित्कर्मपरिग्रहेण।
किंचित्कर्मपरिग्रहेण किंचित्कर्मपरित्यागोऽपि सम्यग्रतश्शुद्धयो।
गात्संन्यासशब्देनोच्यते प्रतीतश्चांतःकरणशुद्ध्यर्थं मवितृकर्मा

श्री॰
गी॰ टी॰
अ॰

3

धिकारिकर्तृकस्य संन्यासस्य केनचिद्रूपेण कर्मत्यागस्य तत्त्वं स्वरू
पं पृथक्सात्त्विकराजसतामसभेदेन वेदितुमिच्छामि त्यागस्य च तत्त्वं
वेदितुमिच्छामि किं संन्यासत्यागशब्दौ घटपटशब्दाविव भिन्नजाती
यार्थौ किं वा ब्राह्मणपरिव्राजकशब्दाविव एकजातीयार्थौ यद्याद्य
स्तर्हि त्यागस्य तत्त्वं संन्यासात्पृथग्वेदितुमिच्छामि यदि द्वितीयस्त
र्हि अवान्तरोपाधिभेदमात्रं वक्तव्यं एकव्याख्यानेनैवोभयव्याख्यानं
भविष्यति महाबाहो हे केशिनिषूदनेति संबोधनाभ्यां बाह्योपद्रव
निवारणस्वरूपयोग्यताफलोपदाने प्रदर्शिते हृषीकेशेत्यनेनान्तरुपद्र पा॰
वनिवारणसामर्थ्यमिति भेदः अत्र त्यागसंबोधनद्वयं अर्जु
नस्य हेयत्वकर्माधिकारिकर्तृत्वेन सर्वाकृत्यत्वादिसाधर्म्येण संन्या
सशब्दप्रतिपाद्यत्वेन चतुर्णामतीन संन्यासद्वयसाधर्म्येणात्रैगुण्यसं
भवासंभवाभ्यां संशयः प्रथमस्य प्रथमस्य बीजं द्वितीयस्य संन्यास
त्यागशब्दयोः पर्यायत्वाकर्मतत्फलत्यागरूपेणैव वैलक्षण्योक्तेः
संशयो बीजं १ ॥ सदानंदी टीका ॥ १ ॥
अखण्डानंदं स्वं निगमशिरसां भावविषयं मनीषैराराध्यं परमपद
मीशानमकलं विश्वव्याप्तं सत्त्वास्पदधिजनैः प्राप्यममलं प्र
कृदेवं देहं भ्रमतिमिरविध्वंसिचरणं १ शरण्यं सर्वस्यां सनक णं॰
मुखैः सद्भिर्हृदि धृतं महायोगीशानैः सुरनरजगद्वंद्यममलं विदा
नंदाकारं सकलरससारं हरिपदं सदा स्मारं स्मारं भवजलधिपारं स्वक
लये २ प्रागिवाद्विमतयाप्रोक्तं विस्तरेण यतस्ततः शास्त्रार्थमुपसं
हृत्याधुना संक्षेपतोऽखिलं ३ अनायासेन बोधार्थं ममाभिप्रायवप्रक्र
मः गीताशास्त्रस्य सर्वस्याध्यायेऽस्मिन्नर्थसंग्रहः ४ वेदार्थस्य च सम
स्तस्य वक्तव्योऽस्तीत्यतोऽर्जुनः अष्टादैर्विधत्तेः सर्वाध्यायेषु यत्नादि।
कर्मणा ५ त्रैविध्यं तत्कर्माकर्मणि संन्यासत्यागस्य संभवः त्रैविध्य
स्येति जिज्ञासन्नुवाच श्रीहरिं प्रति ६ कर्माधिकारिणामेव किंचि
त्कर्मपरिग्रहात् किंचित्कर्मपरित्यागात्त्यागशब्दप्रयोगतः ७ सं
न्यासशब्दतः प्रोक्तस्य चित्तविशुद्धये अविहृतकर्मकस्यापि संन्या
सस्य पर्यायतः ८ पृथक्त्वरूपमिच्छामि वेदितुं गुणभेदतः त्यागा

स्यापि स्वरूपं च सम्यगिच्छामि वेदितुं ८ संन्यासत्यागशब्दौ किमि
न्नार्थौ चैकवाचकौ आद्ये त्वर्हि संन्यासात्त्यागस्यैव पृथक् ९
इच्छामि वेदितुमन्यद्वैदिकेनोभयनिर्णयं ह्याभ्यां सम्बोधनाभ्यां च बाह्या
भ्यन्तरवारणे ११ सामर्थ्यं दर्शयितुं बाह्यगतदोषनिवारणे हृषीकेशेति
सामर्थ्यं भक्तानामिति दर्शितं १२ इत्यवस्थान्तरागाद्धास्तेयं संबोधनत्रयं
१३॥१॥

नीलकण्ठी टीका १८ ॥

अस्याष्टादशाध्यायस्य प्रथमे तु षोडशातितानो द्वितीये सूचितानो
शेषैर्वृन्दादितानामध्यानेकान्तेनोपसंहारार्थोयमन्तिमोऽध्याय
आरभ्यते तत्र पूर्वाध्याये नः श्रद्धया कृतं सर्वं व्यर्थमित्युक्तं तत्र फ
लावश्यंभावनिश्चयः श्रद्धा सा च फलवतां कर्मणामेवाङ्गेन त्वक
र्मविरहरूपस्य संन्यासस्याभावरूपफलवर्जितस्य अभावाज्ञावोम
ते रयोगात् तस्माच्छ्रद्धासापेक्षकर्मापेक्षया श्रद्धानपेक्षः संन्यासः
श्रेयांश्च चास्यैव रूपस्य श्रद्धात्रैविध्यश्रुतेः सात्विकादिभेदेन त्रैविध्यं
संभवति येन फलेनात्मनत्वं स्यात् नक्तलस्यादृष्टविलोपनिहितिरू
पस्य सर्वत्र तुल्यत्वात् स च संन्यासो यदि कर्मत्यागएव तर्हि सिद्धेनः
समीहितं यदि तु तन्मो भिन्नो न हि तं योर्वैलक्षण्यं विचार्यमित्याश
येनार्जुन उवाच संन्यासस्येति हे महाबाहो हे हृषीकेश हे केशि
निषूदनेति बहुकृत्वः संबोधयन् जिज्ञासितेऽर्थेऽत्यादरं दर्शयति
संन्यासस्य तत्वं याथात्म्यं त्यागस्य च पृथक् वेदितुमिच्छामि त्या
गस्य याथात्म्यं संन्यासात्पृथक् वेदितुमिच्छामीति चकारे
णानुवर्तते २ ॥

आनंदी टीका १८

अथैवं विदितवेद्यः स्वकर्मणामनुष्ठाने संशयविगमात्समुपजा
तोत्साहः प्राह्निः श्रितयोरपि संन्यासत्यागशब्दार्थयोरस्मिन्
गीतासर्वार्थसिद्धान्ते ध्यायेपरीक्षया याथात्म्यं वेदितुमिच्छन्न
र्जुन उवाच किं सर्वेषां कर्मणां न्यासः ब्रह्मणि समर्पणं वा क
स्यचिदेवाकिम्वु फलमात्रस्येति तथा त्यागेऽपि किं सर्वेषां कर्म

श्री॰ णां किमकस्यचित् किंवाफलमात्रस्येति संशयानः तत्त्वः पृतन्न
गी॰ता त्वेयाथात्म्यं वेदितुमिच्छामि १ ॥
प्र॰टी॰

रामकंठटीका १८

अथ मान्शुचः सम्पदं दैवीमभिजातोसि पाण्डवेति भगवतस्तदनुग्रह
५ २ लक्षणमात्मानत्कृतपरस्वंपस्य परमगुरोः परमप्रमाणभूताद्वचनादा
त्मनो यथोक्तदेवसर्गगुणसामग्रीसंपन्नत्वसंभावनया यथोपदिष्टा
र्थानुष्ठानपात्रतां प्रतिपाद्यावश्यकरणीयानां स्वकर्मणामनुष्ठानेस
मुपजातोत्साहस्तेषामपवर्गफलत्वेन कारणभूतयोः संन्यासत्याग
योः ज्ञेयः स नित्यसंन्यासी तथा सर्वसमारम्भात्यादिना च संदे
पतः पूर्वमवगतार्थयोरधुना विस्तरतः परमार्थजिज्ञासमानोर्जु
न उवाच संन्यासस्तावत्संन्यसनं नस्य सहृत्पपरिहाररूपवार्थः त्याग
स्य च हानमेवार्थ इत्यनयोरेकार्थत्वात्किं परस्परपर्यायत्वमुत भिन्ना
र्थता तत्कीदृशोर्थभेदोनयोरिति प्रश्नवीजं हृदिकृत्वा संन्यासस्य त्या
गस्य च तत्त्वं परमार्थं पृथग्विवेकेन वेदितुं ज्ञातुमिच्छामीत्यर्जुन
प्रश्नादनन्तरमनयोरेकार्थतां गभीकृत्योत्तरमाह भगवान् १ ॥

लासिकी [illegible]टीका

अथ सर्वगीतार्थसंग्रहं कारयितुं संन्यासत्यागयोः पूर्वं लक्षित
लक्षणयोरपि पार्थक्येन लक्षणं बुभुत्सया प्रस्तावनया अर्जुन उवाच संन्यासेति
हे महाबाहो हे केशिनाम्नासुरस्य ध्वंसन संन्यासः स्वरूपपरिहारः
त्यागो हानमित्यनयोरेकार्थत्वात् किं परस्परपर्यायत्वं उत भिन्ना २
र्थते त्येवं पृथग्विवेकेन संन्यासत्यागयोस्तत्त्वं याथात्म्यं ज्ञातुमिः
च्छामि १

पंचोलीटीका

सकलवेदार्थरूपगीतार्थः समस्ताभिरध्यायैः निरूपितः सर्वोपि
संक्षिप्य अस्मिन्नष्टादशाध्याये निरूप्यते तत्र सर्वकर्मणामनसा सं।
न्यस्य योगयुक्तेनादिषु कर्मसंन्यास उपदिष्टः तथा सक्ताः कर्मफला।
संगं सर्वकर्मफलत्यागेनतक्रकत्यादिषु च फलत्यागेन कर्मानुष्ठान

मुपदिष्टं तत्र संन्यासत्यागशब्दार्थयोः परस्परविरुद्धत्वाभासमान
योः अविरुद्धतयावबोधं तयोश्च विशेषबुभुत्सुरर्जुन उवाच संन्या
सस्येति हे महाबाहो हे हृषीकेश केशिनिषूदन संन्यासस्य संन्यासश
ब्दार्थस्य तत्त्वं याथात्म्यं वेत्तुम् त्यागस्य तत्त्वं याथात्म्यं पृथगन्योन्यवि
भागेन वेदितुमिच्छामि १॥

समिद्धोधिनी

श्रीकार्तवीर्यार्जुनाय नमः   प्राग्विस्तरतो यो ग्रथितः समिद्धो योऽवि
कासयेत् अष्टादशे सोऽसंदिग्धोऽरत्नवीरस्यमानं । अस्य पूर्वेण
ध्यायेन श्रद्धानुरूपैर्यज्ञैः सर्वकर्मणां सिद्धिस्तथापि दैवसर्गाभिजाता
नां सात्त्विकी श्रद्धा तदनुरूपाण्येव च यज्ञदानतपःप्रभृतीनि शुक्ल
लक्षणं त्रिविधं फलं फलन्ति आसुरस्वभावानां तु राजसी तामसी चे
ति द्विविधया श्रद्धयानुष्ठितानि तान्यधोलोकप्रापणेन दुःखाति
शयमेव जनयन्तीति प्रतिपादितं तत्र च कस्मिन्सर्गे ममोद्भव इति जि
ज्ञासायां दैवी संपद् विमोक्षाय निबन्धायासुरी मता मा शुचः संपदं
दैवीमभिजातोऽसि पाण्डवेत्येवं न भगवतः परमगुरोः प्रमाणभूतेन
वचनेन पूर्वमेव द्वयोरपि फलोद्भावनसादितं दैवसर्गगुणसामग्री
संपन्नत्वसंभावनोत्पादनादविषयीभूतायां तस्यां स्ववर्णोचिताना
मवश्यकर्तव्यानां युद्धयज्ञादिकर्मणामनुष्ठाने समुपजातोत्साहो
पि तेषां भगवत्सायुज्यप्राप्तौ संन्यासत्यागयोर्निमित्ततया श्रवणात्
सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी संन्यासयोगयुक्तात्मेत्या
दिषु कर्मसंन्यासस्य त्यक्त्वा कर्मफलासंगं नित्यतृप्तो निराश्रयः स
र्वकर्मफलत्यागं ततः कुरु यतात्मवानित्यादिषु फलमात्रत्यागेन क
र्मानुष्ठानस्य प्रागुक्तस्य स्मृतिपथारूढस्य परस्परविरुद्धत्वमापातत
समनन्तरमेव संस्फुरति अपि ज्ञेयः स नित्यसंन्यासी तथा यस्य सर्वे समा
रंभा इत्यादिना च संन्यासत्यागयोः संक्षेपतो भगवताभिहितेस्वरू
पसमाधाने विस्तरतस्तयोः परमार्थजिज्ञासमानोऽर्जुन उवाच
संन्यासस्येति सम्यग्न्यसनं सम्यक्परित्यागः संन्यासः सर्वहानार्थत्यागा

दमिच्छयवेति किंपरस्परपर्यायत्वमुत सर्वथा कर्मणां परिहारः सं
न्यासः अवश्यमनुष्ठानपर्यवसितः फलमात्रपरिहारस्त्यागइति
भिन्नार्थत्वं आद्ये पृथगभिधानमनौचित्यान्नस्यादेव अंत्येप्रकाशा
न्तमसोरिवकर्मानुष्ठानतत्त्यागयोरेकविषयतया युगपद्वासंभव
इत्यतः कीदृशोर्थभेदेनयोरिति प्रश्नाभिप्रायः भो हृषीकेश सर्वें
द्रियनियामक तथा महाबाहो केशिनिसूदन तादृशौ ते महांतौ बा
हू ययोरेकतरेणाप्युरवं व्यादायाभिमुखमागतस्य हयाकृतेः केशिनाम्नो
दैत्यस्यमुखे प्रवेशिते न तत्क्षणमेव विवृद्धेन तं विदार्य निसूदित
वानसीति भावनेव सर्वेषामंतःकरणे नियम्य तत्तत्कर्मणि प्र
वृत्तिमुत्पादयति लोकरक्षार्थं च तानुष्कर्मणो निवर्तयति अत्या
ग्रहस्य त्वांश्चदिनसीति स्वाक्षंयथा तोलालासोयं तवक्रीडामात्रप्र
योजनस्ततो ममापि समुत्पादितः प्रहृति प्रतिबंधकः संशयः स्व
यमेवोच्छेदितुं संप्रति तत्र वति संबोधनद्वयाभिप्रायः १॥

लघुभाष्य

पूर्वोक्तं साधनं संक्षिप्योपसंहरत्यनेनाध्यायेन फलाति
च्छया करणेन वा काम्यकर्मन्यासः संन्यासः त्यागस्तु
फलत्यागएव तथाहि श्रावीनप्रालक्षुतिः अनिच्छया
कर्मणावापि काम्यन्यासोन्यासः फलत्यागस्तुत्यागइ
ति मनीषिण इति विशेषणात्सर्वपक्षोपि न्यास एव फ
लत्यागो विवक्षितो यज्ञादेस्तस्य देयत्तकर्मफलत्या
गीति च वक्ष्यति अतएवायपक्षः तत्प्रकारं चाह १

भाषा अनुवाद

अब प्रथम समग्र अष्टादश अध्याय का तात्पर्य संक्षेप से श्रीधर
स्वामी कहते हैं कि भगवान श्रीकृष्ण ने समग्र गीताशास्त्र का जो
संग्रह अर्थ सोई परमार्थ है यह निर्णय करने के अर्थ अठारहें अ
ध्याय मे संन्यास औ त्याग भिन्न भिन्न करके स्पष्ट रूप से कहा है और स
र्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी यह ५ अध्याय का १३ श्लोक
औ शुभाशुभ फलैरेवं मोक्ष्यसे कर्मबंधनैः संन्यासयोगयुक्तात्मा वि
मुक्तो मामुपैष्यसि यह ९ अध्यायका २८ श्लोक औ त्यक्त्वा कर्मफ
लासंगं नित्यतृप्तो निराश्रयः यह ४ अध्याय का २० श्लोक औ सर्व
कर्मफलत्यागं ततः कुरु यतात्मवान् यह १२ अध्याय का ११ श्लोक
इन सब श्लोकों से और और अध्याय मे भी तीन तीन श्लोकों मे फल
मात्र त्याग करके निष्काम समस्त कर्म करने का उपदेश दिया है प
रन्तु परम करुणामय सर्वज्ञ जो भगवान श्रीकृष्ण सो परस्पर वि
रुद्ध वचन कभी भी उपदेश न करैंगे इसी से कर्मों के त्याग औ क
र्मों के करने के विषय मे जिस प्रकार से विरोध न पड़े सोई जानने
की इच्छा करि अर्जुन कहते हैं कि हे हृषीकेश अर्थात् इंद्रियों के
नियामक प्रवर्तक और हे केशिनिषूदन केशी नाम दैत्य व्रजली
ला के समय अश्व रूप धर के आया तो भगवान उसके मुख मे
अपना हाथ डाल ककरी के समान चीर डाल के डाल दिया।
या सोई कहा कि हे महाबाहो श्रीकृष्ण संन्यास औ त्याग शब्द
का तत्त्व अर्थ मे भिन्न भिन्न करके जाना चहता हौं सो दया कर
के कहिये १ ॥

दोहा

महाबाहु सन्यास कहत तत्व मे जान्यो चाहि त्याग हि को हृ
षीकेश भिन केशिसूदन याहि १॥

6

श्रीभगवानुवाच काम्यानां कर्मणां न्यासं संन्या
सं कवयो विदुः सर्वकर्मफलत्यागं प्राहुस्त्यागं विच
क्षणाः २॥ शाङ्करभाष्यटीका १

तत्र तत्र निर्दिष्टौ संन्यासत्यागशब्दौ न निर्लुठितार्थौ पूर्वेष्वध्यायेष्व
तोऽर्जुनाय पृष्टवते तन्निर्णयाय भगवानुवाच काम्येति काम्यानां
अश्वमेधादीनां कर्मणां न्यासमपि त्यागं संन्यासं संन्यासशब्दार्थमनुष्ठे
यत्वेन प्राप्तस्याननुष्ठानं कवयः पण्डिताः केचिद्विदुर्विजानन्ति नि
त्यनैमित्तिकानामनुष्ठीयमानानां सर्वकर्मणामात्मसम्बन्धितया प्रा
प्तस्य फलस्य त्यागः सर्वकर्मफलत्यागः तमाहुः कथयन्ति त्यागं त्या
गशब्दार्थं विचक्षणाः पण्डिताः २॥

आनंदगिरिकृतटीका २

ननु पूर्वेष्वध्यायेषु तत्र संन्यासत्यागयोरुक्तत्वात् किमिति पुनस्तौ
पृच्छ्येते ज्ञाने तद्योगात् तत्राह तत्रेति न निर्लुठितार्थौ न नि
ष्कृष्टार्थौ न विविक्तार्थौ विमृष्टौ तु भक्तस्य प्रश्नस्य प्रवृत्तत्वात् पृष्टु
रभिप्रायं प्रश्नेन प्रतिपद्य भगवानुत्तरमुक्तवानित्याह पुनरिति प
दद्वयोपन्यासेन संन्यासत्यागशब्दयोरर्थभेदं कथयति काम्यानामिति २

स्वामिकृतटीका ३

अत्रोत्तरं श्रीभगवानुवाच काम्यानामिति पुत्रकामो यजेतेत्येवमा
दिकामोपबन्धेन विहितानां काम्यानां कर्मणां न्यासं परित्यागं संन्यासं
कवयो विदुः सम्यक् फलैः सह सर्वकर्मणां न्यासमपि संन्यासं पण्डिता
ग पण्डिता विदुः जानन्तीत्यर्थः सर्वेषां काम्यानां नित्यनैमित्तिकानां
च कर्मणां फलमात्रत्यागं प्राहुस्त्यागं विचक्षणा निपुणाः ननु नित्यनैमित्तिकानां
फलाश्रवणात् विद्यमानस्य
फलस्य कथं त्यागः स्यात् न हि वन्ध्यायाः पुत्रत्यागः सम्भवति उच्यते
यद्यपि स्वर्गकामः पशुकाम इत्यादिवत् सन्ध्यामुपासीत यावज्जीवम
ग्निहोत्रं जुहोतीत्यादिषु फलविशेषो न श्रूयते तथाप्यपुरुषार्थे बा
पारे प्रेतावत्प्रवर्तयितुमशक्नुवन् विधिर्विश्वजिन्न्यायेनेत्यादि वि
वक्षामात्रतः किमपि फलमाक्षिपत्येवेत्यतो वा कृतं तत्सवच्छ्रवणादे

श्री॰
गी॰टी॰
प्र॰
१

सिद्धिरेव विधेः प्रयोजनमिति मंतव्यं पुरुषप्रवृत्तिमुपपादयितुं दृष्टविरहवाना
मुपायनेन निषादेष्वपि फले सर्वपुरुषत्वप्रयोगा लोका भवेतीति कर्मणापि र।
लोकरहितयर्मणा पापमपवदतीमेवमादिषु तस्मात्प्रकृतवाक्ये सर्वकर्मफल
भागं शाङ्करायां प्राज्ञस्य विवक्षाणामिति नच फलमयोगनप्रवर्तापि निष्फले
प्रकर्मस्य प्रवृत्तिरेव स्यात् नच सर्वेषामपि कर्मणां संयोगपृथक्त्वेन विवि
दिषार्थतया विनियोगात् तथाच श्रुतिः तमेतं वेदानुवचनेन ब्राह्म
णा विविदिषन्ति यज्ञेन दानेन तपसानाशकेनेति श्रुतिस्मृतिपरोक्तसर्वफ
लेषु प्रकरणेन सम्यक्त्वाविविदिषार्थसर्वकर्मानुष्ठानेन चत्व एव विविदिषाव
निष्पत्तिरेवस्तु विवेकेन निवृत्तदेहाद्यभिमानतया बुद्धेः प्रत्यक्प्रवणता ता
त्पर्यं तेव सत्त्वशुद्ध्यर्थं ज्ञानाविरुद्धस्य योगितमावश्यककर्म कुर्वतः नैष्क
र्म्यापत्यकर्मयोगेनात्मस्वरूपेण तथाच श्रुतिः कुर्वन्नेवेहक
र्माणि जिजीविषेच्छतं समा इति ततः परंतु सर्वकर्मनिवृत्तिः स्वत एव भ
वतीति तदुक्तं नैष्कर्म्यसिद्धौ प्रत्यक्प्रवणतां बुद्धेः कर्माण्युत्पाद्य शुद्धितः
कृतार्थान्यस्तमायान्ति प्रावृडन्ते घना इवेति तदुक्तं भगवता यस्त्वा।
त्मरतिरेव स्यादात्मतृप्तश्च मानवः आत्मन्येव च संतुष्टस्तस्य कार्यं न
विद्यते इति श्रीवसिष्ठमहर्षिणोक्तं न कर्माणि त्यजेद्योगी कर्मभिस्त्य
ज्यते ह्यसौ कर्मणो मूलभूतस्य संकल्पस्यैव नाशनमिति ज्ञाननिष्ठावि
रोधकत्वमालुलायिषेद्वा तदुक्तं श्रीभगवता भागवते तावत्कर्माणि
कुर्वीत न निर्विद्येत यावता मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायते
ज्ञाननिष्ठो विरक्तो वा मद्भक्तो वानपेक्षकः सलिंगानाश्रमांस्त्यक्त्वा चरे
दविधिगोचर इत्यादि अलमतिप्रसंगेन प्रकृतमनुसरामः २ ॥

पैशाचभाष्यटीका ४

अर्जुनेन न भक्तिमर्थ्ये यथावद्वक्तुकामः पै॰ काम्यानां कर्मणां।
यफलानां कर्मणां कर्तव्यतया शास्त्रेण रागतो वा न्यासं स
न्यासं विदुः विज्ञाने तिकवयः पंडिताः नववकाम्यानामिति विशे
षणात् मनन्यर्थं कृयावज्जीवमग्निहोत्रमित्यादि नित्यादिनाम नाहुत
मिति विवेन तेषामपि कमनीयफलत्वे न काम्यत्वात् पुण्यलोका वैलोका
ना। नां प्रसूत्वसंत्साहिन्यापशंसतो निष्फलत्वे तथा सर्वेषां त्यागो नास्ति।
यमेव नेमानानां परमितिष्कतेस्वावमिनिस्ततेष्वनयास इदेवच
सिभगवान् [illegible] फलमिति न

स्याकमनीयफलत्वाकर्तव्यतयाध्यातनित्यनैमित्तिककाम्यप्रति
षिद्धानिकर्माणिकाम्यानित्युक्तं कर्तव्यतयाशास्त्रोक्तानांकाम्यानां
स्वरूपानुवादः सर्वाणितानिकर्माणिनित्यनैमित्तिकसंज्ञितानितेषांफले
त्यागंसर्वमेफलेत्यादिनिसंकल्पत्यागस्त्यागमाहुः विचक्षणाः पंडिताः
सर्वग्रहणेनकाम्यकर्मग्रहणेकस्याचत्स्याकाम्यकर्मत्यागेनतत्फलत्या
गस्यसिद्धत्वात्यागयोः सांकर्यप्रसंगात्तस्मान्नित्यनैमित्तिकफलत्यागः २

रामानुजभाष्यटीका ५

श्रीभगवानुवाच अथानयोरेकमेवस्वरूपंतच्चेदमितिनिर्णेतुंवादि
विप्रतिपत्तिंदर्शयन् केचनविद्वांसः काम्यानांकर्मणांन्यासंसंन्यासंकव सं ४
योविदुः सर्वकर्मफलत्यागएवमोक्षशास्त्रेत्यागशब्दार्थइतिप्राहुः न
तुशास्त्रीयकाम्यकर्मस्वरूपविषयः संन्यासः सर्वकर्मफलविषयइति
विवादेप्रदर्शितेकेसंन्यासशब्दमितरत्रत्यागः त्यागशब्दंप्रयुक्तवान्
अतस्त्यागसंन्यासशब्दयोरेकार्थत्वादनयोरेकत्वमितिज्ञायते तथा
निश्चयंशृणुमेतत्त्वत्यागेभरतसत्तमेति २ ॥

अभिनवगुप्तकृतटीका ६

प्रयोजनं भगवा नुवाच काम्यानामग्निष्टोमादीनि सर्वकर्माणिसर्वेषांनित्यनैमित्तिकका
म्यानांकर्मणांक्रियमाणत्वेपिफलत्यागस्त्यागः अत्रचाध्यायेयद्
वशिष्टंवक्तव्यमस्तितत्सर्वमेवतत्रभवद्भट्टभास्करादिभिर्वितत्य
विस्तृतमिति किमस्माकंतद्रूपार्थप्रकाशनमात्रप्रतिज्ञानिर्वाह
णसाराणांग्रन्थकृत्प्रदर्शनप्रयासेन २ ॥

परमार्थप्रपाटीका ७

एतत्प्रश्नोत्तरंभगवानाह काम्यानामिति काम्यानीष्टसाधनान्यग्नि
ष्टोमादीनितेषांसम्यक्फलैः सहन्यासः परित्यागस्तंकवयः पंडिताः
संन्यासंविदुर्जानंति तथाकाम्यानित्यकानांसर्वेषांकर्मणांनित्यनैमि
त्तिकानांश्रुतानांफलत्यागंविचक्षणाः कुशलास्त्यागमाहुः अत्रैतदु
क्तंभवति नित्यानित्यकारणप्रत्यवायसाधनानि संध्यावंदनादीनिनै
मित्तिकानिपुत्रजन्माद्यनंतरंपीनिजातेष्ट्यादीनि प्रायश्चित्तानिपापक्षय

श्री
गी॰ टी॰
अ॰

साधनानि चांद्रायणादीनि उपासनानि सगुणब्रह्मविषयमानसव्यापाररूपा
णि शांडिल्यविद्यादीनि एतेषां नित्यादीनां बुद्धिशुद्धिः परमप्रयोजनं
उपासनानां तु तदेकाग्र्यं विविदिषंति यज्ञेनेत्यादिश्रुतेः तपसा कल्मषं हं
तीत्यादिस्मृतेश्च नित्यनैमित्तिकयोरुपासनानां चावांतरफले पितृलोकसत्य
लोकप्राप्तिः कर्मणा पितृलोको विद्यया देवलोको देवलोको वै लो
कानां श्रेष्ठ इति श्रुतेः सर्वकर्मफलत्यागं प्राहुः २ ॥

वनमाली टीका २ ॥

तत्रोत्तमस्य स्वीकटाहमायेन निराकरणायोत्तरमाह काम्यानामिति
काम्यानां फलकामनया विहितानां चित्तशुद्धावनुपयुक्तानां कर्मणा
मिष्टिपशुसोमादीनां न्यासं त्यागं संन्यासं विदुर्ज्ञानिनः कवयः सत्त्वशु
द्धिविविदिषोत्पत्तिः सर्वेषां वेदनार्थिनां नित्यान्येव कर्माणि भगवदर्पणबुद्ध्या
नुष्ठेयानि तमेतं वेदानुवचनेन ब्राह्मणा विविदिषंति यज्ञेन दानेन तपसा
साऽनाशकेनेति श्रुतेः वेदानुवचनेनेत्यनेन ब्रह्मचारिधर्मा उक्ताः यज्ञे
नेत्यनेन गृहस्थधर्मा उक्ताः तपसेत्यनेन वानप्रस्थधर्मा उक्ताः अ
३ नाशकेनेत्यनेन संन्यासधर्माः उक्ताः यानि वैकल्पिककाम्यानि ज्योतिष्टोमा
दीनि यानि च केवलकाम्यानि पुत्रकामेष्ट्यादीनि परित्याज्यानीत्येकं मतं।
अथ एवं सर्वेषां वैकल्पिककाम्यानां केवलकाम्यानां नित्यानां च प्रतिपदो
क्तफलत्यागं सत्त्वशुद्ध्यर्थितया विविदिषासंयोगेनानुष्ठानं विचक्षणा वि
चारकुशलास्त्यागं प्राहुः खादिरो यूपो भवति खादिरं वीर्यकामस्य यूपं कु
र्वीत यत्र यथैकस्य खादिरस्य क्रतुप्रकरणपाठात्फलसंयोगाच्च क्रत्वर्थ
त्वं पुरुषार्थत्वं च प्रमाणभेदात् तथाग्निहोत्रेष्टिपशुसोमानां सर्वेषामपि
स्वाध्यायनिविधिसिद्धानां तत्तत्फलसंयोगः प्रत्येकवाक्येन विविदिषासंयो
गश्च यज्ञादिवाक्येन क्रियत इत्युपपन्नं एकस्यैवोभयत्वे संयोगपृथक्त्वमि
ति न्यायात् तदेव सर्वकाम्यकर्मत्यागः संन्यासशब्दार्थः सर्वेषामपि क
र्मणां फलाभिसंधित्यागस्त्यागशब्दार्थ इति न घटपटशब्दयोरिव संन्यास
त्यागशब्दयोर्भिन्नजातीयार्थत्वं किं तु चित्तशुद्ध्यर्थकर्मानुष्ठाने फलाभिसं
धित्यागरूपैकपदार्थ उभयोरिति निर्णीतः पक्षः प्रश्नोत्तरस्य २ ॥

ज्ञलमैवैजयंती टीका ९

एवमर्जुनेन पृष्टो भगवाद्विप्रतिपत्तिप्रदर्शयन्नत्रयोरीदृशं स्वरू
पमिति निरीतिकामः श्रीभगवानुवाच काम्यानामिति केचित्कव
यः पण्डिताः काम्यानां कर्मणां पुत्रकामो यजेत स्वर्गकामो यजेते
त्येवं कामनिमित्तेन विहितानां पुत्रेष्ट्यग्निष्टोमादीनां कर्मणां न्या
सं स्वरूपेण त्यागं विदुर्जानन्ति नत्वनित्यानामग्निहोत्रादीनां परित्या
गमित्यर्थः केचित्तु पुनः पूर्वपक्षमध्ये विचक्षणाः शास्त्रार्थनिपुणा
स्ते सर्वकर्मफलत्यागं सर्वेषां नित्यानां नैमित्तिकानां काम्यानां च कर्म
णां फलत्यागं मोक्षशास्त्रेषु फलस्यैव त्यागस्तमेव त्यागं शास्त्रार्थ
न तु कर्मस्वरूपत्याग इति त्यागं त्यागशास्त्रार्थं प्राहुः काम्यकर्मणां
स्वरूपतो नित्यनैमित्तिकानां तु फलतस्त्यागः संन्यासशास्त्रार्थः सर्वेषां
नित्यनैमित्तिककाम्यानां कर्मणां फलेच्छारहितानुष्ठानं त्यागशा
स्त्रार्थ इति भावः ननु काम्यानां फलमस्ति न त्यागसंभवः स्यादेवना
न्यसे देहः परं तु नित्यनैमित्तिकानां फलमेव नास्ति तस्य त्यागो वक्ष्या
यां तु त्यागः कथं संभवतीति चेन्न यद्यप्यहरहः संध्यामुपासी
त यावज्जीवमग्निहोत्रं जुहोतीत्यादि नित्यनैमित्तिककर्मप्रतिपादके
वाक्ये पुत्रकामो यजेत पशुकामो यजेत स्वर्गकामो यजेतेत्यादाविव
फलविशेषो न श्रुतस्तथापि विश्वजिता यजेतेत्यादाविव विधिश्रु
वणात्किंचिदं तत्कारणं श्रद्धारूपं तानोदत्तरूपं च फलमस्त्येव श्रुय
ताने तत्क्षयश्रुतमनुपपत्तेर्दुरितहारेतापमेत्स्र २ ॥

मधुसूदनी टीका १० ॥

नत्रोति मतसंस्कृतीकदाग्रहमायेन निराकरणाय योगं काम्यानां फल श्रीभगवानुवाच
कामनया चोदितानामन्तःकरणशुद्धावनुपयुक्तानां कर्मणामश्व
मेध पशुसोमादीनां न्यासं त्यागं संन्यासं विदुर्जानन्ति कवयः सूक्ष्मद
र्शिनः केचित् तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन।
दानेन तपसानाशकेनेति वाक्येन वेदानुवचनशास्त्रेण फलं दृष्टिनस्य
ब्रह्मचारिधर्मस्य यज्ञदानशास्त्राभ्यामनुपलब्धितस्य गृहस्थधर्मस्य
नपः तपोनाशकश्रुतेः नापफलाद्धितस्य वानप्रस्थधर्मस्य नित्यस्य नि

येन हि तेन पापक्षयेन द्वारेणात्मज्ञानार्थित्वं बोध्यते । न च विनि-
योगवैयर्थ्यं ज्ञानस्योत्पत्त्या पापक्षयकर्मणा इत्यनेनैव बल-
वत्त्वादिति वाच्यं विनियोगाभावे हि तस्यापि नित्यकर्मवत्स्थाने
ज्ञाने स्याद्धानं स्यात् सति तु विनियोगे ज्ञानमवश्यं भवेदिति नि-
यमार्थत्वात् तस्मान्नित्यकर्मणामेव वेदने विविदिषायां वा विनि-
योगात् तत्त्वतो हि विविदिषायामिति सर्वकर्मवेदनार्थतानित्यानामेव क-
र्मणां भगवदर्पणबुद्ध्या अनुष्ठेयानि काम्यानि तु सर्वाणि सफला-
नि परित्याज्यानीत्येके मन्ते अपरे मन्ते सर्वकर्मफलत्यागं प्राहुस्त्या-
गं विचक्षणाः सर्वेषां काम्यानां नित्यानां च श्रुतिप्रदोक्तफलमात्रस-
त्त्वप्रज्ञार्थितया विविदिषासंयोगेनानुष्ठाने विचक्षणा विचारकुश-
लास्त्यागं प्राहुः स्वर्गादेरेवार्थो भवति स्वर्गादेर्वीर्यकामस्य स्वरूपं करो-
तीत्यत्र यथैकस्य खादिरत्वस्य क्रतुप्रकरणपाठात् फलसंयोगाच्च क्र-
त्वर्थत्वे पुरुषार्थत्वे च प्रमाणभेदान्नित्याग्निहोत्रेष्टिपशुसोमानां सर्वे-
षामपि शतपथप्रतिपादितानां स्वोपात्तविधिसिद्धानां तत्तत्फलसंयोगः
प्रत्येकवाक्येन विविदिषासंयोगश्च यज्ञादिवाक्येन क्रियते न स्वप्रपञ्चे-
पकस्य तत्त्वमयत्वे संयोगपृथक्त्वमिति न्यायात् तदुक्तं सेतौ प्रशारीरके
यज्ञेनेत्यादिवाक्यं शतपथविहितेकर्मस्वेदेगरहीत्यास्वोपमानाय।
सिद्धं पुरुषं विविदिषामात्रसाधनत्वेनाक्त्वीति तस्मात्काम्यान्यपि फला-
भिसंधिमुक्तेनान्तःकरणशुद्धये कर्तव्यानि न तथाग्निहोत्रादिकर्मणां नि-
त्यः काम्यत्वनित्यत्वरूपो विशेषोऽस्ति पुरुषाभिप्रायकृतस्तु विशेषः फ-
लाभिसंधिनामोगे कृतस्य नित्यकर्मणां च प्रातिस्विकफलसद्भावं श्रु-
तिः इष्टमिष्टमिश्रं च त्रिविधं कर्मणः फलमित्यत्र वदति नित्यानामेव
विविदिषासंयोगेन काम्यानां कर्मणां फलेन सह स्वरूपतोऽपि परित्या-
गः पूर्वार्धस्यार्थः काम्यानां नित्यानां च संयोगपृथक्त्वेन विविदिषा।
संयोगात्तदर्थं स्वरूपतोऽनुष्ठाने प्रातिस्विकफलाभिसंधिमात्र।
परित्यागः इत्युत्तरार्धस्यार्थः नतेन तदुक्तीर्तिकृतः वेदानुवच-
नादीनामैकात्म्यज्ञानजन्मने तमेतमिति वाक्येन नित्यानां वस्तुते वि-
धिः यदा विविदिषार्थत्वं सर्वेषामपि कर्मणां तमेतमिति वाक्येन सं-
योगस्य पृथक्त्वात् इति तदेवं सफलकाम्यकर्मत्यागः संन्यासशब्दा-

णः सर्वेषामेव कर्मणां फलाभिसंधित्यागस्त्यागशब्दार्थ इति नच घट
पटशब्दयोरिव संन्यासत्यागशब्दयोर्भिन्नजातीयार्थत्वं किंत्वतः का
ण्यशुद्ध्यर्थकर्मानुष्ठाने फलाभिसंधित्याग एकपदार्थ उभयोरिति
निश्चितं पक्षः प्रश्नोर्जुनस्य अथवा मोक्षादिधीमयस्य प्रतिवचनाय संन्यास
त्यागशब्दार्थस्यैव विधेयतां निरूपयितुं तेनैव विमतिप्रतिपत्तिमाह २ ॥

सदानंदी टीका ११ ॥

स्वीकरोहनीमादौ तत्रोभयस्योत्तरं हरिः उवाच श्रुणु काम्यानां चो
दितानां फलेच्छया १ सुहृदावत्तपश्चानां पशुसोमादिकर्मणां त्यागं
जानंति संन्यासं कवयः सूक्ष्मदर्शिनः २ अनेनेष्टीयमानानां सर्वे
षामेव कर्मणां धीशुद्ध्यर्थं फलत्यागं त्यागं प्राहुर्विदो वराः ३ संयो
गस्य पृथक्त्वेन सर्वेषामपि कर्मणाम् तमेतमिति वाक्येन तु भस्मायो
नियोगतः ४ वेदानुवचनादीनामैकांप्यज्ञानजन्मने तमेतमिति
वाक्येन नित्यानां वक्ष्यते विधिः ५ यद्वा विविदिषार्थत्वं सर्वेषामपि क
र्मणां तमेतमिति वाक्येन संयोगस्य पृथक्त्वतः ६ इत्यर्कवार्त्तिके
तस्मादेवं सिद्धविभागशः काम्यकर्मपरित्यागः संन्यास इति शाब्दि
तः ७ फलाभिसंधेस्त्यागस्त्यागशब्दार्थ कोमतिः धीशुद्ध्यर्थ
मनुष्ठाने कर्मणां फलवर्जने ८ उभयोरेकपदार्थः संन्यासत्याग
शब्दयोः ॥ २ ॥

नीलकंठी टीका १२ ॥

अत्रोत्तरं श्रीभगवानुवाच काम्यानामिति काम्यानां रागतः प्राप्ता
नां पुत्रकामेष्ट्यादीनां नतु फलस्य कामनाविषयत्वात्सर्वस्य कर्मणः
फलवत्त्वनियमात्सर्वं कर्म काम्यमेवेति नित्यादीनामपि समुच्चो
त्यागः स्यादिति सिद्धांतः समीहितमित्याशंक्याह सर्वेति सर्वेषा
नित्यनैमित्तिककाम्यानां कर्मणां फलत्यागमेव त्यागं विचक्षणाः
प्राहुर्न स्वरूपतस्त्यागं प्राहुः अनेन वादिष्टः संन्यासः सिध्यतीत्यर्थः
अयमाशयः यद्यपि संन्यासत्यागशब्दौ निवृत्तिमेव ब्रूतः तथापि सा
वैराग्याद्वा कायक्लेशभयाद्वा मोहाद्वा भवतीति तत्कारणानां सात्वि
कादिभेदेन भिन्नत्वात्तस्याप्युपि सात्विकराजसतामसभेदेन त्रैविध्य

10

त्रिविधश्रद्धाप्रधानत्वेनचतुर्थीरे नचाविरक्तोश्रद्धयानष्टत्यक्तकर्मा
पिदृष्टविक्षेपहीनोदृश्यते यथोक्तंवार्तिकाचार्यैः प्रमादिनोबहिश्चि
त्ताःपिशुनाःकलहोत्सुकाः संन्यासिनोपिदृश्यंतेदैवसंदूषिताशया
इति तस्मादविरक्तकृतसंन्यासापेक्षयानिष्कामकर्माचरणमेवश्रेय
स्त्वाशयेनभगवताकाम्यकर्मत्यागःसंन्यासत्वेननित्यादिकर्मणांफला
नभिसंधानेनचत्यागत्वेनस्तूयतइति तस्मादश्रद्धयाकृतःसंन्यासोप्य
सत्त्वेवेतिसंन्यासाद्दुष्टहाणःस्यान्नमितिस्मृतेस्तत्फलेदातृत्वेनसमर्थइति
प्रकृतत्वंकृतंभगवताश्रद्धयाकृतंसर्वंव्यर्थमिति यत्तुनित्यानामेववि
विदिषायोगात्काम्यानांनरकरूपत्वेनोपित्यागःस्वीकृत्यार्थः सर्वेषांकर्मणां
फलत्यागइत्यत्रवाहोत्थइतिव्याख्यानंपक्षद्वयप्रदर्शनपरंतदग्रिमेणा
श्लोकेनपौनरुक्त्यमावहतीत्युपेक्षितं २ ॥

आनंदटीका ३

अत्रोत्तरंभगवानुवाच काम्यानांकर्मणांसर्वथाननुष्ठानं सर्वेषां
कर्मणामनुष्ठेयानांनित्यनैमित्तिकानांफलस्यत्यागंविचक्ष
णाःज्ञानकर्मसमुच्चयपक्षिज्ञाःप्राहुः ॥२॥

रामकंठटीका ४

कवयःपरावरद्रष्टारःसंन्यासंकाम्यानांकर्मणांत्यागंविदुःकाम्यन्तइ
तिकामाविषयभोगास्तेभ्योहितानितत्साधनभूतत्वात्तदनुकूलानि
यज्ञादिकर्माणिकाम्यान्युच्यन्तेतेषांत्यागंपरिहारंभोगरूपफलत्व
स्याभिसंधिनानुष्ठानस्यवर्जनंसंन्यासंकथयंति तेननित्यादीनिसर्वा
णिकर्माणिकामाभिसंधिनाऽनुष्ठीयमानानिकाम्यानिसंपद्यन्तेते
षांतथानुष्ठानवर्जनेमुमुक्षोःसंन्यासः एवंचव्याख्यानेश्लोकपरंत्र
यविरोधोनापद्येत यतःएवमेर्जुनेनसंशयच्छेदायसंन्यासकर्मयोग
योःकैश्चित्प्रतिपन्नाभिप्रायार्थिना संन्यासात्कर्मयोगोविशिष्यतइति
संन्यासःकर्मयोगश्चनिःश्रेयसकरावुभावित्युपक्रम्य तयोस्तुकर्म
योगस्यनीरागद्वेषतयाकर्मानुष्ठानलक्षणविशेषप्रतिपादनेनोप
क्रमेणसंन्यासस्यज्ञेयःसनित्यसंन्यासीयोनद्वेष्टिनकांक्षतीत्यादिना

लक्षणमुक्तं तेन विशिष्टरूपतया यथाविहितानां सर्वकर्मणामनुष्ठा
नमेव संन्यास इति स्थितं अथ मार्गं व्याचष्टे विचक्षणाः परमार्थविदः
सर्वेषां नित्यादिविभागेन व्यवस्थितानां यज्ञादीनां वर्णाश्रमविहित
कर्मणां फलस्य स्वर्गादिभोगलक्षणस्य त्यागं परिहारमाहुर्न तु य
ज्ञादिस्वरूपस्य कर्मणः परिहारं तथैव च श्रुतिः यस्य सर्वे समारंभा नि
राशीर्बंधनास्त्विह त्यागे यस्य हुतं सर्वं स त्यागी स च बुद्धिमानिति भाग
स्यापि लक्षणमुक्तं एवं च कर्मफलस्यानभिसंधानं त्यागो न कर्मणः
परिहारश्च उक्तं भवति न तत्र संन्यासत्यागयोरेकार्थत्वैव सिद्धान्तः ॥ २ ॥
[illegible]
[illegible] त्याज्यं दोषवदित्येके कर्म प्राहुर्मनी
षिणः यज्ञदानतपःकर्म न त्याज्यमिति चापरे इहैवैके च न मनी
षिणो मतिमन्तः केवलज्ञानवादाभिनिविष्टाः सर्वं नाम कर्म त्या
ज्यं परिहार्यमिति कथयंति यत नतु सर्वं कर्म बहुलातिशयदद्यादिभि
दोषैर्युक्तं मन्ये पुनर्मनीषिणो यथोक्तकर्मयोगवादिनो यज्ञदानत
पःप्रभृतिविहितं कर्मजातं न परिहार्यमित्याहुः यथा च यज्ञा
दैर्विचनस्य कर्मणः परिहार्यानुपपत्तिस्तथा वक्ष्यः प्रतिपादितं
प्राक् उक्तं च संन्यासत्यागयोः परमार्थतः कार्ययोस्तत्त्वरूपार्
देहमिति त्यागविषयमेव वक्तव्यमाह ॥ ३ ॥

म० लासिकी दरूपनीटीका १५

अत्रोत्तरं श्रीभगवानुवाच

काम्यानां पुत्रकामो यजेतेत्यादिना फलकामनया चोदितानां
कर्मणां न्यासं परिहारं कवयः सर्वज्ञाः संन्यासशब्दार्थं जानन्ति
काम्येपि कर्मणि फलाभिसंधिरेव वर्ज्यो न तु अनुष्ठानमित्याह स
र्वेति सर्वेषां नित्यनैमित्तिककाम्यानां कर्मणां यज्ञादीनां क्रिय
मानत्वेपि फलस्य स्वर्गादिलक्षणस्य त्यागं वर्जनं विचक्षणा विवे
किनस्त्यागशब्दार्थमाहुः एतेन संन्यासत्यागयोरेकार्थता सि
द्धा [illegible]

पंचोलीटीका

तन्निर्णयाय भगवानुवाच काम्यानामिति केचित्कवयः पंडिताः।
काम्यानामश्वमेधादीनां कर्मणां संन्यासं कर्तव्यत्वेन प्राप्तानामकर
णं संन्यासशब्दार्थं विदुर्विचक्षणाः केचिन्मेधाविनः सर्वकर्मफल।
त्यागं सर्वकर्मणां नित्यनैमित्तिकानां क्रियमाणानामात्मसंबंधित
याप्राप्तस्य फलस्य त्यागं त्यागशब्दार्थमाहुः २॥

रणवीरसमिद्धाधिनी॥

अत्रोत्तरं भगवानुवाच काम्यानामिति कामेभ्यः स्त्र्यादिविषये
भ्योहितानि यानि कर्माणि स्वधर्मयुद्धादित्यागपूर्वं परवर्णोचि
तानि कृषिवाणिज्यादीनि कामादागतानि वा कर्माणि स्वधर्मप्र
व्यावकप्रतिकूलमानसिकसंकल्पात्मकानि बहुशः पूर्वमभि
हितानि तेषां काम्यानां कर्मणां न्यासं परिहारं स्वधर्मानुष्ठानपर्य
वसितं संन्यासपदाभिधेयं कवयः परावरब्रह्मणो विदुः तथा
सर्वेषां कर्मणां स्ववर्णोचितानां युद्धादीनां यत्फलमैहिकामुष्मिकं दृष्टा
दृष्टरूपं तस्य त्यागोऽनभिसंधानं स्वधर्मानुष्ठानपर्यवसायितं त्यागं
विचक्षणाः परमार्थविदः प्राहुः कथयंति इत्येवं विषयभेदाद्धि
न्नार्थतायामेकानुष्ठेयविषयप्रवृत्तिपर्यवसायित्वेनयोरविरुद्धैवे
ति प्रागपि व्याख्यातं एकार्थतापि समीचीनैव सा वयथा काम्यते
सो कामः प्रवृत्तिप्रयोजकं द्विविधं फलं तदभिसंधिनानुष्ठितानि
सर्वाणि कर्माणि स्वधर्मभूतान्यपि काम्यानि भवंति तेषां न्यासं परि
हारं तदितरेषामनुष्ठानव्यवस्थापनेन फलमात्रपरिहारपर्यवसि
तं संन्यासमाहुः तथैव कर्मफलत्यागं त्यागं कथयंतीति विशिष्ट
रूपतया यथाविहितानां सर्वकर्मणामनुष्ठानमेव संन्यासत्याग
शब्दाभिधेयं न तु नः कर्मणः परिहार इति भावः २॥

मधुभाष्य

भाषा अनुवाद

इस अर्जुन की प्रश्न के उत्तर मे भगवान कहतेहै कि देखो पु
त्रकी कामना करि पुत्रेष्टि यज्ञ करै और स्वर्ग की कामना
करि अश्वमेध यज्ञ करै तथा और और कामना करि जोजो क
र्म विहित है ऐसे जो काम्यकर्म तिन सबके परित्याग करनेको
ही पण्डित लोग संन्यास जानतेहै अर्थात् फल सहित सक
ल कर्म केत्याग कोसंन्यास ज्ञान करतेहै और जितने कर्म
अकर्म कहे उक्त तिन कर्म औ नित्यनैमित्तिककर्मोके फल
मात्र त्याग को विचक्षण कहे निपुण लोग त्याग कहते है पर
विचारसे तोकर्म त्याग करनेको तो त्याग नही कहतेहैं फल
त्याग बल्क त्याग हो सकैहै क्यौ कि बहुतेरे कर्म ऐसेहै कि
जिनका शरीर रहते त्याग नही हो सकताहै तो शास्त्रोक्तकर्म
नित्यनैमित्तिक उपासना आदि जिन से बुद्धि की शुद्धि औ ज्ञा
न की योग्यता होती उनका त्याग लोकविरुद्ध संसारअवस्थामे
अनुचितहै परंतु जिस को तत्वज्ञान नहीभया है उसकोकर्म
फल के त्याग करने ही को त्याग जानो और जिसको तत्वज्ञान
है उसीको समस्त कर्म का सन्यास होसके है और उचितहै य
ह भगवानने कहा २ ॥

दोहा

सकामकर्मकेत्यागकोसंन्यासहुंकविजान सर्वकर्मफल-
त्यागकों कहहित्यागसुजान २ ॥

त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः । य
ज्ञदानतपःकर्म न त्याज्यमिति चापरे ३ ॥

शांकरभाष्यटीका १

यदि काम्यकर्मपरित्यागः फलपरित्यागो वार्थो विवक्षितः सर्वथा
परित्यागमात्रं संन्याससत्यागशब्दयोरेकोऽर्थः स्यात् न घटपटशब्दा
विव जात्यन्तरभूतार्थौ ननु नित्यनैमित्तिकानां कर्मणां फलमेव
नास्तीत्याहुः कथमुच्यते तेषां फलत्यागः यथा वन्ध्यायाः पुत्रत्या
गो नैष दोषः नित्यानामपि कर्मणां भगवता फलवत्त्वस्येष्टत्वात् व
क्ष्यति भगवान् अनिष्टमिति न तु संन्यासिनामिति च संन्यासिनामे
व हि केवलं कर्मफलासंबंधं दर्शयन्नसंन्यासिनां नित्यकर्मफलप्रा
प्तिं भवत्यत्यागिनां प्रेत्येति दर्शयति त्याज्यं दोषवदिति त्याज्यं त्यक्तव्यं दो
षवत् दोषोऽस्यास्तीति दोषवत् किं तत् कर्म बंधहेतुत्वात् सर्वमेव
अथवा दोषो यथा रागादिस्त्यज्यते तथा त्याज्यमित्येके कर्म प्राहु
र्मनीषिणः प्रवृत्ताः सांख्यादिदृष्टिमाश्रिताः अधिकृतानामत्र कर्मि
णामपीति तत्रैव यज्ञदानतपःकर्म न त्याज्यमिति चापरे कर्मिणोऽ
धिकृतास्तानपेक्ष्यैते विकल्पाः न तु ज्ञाननिष्ठान् व्युत्थायिनः सं
न्यासिनोऽपेक्ष्य ज्ञानयोगेन सांख्यानां निष्ठा मया पुरा प्रोक्ता इति क
र्माधिकारादपोद्धृता ये न तान् प्रति चिन्ता ननु कर्मयोगेन
योगिनामिति अधिकृताः पूर्वं विभक्तनिष्ठा अपीह सर्वशास्त्रोपसं
हारप्रकरणे यथा विचार्यन्ते तथा सांख्या अपि ज्ञाननिष्ठा विचार्यन्ता
मिति न तेषां मोहक्लेशदुःखनिमित्तत्यागानुपपत्तेः न कायक्लेशनि
मित्तानि दुःखानि सांख्या आत्मनि पश्यन्ति इच्छादीनां क्षेत्रधर्मत्वेने
व दर्शितत्वात् अतस्ते न कायक्लेशदुःखभावात् कर्म परित्यजन्ति ना
पि ते कर्माण्यात्मनि पश्यन्ति येन नियतं कर्म मोहात् परित्यजेयुः गु
णानां कर्मैव नैव किंचित्करोमीति हि ते संन्यस्यन्ति सर्वकर्माणि मन
सा संन्यस्येत्यादिभिर्हि तत्त्वविदः संन्यासप्रकारउक्तस्तस्मादन्येऽधिकृ
ताः कर्मण्यनात्मविदो ये तेषां च मोहात् त्यागः संभवति कायक्लेश
भयाच्च त एव तामसास्त्यागिनो राजसाश्चेति निन्द्यन्ते कर्मिणामनात्म

श्री·
गी·टी·
ग्र·

13

ज्ञानी कर्मफलत्यागसमर्थः सर्वारम्भपरित्यागी मौनी सन्तुष्टो येन
केनचिदनिकेतः स्थिरमतिरिति परमार्थसंन्यासिनो विशेषितत्वात्
वक्ष्यति च ज्ञानस्य या परा निष्ठेति तस्मात् ज्ञाननिष्ठाः संन्यासिनो
नेह विवक्षिताः कर्मफलत्याग एव सात्विकत्वेन गुणेन तामसत्वाद्यपे
क्षया संन्यास उच्यते न मुख्यः सर्वकर्मसंन्यासः सर्वकर्मसंन्यासासम्भ
वे च न हि देहभृतेति हेतुवचनान्मुख्य एवेति चेन्न हेतुवचनस्य स्तुत्य
र्थत्वात् यथा त्यागाच्छान्तिरनन्तरमिति कर्मफलत्यागस्तुतिरेव यथो
क्तानेकपक्षानुष्ठानाशक्तिमन्तं अर्जुनं प्रति विधानात् तथेदमपि न हि
देहभृता शक्यमिति कर्मफलत्यागस्तुत्यर्थं न सर्वाणि कर्माणि मनसा
संन्यस्यैव कुर्वन्न कारयन्नास्ते इत्यस्य पक्षस्यापवादः केनचिद्दर्शयि
तुं शक्यस्तस्मात् कर्मण्यधिकृतानां प्रवैष संन्यासत्यागविकल्पः
ये तु परमार्थदर्शिनः सांख्यास्तेषां ज्ञाननिष्ठायामेव सर्वकर्मसंन्यास
लक्षणायामधिकारो नान्यत्रेति न ते विकल्पार्हास्तच्चोपपादितमस्माभि
र्वेदाविनाशिनमित्यस्मिन् प्रदेशे तृतीयादौ च २ ॥

आनंदगिरिकृतटीका २

ननु किमिदानीं संन्यासत्यागशब्दयोरात्यन्तिके भिन्नार्थत्वे तथा च प्र
सिद्धिविरोधः स्यादित्याशंक्यावान्तरभेदेऽपि नात्यन्तिकभेदोऽस्तीत्याह य
दीति शुद्ध्याभावादसंन्यासात्त्यागाद्योगवद्भिर्नित्यनैमित्तिककर्मणामफ
लानां फलत्यागानुपपत्तेस्तत्त्यागशब्दार्थोऽत्र सिध्यतीति शङ्कते न
न्विति नित्यनैमित्तिककर्मफलस्य वन्ध्यापुत्रसादृश्याभावात्त्यागसम्भ
वात्तत्त्यागशब्दार्थः सम्भवतीति समाधत्ते नैष दोष इति भगवता तेषां
फलवत्त्वमिष्टमित्यत्र वाक्यशेषमनुकूलयति वक्ष्यतीति न हि संन्यासि
नामसंन्यासिनां च नित्याद्यनुष्ठायिनामविशेषेण तत्फलं स्यादिति चे
त्तत्रैवमाह नत्विति वक्ष्यतीत्यनन्तरश्लोकस्य चकारार्थः प्रसक्तवचसोऽर्थं प्रकृ
तोपयोगित्वेन संगृह्य सारयति संन्यासिनामिति काम्यानि वर्जयित्वा नि
त्यनैमित्तिकानि फलाभिलाषादृते कर्तव्यानीत्यस्मिन् पक्षे प्रतिपन्ननिरासे
न दूषयित्वा विप्रतिपत्तिमाह त्याज्यमिति कर्मणः सर्वस्य दोषवत्त्वे हेतु
माह बन्धेति दोषवदित्येतद्दृष्टान्तत्वेन व्याचष्टे यथैवेति कर्माण्यनधि
कृतानामकर्मिणामेव कर्म त्याज्यं कर्मिणां तु त्यागे प्रत्यवायादित्या

शंकामाह अधिकृतानामिति नहि तेषामपि कर्म्मत्यजतो प्रत्यवायो हि
स्वाधिकृतस्य कर्म्मणोऽननुष्ठाने प्रत्यवायादिति भावः सांख्यादिपक्षसमा
प्ताविति शब्दः मीमांसकपक्षमाह नैवेति कर्म्माधिकृतेष्वेवेति यावत्
कर्म्म नित्यं नैमित्तिकञ्च काम्यानां कर्म्मणामित्यारभ्य श्लोकाभ्यां कर्म्मि
णोऽधिकृतानऽनधिकृतांश्चापेक्ष्य दर्शितविकल्पानां प्रवृत्तिरित्याशंकामाह
कर्म्मिणाश्चेति एवकारव्यवच्छेद्यमाह नत्विति नैव स्फुटयति ज्ञानेति
कर्म्माधिकृतानां ज्ञाननिष्ठानां विभक्तनिष्ठात्वेन सर्व्वोक्तानामपि स्वा
स्वार्थोपसंहारेण न विचार्यत्वं ज्ञाननिष्ठानामपि विचार्यत्वमत्राविरु
द्धमिति शङ्कते नन्विति सांख्यानां परमार्थज्ञाननिष्ठानां नात्र विचार्य
तेत्युत्तरमाह न तेषामिति ननु तेषामपि स्वात्मनि क्लेशदुःखादिप
श्यतां स्वदेहरोधेन राजसकर्म्मत्यागसिद्धेर्विचार्यत्वं तत्राह न कायेति
तत्र तेषामध्यायोक्त हेतुकरोति इत्यादीनामिति स्वात्मनि सांख्यादी
नां क्लेशाद्यप्रतिपत्तौ फलितमाह अत इति ननु तेषां क्लेशादर्शने
पि स्वात्मनि कर्म्माणि पश्यतां त्यागो युक्तस्तेषां कायक्लेशादिक
त्वात्त्रेत्याह नापीति अज्ञानात्मोहमाहत्यात् नियतमपि कर्म्मत्यक्तु
शक्येन तत्त्वविदां स्वात्मनि कर्म्मादर्शने तत्यागे हेत्वभावादिति मत्वाह
मोहादिति कथं तर्हि तेषामात्मनि कर्म्माण्यपश्यतां शास्त्राभावे तत्या
गः सन्न्यासलक्षणानामिति अविवेकशालीनां कर्म्मिणां त्यागस्त
त्त्वविदामित्युक्ते स्वारस्यप्रशमनप्रतिषेधं प्रत्यादिशति सर्व्वेति तत्त्वविदा
मत्राविचार्यत्वे फलितमाह तस्मादिति येनात्मविदस्तस्मादेवात्र स
त्यः कर्म्मण्यधिकृतानामनात्मविदां कर्म्मत्यागसम्भावना दर्शयति
येषाञ्चेति तत्त्विन्दाकथा प्रयुक्तेत्याशंक्याह कर्म्मिणामिति किंच पर
मार्थसन्न्यासिनां प्रशस्ततोपलम्भाच्च निन्दाविषयत्वमित्याह सर्व्वेति
किंचात्रापि सिद्धिंप्राप्तो यथेत्यादिना ज्ञाननिष्ठाया वक्ष्यमाणत्वान्नतस्तत्रा
दे१ नवनाते विचार्यतेमाह विचार्यत्वमाह वक्ष्यतीति कर्म्माधिकृतानामे
वात्र विवक्षितत्वात् नज्ञाननिष्ठानामित्युपसंहरति तस्मादिति ननु स
न्न्यासशब्देन सर्व्वकर्म्मसन्न्यासस्य गृहीतत्वात्तथाविधसन्न्यासिनामिह विव
क्षितत्वं प्रतिभाति तत्राह कर्म्मेति सन्न्यासशब्देन सात्विकस्यैव सन्न्यासस्य

ग्रहणाज्ञानमन्ययोगितो सम्भवमपादयता तदसम्भवे हेतुं किं वेय
र्थ्यात् प्राप्तप्रतिषेधादिति शंकते सर्वेति भेदे हेतुवचने सर्वकर्मसन्यास
संभवसाधके कर्मफलत्यागस्तत्परत्वादिति परिहरति नेत्यादिना प
तदेव दृष्टान्तेन स्पष्टयति यथेति दृष्टान्तेपि यथा क्रतार्थत्वं किं न स्या
दित्याशंक्याह यथोक्तेति न हि फलत्यागादेव ज्ञानं विना मुक्तिशंका मु
क्तेर्ज्ञानैकाधीनत्वसाधकश्रुतिस्मृतिविरोधादहेत्यादिना वाक्यमेव
ज्ञानसाधनविधानानर्थक्यादृत्यागस्तु नित्येवात्र ग्राह्योर्थः दृष्टान्तगत
मर्थं दार्ष्टान्तिके योजयति तथेति प्राशक्तपक्षापवादविवक्षया हेतुत्वे
नैवाख्यातत्वमेव किं न स्यादित्याशंक्य तदपवादे हेतुभावात्मेवमित्याह
न सर्वेति न वेयमेव हेतुः किन्तु तदपवादिकात्मथा सिद्धेरुक्तत्वादिति भा
वः सत्यसंन्यासापवादासम्भवे संन्यासत्यागविकल्पस्य कथं साव
काशतेत्याशंक्याह तस्मादिति ज्ञाननिष्ठानुपपन्नकविकल्पानुपपत्तौ
कथं तेषामधिकारस्तत्राह येषामिति संन्यासिना विकल्पानर्हत्वेन ज्ञान
निष्ठायामेवाधिकारस्य भूयःसु प्रदेशेषु साधितत्वात् साधनीयत्वापे
तेत्याह तथेति २ ॥ स्वामिकृतटीका २

अधिकृतः फलत्यागमात्रमेव त्यागशब्दार्थो न कर्मत्याग इत्येतदेव म
तान्तरनिरासेन द्रढीकर्तुं मतभेदं दर्शयति त्याज्यमिति दोषवद्धिंसा
दिदोषवत्त्वेन बन्धकमिति हेतोः सर्वमपि कर्म त्याज्यमित्येके सांख्या
प्राहुर्मनीषिणः अस्यायं भावः न हिंस्यात् सर्वाभूतानीति हि निषे
धः पुरुषस्यानर्थहेतुर्हिंसेत्याह अग्नीषोमीयं पशुमालभेतेत्यादि
वाक्यं विधिस्तु हिंसायाः क्रतूपकारकत्वमाह अतो भिन्नवि
षयत्वेन सामान्यविशेषन्यायागोचरत्वात् इत्यसाध्यत्वं सर्वेष्वपि क
र्मसु हिंसादेः संभवात् सर्वमपि कर्म त्याज्यमिति तदुक्तं दृष्टवदानु
श्रविकः स ह्यविशुद्धिक्षयातिशययुक्तः तद्विपरीतः श्रेयान्व्यक्ता
व्यक्तज्ञविज्ञानात् इति अपरे तु मीमांसकाः यज्ञादिकं कर्म न त्या
ज्यमिति प्राहुः अयं भावः क्रत्वर्थापि सती हिंसा पुरुषेणैव कर्तव्या
सा वाक्यमादेशेनाधिकृता पुरुषस्यापवादहेतुरेव अतो न विधि
निषेधयोः समानफलत्वाभावेन सामान्यविशेषन्यायसंपादयितव्य

यथाहि विधिर्विधेये प्रवर्तकः देशेनानुष्ठाने विधत्ते नार्थ्यालंबनत्वेना
क्षेपतस्य न तथैवं निषेधोपि निषेध्यस्य कर्तुर्नार्थ्यमपेक्षते प्रागिमा
ज्ञापेक्षितत्वात्‌ अन्यथाज्ञानप्रमादादिकृते दोषाभावप्रसंगात्‌ तदे
वं समानविषयत्वेन सामान्यशास्त्रस्य विशेषेण बाधान्नास्ति दोषवत्वे
ऽप्यग्नीषोमीययज्ञादेर्न त्याज्यमिति [illegible]
[illegible] ३ ॥ पैशाचभाष्यटीका ४ ॥
त्याज्यं मलवद्दोषवत्कर्म न स्यादेवं हेतुना त्याज्यमित्येके मनीषिणः
प्राहुः अथवा दोषशब्देन रागद्वेषादय उच्यंते दोषवत्‌ रागद्वेषवता संध्यान
ल्पकर्म त्याज्यं भेदवैधकत्वादित्येके मनीषिणः प्राहुः नित्यं यज्ञदानतपः
कर्म न त्याज्यमिति स्वकर्मणा तमभ्यर्च्य सिद्धिं विंदति मानव इति वचना
त्‌ मोक्षार्थिनामपि न त्याज्यमित्यर्थः ३ ॥

रामानुजभाष्यटीका ५ ॥

त्यागशास्त्रैरेव निर्णयवचनात्‌ नियतस्य तु संन्यासः कर्मणो नोपपद्य
ते मोहात्तस्य परित्यागस्तामसः परिकीर्तितः भवत्यत्यागिनां प्रेत्य न
तु संन्यासिनां क्वचित्‌ इति च परस्परपर्यायतादर्शनात्‌ अत एवैकत्वेपी।
यत इति निश्चीयते त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः एके मनीषि
णः कापिलैकदेशप्रवृत्तास्ताविणो रागादिदोषानुबंधकत्वात्‌ स
र्वं यज्ञादिकं कर्म मुमुक्षुणा त्याज्यमित्याहुः एते तु अपरे पंडिता यज्ञा
दिकं कर्म न त्याज्यमिति प्राहुः ३ ॥

अभिनवगुप्तकृतटीका ६ ॥

तद्देवविशेषनिर्णयाय मतान्तराण्युपन्यस्यति त्याज्यं दोषवदित्येके कर्म
प्राहुर्मनीषिणः यज्ञदानतपःकर्म न त्याज्यमिति चापरे ३ ॥

परमार्थप्रपाटी ७ ॥

अथास्मिन्नर्थे मतान्तराण्युपन्यस्यति त्याज्यमिति यज्ञे हिंसादिदोष
वत्कर्मत्वं बंधकं भवतीति त्याज्यमित्येके मनीषिणः सांख्या वदंति
तथा अपरे मीमांसकाः अग्नीषोमीयपशुमालभेत [illegible] नेत्यादिश्रु
तिबलात्‌ यज्ञदानतपः कर्म न त्याज्यमिति वदंति ३ ॥

श्री॰
गी॰ टी॰
ग्र॰

वनमालीटीका ८

इदानीं द्वितीयप्रश्नप्रतिवचनाय संन्यासत्यागशब्दार्थस्य द्वैविध्यं नि
रूपयितुं तत्र विप्रतिपत्तिमाह त्याज्यमिति एके मनीषिणः कपिला
नुयायिनः कर्म दोषवद्धिंसादिदोषकं दुःखबंधकं च सर्वं कर्माधिकारि
भिरपि त्याज्यमिति प्राहुः यद्वा दोषवत् दोषश्च बध्यते दोषो रागादि
स्तज्जन्यत्वेन हेतुना कर्म त्याज्यमन्ये तु विविदिषैः कर्माधिकारिभिरपीत
रैः अपरे जैमिन्याद्यनुयायिनः कर्माधिकारिभिश्चित्तशुद्धिद्वारा वि
विदिषोत्पत्त्यर्थं यज्ञदानतपः कर्म न त्याज्यमिति प्राहुः ३ ॥

ऊसमवैजयंतीटीका ८ ॥

त्यागविषयेऽवांतरमतभेदोक्तिमाह त्याज्यमिति यत्तु हिंसादिने।
कदोषयुक्तमतो मुमुक्षुणा त्वरुषेण त्याज्यं हिंसान्वयं तो हेयमित्ये
वि॰ वंप्रकारेणैकेन हिंस्यात्सर्वाणि भूतानीत्यादिशास्त्रमर्थमेवांगीकु
र्वाणाः अग्निषोमीयं पशुमालभेतेत्यादिकं तत्र पशोरालंभनेऽवद
ति न तु हिंसात्मकेमारणमिति प्रवदमानाः कपिलमतानुसारि
णः प्राहुः तत्तेन मनीषिणः यास्तु यज्ञदानतपः कर्म तन्न त्यागेन
त्याज्यमित्येवं मतं अग्नीषोमीयं पशुमालभेतेत्यादिशास्त्रविहितं हिंसायाः
कर्तव्यत्वेन तस्याच्छास्त्रीयत्वेन निवारयन्ति न साक्षाद्धिंसाध्यत्वे दू॰
न हिंसा यासां भवेत् सेव न हिंस्यादिति सामान्यतो निषेधस्तु क्रतो
रन्यत्र तस्याः पापनाशाहेतित्व किं विरुद्धमिति प्रवदमाना जैमि
नमतसारिणः प्राहुः यद्यपि कर्मणो हिंसानुग्राहकत्वं नास्ति तथापि
ना॰ वेदेन यमेवाभिधीयान्न दोषवत्त्वमतः कार्यमेवेत्यभिप्रायः ३ ॥

मधुसूदनीटीका १० ॥

अधुना द्वितीयप्रश्नप्रतिवचनाय संन्यासत्यागशब्दार्थस्यैवैविध्यं
निरूपयितुं तत्र विप्रतिपत्तिमाह सर्वकर्म बंधहेतुत्वाद्दोषवद्
दुष्टं अतः कर्माधिकृतेनापि कर्म त्याज्यमेवेत्येके मनीषिणः प्राहुः
दोषवत् दोषश्च यथा दोषो रागादिस्तज्जन्येनेन हेतुना कर्म त्याज्यं अन्ये
त्वनुवैधेनास्रविविदिषैः कर्माधिकारिभिरपीत्येकः पक्षः अ
थ द्वितीयः पक्षः कर्माधिकारिभिरेव तः करणशुद्धिद्वारा विविदिषा वि॰

त्यर्थं यज्ञदानतपःकर्म न त्याज्यमिति चापरे मनीषिणः प्राहुः ३ ॥

सदानंदी टीका ॥ ११ ॥

अथ द्वितीयप्रश्नस्य परिहाराय केशवः संन्यासत्यागयोः फलं चैव द्वे
द्वैविध्यमेव हि १ विप्रतिपत्तिमाह दोषवत्त्याज्यमित्यादिना स्फुटं वंचयेत्
तत्तया सर्वं कर्म दुष्टमतो त्याज्यं २ त्याज्यमेके बुधाः प्राहुः कर्मणाधि
कारिणोऽपि ३ एतेकं मतमयोक्तं द्वितीयं प्राह केशवः ३ कर्माधिकारि
भिः शुभिर्धीशुद्ध्यावाप्तफलप्रदं यज्ञदानतपःकर्म न त्याज्यमिति चाप
रे ४ ॥ ३ ॥

नीलकंठी टीका १२ ॥

इदमेव पक्षद्वयमाह त्याज्यमिति एके सांख्याः मनीषिणो मनो
निग्रहसमर्थाः परमात्मनि उपरतत्वाद्विविदिषाणां मुमुक्षूणां दोष
वत् रागादिदोषयुक्तत्वात्त्याज्यं त्यक्तव्यं कर्म त्याज्यमिति प्राहुः अपरे
तु विविदिषार्थिना यज्ञादिकं न त्याज्यमिति वा प्राहुर्विशेषेण वर्तते
तथा च द्विविधाः श्रुतय उपलभ्यंते न कर्मणा न प्रजया धनेन त्या
गेनैके अमृतत्वमानशुः कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं
समा इत्याद्याः अविहितविषयमेवैतन्मतद्वयं विदुषां तु कर्मस्वप्रह
तिकाराणां स्वाज्ञानस्य नष्टत्वात् ततः सिद्धमेव त्यागः इति ततानानिक
मेविधिर्वा त्यागविधिर्वा प्रवर्तते यथोक्तं न कर्मणामनारंभान्नैष्कर्म्यं योगी
कर्मभिस्त्यज्यते त्यसावित्ति ३ ॥

आनंदी टीका १३

संन्यासत्यागशब्दयोरेकार्थतया विस्तारयति एके केवलज्ञाना
नुष्ठानवादिनः दोषवद्बन्धकमित्यतो हेतोः सर्वमेव कर्म त्याज्य
मित्याहुः अपरे केवलकर्मिणः यज्ञादिकं हि नियतं कर्म न त्याज्य
मित्यर्थः ३ ॥

रामकंठी टीका १४ ॥

तत्र तयोर्विधेः संन्यासादभिन्नार्थे त्यागे प्राक्तनलक्षणविप्रतिपत्तिं दर्शयति
र्थयमन्तनमवधारयव्याख्यानलक्षणस्य करदानीं निश्चयो बुधि
पते यदर्थमेवमन्यानेत्युत्वाह हि शाहेहेनो यस्मात्तामायैनो

श्री·
गी·टी·
अ·

त्याग

कलत्यागो विशेषतो वक्ष्यमाणहेयोपादेयरूपेण विभागेन विप्र
कारः शुक्लान्तमस्कृतकटीकृतः इत्थं त्यागविषये निश्चये वक्तव्ये
सति कर्मणां त्यागस्य परमाभिमतापवर्गलक्षणफलहेतुत्वादवश्य
मवक्तव्यत्वनिमायत्वेन प्रदर्शितात्तमोपपत्तिगर्भीकारेण सर्व
कर्मणां त्यागत्वमेवतावदाह + इहैके केचन मनीषिणो मति
मन्तः केवलज्ञानवादाभिनिविष्टाः सर्वं नाम कर्म त्याज्यं परिहा
र्यमिति कथयन्ति यतस्तत्सर्वं कर्माल्पद्यतिशयत्वयादिभिर्दो
षैर्युक्तं मन्ये पुनर्मनीषिणो यथोक्तकर्मयोगवादिनो यज्ञतपो
रूपं शास्त्रविहितं कर्म न त्याज्यं न परिहार्यमित्याहुः यथा च य
ज्ञादेर्नियतस्य कर्मणः परिहार्यानुपपत्तिस्तथा बहुशः प्रति
पादितं प्राक् उक्तं च ३॥

तस्य तयोर्भिन्नार्थतावादिनां तत्र पन्यस्य तमेव संन्यासे ...र्थं त्यागे सम्यक्प्रतिपादयितुमाह॥

लासिकी टीका

तदेवैव विशेषनिर्णयायमतान्युपन्यस्यति

एके मनीषिणः सांख्याः शुद्धदोषवदविशुद्धित्वयातिशयादिदो
षयुक्तत्वात्कर्म सर्वं त्याज्यं परिहार्यमित्याहुः यद्वा दोषवत्
दोष इव मनीषिण इत्यस्यायमभिप्रायः न हिंस्यात्सर्वभूतानी
ति हि निषेधः पुरुषस्यानर्थहेतुर्हिंसेत्याह अग्निष्टोमीयं पशुमा
लभेतेत्यादिप्राकरणिके विधिस्तु हिंसायाः क्रत्वुपकारत्वमाह
अतो भिन्नविषयत्वेन सामान्यविशेषन्यायागोचरत्वाद्दृश्यमाध्ये
श्व सर्वेष्वपि कर्मस्व हिंसादेः संभवात् सर्वमपि कर्म त्याज्यमेवे
ति तदुक्तं दृष्टवदानुश्रविकः स ह्यविशुद्धिक्षयातिशययुक्त इति
अपरे तु मीमांसका यज्ञादिकं कर्म न त्याज्यमित्येवमाहुः यथा च
यज्ञादेर्नियतस्य कर्मणः परिहारानुपपत्तिः तथा बहुशः प्रति
पादितं प्राक्

पंडोलीटीका

अविदुषः फलत्यागमात्रमेव त्यागशब्देन कर्मत्यागः इत्येतदेव मतान्त

इति रासेन स्पष्टीकर्तुं मतांतरेण दर्शयति एवं द्वैन सांख्यमतमनुरा
ह्यैनमीमांसकमतमाह त्याज्यमिति एके मनीषिणः सांख्याः सकल
मपि कर्म दोषवत् दोषयुक्तमिति कारणात्त्याज्यमाहुः अथवा दोषवदि
ति दृष्टांतः यथा दोषस्त्याज्यः तथा सकलं कर्म त्याज्यं सांख्या एवमाहुः अ
परे मीमांसका यज्ञदानतपःकर्म न त्याज्यमित्याहुः ३ ॥

रणवीरसमिद्बोधिनी

एतदेव द्रढयितुं भिन्नार्थतावादिनां मतमुपन्यस्य तमेव संन्यासा
भिन्नार्थत्यागं सम्यक्प्रतिपादयितुमाह त्याज्यमिति इहैके केच
न मनीषिणो बुद्ध्यभिमाननिरूढाः प्राक्प्रतिपादितासुरस्वभावा
स्तामसा जनाः कर्म यत्किंचित्त्याज्यं परिहार्यमित्येवमाहुः यतस्त
त् दोषवत् बांधवादिवियोगस्वशारीरक्लेशादिजननेन सदोषमिति
अपरे तु दैवस्वभावाः कर्मयोगिनो यज्ञदानतपोरूपं त्रिविधं कर्म
न त्याज्यं किंतु अनुष्ठातव्यमेवेत्याहुः ३ ॥

मधुभाष्य

३ ॥

17

भाषा अर्थ

मतान्तर को निषय करते हुये उक्त विषय को दृढ़ करने की इच्छा से मतभेद देखाते है कि हिंसादि कर्म दोषयुक्त औ अनर्थहेतु से बन्धस्वरूप है इस लिये सब कर्म का त्याग करना उचित यह सांख्य मतवाले विवेकी मा हिंस्यात्सर्वभूतानि इससे कहते है और अग्नीषोमीयं पशुमालभेत इस श्रुति से अग्निष्टोमयज्ञ से पशुहिंसा को यज्ञक्रिया का अंगविधान किया है और सकल कर्मो के करने मे जीवहिंसा ज्ञान अज्ञान पूर्वक होती ही है इस मे कर्ममात्र का त्याग कहा है और कर्मकाण्डी मीमांसामतवाले अग्नीषोमीयं पशुमालभेत इस विधि से कहते है कि यज्ञकर्म मे हिंसा हिंसा नही है करनी ही चाहिये और यज्ञ छोड कर हिंसा करने से पुरुष को पाप होता है इस अभिप्राय पर भगवान कहते है कि कोई बुद्धिमान तो कहते कि दोषवत कहे दोषयुक्त कर्म त्याग करना चाहिये और कोई यज्ञ दान तप कर्म का त्याग नही कहते हैं क्यों कि विधिकृत हिंसा से दोष नही होता है पर अहिंसा परम धर्म है ३ ॥

दोहा

कर्म त्याज्य है दोषयुत कहें सुनि इक पद यज्ञ दान तप त्याज्य
नहि ऐसे और कहेह ३

18

निश्चयं शृणु मे तत्र त्यागे भरतसत्तम
त्यागो हि पुरुषव्याघ्र त्रिविधः संप्रकीर्तितः ४

शांकरभाष्यटीका १

तत्रैतेषु विकल्पभेदेषु निश्चयमिति निश्चयं शृणु अवधारय मे मम वचनात् तत्र त्यागे त्यागसंन्यासविकल्पे यथादर्शिते भरतसत्तम भरतानां साधुतम त्यागो हि त्यागसंन्यासशब्दवाच्यो हि योऽर्थः स एक एवेत्यभिप्रेत्याह त्यागो हीति पुरुषव्याघ्र त्रिविधस्त्रिप्रकारस्तामसादिप्रकारैः संकीर्तितः शास्त्रेषु सम्यक् कथितः यस्मात्तामसादिभेदेन त्यागसंन्यासशब्दवाच्योऽर्थोऽधिकृतस्य कर्मिणोऽनात्मज्ञस्य त्रिविधः संभवति न परमार्थदर्शिन इत्ययमर्थो दुर्ज्ञानस्तस्मात् अत्र तत्त्वं नान्यो वक्तुं समर्थस्तस्मान्निश्चयं परमार्थशास्त्रार्थविषयमध्यवसायमैश्वरं मम शृणु ४

आनंदगिरी टीका २ ॥

कर्माधिकृतानां यथोक्तविकल्पसंभवेऽपि कुतो निर्धारणासिद्धिस्तत्राह तत्रेति तमेव निश्चयं दर्शयितुमादौ त्यागगतमवान्तरविभागमाह त्यागो हीति ननु त्यागसंन्यासयोरुभयोरपि प्रकृतत्वाविशेषे त्यागस्यैवावान्तरविभागाभिधाने संन्यासस्योपेक्षकत्वमापद्येतेत्याह त्यागो हीति सात्त्विको राजसस्तामसश्चेत्यर्थः त्रैविध्येऽपि त्यागस्यैव निश्चयसंभवे किमत्र भागवतेन निश्चयेनेत्याशंक्याह यस्मादिति भगवतान्येनोक्तविभागे तत्त्वानिश्चयाद्भागवतनिश्चयस्य श्रोतव्यतेति नियामयति तस्मादिति ४ ॥

+ एवमतभेदं तु परमतं कथयितुमाह ॥

स्वामिकृत टीका ३

+ निश्चयमिति तत्रैवं विप्रतिपत्तौ त्यागे निश्चयं मे वचनाच्छृणु त्यागस्य लोकप्रसिद्धत्वात् किमत्र श्रोतव्यमिति मावमंस्था इत्याह हे पुरुषव्याघ्र पुरुषश्रेष्ठ त्यागोऽयं दुर्बोधः हि यस्माद्वैदिककर्मत्यागस्त्रिविधस्तामसादिभेदेन त्रिविधः सम्यक् विवेकेन प्रकीर्तितः ४ ॥

तन्मुत्रैविध्यत्यागमतभेदाश्चतन्मत्यागे
मतंनिश्चयंमशृणु ॥४॥

पैशाचभाष्यटीका ४ ॥

रामानुजटीका ५

श्री॰
गी॰टी॰
अ॰

19

निश्चयमिति तत्रैवंवादिविप्रतिपत्तेस्त्यागेत्यागविषये निश्चयं मत्तः
शृणु । त्यागोहिपुरुषव्याघ्रत्रिविधः संप्रकीर्तितः त्यागःक्रिय
मानेषु कर्मस्ववैदिकेषु फलविषयतया कर्तृत्वविषयतयाचम
मताविषयतयाच पूर्वमेवमयात्रिविधः संप्रकीर्तितः मयिसर्वा।
णिकर्माणिनिकं जन्मे स्वर्गादिकंफलंमम तस्मादिति फलत्यागः फ
लविषयत्यागोमदीयफलसाधनतया मदीयमिदंकर्मेतिकर्मणिमम
तया परित्यागः ममताविषयत्यागः सर्वेश्वरेकर्तृत्वानुसंधानेना
त्मनः कर्तृतात्यागः कर्तृत्वविषयत्यागः ४ ॥

श्रीभिनवगुप्त टीका ६ ॥

स्पष्टोर्थः ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका ७

एवंमतभेदमुपन्यस्यस्वमतंकथयितुमाह निश्चयमिति तत्रैवं
विप्रतिपन्नेत्यागेमेवचनान्निश्चयंशृणु हि यस्मात्कारणात्त्यागोभोपुरुष
व्याघ्रपुरुषार्थसाधनशीलहे इतिनिश्चयेनत्यागस्त्रिविधः संप्रकीर्ति
तः तामसादिभेदेनसम्यक्प्रकारेणाग्रेनिरूपितोस्ति ४ ॥

वनमाली टीका ८ ॥

तत्रतत्रयात्रहेष्टकर्माधिकारिकर्तृकेसंन्यासत्यागशब्दाभ्यांप्रतिपादि
तेत्यागेफलाभिसंधिपूर्वककर्मत्यागेममवचनान्निश्चयंपूर्वाचार्यैः
कृतंशृणु किंतदुच्चैर्यमनुवाद हेपुरुषव्याघ्रपुरुषश्रेष्ठ हियत
स्त्यागः कर्माधिकारिकर्तृकः फलाभिसंधिपूर्वककर्मत्यागः त्रिवि
धस्त्रिप्रकारस्तामसादिभेदेनसंप्रकीर्तितः यद्वाविशिष्टाभावरू
पस्त्यागोविशेषणाभावाद्विशेष्याभावादुभयाभावाच्चत्रिविधः सं।
प्रकीर्तितः तथाहिफलाभिसंधिपूर्वककर्मत्यागः सत्यपिकर्मणिफ
लाभिसंधित्यागादेकः सत्यपिफलाभिसंधौकर्मत्यागाद्द्वितीयः फला
भिसंधेः कर्मणश्चत्यागात्तृतीयः तत्रप्रथमः सात्त्विकउपादेयः द्वितीय
स्तुहेयोहिविधः दुःखबुद्ध्याकृतोराजसोविपर्यासेनकृतस्तामसः ए
तावान्कर्माधिकारिकृतत्यागोज्ञेनत्प्रमविषयः तृतीयस्तुकर्मीन।

धिकारिकर्तृकोऽचैतन्यएकरूपो नार्जुनस्य विषयः सोऽपि साधनफ
लभेदेन द्विविधः तत्र सात्विकेन फलाभिसंधित्यागपूर्वककर्मानु
ष्ठानरूपेण त्यागेन शुद्धचित्तस्यास्य विविदिषास्यात्मज्ञानसाधनवेदा
न्तविचाराय फलेच्छारहितस्य विनष्टस्य संन्यासेन तत्साधनस्य कर्मणो
वैधानामनाबाध्यत्वान्नैव हननं सेव परित्यागः स एकः साधनमसौ
विविदिषासंन्यासः ते कर्मसिद्धिं परमामेति निवदति द्वितीय
स्तज्ञोऽनरसाधनाभ्यासपरिपाकादस्मिन्जन्मन्यादेवेवोत्पन्ना
त्मबोधस्यस्य न एव फलेच्छायाः कर्मणोऽपि त्यागः स विद्वत्संन्यासः
स तव यत्स्यात्मरतिरेवेत्यकः ४ ॥

ज्ञानमैवजयंती टीका ४ ॥

एवं नानाविधमतभेदमुपवर्ण्य स्वाभिमतमाह निश्चयमिति हे
भरतसत्तम भरतवंशोत्तम तत्रानेकवादिमतभेदापन्ने त्यागवि
षये मे मम वचनस्य सर्वेश्वरस्य मम निश्चयं त्यागविषयकं निर्णयं शृ
णु ननु लोके त्यागस्य प्रसिद्धत्वात्तत्र विशेषश्रोतव्यं किमस्ति यत्त्वं
शृण्विति प्रतिज्ञां करोषीति चेत्तत्राह त्यागो हीति हे पुरुषव्या
घ्र पुरुषश्रेष्ठ हि यस्मात्त्यागः शास्त्रविद्भिस्तामसादिभेदेन त्रिवि
धः संप्रकीर्तितो विविच्योक्तस्तस्मादसौ त्यागः श्रोतव्यः तद्वी
यमर्थः नियतस्य तु संन्यासः तामसादिभिस्त्रिभिः सोऽत्र विधेयमपि
वाच्यम् यद्वा हीति निश्चयेनमपि सर्वाणीत्यादिना पूर्वमेव त्याग
द्विविधोऽपि एव संप्रकीर्तितः तत्रैहिकामुष्मिककर्मजन्यफलं म
म तत्स्यादिति फलविषयकस्त्यागः एकः भगवत्कारितेन मया
तत्कारितमिदं कार्यं कृतमतो ममेदं न स्यादिति ममतात्यागवि
षयो द्वितीयः भगवदन्यदिह वल्पोरूपादिनेवाहमिदं कर्माकर
वं करोमि करिष्ये इतः स एव स्वतंत्रः कर्ता हि तेन त्वयोऽपि इति क
र्तृत्वविषयस्त्यागस्तृतीयः भरतसत्तमेत्यनेन यत्त्वं भरतवंशपाला
मत्तमोः नत्वैवेनत्यागविषयेश्रवणाधिकारीऽस्यतोः हे वह्निमी
ति सूचितम् पुरुषव्याघ्रेत्यनेन त्रिविधस्य त्यागस्य पालनं कर्तुमशक्य

श्री
गी टी
अ

एवंविंशतिमा कृत्या इति सूचितम् ४ ॥

अथाष्टादशी टीका १८ ॥

तत्र तावदेकं कर्माधिकारिकर्तृके संन्यासत्यागशब्दाभ्यां प्रतिपादि
तेन त्यागेन फलाभिसंधिपूर्वकेकर्मत्यागो मेमम वचनात्त्रिविधएवेत्यो।
चार्यः कृतेभ्यागाभगवतस्तनम किंतत्तद्वैषम्यमितित्राहहेतुरु
षयात्तद्गुरुषश्रेष्ठहिययस्मात् त्यागः कर्माधिकारिकर्तृकः फला।
भिसंधिपूर्वककर्मत्यागाख्यो विधः त्रिप्रकारः तामसादिभेदेन संप्र
कीर्तितः अथवा विशिष्टाभावरूपस्य त्यागो विशेषणाभावाद्विशे
ष्याभावादुभयाभावाच्च त्रिविधः संप्रकीर्तितः तथाहि फला
भिसंधिपूर्वककर्मत्यागो सत्यपि कर्मणि फलाभिसंधित्यागादेकः
सत्यपि फलाभिसंधौ कर्मत्यागात् द्वितीयः फलाभिसंधेः कर्मण
श्च त्यागात्तृतीयः तत्र प्रथमः सात्विकत्वादेयः द्वितीयस्तु हेयो हि।
विधः दुःखत्वबुद्ध्याकृतो राजसः विपर्यासेन कृतस्तामसः एतावान्क
र्माधिकारिकर्तृकस्त्यागो र्जुनस्य प्रश्नविषयः तृतीयस्तु कर्मान
धिकारिकर्तृको नैष्कर्म्यरूपो नार्जुनस्य प्रश्नविषयः सोपि साधनफ।
लभेदेन द्विविधः तत्र सात्विकेन फलाभिसंधित्यागपूर्वककर्मानुष्ठा
नरूपेण त्यागेन शुद्धान्तःकरणस्य तत्र विविदिषणोत्पन्नस्य साध
नश्रवणाद्यवेदान्तवाक्यविचाराय फलाभिसंधिरहितस्यान्तःकर।
णशुद्धेः समानसाधनस्य कर्मणो वैतृष्ण्यजातत्वाद्बहूनस्य परि
त्यागः स एकः साधनभूतो विविदिषासंन्यास उच्यते तमग्रे नै।
ष्कर्म्यसिद्धिं परमामिति वक्ष्यति द्वितीयस्तु जन्मान्तरकृतसाध
नाभ्यासपरिपाकादस्मिन् जन्मन्यादावेवोत्पन्नात्मबोधस्य कृत
कृत्यस्य सत एव फलाभिसंधेः कर्मणश्चोपरि त्यागः फलभूतः स
विद्वत्संन्यास उच्यते सत यस्त्वात्मरतिरेव स्यादित्यादिश्लोकाभ्यां
प्राग्व्याख्यातः स्थितप्रज्ञलक्षणादिभिश्च बहुधा प्रपंचितः एतस्मा
देव त्यागास्यनन्तरं द्वैतं तयापोक्तं तन्नैवेदितमिच्छामीति श्रोतम
मसर्वज्ञस्य वचनाद्विदोषाभिप्रायः संबोधनद्वयेन कुत्यानिमित्तो।

त्कर्षः पौरुषनिमित्तोत्कर्षश्च योगपत्तातिशय सूचनायोक्तः
सोनिश्चयो विप्रतिपत्तिकोटिभूतयोः पक्षयोः द्वितीयः पक्षः
दृश्यः ४ ॥

सदानंदी टीका ११ ॥

तत्र त्यागेनत्याज्यैकर्माधिकृतकर्तृके संन्यासत्यागशब्दाभ्यां द्वा।
भ्यिभिः प्रतिपादिते १ निश्चयं मत्तो भिन्नैस्सर्वाचार्यैः कृतं श्रृणु
कर्माधिकारिणोयस्मात्यागः सफलकर्मणः २ तामसादिकभे
देन त्रिःप्रकारस्तु दाहृतः फलाभिसंधिसत्यागो विद्यमानोपिक
र्मणि ३ सात्विकोयं परित्यागउपादेयो मनुमन्तुभिः फलाभिसं
धौसत्येवकर्मत्यागस्तुराजसः ४ अज्ञानतोद्वयोरेवप्रमादा।
दिभिरेवयः त्यागः फलाभिसंधेश्चकर्मणश्चसतामसः ५
यत्तेनमतावेतौत्यागौराजसतामसौ त्याज्यौयः कर्मसंन्यासो
निर्गुणः सत्तेद्धवे अर्जुनप्रश्नविषयोनचातस्यविवेचन
यत्त्यागस्यतु वैविध्यं तत्वेनस्मात्कर्मणितः ७ वाक्याद्वितीयाभि
प्रायः संबोधनद्वयेनतत्कुलोत्कर्षात्स्वकोत्कर्षाद्योग्यत्वं।
सूच्यतेजिने ८ ॥ ४ ॥

नीलकंठी टीका १२ ॥

निश्चयमिति तत्रकर्मणांत्यागत्यागविषयेविप्रतिपत्तौसत्
त्यागपक्षमेघात्त्यागोविषयेमम सूचनात्त्रिश्चयंश्रृणु द्विध
स्मात्हे पुरुषव्याघ्रत्यागः त्रिविधः सात्विकराजसतामस
भेदेनत्रिप्रकारः परिकीर्तितः शास्त्रे दृष्टवैराग्यपूर्वकः क
र्मसंन्यासः सात्विकः आयासभयात्त्यागोराजसः मोहात्त
त्यागस्तामसइति तस्मादिह त्यागोनिश्चयेनविचारणीय
इत्यर्थः ४ ॥

आनंदी टीका १२

तत्रतयोः पक्षयोर्मध्ये तावन्निश्चयमेवाह ॥ ४ ॥

+संन्यासत्यागयोः परमार्थतएकार्थयोस्तत्स्वरूपासन्देहनिर्वृत्तये त्यागविषयमेव वक्तव्यमाह ॥

91

श्री॰
गी॰ टी॰
अ॰

रामकंठी टीका ४

+तत्रतथाविधेसंन्यासादभिन्नार्थेत्यागेप्रोक्तलक्षणविषयेनि
श्चयंनिर्णयंमन्मतमवधारयव्याख्यातलक्षणस्यकइदानींनिश्च
योवशिष्यते यदर्थमेवमुच्यतेऽस्यामाह हिशब्दोहेतौ यस्मात्सा
मान्येनोक्तलक्षणस्त्यागोविशेषतोवक्ष्यमाणहेयोपादेयत्वरूप
णविभागेनत्रिप्रकारः पुरस्तात्सम्यक्प्रकटीकृतः [illegible]
विषयनिष्कृष्टेवक्ष्येसंनिकर्मणांत्यागस्ययोगाभिमतोयवर्गील
क्षणफलत्वेनतादृत्यागलमेवप्रतिपादयिष्यन्[illegible]
पत्निगभीकारेणसर्वकर्मणांत्यागत्वमेवतत्[illegible] ४ ॥

लासिकी टीका

एवंविप्रतिपत्तौस्वमतंसर्वमतशिरोमणिभूतंनिश्चाययितुमाह ॥
तत्रैवंविप्रतिपन्नेत्यागेमद्वचनान्निश्चयंशृणु त्यागस्यलोकेप्र
सिद्धत्वात्किमत्रश्रोतव्यमितिमावमंस्थाइत्याह हियतेहेपुरु
षव्याघ्र अयंत्यागः सामान्यजनदुर्बोधस्तत्त्वविद्भिः सात्त्विका
दिभेदेनत्रिप्रकारः सम्यग्विवेकेनप्रकीर्तितः कथितइत्याह

पंचोलीटीका

एवंमतभेदस्योपन्यस्यस्वमतंकथयितुमाह निश्चयमिति हेभर
तसत्तमतत्रत्यागेत्यागसंन्यासविकल्पेममनिश्चयंमतंशृणु।
त्यागोहित्यागसंन्यासशब्दार्थोहिएकएवसन्हेपुरुषव्याघ्रसत्त्वा
दिभेदैस्त्रिविधःसंप्रकीर्तितःशास्त्रेषुकथितः ४ ॥

रणवीरसमिद्बोधिनी ॥

अथस्वमतंदर्शयति निश्चयमिति तत्रतयोस्त्यागस्वीकारयो
र्मध्येत्यागेप्राक्प्रतिपादितस्वरूपेतत्त्वज्ञानपर्यवसायिनिसंन्या
सैकार्थेमेममनिश्चयमवधार्यस्वीकार्यः स्वधर्मइत्येवंशृणुअव
धारय व्याख्यातलक्षणस्यकइदानींनिश्चयोवशिष्यतेयदर्थ
मेवमुच्यतेइत्यत्राह हियस्मात्त्यागःसामान्येनोक्तलक्षणो।

पिवक्ष्यमानविभागेन त्रिविधः तिस्रस्तामसादयो विधाः प्रका
रायस्य स तादृशः सम्यक्प्रदर्शितः परमार्थविद्भिरिति शेषः अ
तो हेयोपादेयतावशिष्यते तज्ज्ञानार्थं श्रोतव्यमेवास्तीति भावः
४॥

मधुभाष्य

निश्चयमित्यादिना यज्ञभेद उक्तो द्रव्ययज्ञ इत्यादिना
दानेन भयदानमंतर्भवति एतेषामध्येयं किंचिद्यज्ञा
दिकं कर्तव्यमेवेत्यर्थः अन्यथा ब्रह्मचारी गृहस्थो वा
वानप्रस्थो यतिस्तथा यदीच्छन्मोक्षमास्थातुमुत्तमा
श्रममाश्रयेदित्यादिव्याससूत्रादिविरोधः ज्ञानय
ज्ञविद्याभयदानब्रह्मचर्यादितपसो हि ते अतो यज्ञवो
ऽन्यथा प्रतीयते अधिकारिभेदेन योग्यं अन्यथेतरे
षां गत्यभावात् अन्यत्यागार्थो न युक्त इत्याह ४॥

~~२२~~

२/१

भाषा अनुवाद

इस प्रकारसे अन्य मत कहि कर अब अपने मत कहनेको इ
च्छासे भगवान कहते किहे भरतसत्तम भरतवंशी अर्जुन इ
स पूर्वोक्त परस्पर विरुद्ध मतके विषय मे निश्चयरूप जो मे
रे वचन सो सुनो और त्याग की लोकमे प्रसिद्धि है तो उसके वि
षयमे और का सुने ऐसा अनादर न करना यही कहते है कि
हे पुरुषव्याघ्र कहे पुरुषश्रेष्ठ अर्जुन त्याग पदार्थ बडा कठि
न दुर्बोधहै जिस हेतु इस काम्य कर्म का त्याग तत्त्वदर्शी लो
गो ने अच्छीतरहसे विचार करके तामस आदि भेदसे त्रिवि
ध कहे तीन प्रकार कहाहै सो त्याग विषयक तीन प्रकार इ
सी अध्यायके इस सतये श्लोकसे कहेंगे कि नियतस्यतु
सन्न्यासः इति ४ ॥

दोहा

ता में मो निश्चय~~है~~ तहूं तिनके सुनहुं भारत त्यागहि
माहि पुरुषश्रेष्टसोत्यागहि तीनप्रकार कहाहि ४

यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत् य
ज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ५ ॥

शांकरभाष्यटीका १ ॥

कः पुनरसौ निश्चय इत्याह यज्ञ इति यज्ञो दानन्तप इत्येतत्त्रिवि
धं कर्म न त्याज्यं न त्यक्तव्यं कार्यं करणीयमेव तत् कस्मात् य
ज्ञो दानं तपश्चैव पावनानि विशुद्धिकराणि मनीषिणां फला
नभिसन्धीनामित्येतत् ५ ॥

आनंदगिरिकृतटीका २

तमेव भगवतो निश्चयं विशेषतो निर्धारयितुं प्रश्नपूर्वकमन
न्तरश्लोकप्रवृत्तिं दर्शयति कः पुनरिति यज्ञादीनां कर्तव्यत्वे हेतु
माह यज्ञ इति न केवलं न त्याज्यं किन्तु कर्तव्यमेवेत्याह कार्यमि
ति प्रतिज्ञामेव विभज्य हेतुं विभजते कस्मादिति ५ ॥

स्वामिकृतटीका ३ ॥

त्रैविध्यं तु नियतस्य त्यागस्य संन्यासः कर्मणामित्यादिना वक्ष्यति प्रथमं ता
वन्निश्चयमाह यज्ञेति द्वाभ्यां मनीषिणां विवेकिनां पावनानि चि
त्तशुद्धिकराणि ५ ॥

पैशाचभाष्यटीका ४ ॥

यज्ञदानतपःकर्म न त्याज्यं न त्याज्यं तत्त्वश्यथार्थमीश्वराराधनार्थं
च कार्यमेव यतः यज्ञो दानं तपश्चैव पावनानि उपातकहरीनि तत्त्वार्थी
त्तिमनीषिणां ज्ञानिनां यस्मात्त्रीण्यानि यज्ञदानतपांसि उपातकहरि
नत्तयार्थी तस्मात्कार्याण्येवेत्यभिप्रायः ५ ॥

रामानुजभाष्यटीका ५ ॥

यज्ञेति यज्ञदानतपःप्रभृतिवैदिकं कर्म मुमुक्षुणा कदाचिदपि
न त्याज्यं अपि त्वाप्रयाणादहरहः कार्यमेव कुतः यज्ञदानतपःप्र
भृतीनि वर्णाश्रमसंबंधीनि कर्माणि मनीषिणां मननशीलानां पा

श्री· गी· ता· टी· ग्रं·

वनानि मननेउपासनेनसत्त्वाणां यज्ञदानतपः प्रभृतीनि पावनानी
वेउपासनेकुर्वतामुपासननिष्ठानि विरोधिप्राचीनकर्मविनाशनानीति
५ ॥

अभिनवगुप्तकृत टीका ६

स्पष्टार्थं ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका ७ ॥

नत्वादौ त्यागस्य स्वरूपं दर्शयति यज्ञदानतपइति द्वाभ्यां यज्ञदान
तपोरूपं कर्म न त्याज्यं किंतु कार्यमेव कुतः यज्ञो दानं तपश्च
मनीषिणां ज्ञानवतां कर्तुः पावनानि चित्तशोधकानि ५ ॥

वनमाली टीका ८ ॥

कोसौ निश्चयो विप्रतिपत्तिकोटिमतयोः पक्षयोर्द्वितीयइत्याह
यज्ञइति द्वाभ्यां चोहेतौ यस्माद्यज्ञदानतपांसि मनीषिणामकृत।
फलाभिसंधीनां पावनानि चित्तस्य भगवदर्पणेन योग्यतासंपाद
कानि प्रकृतफलाभिसंधीनां यज्ञदानतपांसि चित्तशोधकानि
भवंत्येव तस्माच्चित्तशुद्ध्यर्थिभिः कर्माधिकृतैर्यज्ञो दानं तपइतिय
फलाभिसंधिरहितं कर्म न त्याज्यं किंतु कार्यमेव ननु श्रुत्याज्ञाने
न कार्यं नेवलवेयमसादरार्थंभूतः कार्यमेवस्मृतं ५ ॥

ज्ञानमवैजयंती टीका ९ ॥

त्यागविषये प्रतिज्ञातं स्वनिश्चयमाह द्वाभ्यां यज्ञदानेति चकारो
हेत्वर्थे हि यथेकः हि यस्मान्मनीषिणां शास्त्रीयविवेकबुद्धिमतां
मननशीलानां वा यज्ञदानतपांसि सर्वाण्युक्तानि एवकारा
द्यस्मादपि विनाश्ययनतिनियमनादीनि कर्माणि पावनानि विशुद्ध
त्वदंतर्भूदितानज्ञानद्वारा संसृतिहेतुभूतप्राचीनकर्मविना
शकानि भवंति तस्माद्यज्ञदानतपः प्रभृति सत्कर्म मुमुक्षुणा
पुरुषेण न त्याज्यं प्रमादालस्यादिना नहेयं भवति किंतु तत्कर्मका
र्यमेव कर्तव्यमेव यदीदं कर्म पुरुषो न कुर्यात् तर्हि बुद्धिशुद्ध्यभा
वेन ज्ञानोदयाभावान्मुक्तिमप्राप्य नितरां संसारी भवतीत्येवकाराभि
प्रायः ५ ॥

+ कोसौनिश्चयोविप्रतिपत्तिकोटिद्वययोःपक्षयोःद्वितीयःपक्षइत्याहद्वाभ्यां ॥

मधुसूदनी टीका १० ॥

+ चोहेतौयस्माद्यज्ञदानतपांसिमनीषिणामकृतफलाभिसंधीनांपा
वनानिज्ञानप्रतिबंधकपापमलक्षालनेनज्ञानोत्पत्तियोग्यतापादका
नि उपासनास्थानेनचशोधकानि अकृतफलाभिसंधीनामेवयज्ञ
दानतपांस्येवशोधकानिभवंत्येव उपाधिशुद्धयोरुपहितशुद्धिरवा
भिचेत। तस्मादेतैःकल्याणरूपार्थिभिःकर्माधिकृतैर्यज्ञोदानंतपश्च
नियमफलाभिसंधिरहितंकर्मतन्नत्याज्यंकार्यमेवतत् तपश्चा
मीषांचकल्याणशोधनेनात्मशुद्धिहेतुत्वात् फलाभिसंधिनाह
तामपिचतात्तच्छोधकानिभवंतीति तेनफलाभिसंधिरहितानांचे
त्यर्थः ५ ॥

सदानंदी टीका ११ ॥

कश्चासौनिश्चयस्तत्रद्वाभ्यामाहयज्ञेति फलाभिसंधिहीनानां
५४ यज्ञदानतपांसिहि १ शोकमोहमानमविज्ञानप्रतिबंधमलशयान्त
त्साधिनविशुद्ध्यात्मविज्ञानाधिकारिभिः २ फलाभिसंधिही
नेयंकर्मनत्याज्यमितिहेतुः यस्माद्यज्ञादिककर्मकर्तव्यत्वेनचोदितं
तस्मात्त्याज्यमेवेतिकिंतुकार्यंप्रयत्नतः ४ ॥ ५ ॥

नीलकंठी टीका १२ ॥

स्वीकरणायतेनत्यागस्वरूपकथनात्प्राक्परमतमत्यागपदेउ
पसंहरति यज्ञेति यज्ञादिकंकर्मनत्याज्यंकिंतुकार्यमेवविहि।
तहीनेनैववर्णाश्रमस्वधर्मत्वेनावश्यमेवतत् प्रकरणोप्यमवापत्तव।
णात् चकारोहेत्वर्थः यस्माद्यज्ञोदानंतपश्चैवमनीषिणांनिष्कामा
नांदंभादिरहितानांपावनानिचित्तशोधकानितथाचश्रुतिः त्र
योधर्मस्कंधायज्ञोऽध्ययनंदानमितिप्रथमस्तपएवद्वितीयोब्रह्म
चर्याचार्यकुलवासीतृतीयःसर्वएतेपुण्यलोकाभवंतीनिष्कामादी
नांगृहस्थधर्माणांतपसोवनस्थधर्मस्याचार्यकुलवासस्यब्रह्मचारि
धर्मस्यचपावनत्वंदर्शयति अत्रापियज्ञदानशब्देनगृहस्थधर्मालै
ख्याः तपइतिवानप्रस्थधर्माः परिशेषात्कर्मेतिब्रह्मचारिधर्मो
ज्ञेयः ५ ॥

श्री॰
गी॰ टी॰
अ॰

आनंदी टीका ६

एवं न त्याज्यं कार्यमेवेति नियोगेन सर्वथैव केवलज्ञानानुष्ठायिम
तेनिरस्तं परमेश्वरेण ॥ ५ ॥

इत्थं त्यागविषयनिश्चये वक्तव्ये सति कर्मणां त्याग
स्वपराभिमतापवर्गलक्षण+
फलहेतुत्वादत्यागमेव श्रुति+
पादयितुं प्रदर्शितागमोप
पत्तिगर्भीकारेण सर्वकर्मणा
मत्यागत्वमेवतावदाह ॥

रामकंटी टीका ५४

यज्ञादिरूपं कर्म सर्वैः शास्त्राधिकृतैः सर्वदा न त्याज्यं न तस्य त्या ५
गउपपद्यते तस्मादवश्यं कर्तव्यमेतत् कुतो ज्ञानीनि कर्माणि
मनीषिणां पावनानि मनीषिणः पुरुषाः प्रज्ञायुक्ता देवसर्गभाजः
शास्त्रार्थानुष्ठानाधिकृता उच्यंते ते च द्विधा संभवंति प्रवृत्तिध
र्मात्मकशास्त्रार्थानुष्ठानाधिकृता रजोलेशानुगतसत्वप्रधान
बुद्धयस्तथाविधश्रद्धाश्चैके यान् प्रति तृतीयेऽध्याये सहयज्ञाः प्रजाः
सृष्ट्वा इत्यादिना चायुरिंद्रियारामो मोघं पार्थ स जीवतीत्यंतेन ग्रंथे
नाऽग्रमेपपत्तिप्रतिपादकेन सर्वकर्मणामत्याज्यत्वं पावनत्वं चो वै॰
क्तम् अपरे तु मनीषिणो निवृत्तिधर्मात्मकशास्त्रार्थानुष्ठाना
धिकृता गुणीभूतरजस्तमस्कत्वाद् उद्रिक्तसत्वात्मकबुद्धयस्त
थाभूतश्रद्धाश्च यान् प्रति तत्रैव तत्त्वात्वप्रतिपादितज्ञाननिष्ठ
तया यज्ञादिकर्मणो यथास्वं यथास्वावस्थास्तु यस्त्वात्मरतिः
स्यादित्यादिना तस्मादसक्तः सततं कार्यं कर्म समाचर । अस
क्तो ह्याचरन् कर्म परमाप्नोति पूरुष इत्यंतेन ग्रंथेनाऽत्याज्यत्वमु
क्तमिति उभयेषां मनीषिणां यज्ञादिकर्माणि पावनान्युक्तानि
तानि ५ ॥

लासिकी [illegible]टीका

निश्चयमेवाह — सर्वैर्जनैर्ज्ञानिभिरज्ञानिभिर्वा यज्ञदानतपोरूपं कर्म न त्याज्यं
न परिहार्यं किंतु तदवश्यं कर्तव्यमेव तत्र कर्मात्यागे प्रयोजन
माह यज्ञ इति मनीषिणां देवसर्गभाजां विवेकवर्जं यज्ञो दानं त
पश्चेत्येतानि पावनानि शोधकानि अज्ञानरूपमलनिर्णेजका
नीत्यज्ञानपक्षे ज्ञानिपक्षे तु पावनानि देहाहंभावात्मकमल+
नाशकानि येन प्रकारेण कृतानि तानि पावनानि भवंति तं प्रका
रमाह ५

पंचोलीटीका

अथ स्वमतं निश्चयमाह यज्ञ इति यज्ञो दानं तपः कर्म न त्याज्यं तत्का र्यं करणीयमेव तत्स्मात् यज्ञो दानं तपः एतानि त्रीणि मनीषिणां फ लकामनारहितानां पावनानि चित्तशुद्धिकरणानि ५॥

रणवीरसमिद्धोधिनी

निश्चयस्वरूपमाह यज्ञ इति यज्ञादिरूपं कर्म न त्याज्यं वेदादिक्रु तैः सर्वदापरिहर्तुं नोपपद्यते तस्मादवश्यं कर्त्तव्यं तत् यज्ञो म नीषिणां दैवीसंपदभिजातानां प्रज्ञातिशयशालिनां धर्मानु ष्ठानाधिकृतानां पावनानि अनेकजन्मांतरार्जितदुष्कृतमलप रिमार्जकानि भवंति ५॥

मधुभाष्य

५॥

24

भाषा अनुवाद

अब प्रथम अपने निश्चित वचन को दो श्लोक से कहते हैं कि
यज्ञ दान औ तपरूप कर्म त्याग करने योग नहीं है वरन
अवश्य ही कर्तव्य है क्यों कि ये यज्ञ दान तप भजन आदि
सत् कर्म विवेकी पुरुषों को पावन करते हैं अर्थात् चित्त के
शुद्धि करनेवाले हैं ५ ॥

दोहा

यज्ञ दान तप त्याज्य नहिं योग्यहि करणो सोय यज्ञ दान
तपतीन यह पुण्य मुनिन को होय ५॥

एतान्यपि तु कर्माणि संगं त्यक्त्वा फलानि च
कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमं ६ ॥

शांकरभाष्यटीका १ ॥

एतान्यपीति एतान्यपि तु कर्माणि यज्ञदानतपांसि पावनान्यु
क्तानि संगमासक्तिं तेषु त्यक्त्वा फलानि च तेषां परित्यज्य कर्त
व्यानीति अनुष्ठेयानीति मे मम निश्चितं मतमुत्तमं निश्चयं प्र।
णमे तचैति प्रतिज्ञाय पावनत्वं च हेतुमुक्त्वा एतान्यपि कर्माणि
कर्तव्यानीत्येतन्निश्चितं मतं उत्तममिति प्रतिज्ञातार्थोपसंहार एव
नापूर्वार्थं वचनमेतान्यपीति प्रकृतसंनिकृष्टार्थत्वोपपत्तेः सासंगस्य
फलार्थिनो बंधहेतवः एतान्यपि कर्माणि मुमुक्षोः कर्तव्यानीति अपिश
ब्दस्यार्थः न त्वन्यानि कर्माण्यपेक्ष्य एतान्यपीत्युच्यते अन्ये वर्णयंति नि
त्यानां कर्मणां फलाभावात् संगं त्यक्त्वा फलानि चेति नोपपद्यते एता
न्यपीति यानि काम्यानि कर्माणि नित्येभ्योऽन्यानि एतानि अपि कर्त
व्यानि किमुत यज्ञदानतपांसि नित्यानि इति तदसत् नित्यानामपि
कर्मणां फलवत्त्वस्योपपादितत्वात् यज्ञो दानं तपश्चैव पावनानीत्या
दि वचनेन नित्यान्यपि कर्माणि बंधहेतुत्वाशंकया जिहासोर्मुमु
क्षोः कुतः काम्येषु प्रसंगः दूरेण ह्यवरं कर्मेति च निंदितत्वात् यज्ञा
र्थात् कर्मणोऽन्यत्रेति च काम्यकर्मणां बंधहेतुत्वस्य निश्चितत्वात् त्रै
गुण्यविषया वेदास्त्रैविद्या मां सोमपाः क्षीणे पुण्ये मर्त्यलोकं विशंती
ति च दूरव्यवहितत्वाच्च न काम्येष्वेतान्यपीति व्यपदेशः ६ ॥

आनंदगिरिकृतटीका २ ॥

प्रतिज्ञातमर्थमुपसंहरति एतान्यपीति उपसंहारश्लोकाक्षराणि
व्याकरोति एतानीत्यादिना उक्तमर्थमुक्त्वा तात्पर्यार्थमाह निश्चय।
मिति प्रकृतार्थोपसंहारे गमकमाह एतान्यपीति अपिशब्दस्याविव
क्षितमर्थं दर्शयति सासंगस्येति व्यावर्त्यं कीर्तयति नत्विति एतान्यपी
त्यादिवाक्यं न नित्यकर्मविषयमिति मतमुपन्यस्यति अन्ये इति न
चेदिदं नित्यकर्मविषयं किंविषयं तर्हि इत्याशंक्य वाक्यमवतार्य

व्यकरोति एतानीत्यादिना नित्यानामफलत्वमप्युपेत्य पक्षोयमुक्त
मुक्तमिति दूषयति नदसदिति यत्तु काम्यान्यपि कर्तव्यानीति न
त्विरस्यति नित्यान्यपीति किंच काम्यानां भगवता निंदितत्वान्न तेषु
मुमुक्षोरनुष्ठानमित्याह दूरेणेति किंच मुमुक्षोरपेक्षितमोक्षापेक्ष
या विरुद्धफलत्वात् काम्यकर्मणां न तेषु तस्यानुष्ठानमित्या
ह यज्ञार्थादिति काम्यानां बन्धहेतुत्वं निश्चितमित्यत्रैव सर्वत्रवा
क्यानुकूल्यं दर्शयति त्रैगुण्येति किंच पूर्वश्लोके यज्ञादिनित्यक
र्मणां प्रकृतत्वादेतच्छब्देन सन्निहितवाचिना परामर्शात् काम्यक
र्मणांच काम्यानां कर्मणामिति व्यवहितानां सन्निहितपरामर्शि
नैतच्छब्दाविषयत्वान्न काम्यकर्मणामेतान्यपीति व्यपदेशमर्हन्ती
त्याह दूरेति ६ ॥

स्वामिकृतटीका ३ ॥

येन प्रकारेणाकृतान्येतानि पावनानि भवंति तं प्रकारं दर्शयन्नाह
एतानीति यानि यज्ञादीनि कर्माणि मया पावनानीत्युक्तमेतान्यपि
कर्तव्यानि कथं संगं कर्तृत्वाभिनिवेशं त्यक्त्वा केवलमीश्वराराधन
तया कर्तव्यानि फलानि च त्यक्त्वा कर्तव्यानि इति च निश्चितं मम म
तमत एवोत्तमं [illegible] दर्शयति ६ ॥

पिशाचभाष्य टीका ४ ॥

एवं तु कर्तव्यानि कथमेतानि कर्माणि यज्ञादीनि संगं फले स्पृहां फ
लानि च त्यक्त्वा कर्तव्यानीति निश्चितमसंदिग्धमतमेवेष्टं ६ ॥

रामानुजभाष्य टीका ५ ॥

२ एतान्यपि यस्मान्मनीषिणां पावनानि तपः प्रभृतीनि पावनानि तस्मा
दुपासनवदेतान्यपि यज्ञादीनि कर्माणि मदाराधनरूपाणि संगं क
र्माणि ममतां फलानि च त्यक्त्वा मुमुक्षुणा प्रयाणादुपासनवन्नित्यनै
मित्तिकवत् कर्तव्यानीति मम निश्चितमुत्तमं मतं ६ ॥

अभिनवगुप्तकृत टीका ६ ॥

स्पष्टार्थं ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका ७ ॥

केन प्रकारेण कृतानि पावनानि भवन्तीत्याह (ता) एतानीति एतानि य
ज्ञदानतपोरूपाणि कर्माणि सङ्गं त्यक्त्वा फलानि चैहिकामुष्मिका
णि त्यक्त्वा केवलमीश्वरार्पणतया कर्तव्यानीति मे मतं निश्चितमसंदि
ग्धं तन्मत्वा रे तद्वा हरणीयमित्यर्थः ६ ॥

वनमाली टीका ६ ॥

ननु यदि यज्ञादीनां चित्तशोधनसामर्थ्यमस्ति तर्हि फलेच्छया कृ
तान्यपि शोधकानि स्युरेवं कृतफलेच्छात्यागेन प्रयत्नस्तत्राह एतानीति
काम्यान्यपि कर्माणि शोधकानि भवन्त्येव परं तु सा शुद्धिस्तत्फलभो
गायैव भवति न तु मत्कृपे एतान्यपि यज्ञादीनि यानि फलेच्छया कृता
नि वेदपदेन भूतान्यपि मन्मुखैर्भिः सङ्गमहमिदं कर्म करोमि मदीय
मिदं कर्मेति कर्मसङ्गं त्यक्त्वा कर्मणामानि फलानि भवेयुरिति तान्यभि
संधायमानानि फलानि च त्यक्त्वा शुद्धये कर्तव्यानीति मे मम मत
ते निश्चितं यद्वा केवलकाम्यानां फलानपेक्षया करणे फलान
राभावादेव व्यर्थत्वादतो येन प्रकारेण कृतानि पावनानि तमाह
एतानीति सङ्गं स्वस्य कर्तृत्वाभिनिवेशमीश्वराराधनतया फला
नि त्यक्त्वा कर्तव्यानीति निश्चितं मतं अतस्त्यक्तफलेच्छानां कर्म
णां चित्तशुद्धिरेव फलमित्यर्थः ६ ॥

ऊसमवैजयंती टीका ६ ॥

ननु यज्ञादीनि कर्माणि केन प्रकारेण पावनानीत्यपेक्षायां प्रका
रमाह एतान्यपीति चकारो यथाशब्दार्थकः यथा मदुपासनम्
तानि भक्तिज्ञानादीनि मम लक्षणानि कर्तव्यानि भवन्ति तथा एता
न्यपि यज्ञदानतपःप्रभृतीनि मदाराधनलक्षणानि कर्माणि
कर्तव्यानि भवन्ति किं तु सङ्गं स्वकर्तृत्वाभिनिवेशं फलानि च।
इह राज्यपशुपुत्रादिरूपाणि अमुत्र च देवाङ्गनाविहारादिलक्षणा।
नादिलक्षणानि च त्यक्त्वा इत्यतो निषिद्धवर्जितं तद्धे पार्थ मे मम।
मैतन्मे त्यागविषये सर्वेभ्यो मतेभ्यः श्रेष्ठं मतं त्यागरूपं नि।
श्चितं पार्थेत्यनेन यत्त्वमपि तत्त्वमसः अतः संशयो न ते मम मैवत्व।

+ यदियज्ञदानतपसामंतःकरणशोधनेसामर्थ्यमस्तितर्हि फलाभिसंधिनाकृतानामपि तानितच्छोधकानिभविष्यंति कृतेफलाभिसंधित्यागेनेत्यतआह ॥

श्री गी० टी० ग्र०

न्यारथे निश्चितंमतंगीकृष्णनाम्नेयामिजिमुखिते ६ ॥

मधुसूदनी टीका ६ ॥

+ तत्राहशंकानिराकरणार्थं यद्यपिकाम्यान्यपिशुद्धिमादधतिनित्य
मैस्वाभाव्यात्तथापिसानफलोपयोगिन्येवकाम्यंकर्मफलोपयो
गिन्येवविरुद्धाहादिदेहेननहिद्वेभुज्यतेफलमिति ज्ञानोपयोगिनी
तुशुद्धिमादधतियानित्यज्ञादीनिकर्माणिएतानिफलाभिसंधिपूर्व
कत्वेनबंधहेतुभूतान्यपिमुमुक्षुभिः संगमहमेवंकरोमीतिकर्तृ
त्वाभिनिवेशंफलानिचाभिसंधीयमानानित्यक्त्वाकरणशुद्धये
कर्तव्यानीतिमेममनिश्चितं अतएवहेपार्थकर्माणिकृतैःकर्माणि
त्याज्यानिनत्याज्यानिवेतिद्वयोर्मतयोर्नत्याज्यानीतिममनिश्चितंम
तमतमंश्रेष्ठं यदुक्तंनिश्चयंशृणुमेतत्रेतिसोयंनिश्चयउपसंहृतः
भगवत्पूज्यपादानामभिप्रायोयमीरितः श्रुतिस्मृतितयाभाष्येतुत्या
गोमंदबुद्धिभिः तद्वेवयज्ञदानतपःकर्मनत्याज्यमितिचापरेइति
स्वपक्षःस्थापितः [illegible]
[illegible]
६ ॥

सदानंदी टीका ॥ ॥

यौशोधनेस्तिसामर्थ्यंयदियज्ञादिकर्मणां शोधकानेवतर्हिस्युः
कृतान्यपिफलेप्सुना १ कृतेफलाभिसंध्येकत्यागेनैवचेष्टु
तम् धर्मस्वभावतःशुद्धिःकाम्यानामपिसंभवेत् २ तथापिका
मिनांसानफलभोगोपयोगिनी ज्ञानोपयोगिनीनास्तितत्रुक्त
वार्तिकेस्फुटं ३ काम्येपिशुद्धिरस्त्येवभोगसिद्ध्यर्थमेवसा विरु
द्धाहादिदेहेननसैंद्वेभुज्यतेफले ४ ज्ञानोपयोगिनीशुद्धिमादध
त्यत्रयानित यज्ञादीन्येवकर्माणिवधकान्यपिकामिनां ५ मुमु
क्षुभिःपरित्यज्यकर्तृत्वाभिमतिंतथा अभिसंधीयमानानित्य
क्त्वाकर्मफलान्यपि ६ कर्तव्यानिधियःशुद्ध्यैइतिमेनिश्चितंम
ते अतएवहिहेपार्थनत्याज्यानिमुमुक्षुभिः ७ कर्माण्येका
दिभिःश्रेष्ठभिःकर्माणिशतमेमते ८ ॥ ६ ॥

नीलकंठी टीका १८ ६॥

एवमत्यागपक्षमुक्त्वाश्रौतंत्यक्त्वामध्यमतमभिमतंत्यागात्यागमध्य
ज्ञपपदंदर्शयति एतानीतित्यागशब्दः सर्वोपयस्तात्पत्ताद्वैतत्व
णंप्रदर्शयति अपिशब्दएवशब्दार्थः एतान्येवकर्माणियज्ञदान
तपांसिसंगंत्यक्त्वाअहमेतेषांकर्तामयाऽवश्यमेतानिकर्तव्यानीत्य
भिमानेवयोवृणीयथास्वनिमित्तंत्यक्त्वाएतेः कैतैरहंस्वर्गवाचि
त्तशुद्धिंवाज्ञानंवाप्राप्स्यामीतिफलानिचत्यक्त्वाचकारादेषाम
करणेममप्रत्यवायोभविष्यतीत्येतमप्यभिसंधिंत्यक्त्वाअन्यानि
ष्टेनैवासंगस्वभावेनपुरुषेणकर्तव्यानि इतिएवंप्रकारंमे
ममनिश्चितंमतंसर्वमतात्कृष्टं तत्रहिकर्तृत्वाभिमानत्यागेन
संगेनप्रत्यवायोत्सादभयाच्चकर्मानुष्ठानेविहिते श्रुतत्वतद
भावादसंगत्वांशेनकर्मणांत्यागः स्वरूपेणात्यागइतिभेदः ६

आनंदी टीका १८

आसंगंरागद्वेषादिहठेनप्रवृत्तिम् फलानिदृष्टार्थानि ६ ॥

रामकंठी टीका १८

एतान्यप्यास्त्वेनेहप्रतिपादितानियज्ञैर्दोषवत्त्वात्त्याज्यत्वेनप्र
तिपन्नान्यपिसर्वाणिकर्तव्यान्यवश्यानुष्ठेयानीत्युत्तमंप्रकृ
ष्टंमदीयंचैतन्मतंनिश्चितंप्रदर्शितप्रकारेणएवमेवनिर्णी
तं कथंकर्तव्यानीतितद्विशेषमाह संगंत्यक्त्वाफलानिचे
ति संगात्संजायतेकामः इत्यत्रव्याख्यातस्वरूपः संगएकः क
र्मसुदोषस्तथानन्तरलरागद्वेषदोषयोगादिष्टानिष्टविषयप्रा
प्तिपरिहाररूपाणिफलानिद्वितीयोदोषः तत्तदनुष्ठानमतः
संगफलानिचत्यक्त्वाकर्माणिकर्तव्यान्येव तेनकर्मसुसंगफ
लाभिसंधित्यागस्त्यागउच्यतेनतत्तदनुष्ठानमेवत्यागस्तस्माद
कर्तव्यापपत्ता ॥ ६ ॥

लासिकी धनपती टीका १५

येनप्रकारेणकृतान्येतानिपावनानिभवंति तत्प्रकारमाह ॥ ॥

अपि त्विति किं त्वर्थे एतान्यप्याहतयोक्तानि कर्माणि यज्ञदा
नादीनि कर्तव्यान्यवश्यकरणीयानि किंतु संगं तत्र ममत्वाभिन
वेशं फलानीष्टानिष्टरूपाणि त्यक्त्वा कर्तव्यानीति मम मेश्वरस्यो
त्तमं सर्वोत्कृष्टं निश्चितं प्रमाणैरवधारितं मतम् [illegible]
६ ।

पंबोलीटीका

तेषां पावनत्वप्रकारमाह एतानीति तु पुनः हे पार्थ एतानि यज्ञदा
नतपांसि कर्माणि तेषु कर्मसु संगं आसक्तिं प्रीतिं त्यक्त्वा च पुनः
फलानि त्यक्त्वा कर्तव्यानीति एवं मे मम निश्चितं मतमुत्तमं ६ ॥

रणवीर सम्मिद्धोधिनी

अनुष्ठानप्रकारमाह एतानि यज्ञादीनि कर्माणि हेयत्वात्याज्यत्वे
न प्रतिपादितानि परैः सदोषत्वात्त्याज्यत्वेन प्रतिपन्नान्यपि
सर्वाणि कर्तव्यान्यवश्यमनुष्ठेयानि विशेषमाह संगं त्यक्त्वा
फलानि चेति ध्यायतो विषयान्पुंसः संगस्तेषूपजायते इत्यत्र
प्रतिपादितलक्षणः संगः फलानि चेष्टानि इष्टप्राप्तिपरिहार
रूपाणि तद्द्वयमपि त्यक्त्वा इत्येतन्ममोत्तमं प्रकृष्टं मतं निश्चि
तमस्ति कर्मसु कर्मफलाभिसंधित्याग एव त्यागो न पुनरन
नुष्ठानमेव स इति भावः ६॥

मधुभाष्य

६॥

भाषा अनुवाद

जिस प्रकार से किये गये ये कर्म्म विवेकी जनो के चित्त को शुद्ध करतेहै सोई प्रकार से इन कर्मोका अनुष्ठान देखावते हु ये कहते है कि हे पार्थ अर्जुन संग करे कर्तृत्वाभिनिवेश अ र्थात् हमकर्त्ता इस कर्म्म को करतेहै इस अहंकार को छोड़कर केवल ईश्वर के आधीन रूपसे कर्म्म का अनुष्ठान करना उचि तहै और फल की कामना कोभी त्याग करके जो कर्म्मकाक रना है यही हमारा नित अभिमत सिद्धान्त है इसी से वह कर्म्म उत्तम है हय भगवान अर्जुन से कहाहै ६ ॥

दोहा

यदभिजो पुनकर्म हैं त्यागसंगफलकोय सोमत करणे
योग्यहै पार्थनिश्चितसोय ६

नियतस्य तु संन्यासः कर्मणो नोपपद्यते मो
हात्तस्य परित्यागस्तामसः परिकीर्तितः ७

शाङ्करभाष्य टीका १ ॥

तस्मादज्ञस्याधिकृतस्य मुमुक्षोः नियतस्येति नियतस्य तु
नित्यस्य संन्यासः परित्यागः कर्मणो नोपपद्यते अज्ञस्य पावन
त्वस्येष्टत्वात् मोहादज्ञानात्तस्य नियतस्य परित्यागो नियतं चा
वश्यं कर्तव्यं त्यज्यते चेति विप्रतिषिद्धमतो मोहनिमित्तः परि
त्यागस्तामसः परिकीर्तितो मोहश्च तम इति ७ ॥

आनन्दगिरिकृत टीका २ ॥

नित्यकर्मणामवश्यकर्तव्यत्वमुक्तमुपजीव्याधिकृते प्र
यत्नान्तरश्लोकमवतारयति तस्मादिति नन्वकस्मिन्नियतम
पि कर्म त्यजन्नुपलभ्यते तत्राह मोहादिति अज्ञाते पावन
त्वापरिज्ञाने अज्ञस्य नित्यकर्मत्यागो मोहादित्येतदुपपादय
ति नियतं चेति नित्यकर्मत्यागस्य मोहकृतत्वे उक्तस्तामस
त्वमित्याशंक्याह मोहश्चेति ७ ॥

प्रतिज्ञातं त्यागस्य त्रैविध्यमिदानीं दर्शयति —

स्वामिकृतटीका ३

नियतस्येति त्रिभिः काम्यस्य कर्मणो बंधकत्वात्संन्यासो युक्तः
नियतस्य तु नित्यस्य पुनः कर्मणः संन्यासस्त्यागो नोपपद्यते सत्व
शुद्धिद्वारा मोक्षहेतुत्वात् अतस्तस्य परित्याग उपादेयो यमाज्ञ
मित्येवं लक्षणान्मोहादेव भवेत् स च मोहस्य तामसत्वात्ता
मसः परिकीर्तितः ७ ॥

पिशाचभाष्य टीका ४ ॥

काम्यकर्मणां त्यागोस्तु नित्यस्य नियतस्य कर्मणस्त्यागो नोपप
द्यते सत्वशुद्ध्यर्थमस्य त्वन्याकर्तव्यत्वमोहादज्ञानात्तस्य नियतस्य क
र्मणः त्यागस्तामसः परिकीर्तितः ७ ॥

रामानुजभाष्यटीका ५

नियतस्येति नियतस्य नित्यस्य नि तस्य च महायज्ञादेः कर्मणः
संन्यासस्त्यागो नोपपद्यते शरीरयात्रापि च ते न प्रसिध्येदकर्मण इ
ति शरीरयात्राया एव सिद्धेः शरीरयात्रा हि यज्ञशिष्टाशनेन निर्व
र्त्यमाना सम्यक्ज्ञानाय भवति अन्यथा भुंजते ते त्वघं पापा इत्य
यज्ञशिष्टाघरूपाशनाप्यायनं मनसो विपरीतज्ञानाय भवति
अन्नमयं हि सोम्य मन इत्यन्नेन हि मन आप्यायते आहारशुद्धौ
सत्वशुद्धिरित्यादिना ब्रह्मसाक्षात्काररूपं ज्ञानं आहारशुद्ध्याय
त्तमिति श्रूयते तस्मान्महायज्ञादिनित्यनैमित्तिकं कर्म आप्रया
णात् ब्रह्मज्ञानायोपादेयमिति तस्य त्यागो नोपपद्यते एवं ज्ञा
नोत्पादिनः कर्मणो बंधकत्वमोहात्परित्यागस्तामसः तमः का
र्यज्ञानमूलत्वेन त्यागस्य तमोमूलत्वं प्रमादमोहौ तमसो भवतो
ज्ञानमेव चेति प्रोक्तं अज्ञानं तु ज्ञानविरोधि विपरीतज्ञानं तथा च
वक्ष्यते अधर्मं धर्ममिति या मन्यते तमसावृता सर्वार्थान्वि
परीतांश्च बुद्धिः सा पार्थ तामसी इति अतो नित्यनैमित्तिकादेः
कर्मणस्त्यागो विपरीतज्ञानमूल इत्यर्थः ७ ॥

अभिनवगुप्तकृतटीका ६ ॥

स्पष्टार्थं ॥ ७ ॥ ॥ ॥ ॥

परमार्थप्रपारी टीका ७ ॥

तत्र त्यागस्त्रैविध्यमाह नियतस्येति काम्यस्य कर्मणो बंधकत्वा
त्तत्त्यागो युक्तः नियतस्य नित्यस्य तु कर्मणः संन्यासस्त्यागो नो
पपद्यते न युज्यते सत्वशुद्धिद्वारा मोक्षहेतुत्वात् मोहादज्ञानात्तस्य
त्या नित्यस्य कर्मणो यस्त्यागः स तामसः परिकीर्तितः ७ ॥

वनमाली टीका ८ ॥

तदेवं यज्ञदानतपःकर्म न त्याज्यमिति चापरे इति स्वपक्षं व्यापयि
त्वा त्याज्यं दोषवदित्येके इति परपक्षस्य त्रैविध्यव्याख्यानेन निराकर
णमारभते नियतस्येति काम्यस्य कर्मणः फलेच्छयाकृतस्य शुद्धिहे

नू

न्तत्वाभावेन वैधहेतुत्वेन च दोषत्वं प्रसज्यमानं क्रियमाणस्याप्यु
पपद्यत एव । नियतस्य निमित्ततया स्ववर्णाश्रमोदितस्य कर्मणाश्रित
शुद्धिहेतुत्वेनादोषस्य सत्त्वमसत्त्वाशेनोपपद्यते न च काम्यस्यैव ।
नित्यस्यापि दर्शपूर्णमासज्योतिष्टोमादेः पश्वादिहिंसामिश्रितत्वेन स
दोषत्वं न चाग्नीषोमीयं पशुमालभेतेत्यादिविशेषविधिगोचरत्वात् । नू
क्रत्वंगहिंसायां न हिंस्यात्सर्वभूतानीति सामान्यनिषेधस्यानादितप
रत्वमिति वाच्यं भिन्नविषयत्वेन विधिनिषेधयोर्बाधेनैव समावेशात्
निषेधेन हि पुरुषस्यानर्थहेतुर्हिंसाभिहिता विधिना च क्रत्वर्थी सह
कैन तन्नर्थहेतुत्वेनेति तथा च क्रतूपकारकत्वपुरुषानर्थहेतुत्वयो
रेकत्र संभवात् क्रत्वर्थायां हिंसायां निषिद्धेति हिंसा पुरुषे दर्शपूर्णमास
ज्योतिष्टोमादिसर्वं दुष्टमेवेति तस्यापि निषिद्धत्वेति सिद्धस्यापि च
विहितत्वरूपेनादिवदुपपन्नमेव यथा हि श्येनेनाभिचरन्यजेतेत्या
भिचारविधिना विहितो पि श्येनादिर्न हिंस्यात्सर्वभूतानीति निषेधवि स्या
षयत्वाद्नर्थहेतुरेव तद्दोषादिवशीकृतस्य तत्राधिकारः एवं ज्यो ।
तिष्टोमादावपि तथा चोक्तं महाभारते जपस्तु सर्वधर्मेभ्यः परमो धर्म
उच्यते अहिंसया हि भूतानां जपयज्ञः प्रवर्तते इति मनुनापि ज ।
प्येनैव तु संसिद्ध्येद्ब्राह्मणो नात्र संशयः कुर्यादन्यन्न वा कुर्यान्मैत्रो
ब्राह्मण उच्यते इति वदता मैत्रीमहिंसां प्रशंसता हिंसायां दुष्टत्वमेव
प्रतिपादितम् तस्मात्त्याज्यमेव ज्योतिष्टोमादिकमिति प्राप्ते न क्रत्वर्थ
हिंसानर्थहेतुः विधिविहिते निषेधानवकाशात् लिङाद्यर्थो विधि
वाक्ये प्रवर्तनापरपर्यायः निषेधवाक्ये तु निवर्तनानि
वारणानिषेधापरपर्यायः शाब्दी भावनाभाव्यं च तस्या यथायोगं प्रवृ
त्तिनिवृत्ती शाब्दभावनाज्ञानं करणं करणान्वेच शाब्दभाव्यार्थभावना
निष्पादकत्वे इतिकर्तव्यता च यथायोगमस्तीति निर्दिष्ट शाब्दभावनाभा
व्यार्थभावनायास्तु स्वर्गरूपा याग्रवृत्तेर्निवृत्तेश्च ज्योतिष्टोमकलंज
भक्षणादाविष्टसाधनत्वानिष्टत्वज्ञानेन विनानुपपत्तेस्तत्रेष्टसाधनत्वा
निष्टत्वज्ञानं विनानुपपत्तेस्तत्रेष्टसाधनत्वानिष्टसाधनत्वेऽनुमीये
ते ज्योतिष्टोमादेरनिष्टहेतुत्वे विधिवाक्यानन्तरपुरुषप्रवृत्तिर्न स्यात्
प्रनिष्टसाधनत्वज्ञानस्य प्रवृत्तिविरोधिनिवृत्तिजनकत्वेन प्रवृत्तिप्र

निषेधकत्वात् लिङाद्यर्थप्रवर्त्तनाया प्रवृत्तिविषयं यानर्थकरणे
प्रवर्त्तनावलेव तेषामनर्थहेतुत्वं विषयीकरोतीति न यागीय हिंसा
विधिबाधितेऽस्मामा निषेधवाक्यं रागद्वेषादिमूलकं कृत्वर्थभिन्न
लौकिकहिंसाविषयकं श्येनेनेष्टसाधनताया विधिबोधितत्वात्
स्य धर्मत्वमेव अनिष्टजनकत्वेन श्येनफलस्य वैरिमरणानुकूलश
स्त्रघातादिरूपहिंसात्मकाभिचारस्य वेदबोधितत्वात्तस्य धर्मत्व
मेव अनिष्टजनकत्वेन श्येनानिष्टसाधनताकत्वादधर्मत्वं फल
स्य विधिजन्यप्रवृत्तिविषयत्वाभावेन तत्रानिष्टसाधनत्वज्ञानेन प्र
वृत्तिप्रतिबंधकेऽयत्वे वैरिवधकामो यजेतेति श्रुतेन तद्वैरिमरणा
नुकूलकरे लौकिकव्यापाराभावे तत्र वैरिमरणरूपपरानिष्टचि
न्तनादेवपापं अभिचारार्थकरणस्यात्मत्वात्तेन शिष्टानां न तत्र प्रवृ
त्तिः परस्योन्मादनार्थमिति विहितस्यापि निषेधविषयस्य तेषां
उशीरग्रहणस्यापि कलंजभक्षणवदनर्थहेतुत्वापत्तेः तस्यापि
नातिरात्रे षोडशिनं गृह्णातीति निषेधात् उक्तं हि श्रीबादरायणेन
अशुद्धमिति चेन्न शब्दादिति ज्योतिष्टोमादिकं अग्नीषोमीयादि हिं
सायुक्तत्वेन अशुद्धमिति चेन्न अग्नीषोमीयं पशुमालभेतेत्यादिवि
धिशास्त्रादित्यस्यार्थः ज्योतिष्टोमादावग्नीषोमीयहिंसायाश्च ध पा०
र्मत्वबोधकेन तत्र तात्पर्यात् तथा च सर्वत्राप्यनोविहितनिषिद्धत्व
ज्ञानमर्थहेतावनर्थहेतुत्वज्ञानेन धर्मे चाधर्मत्वज्ञानमनर्थे यत्वज्ञा
ने विपर्यासरूपो मोहः तस्मान्नित्यस्य कर्मणो यः परित्यागः स तामसः
परिकीर्त्तितः ७ ॥

ज्ञसमवेतजयंती टीका ८ ॥

त्यागस्य यत्त्वं वैप्रतिज्ञातं द्वैविध्यं तदाह त्रिभिः नियतस्येति यद्यपि
स्वर्गकामो यजेतेत्यादिशास्त्रविहितं काम्यं कर्म तथापि तस्य बंध
कत्वात्त्यागो युक्त एव नियतस्य तु शुद्धहृदः संध्यामुपासीत यावज्जी
वमग्निहोत्रं जुहोतीत्यादिशास्त्रविहितनित्यनैमित्तिकस्य पंचयज्ञादेः
कर्मणस्तु सन्न्यासः सर्वनैदिवदं निगतात्मज्ञानेन संसारमोचकत्वा
देहयत्रासाधकत्वाच्च सन्न्यासस्त्यागो नोपपद्यते युक्तो न भवति य
दि मोहात् इदं सर्वमेकर्मबंधनहेतुर्भवतीत्येवं प्रकारेणाशास्त्रवि

वेकज्ञानवतस्य कर्मणः परित्यागः परित्यक्तस्वरूपेण त्यागः प्रकर्षेणाक्रि
यते न तर्हि स त्यागस्तामसो मोहस्य तमोगुणा यमिनां मनीषिणां कीर्तितः निय।
ते कृतकर्मत्वे कर्मत्यागो हि कर्मणः इत्यादिभिस्त्रिभी ये भगवता मया
परितो विस्तरेण कीर्तितः कथितः अयं भावः यज्ञादिकर्मत्यागे यज्ञशि
ष्टाशिनः सन्तो मुच्यन्ते यज्ञशिष्टामृतभुजो यान्ति ब्रह्म सनातनमित्याद्युक्त
प्रकारेण यज्ञशिष्टान्नभक्षणाभावात् ज्ञानहेतोः शरीरयात्रायाः प्रसिद्धे
स्तदसिद्ध्या अन्नशुद्धिर्न मनःशुद्ध्येन न हि मनसः शुद्ध्या यतः सर्वासिद्धिस्तद
सिद्ध्या आहारशुद्धौ सत्त्वशुद्धिरित्यादि ब्रह्मसाक्षात्कारज्ञानेन सिद्ध्य।
तितदसिद्ध्या च विपरीतज्ञानान्मोहस्तत्त्वभावो भवतीति ७ ॥

मधुसूदनी टीका ९ ॥

+ काम्यस्य कर्मणः अंतःकरणशुद्धिहेतुत्वाभावेन बंधहेतुत्वेन च दोष
वत्वं यत्त्वितिहेतुर्वा यावद्भिन्नाक्रियमाणस्त्यागउपपद्यत एव नित्य
स्य तु निष्कामस्य कर्मणः शुद्धिहेतुत्वेनादोषस्य संन्यासस्त्यागो न युक्तः।
णाअंतःकरणशुद्ध्यर्थिना नोपपद्यते शास्त्रयुक्तिभ्यां तस्यांतःकरण
शुद्ध्यर्थमवश्यानुष्ठेयत्वात् तथा चोक्तं प्राक् आरुरुक्षोर्मुनेर्योगं
कर्मकारणमुच्यते इति ननु दोषवत्वं काम्यस्येव नित्यस्यापि दर्श
पूर्णमासज्योतिष्टोमादेः व्रीहिपश्वादिहिंसामिश्रितत्वेन सांख्यै।
रभिहितं न च व्रीहीनवहन्ति अग्नीषोमीयं पशुमालभेत इत्यादिवि
शेषविधिगोचरत्वात् क्रत्वंगहिंसायाः न हिंस्यात्सर्वा भूतानीति सा
मान्यनिषेधस्य तदितरपरत्वमिति सांप्रतं भिन्नविषयत्वेन विधिनि
षेधयोरबाधेनैव समावेशसंभवान्निषेधेन हि पुरुषस्यानर्थहेतु
हिंसेत्यभिहितं नत्वक्रत्वर्थेति विधिना च क्रत्वर्थेत्यभिहितं
न त्वनर्थहेतुर्नेति तथा च क्रतूपकारकत्वपुरुषानर्थहेतुत्वयोरे
कत्र संभवात् क्रत्वर्थापि हिंसा निषिद्धैवेति हिंसायुक्ते दर्शपूर्णमा
मासज्योतिष्टोमादि सर्वं कर्म इष्टमेव विहितस्यापि निषिद्धत्वेन निषि
द्धस्यापि विहितत्वं श्येनादिवदुपपन्नमेव यथा श्येनेनाभिचरन् यजे
तेत्यभिचारविधिना विहितोपि श्येनादिः न हिंस्यात्सर्वा भूतानीति
निषेधविषयत्वादनर्थहेतुरेव न दोषवत् हिंसोरवच रागद्वेषादिवशी

+ इदानीं त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः इति परपक्षस्य पूर्वोक्तन्याय वैविध्यज्ञापनेन निराकरणमारभते ॥

क्रतुस्तत्राधिकारः पर्वज्योतिष्टोमादावपि तथाचोक्तं महाभार
ते जपस्तु सर्वधर्मेभ्यः परमो धर्म उच्यते अहिंसया हि भूतानां ज
पयज्ञः प्रवर्तते इति मनुनापि जप्येनैव तु संसिध्येद्ब्राह्मणो नात्र सं
शयः कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते इति वदता मैत्रो हि
सांप्रशेसनाहिंसायाउत्तममेव प्रतिपादितं अतः कारणाद्धिंसादर्श
नगायत्रीजपादिना स्वतरामपपद्यत इति हिंसादिदोषदुष्टज्योति।
ष्टोमादिनित्यकर्मदोषासहिष्णुना श्येनादिकमिव कर्माधिकारिणा
पि नानुष्ठेयमिति मा भूद्भ्रमः नच क्रत्वर्थाहिंसानर्थहेतुः विधिस्पृष्टत्वे नि
षेधानवकाशात् तथाहि विधिना बलवदिष्टाविषयसाधनताबो
धनेन प्रवर्तनाकृतेनानर्थसाधनेनेतदनुपपत्तेः स्वविषयस्य प्रवर्तना।
गोचरस्यानर्थसाधनत्वाभावो बोध्यत्वादाक्षिप्यते तेन विधिविषयस्यान
र्थहेतुत्वं बाध्यते नहि क्रत्वर्थत्वे सता ताद्ध्यर्थ्यैः येन विरोधो न स्यात् किं
तु प्रवर्तनैव प्रवर्तनाकर्मभूतानपुरुषप्रवृत्तिः पुरुषार्थमेव विषयीकु
र्वती किंचित्क्रतुमपि पुरुषार्थसाधनत्वेन पुरुषार्थभावमापन्नं विषयी
करोतीत्यन्यत् पुरुषप्रवृत्तिश्च बलवदिष्टोपधानदशायां जायमाना
नुभावस्यार्थहेतुतामाक्षिपति तत्वाश्रनर्थहेतुतां प्रतिक्षिपति किं
तु यथाप्राप्तमेवावलंबते बलवदिष्टाविषये स्वतएव प्रवृत्तेः श्येना
दौ विध्यनपेक्षणात् अतएव विहितश्येनफलस्यापि शत्रुवधरूपस्या
भिचारस्यानर्थहेतुत्वमपप्रायत एव फलस्य विधिजन्यप्रवृत्तिविषय
त्वाभावात् विधिजन्यप्रवृत्तिविषयं तु यागं त्वर्थीकरणां प्रवर्तनावलं
बते सा चानर्थहेतुं न विषयीकरोतीति विशेषविधिवाधितेन सामान्यनि
षेधवाक्यं रागद्वेषादिमूलाः क्रत्वर्थलौकिकहिंसाविषयं तेन श्येना।
ग्नीषोमीययोर्वैषम्यादुपपन्नमत्र उक्तं ज्योतिष्टोमादेर्विधिस्पृष्टस्यापि
निषेधविषयत्वे षोडशीग्रहणस्याप्यनर्थहेतुतापत्तिर्नातिरात्रे षोडशि
नं गृह्णातीति निषेधात् तस्मान्न किंचिदेतदिति भाट्टदर्शनं प्राभाक
रं तु दर्शनं फलसाधने यागे तप्रवृत्तिसिद्धेर्न नियोगस्य प्रवर्तकत्वं ते
न श्येनस्य यागजन्यप्रवृत्तिविषयत्वेन विधेरौदासीन्यमात्रं तस्यानर्थहेतुत्वं
विधिना प्रतिक्षिप्यते अग्नीषोमीयहिंसायां तु क्रत्वंगभूतायां फलसाधन

त्वाभावेन रागाभावाद्धिंसायामप्रवर्त्तकः स च स्वविषयस्यानर्थहेत
त्वाप्रतिलिप्सतीति प्रधानभूता हिंसानर्थं जनयति न क्रत्वर्थेति न।
हिंसामिश्रत्वेन ज्योतिष्टोमादेरीश्वरामिति समम्मेव एतावन्मात्रत्ववि
रोधः चोदनालक्षणोर्थो धर्म इत्यत्रार्थपदस्यावर्त्तत्वेनाधर्मत्वे श्येनादेः
प्रभाकरमते भाट्टमतेन श्येनफलस्यैवाभिचारस्यानर्थहेतुत्वादधर्म
त्वे श्येनस्य तु विहितस्य समीहितसाधनस्य धर्मत्वमेव शुद्धेपि स्यादधर्मत्वे
तत्फले जन्मतत्याद्दिं निषिद्धस्यैवेति फलतोनर्थहेतुत्वेन तु श्येनाश्ये
नादीनामधर्मत्वेनव्यवहारः तदुक्तं फलतोपि च यत्कर्म नानर्थेनानुबध्य
ते केवलप्रीतिहेतुत्वात्तद्धर्म इति कथ्यते तार्किकाणां तु दर्शने क्रतुसा
धनत्वमर्थहेतुत्वे चेति द्वयं विधेयार्थः तत्र क्रत्वर्थहिंसायोः साक्षाद्विधेया
भावात्सामग्र्यभिनावपदेशाच्च क्रतुहिंसाया अनर्थहेतुत्ववदनर्थहेतुत्व
मपि विधिनाबोध्यते इति न तस्याप्यनर्थहेतुत्वे श्येनादेस्त्वभिचारस्य
साक्षादेव निषेधान्सामग्र्यभिनोपदेशाच्चानर्थहेतुत्वावगमाविकावे न
च विधिनानवबोध्यते इत्युपपन्ने श्येनाग्नीषोमीयोर्वैलक्षण्यं औपनिषदे
स्तु भाट्टमेवदर्शने व्यवहारे प्रायेणावलंबितं तथा च भगवद्बादरायणा
चार्येणोक्तं अशुद्धमिति चेन्नशब्दादिति ज्योतिष्टोमादिकर्म अग्नीषो
मीयहिंसादिमिश्रितत्वेनाशुद्धमिति चेन्न अग्नीषोमीयं पशुमालभेतेत्या
दिविधिशास्त्रादिमतत्वार्थः जपशर्मापरत्वाकेनक्रत्वर्थहिंसायाः
धर्मत्वबोधकेन तत्र तस्या नाशुचित्वम् तथा च सांख्याभिमतो विहिते निषिद्धधर्म
चाधर्मत्व तानर्थहेतुत्वान्न ज्ञानमतं तु द्वेष्टेयान्नेष्टयत्वज्ञानेविप
र्यासद्भूपो मोहः तस्मान्मोहाच्चित्यस्य कर्मणस्त्यागः परित्यागः स तामसः
परिकीर्तितः मोहो हि तमः एवं क्रमो हाभावेपि ॥

सदानंदी टीका ॥ ॥

तदेवं कर्मतत्यागेपक्षानन्तरः स्थापितं मतं साङ्ख्यदोषवदित्यादिपरप
क्षनिराकृतिः १ कर्म मारभेत स्यागो वैविध्यमुक्तेनाहरिः कामस्य दो
षवत्वात्स्वत्यागः स्वद्वर्थिनोत्तमः २ नियतस्य कर्मणः शुद्धहेतुत्वे
नानवद्यस्य तु चित्तशुद्धर्थिनस्त्यागो मस्तु मोहो नैवोपपद्यते ३ धीशुद्धो।
शास्त्रशक्तिमान्मतत्वेष्टेयमस्तस्त्यागः कामस्यैवास्य नियतस्य दोषवत्वेनमं

श्री॰
गी॰ टी॰
म्र॰

34

भवेत् ४ पावनत्वापरिज्ञानत्यागो नियतस्य कर्मणः अवश्यमेव कर्त
व्यत्वत्रिस्मिनीर्षेणेन ५ अज्ञानान्नत्यपरित्यागस्तामसः परिकीर्तितः
६॥ ७ ॥

नीलकंठी टीका २ ॥

प्राकृयतिज्ञाते त्यागत्रैविध्यमाह नियतस्येति तुशब्दः पूर्वोक्तपक्ष
द्वयवैलक्षण्यार्थः यस्मादधिकृतस्य ममक्षो नियतस्यावश्यानुष्ठे
यस्य कर्मणः संन्यासः स्वरूपेण त्यागो नोपपद्यते नयुज्यते अज्ञस्य
शुद्ध्यपेतत्वात् एवं सति यो मोहादज्ञानात्तस्य [illegible] नियतस्य कर्म
णः परित्यागः स तामसः परिकीर्तितः आवश्यकं चानुष्ठाने चेति वि
प्रतिषेधात् ७ ॥

आनंदी टीका ३

त्यागस्यैव त्रैविध्ये न हेयोपादेयतामाह मोहान्मिथ्याज्ञानात्तामसः
उक्तयोनिष्प्राप्तिहेतुत्वेन तमोत्वेहत्वरित्यर्थः ७ ॥

रामकंठी टीका ४

चशब्दो हेतौ यस्मान्नियतस्य वर्णाश्रमविभागेन नित्यस्याव्यभिचारि
णः कर्मणो यज्ञादेः संन्यासस्त्यागो नत्वनुष्ठानं नोपपद्यते यथा
नोपपद्यते तथा न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः इत्या
दिना च वक्ष्यति प्रतिपादितमेव तस्यैवं विधस्य सर्वथैवावश्या
स्य कर्मणो मोहाद्विपर्ययलक्षणाद्धेतोर्विद्यात्यागः परिहारस्ता
स॰ मसस्तमोगुणसंभव उच्यते तमसो हि कार्यं मोहः यदुक्तं प्रमा
म॰ दमोहौ जायेते तमसो ज्ञानमेव च इति एवमयं तामसस्त्यागो विपरी
तफलपर्यवसायी यतोऽपवर्गबुद्ध्या प्रतिपन्नः संसारमेव फल
त्यतो हेय एवासौ [illegible] त्यागमाह ७ ॥

लासिकी [illegible] टीका

अत्र हेतुमाह कामं भवतु काम्यस्य कर्मणः संन्यासः नियतस्य तु वर्णाश्रम
विभागेन नित्यस्याव्यभिचारि[illegible] कर्मणो यज्ञादेः संन्यासस्त्या ए:७
गो नत्वनुष्ठानं नोपपद्यते शास्त्रयुक्तिभ्यां न घटते धीगतिहेतु
त्वात् तथा च शास्त्रं वृथैव वैः परित्यक्तं कर्मकांडमपंडितैः पा
खंडैः पंडितंमन्यास्ते यांति नरकं प्रियेऽइति युक्तिश्च न हि देहभृ

ताः शक्यं त्यक्तुं कर्माण्यशेषत इत्यादिनोक्तं च अथ प्रतिज्ञातं त्याग-
स्य त्रैविध्यं दर्शयति मोहादिति अद्वैतज्ञानपरिनिष्ठितज्ञानिदृष्टान्ते
न मोहाद्विपर्यासरूपात्तस्यात्याज्यस्य नियतस्य कर्मणः परित्याग-
स्तामसः तमःकार्यमोहजन्यत्वादधोगतिहेतुत्वाच्च तामसः परिकी-
र्तितः [illegible] ७

पंचोलीटीका

प्रतिज्ञातं त्यागत्रैविध्यमधिकारिणां तस्य मुक्ततोर्दर्शयितुमाह नियत
स्येति त्रिभिः पुनः नियतस्य नित्यस्य कर्मणः संन्यासः त्यागो नोपपद्यते
न घटते तस्य पावनत्वेनेष्टत्वात्तस्य मोहात्परित्यागः तामसः परिकीर्तितः ७

रणवीर समिद्धोधिनी॥

अधुना प्रतिज्ञातमेव त्यागस्य त्रैविध्यं दर्शयन्ननुष्ठानोपपत्तिप्रदर्श-
नपुरस्सरं तावत्तामसं तं प्रतिपादयति नियतस्येत्यादि यो हेतोर्य-
स्मान्नियतस्य वर्णाश्रमविभागेन व्यवस्थापितस्यात एव नित्यं व्यभि-
चारिणो यज्ञादेः कर्मणः संन्यासः परिहारो नोपपद्यते तत्र च न हि
कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृदित्यादिना न हि देहभृता शक्यं
त्यक्तुं कर्माण्यशेषत इत्यादिना च हेतुः प्रागुक्तः यस्मादेवं तस्मात्तस्य
नियतधर्मस्य मोहाद्धेतोः परित्यागकरस्य मोहस्य तामसत्वात्तामसः
तमोगुणसंभवः परिकीर्त्यते तामसत्वाच्चाधोगतिफलप्रवणहेतुरे-
वेत्यर्थः ७॥

मधुभाष्य

७॥

35

भाषा अनुवाद

अब इस श्लोक से देखावते हैं कि सकल काम्य कर्मों को बन्ध
करत हैं अर्थात् कामना करि किये कर्म बन्धन करते हैं इस
हेतु से उन का त्याग करना ही कर्तव्य है परंतु नियत कहे नि
त्यकर्मों का त्याग करना योग्य नही है क्यों कि नित्यकर्म स
त्वशुद्धि के द्वारा मोक्ष के साधन स्वरूप हैं इससे यद्यपि का
म्य का परित्याग करना ठीक है तो भी नित्यकर्म का त्याग मो
ह से ही होता अर्थात् तामस है क्यों कि मोह तमोगुण से हो
ता है इससे उस त्याग को शिष्ट लोगों ने तामस ही कहा है ७

दोहा

नित्यकर्मकात्यागहि कदा न करया होय ताकों त्यागहि
मोहसें तामसकहियत सोय ७ ॥

36

दुःखमित्येव यत्कर्म कायक्लेशभयात्त्यजे
त् स कृत्वा राजसं त्यागं नैव त्यागफलं लभे
त् ८ ॥ शाङ्करभाष्यटीका १ ॥

किंच दुःखमिति दुःखमित्येव यत् कर्म कायक्लेशभयात् श
रीरदुःखभयात्त्यजेत् स कृत्वा राजसं रजोनिर्वर्त्यं त्यागं नैव त्याग
फलं ज्ञानपूर्वकस्य सर्वकर्मत्यागस्य फलं मोक्षाख्यं न लभेन्नैव
लभेत ८ ॥ आनंदगिरिकृतटीका २ ॥

इतश्च नित्यकर्मत्यागो राजसः सम्भवतीत्याह किंचेति ननु मो
हं विनैव दुःखात्मकं कर्म कायक्लेशभयात्त्यजति करणानि हि
कार्यं जनयन्ति श्राम्यन्ति तथाच न तत्त्यागस्तामसोऽथ कस्तत्राह
दुःखमित्येवेति यत् कर्म दुःखात्मकमशक्यसाध्यमित्येवालो
च्य तन्निर्वर्तिते देहेन्द्रियाणां च क्लेशात्मनो भयात्त्यजति स त
त्यक्ता रजोनिमित्तं त्यागं कृत्वापि न तत्कृतं मोक्षं लभते किन्तु
कर्मैवं राजसेन त्यागेन तदनुरूपं नरकं प्रतिपद्यते इत्याह दुःख
मित्येवेत्यादिना मर्मत्यागस्तामसो राजसश्च निहितयोर्दर्शितः ८ ॥

स्वामिकृतटीका ३ ॥

राजसत्यागमाह दुःखमित्येवेति प्रकर्तीत्मबोधं विनाकेवलं दुः
खमित्येवेत्यात्वा शरीरायासभयात् नित्यकर्म त्यजेदिति यत्ताहश
स्त्यागो राजसः दुःखस्य राजसत्वात् अतस्तं राजसं त्यागं कृत्वा रा
जसः पुरुषस्त्यागस्य फलं ज्ञाननिष्ठालक्षणं नैव लभते इत्यर्थः
८ ॥

पिशाचभाष्यटीका ४ ॥

कर्मकायक्लेशभयाद्दुःखं दुःखतरमिति मत्वा त्यजेत्स राजसः राजसिभ
वः त्यागं कृत्वा नैव कृत्वा सर्वत्यागफलं मोक्षं न लभेत् ८ ॥

रामानुजभाष्यटीका ५ ॥

दुःखमिति यद्यपि परंपरया मोक्षसाधनभूतं कर्म तथापि दुःखा
त्मकं द्रव्यार्जनसाध्यत्वात् वाऽनेकयासबहुलतया कायक्लेशकरत्वा
च्च मनसोऽवसादकरमिति तदीयमाहात्म्यानभिज्ञतये ज्ञानाभ्यासप्रवृत्य
तनीयः इति यो महायज्ञाशुभकर्म परित्यजेत् स राजसत्यागोऽल्प
त्यागं कृत्वा तन्दूषयत्वा व्यवस्थितशास्त्रार्थरूपमिति ज्ञात्वा तन्निरूपं त्याग
फलं न लभेत् अयथावज्जानाति बुद्धिः सा पार्थ राजसीति वक्ष्यति
न हि कर्म दष्टहस्तेन मनः प्रसादहेतुः अपि तु भगवत्प्रसादहेतोः ॥ ८

अभिनवगुप्तकृतटीका ६ ॥

स्पष्टार्थं ८ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपाटीका ७ ॥

राजसं त्यागमाह दुःखमिति अथ कर्त्तीकर्म दुःखं वै दुःखसाध्यमिति
मत्वा कायक्लेशभयाद्यस्त्यजेत् स राजसं त्यागं कृत्वा ज्ञाननिष्ठा
लक्षणं त्यागफलं नैव लभेत् ८ ॥

वनमाली टीका ८

अथ तत्त्वचित्तशुद्धितया कर्माधिकृतोपि दुःखमेवेति मत्वा काय
क्लेशभयान्नित्यं कर्म यजेत स त्यागो राजसः दुःखं हि रजः अतः स
मोहरहितोपि राजसः प्रकृष्टसत्त्वांशे राजसं त्यागं कृत्वा नैव त्यागफ
लं सात्त्विकत्यागस्य फलं भगवज्ज्ञानं नैव लभेत् न लभते ८ ॥

जगन्मधेवजयंती टीका ९ ॥

राजसं त्यागमाह दुःखमित्येवेति यद्यपीदं यज्ञादिकं कर्मान्तःकर
णशुद्धिद्वारा ज्ञानभक्त्यादिसाधनजनकतया निष्कामतयानुष्ठि
तं संपरंपरया भक्तिहेतुरूपं स्यादिति जानन् तथापि दुःखं प्रातः
स्नानद्रव्योपार्जनादिदेहपरिश्रमेण दुःखरूपकमेव दुःखसर्जो
गुणाधर्मत्वात् न किंचित् सुखमित्येवं प्रकारेण कामक्लेशभयात् व
हुपरिश्रमतया देहक्लेशकरमिदमिति भयात् यत्कर्म महायज्ञा
दिरूपं त्यजेत् यः कश्चिद्रजोगुणान्वितः प्रकृष्टरजस्त्वात्
त्वा न कुर्यात् स राजसं रजोगुणान्वितं त्यागं कृत्वा त्यागफलं मोक्षं न लभेत्

न मूलज्ञानोत्पत्तिरूपंत्यागस्यफलंनैवलभेत् नैवप्राप्नुयात् किंतु संसारमेवपुनःपुनर्लभेदितिमेवकारेणाध्वनितम् ८ ॥

मधुसूदनी टीका १० ॥

+ पूर्वोक्तमोहाभावेपि ॥

+ अनुपजातोत्तःकरणशुद्धितयाकर्माधिकृतोपिदुःखमेवेदमिति मत्वाकायक्लेशभयात्त्रित्यकर्मपरित्यजेदिति यत्सत्यागोराजसः दुःखे हिराजः अतःसंमोहरहितोपिराजसत्वहेयोदर्शितः सपुरुषःतादृशे राजसंत्यागंकृत्वानैवत्यागफलंसात्विकत्यागस्यफलंज्ञाननिष्ठा लक्षणंनैवलभेत् ८ ॥

सदानंदी टीका ११ ॥

चित्तशुद्धिंविनायस्तुकर्मण्यधिकृतःपुमान् दुःखमित्येवदेहादा वभिरागितयाजडः १ मत्वाकर्मत्यजेत्कायक्लेशभीत्यागमोहि ते पूर्वोक्तमोहसूत्योपिराजसःसचपूरुषः २ तादृशंराजसंत्या गंकृत्वाज्ञानयोगपतो चित्तशुद्ध्यानचाप्नोतिसात्विकत्यागजे फलं ३ प्रत्युतत्यागतोवश्यंकर्तव्यस्यैवकर्मणः अस्यैवतिनतो मूढःसंसृतिनरकंव्रजेत् ४ अतोमुमुक्षुभिर्नित्यंनत्याज्यंप्यौवि शोधकं किंतुकार्यंस्वकर्मेतिश्रीहरेरयमाशयः ५॥८ ॥

नीलकंठी टीका १२ ॥

एवंतामसंत्यागमुक्त्वाराजसंत्यागमाह दुःखमिति यः दुःख रूपमेवेदंकर्मेतिमत्वाकायक्लेशभयात्त्यजेत् स उमानत स्मादेवहेतोःराजसंरजोगुणनिर्वृत्तंत्यागंकृत्वात्यागफलंचित्तशुद्धि द्वारामोक्षंनैवलभेत्लभेत ८ ॥

आनंदीटीका १३

दुःखमित्येव इदंसर्वथादुःखकरमितिज्ञानात् अत्रफलालाभ मेवनकिंतप्रत्यवायाप्तिरपीत्यर्थः ८ ॥

रामकंठीटीका १४ ॥

अथराजसंत्यागमाह ॥

श्री॰
गी॰ टी॰
अ॰
३८

यः पुरुषः शास्त्रचोदितं कर्म स्नानाग्निहोत्रादि दुःखं सत्स्वप्रतिकू
लमिदमित्येतावन्मात्राद्धेतोः शरीरकदर्थनत्रासात्त्यजति ना
नुतिष्ठति राजसं रजोगुणनिमित्तकं त्यागं नियतकर्मपरिहारं
कृत्वा नस्य त्यागस्यापवर्गभोगसुखलक्षणमभिहितं फलं नैव
प्राप्नुयात् रजोगुणयुक्तत्वान्नत्फलं दुःखमेवासौ लभते
ततो राजसो त्यागोपि हेय एव [illegible] सात्त्विकं त्यागमाह ८
लासिकी [illegible]टीका १५ ॥

तामसं त्यागमुक्त्वा राजसं त्यागमाह ॥
यत्कर्म दुःखं दुःखावहमित्येवं मत्वा कायक्लेशभयाच्छरीर
कदर्थनात्त्रासान्नित्यं कर्म यस्त्यजेदिति यत् पुरुषस्तादृशं रा
जसं त्यागं कृत्वा त्यागस्याहेतज्ञानधारााधिरूढयोगस्य॰
फलं मोक्षफलं नैव लभेतेत्यर्थः सात्त्विकं त्यागमाह ८

पंचोलीटीका

राजसं त्यागमाह दुःखमिति यत्कर्म दुःखं दुःखाकारमित्येव त्व॰
क्वा कायक्लेशभयात्त्यजेत् त्यागं करोति स राजसः त्यागः प्रमा
नेन राजसं त्यागं कृत्वा त्यागफलं मोक्षाख्यं न लभेत् ८ ॥

रत्नावीर समिद्धार्थिनी

राजसं त्यागमाह दुःखमेवेति यत्दुःखोत्पादकत्वात्सुख
प्रतिकूलमित्येतावन्मात्राद्धेतोः शरीरायासत्रासाद्धेतोः
कर्म शास्त्रचोदितं यज्ञादिलक्षणं स्वधर्मं यः पुमांस्त्यजेन्नानु
तिष्ठति स राजसः कारणस्य दुःखभयादेराजसत्वाद्रजोगुणसंभ
वं त्यागं विहितधर्माननुष्ठानलक्षणं कृत्वा त्यागस्य फलाभि
संधिमात्रपरिहारेण स्वधर्मानुष्ठानलक्षणस्य फलं भोगापव
र्गलक्षणं न लभेत् न प्राप्नुयात् आर्षं परस्मैपदित्वं अतः सोपि
हेय इतिभावः ८ ॥

भाषा अनुवाद

राजस त्याग को कहते है कि जो मनुष्य आत्मज्ञान विना केवल कर्म करना दुःख मात्र विचारिके शरीर के क्लेशके भय से नियकर्म त्याग करता है सो त्याग राजस है क्यों कि दुःख रजोगुण का धर्म है इसीसे राजस त्यागकारी रजोगुणी पुरुष को ज्ञान मे निष्ठा जो त्याग का फल सो कभू नही मिले है ८

दोहा

जान दुःख जो कर्मको तजें देहकष्ट भय सोय सो कहि रा
जस त्याग हि नहि त्याग फल लहें सोय ८॥

39

कार्य्यमित्येवयत्कर्म्मनियतंक्रियतेऽर्जु
न संगंत्यक्त्वाफलंचैवसत्यागःसात्वि
कोमतः ९ ॥ शांकरभाष्य टीका १ ॥

कः पुनः सात्विकस्त्यागः कार्य्यमिति कार्यं कर्त्तव्यमित्येव
यत् कर्म्म नियतं नित्यं क्रियते निर्वर्त्यते हेऽर्जुन संगं फ
लं च एव नित्यानां कर्म्मणां फलवत्त्वे भगवद्वचनं प्रमाणमवोचा
म अथ वा यद्यपि फलं न श्रूयते नित्यस्य कर्म्मणस्तथापि नित्यं क
र्म्म कृतमात्मसंस्कारं प्रत्यवायपरिहारं वा फलं करोत्यात्मन इ
ति कल्पयत्येवाज्ञस्तत्र तामपि कल्पनां निवारयति फलं त्यक्त्वे
त्यनेनातः साधूक्तं संगं त्यक्त्वा फलं चेति स त्यागो नित्यकर्म्म
सु संगफलपरित्यागः सात्विकः सत्वनिर्वृत्तो मतोऽभिमतः ९

आनंदगिरिकृत टीका २

संप्रति सात्विकं त्यागं प्रश्नपूर्वकं वर्णयति कः पुनरिति कर्त्त
व्यमित्येवेत्येवकारेण नित्यस्य भावान्तरं निषिध्यते नित्यानां
विध्युद्देशे फलाश्रवणात् तेषां फलं त्यक्त्वेत्ययुक्तमित्याशं
क्याह नित्यानामिति फलं त्यक्त्वेत्यस्य विधान्तरेण तात्पर्यमा
ह अथ वेति नहि विधिना कृतं कर्म्म अनर्थकं विधानर्थक्यात्ते
न श्रौतफलाभावेऽपि नित्यं कर्म्म विधितो नतिष्ठत्वात्मानम
जानन्नपहतमनस्कोऽज्ञस्तस्मिन् कर्म्मण्यात्मसंस्कारं फलं
कल्पयति तदकरणे प्रत्यवायस्तस्मात्तत्करणे कर्त्तुरात्मनस्त
न्निवृत्तिं करोतीति वा नित्ये कर्म्मण्यज्ञो कल्पनामनतिष्ठाप्य ट
त फलकल्पनां च फलं त्यक्त्वेत्यनेन भगवान्निवारयतीत्यर्थः नित्य
कर्म्मसु फलत्यागोक्तेः संभवे फलितमाह अत इति ९ ॥

^सात्विकत्यागमाह कार्यमिति ॥ स्वामिकृत टीका ३ ॥

^कार्यमित्येवबुद्ध्या नियतमवश्यकर्त्तव्यतया विहितं कर्म संगं

फलेचत्यक्त्वाक्रियतइतिनियतन्नित्यमाह शास्त्रात्ः सात्विकोमतः
न सात्विकत्यागी त्रिविधिः फलत्यागी ९ ॥

पिशाचभाष्य टीका ४ ॥

कार्यंकर्मकर्तव्यमित्येवयत्यज्ञादिनियतंनित्यंक्रियतेनिर्वर्त्यते संगंफलेस्नेहंतदाविद्यमानंसंगंफलंत्यागः सात्विकः सत्वनिर्हेतुः नियतंनित्यंकर्मसंगंत्यक्त्वाफलानिचत्यक्त्वायदाक्रियतेइतिईश्वरवचनान्नित्यकर्मणांसफलत्वंसिद्धं ९ ॥

रामानुजभाष्य टीका ५ ॥

कार्यमित्येवनित्यनैमित्तिकमहायज्ञादिवर्णाश्रमविहितंकर्ममदाराधनरूपतयाकार्यंस्वयंप्रयोजनमितिमत्वासंगंकर्मणिममतांफलंचत्यक्त्वायत्क्रियतेसत्यागस्सात्विकोमतः तत्वमूलः यथावस्थितशास्त्रार्थज्ञानमूलइत्यर्थः ननु सत्वंयथावस्थितज्ञानंउत्पादयतीत्युक्तं सत्वात्संजायतेज्ञानमिति प्रवृत्तिंचकार्याकार्येभयाभयेवेत्तियाबुद्धिःसापार्थसात्विकीति ९ ॥

अभिनवगुप्तकृत टीका ६ ॥

स्पष्टार्थं ९ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका ७

सात्विकंत्यागमाह कार्यमिति कार्यमवश्यकर्तव्यत्वेनशास्त्रविहितमेवमत्वानियतंनित्यं कर्मसंगंफलंचत्यक्त्वायत् क्रियतेसत्यागः सात्विकोमतः अत्रेदमुक्तंभवति वेदबोधितस्यकर्मणः प्रयोजनद्वयंदर्शितमस्तिस्वर्गादिप्राप्तिः संसारानर्थपरिहारश्च तत्रेष्टप्राप्तिर्मीनस्यवडिशामिषग्रासिरिवडः खगर्भीस्तवेनावस्थानमेवानर्थपरिहारः तयोश्चोभयोर्मध्येआवश्यकत्वेनकिमनुष्ठेयमितिविचारेऽनर्थपरिहारएवानुष्ठानंश्रेयानितिभगवतोहार्दं ९ ॥

वनमाली टीका ८ ॥

नियतंनित्यंकर्मविविधाकोफलाश्रवोऽपिकार्यंकर्तव्यमेवेतिबुद्ध्या नित्यंनित्यंकर्मसंगंकर्तृत्वाद्यभिनिवेशंफलंचत्यक्त्वैवयत्क्रियतेस

त्यागः सात्विकस्तत्वविद्भिर्मतः ननु नित्यानां फलमेव नास्तीति
कथं फलं त्यक्त्वेति चेत् उच्यते यद्यपि भगवद्वाक्यादेव नित्यानां फल
मस्तीति गम्यते नित्यः फलस्यानुष्ठाना संभवात् तथावापस्तंभः त
आत्मे यथा फलार्थिनि मित्तेच्छायागेषु स्मृतमुच्यते एवं यमेव वर्षमाणमत्थी घ
त्य त्रनूयते तस्माद्वैदिके फले नित्यानां दर्शयति ९ ॥

ऊसमैवैजयंती टीका ९ ॥

सात्विकं त्यागमाह कार्यमित्येवेति भगवदाराधनमित्येनेमित्तिक
महायज्ञादिरूपमन्यमिदं कर्म कार्यमेवमयावश्यकर्तव्यमेवमित्य
मेव नत्वन्यमिति वेष्प्रकारेण हेतु जनन्निपत्तव्यर्णाश्रमोचितं तत्या
शास्त्रविहितं यत्कर्म नियमेन क्रियते किं कृत्वा संगं कर्म
णि ममताकर्तृत्वाभिनिवेशं च चकृतः फलमिह कामुष्मिक भोग।
रूपं सर्वं त्यक्त्वा परित्यज्य एवंकारानन्त्यत्त्वाभिमाने कृत्स्नतरदेवोपा
सनेन त्यक्त्वा सर्वविहत्वा त्यागः सात्विकस्तत्वावृज्ञायते ज्ञानमित्युक्त
प्रकारेण प्रवृत्तिं च निवृत्तिं च कार्याकार्यभयाभये बंधमोक्षं च यावे
त्ति बुद्धिः सापार्थ सात्विकी निबध्यमाणप्रकारेण च ज्ञानस्य सत्त्वज
सत्वात्तत्कृतत्यागोपि सात्विक इत्यर्थः ममनिश्चितमेतमतः
श्रुतेन श्रुतमतत्वज्ञानात्मवेद्रूशे त्यागो नास्तित्यायासइ तिसूचितं ९

मधुसूदनी टीका १० ॥

विप्रुदेशे फलाश्रवणेपि कार्यं कर्तव्यमेवेति बुद्ध्वा नियतं नित्यं कर्म
संगं कर्तृत्वाभिनिवेशं फलं च त्यक्त्वैव यत्क्रियते तेः कारणैर्हि प
र्यंते स त्यागः सात्विकः सत्त्वनिर्वृत्तो मतस्तत्वद्र्यत्वेन सम्मतः शिष्टा
नां ननु नित्यानां फलमेव नास्ति कथं फलं त्यक्त्वेत्युक्तमुच्यते यद्यपि
देव भगवद्वचनान्नित्यानां फलमस्तीति गम्यते निष्फलस्यानुष्ठाना
संभवात् तथापापस्तंभः नयथाश्चाभ्रफलार्थैनिमित्तेच्छायाग
ये स्मरन्त्यपेते एवं यमेवर्यमाणमर्थ्यार्थमनूद्यते तस्मात् वैदि
के फले नित्यानां दर्शयति श्रुकरणे प्रत्यवायस्मृतिश्च नित्यानां प्रत्य
वायपरिहारं फलं दर्शयति धर्मेण पापमपनुदतीति तस्मादहं मेप
मेवं दर्शितेयन केनचयजनापिवादविहोमेनानुपदनेमनापवम

श्री॰
गी॰टी॰
अ॰

वति तदाहुर्देवयाजी श्रेयानात्मयाजी इत्यात्मयाजीति स्वयात्म
हवा आत्मयाजी यो वेदेदं मेऽनेनांगं संस्क्रियत इदं मेऽनेनांगमुपधी
यत इत्यादि श्रुतयश्च ज्ञानप्रतिबंधकपापक्षयलक्षणां ज्ञानयो
ग्यतां पूर्वपूर्वोपात्तितलक्षणां वा आत्मसंस्कारं नित्यानां कर्मणां फ
लं दर्शयंति तदभिसंधिपूर्वकाणामनुष्ठेयानां मध्ये यदुक्तं त्या
गसंन्यासशब्दौ च घटपटशब्दाविव न भिन्नजातीयार्थौ किंतु फ।
लाभिसंधिपूर्वककर्मत्यागपर्वतयोरर्थ इति तत्तत्र विस्मर्तव्यं तत्र
सत्यपि फलाभिसंधौ मोहाद्दुःखाद्वा कायक्लेशभयाद्वा यः कर्मत्यागः
स विशेषणाभावकृतो विशिष्टाभावस्तामसत्वेन राजसत्वेन च निर्दि स^
ष्टः यस्तु सत्यपि कर्मणि फलाभिसंधित्यागः स विशेषणाभाव
कृतो विशिष्टाभावः सात्त्विकेन रूपेण इति विशेषणाभावकृते वि
शेषणाभावकृते च विशिष्टाभावत्वमप्यसमानं नात्र द्वैधापरविरो
धः उभयाभावकृतस्तु निर्गुणत्वान्न त्रिविधमध्ये गणनीय इति
चावोचाम एतेन त्यागो हि पुरुषव्याघ्र त्रिविधः संप्रकीर्तित इति
प्रतिज्ञाय कर्मत्यागलक्षणोद्देशविधे दर्शयित्वा प्रतिज्ञातं त्रैरूप्यं क
र्मानुष्ठानलक्षणान्तरीयविधां दर्शयतो भगवतः प्रकटमकौश
लमापतितेन हि भवति त्रयो ब्राह्मणा भोजयितव्या इति कथं कौ
ण्डिन्योऽन्तरीयः स्याद्विय इति तद्वदिति परास्तं निरूपणमपि विधानां
विशिष्टाभावरूपेण त्यागसामान्ये नैकजातीयत्वत्याप्राक्ख्या।
ख्यातत्वात् तस्माद्भगवदकौशलोद्भावनमेव महदकौशलमि
ति दृष्टव्यं सात्त्विकत्यागमादौ गायसन्तपूर्वहिंद्वारेण ज्ञानानि
फलमाह ४ ॥ मधुसूदनी टीका ९

सदानंदी टीका ९ ॥

नाम मोराजसोहेयः कर्मत्यागस्त्वदर्शितः कीदृशः पुनरादेयः
सात्त्विकस्त्याग उच्यते १ अवश्यकार्यमेवेति बुद्ध्या शास्त्रविधे
र्वशात् न कर्तृत्वाभिनिवेशाद्धि संगत्यक्त्वा फलं तथा २ नित्य
नैमित्तिकं कर्म क्रियते सततं हृदये आदेयत्वेन शिष्टानां स त्यागः
सात्त्विको मतः ३ नत्वनात्मैव नित्यानां फलस्यानेकेति तत्त्वकथ्यतु

क्रमिमप्यत्रचतुर्थम्: श्रीमद्भागवतोक्तेः ४ वाक्यादेवफलेतेषांमत्ती
त्यैवेहिगम्यते यतोननिष्फलस्यास्तित्र्हिसर्वमन्तुष्टेतिः ५ क
र्मणांपित्र्लोकःस्यादिमान्विकात्वाक्यातः श्रवणपफलमत्याव
गतिष्यादिवकर्मणां ६ नित्यानामनवष्टानेप्रत्यवायस्तितस्त
था प्रत्यवायदत्त्येतेषांफलेस्मर्दशीयमतः ७ यमेणापापमित्यादि
ष्कतयोर्दर्शयन्नपि साक्षात्फलविधिःश्रहिर्नित्यानामत्तंवगीक ८
पित्र्लोकादिमत्वाज्ञिःप्रत्यवायदत्तयत्नया मोहाद्दात्क्लेशभीत्यावा।
फलांसंगेचसत्यपि ९ नित्यकर्मपरित्यागःक्रियतेयोऽविपश्चिता स
त्यागस्तामसस्तेनराजसस्त्वेननिंदितः १० फलाभिसंधिसंत्यागोयस्तु
कर्मणांसत्यपि स्वरूपेनसात्विकत्वेनसंत्यागःसमशोधकः ११॥९॥

नीलकंठी टीका ॥ ९ ॥

एवंद्वाभ्यांश्लोकाभ्यांतामसराजसौत्यागावुक्तौ तामस।
राजसयोरप्युभयोस्त्यागयोरसंभवस्यापरित्यागइतिकायक्लेशभया।
त्यजेदितिवसूचनात् नह्येवंसंभवति मूढस्यकरोतिचेत्तिविप्रति
षेधात् यदिकरोतिनैवमूढः यदिमूढस्तर्हिनैवकरोति एवंयदि
कायक्लेशाद्विभेतिनैवकरोति यदिकरोतिनैवकायक्लेशाद्विभे।
तितस्मात्करोतिचकायक्लेशाद्विभेतिचेतिविप्रतिषिद्धं अतस्ता
मसराजसयोरप्युभयोस्त्यागयोरसंभवात्तेनैवोक्तौ सात्विकस्त्वयंत्य
त्यागःसंभवति यथास्फटिकेजपाकुसुमाश्रितेलौहित्यंविवेकि
नोप्रतीतिनएवास्तिनवस्तुतएवमात्मनिईश्वराधीनेविवेकिनांक।
र्तृत्वप्रतीतिनएवास्तिनवस्तुतइतिवक्ष्यमाणएवंचकर्तृत्वाभिनि
वेशशून्यः शुमान्प्रतीतिनःकरोत्येवनवस्तुतइतिसंभवत्यस्तु
पिसात्विकस्त्यागइतितमेवमस्तुत्यागापिकारहेतुंप्रथममाह का
र्यमिति कार्यकर्तव्यमित्येवयत्कर्मनियतंनित्यंक्रियतेहेअर्जुन
संगंफलंचत्यक्त्वैवसर्वथाराणमाश्रुकस्यात्यागपदस्याहत्यर्थ
सएवंभूतस्त्यागःसात्विकोमतः वेदेदृष्टः तथाचश्रुतिः ईशावा
स्यमिदंसर्वंयत्किंचजगत्यांजगत् तेनत्यक्तेनभुंजीथामागृधःक
स्यस्विद्धनमितिईशाईशेनपरमेश्वरेणसर्वकार्यकरणकर्त्रात्मप्रवर्त

केनइदंजगत्स्थावरजंगमंजगतोब्रह्मोऽस्थितेवासमाच्छादितं
यामे येनदेहेननासर्वंजदर्थीनेतेनकारणेनमत्केनत्यागेनकर्तृत्वभो
रूढ्याभिमानवर्जनेनभेजीष्याविषयान्भेद्व मागृधः गर्ह्यमाका।
धीः कस्यचिद्धनेनकस्यापिनचस्वामित्वमस्तीतिहे एवंतत्रगर्हेश्वम
धीः एवंकर्माण्यपियज्ञादीनिकर्तृत्वाभिमानेनमत्काकुर्वन्तस्त्वक
र्मलेपोनभविष्यति एतद्व्यतिरेकेणनवर्तुपायान्तरंचनास्तीमृत्युम
र्थेनप्रदर्शयते कुर्वन्नेवेहकर्माणिजिजीविषेच्छतंसमाः एवंत्वयि
नान्यथेतोऽस्तिनकर्मलिप्यतेनरइति इदमेवमत्राभिसम्मतंभगवतात्र
दर्शितं एतान्यपितुकर्माणीतिश्लोके नन्वनिसानोफलमेवना।
स्तिकिंत्यक्तव्यमितिचेत् इतएवभगवद्वचनात्तेषामपिफलमस्ती।
तिजानीहि निष्फलस्यवेदेनाद्युपनासंभवात् तथाचापूर्ववत्स
प्यात्मफलार्थीनिमित्तेच्छायागेपरंतन्नस्ययेन एवंपमेवचयमाणा
मर्थाश्रन्तत्यतइतिआनवेगिकफलेनिमानादर्शयति प्रकरणा
प्रत्यवायस्यसायितेषांप्रत्यवायपरिहारः फलमितिमर्दयते धर्मो
णापापमपनुदतीत्यादिनाचनिषेधपिकर्मस्वफलंदर्शयतेनतदेव
वक्तव्यमितिनकोऽपिदोषः ९ ॥

आनंदीटीका १२

अथोपादेयमाह संगलाभइत्यादयोयथार्थिंदृष्टम् फलमदृ
ष्टंस्वर्गादिकम् ९ ॥

रामकंठी टीका १४

+ अथोपादेयंसात्विकंत्यागमाह॥

+ससात्विकोज्ञानफलसत्वगुणहेतुकस्त्यागोऽभिमतः कोऽसौ
यन्नियतंशास्त्रचोदितंकर्मक्रियतेअनुष्ठीयते कर्मणःकरणमे
वत्यागेनपरिहारइत्यर्थः कथंक्रियतेयेनक्रियैवत्यागःसंप
द्यते इत्याह कार्यंपरमगुरोःपरमेश्वरस्यनिरुपमत्वप्रमाणभू
तशास्त्ररूपवचनचोदितत्वादवश्यकरणीयमित्येतेनहेतुना
क्रियतेतथवश्यंव्याख्यातंसंगंफलंचमत्का किमनेनोक्तंभवति
अनुपपन्नत्यागस्यापिकर्मणोरजस्तमोऽभिभूतत्वादत्यागपिसा
गमतियतिः संगफलाभिसंधानच्छेदात्कर्मचसंसारकारणं

संपद्यते विशुद्धसत्वगुणोदेकान्नयथोक्तज्ञानवैर्मल्येसतिसंग
फलाभिसंधिशून्यत्वेननियतस्यकर्मणोनुष्ठानमेवसंसारोच्छे
दकारणंत्यागःसंपद्यतेइतिसात्विकएवत्यागउपादेय[illegible]
वैविधसात्विकस्यत्यागिनःस्वरूपंप्रतिपादयितुमाह ९ ॥

लासिकी[illegible]टीका

सात्विकंत्याग
माह संगंतद्धीनचिन्तत्वंफलंचत्यक्त्वानित्यंस्वरूपप्रतिष्ठतया
परिहार्यकार्यमवश्यकर्तव्यमितिनियतंशास्त्रचोदितंनित्यक नदि
र्मक्रियतेइतियत् सतादृशस्त्यागःसात्विकोमतः अर्थैवंवि
धस्यसात्विकस्यत्यागिनःस्वरूपंप्रतिपादयति ९

पंचोलीटीका

सात्विकत्यागमाह कार्यमिति हेअर्जुनयत्कर्मकर्मणिसंगंप्री
तिंफलंचत्यक्त्वाकार्यंकर्तव्यमित्येवबुद्ध्यानियतंनित्यंकर्मक्रियते
सत्यागःनित्यकर्मणिफलसंगत्यागात्सात्विकोमतः ९

रत्नावीरसमिद्धोधिनी॥

अथोपादेयंसात्विकंत्यागमाह कार्यमित्येवेति सत्यागःसा
त्विकःसत्वेनविशुद्धेननिर्दिष्टत्वादुपादेयोमतःकोसौ यन्नि
यतंशास्त्रचोदितंकर्मस्ववर्णाश्रमोचितंक्रियतेनुष्ठीयतेको
र्थःनियतकर्मस्वीकारएवत्यागइति कथंस्वीकारस्यत्यागत्वं
नहिरुद्धमुपपद्यते इत्यतोनुष्ठानंविशिनष्टिकार्यंपरमेश्वराज्ञ
म्मेतदवश्यमाचरणीयमित्यनेनैव हेतुनापूर्वोक्तलक्षणंसंगं
फलंचत्यक्त्वायदनुष्ठीयतेइति संगफलाभिसंधिराहित्येननि
यतकर्मानुष्ठानमुक्तवक्ष्यमाणप्रयासस्यफलकत्वेनोपादेयः
सात्विकत्यागइतिभावः ९॥

मधुभाष्य

९॥

43

116

भाषाअनुवाद ॥

अब सात्विकरूप त्याग कहतेहैं कि हे अर्जुन कर्म्मसब कर्त्तव्यहैं ऐसे विचार से नियत कहे अवश्यकर्त्तव्यरूप विहित कर्मों को कर्त्तव्य अभिनिवेश कहे अहंकारहि औ फल की कामनारहितजो त्यागकरना सोसात्विकत्यागहै ९ ॥

दोहा

करणा योग्य है कर्म यह नित्यकरहे नरजीव संगत्या
गफलकोतथात्यागहसात्विक होय ९॥

नद्वेष्ट्यकुशलं कर्म कुशले नानुषज्जते
त्यागी सत्वसमाविष्टो मेधावी छिन्नसंश
यः १० ॥ शांकरभाष्यटीका १ ॥

न य कर्मणि परित्यागस्त्रिविधः सन्यास इति च प्रकृतस्तत्र ताम
सो राजसश्चोक्तस्त्यागः कथमिह संगफलत्यागस्तृतीयत्वेनो
च्यते यथा त्रयो ब्राह्मणा आगतास्तत्र षडंगविदौ द्वौ क्षत्रियस्तृ
तीय इति तद्वत् नैष दोषस्त्यागसामान्येन स्तुत्यर्थत्वादस्ति हि
कर्मसन्यासस्य फलाभिसन्धित्यागस्य च त्यागत्वसामान्यन्त
त्र राजसतामसत्वेन कर्मत्यागनिन्दया कर्मफलाभिसन्धित्या
गः सात्विकत्वेन स्तूयते स त्यागः सात्विको मत इति यस्त्वधिकृ
तः संगं त्यक्त्वा फलाभिसन्धिंच नित्यं कर्म करोति तस्य फलरा
गादिना अकलुषीक्रियमाणमन्तःकरणं नित्यैश्च कर्मभिः सं
स्क्रियमाणं विशुध्यति तत् विशुद्धं प्रसन्नमात्मालोचनक्षमंभ
वति तस्यैव नित्यकर्मानुष्ठानेन विशुद्धान्तःकरणस्यात्मज्ञाना
भिमुखस्य क्रमेण यथा तन्निष्ठा स्यात्तद्वक्तव्यमित्याह नद्वेष्टि अकु
शलं अशोभनं काम्यं कर्म शरीरारम्भद्वारेण संसारकारणं किम
नेनेत्येवं कुशले शोभने नित्ये कर्मणि सत्वशुद्धिज्ञानोत्पत्तितन्निष्ठा
हेतुत्वेन मोक्षकारणमिदमित्येवं नानुषज्जते तत्रापि प्रयोजनम
प्रपन्नत्वात् प्रीतिं न करोतीत्येतत् कः पुनरसौ त्यागी पूर्वोक्तेन
संगफलपरित्यागेन तद्वांस्त्यागी यः कर्मणि संगं त्यक्त्वा तत्फलं च
नित्यकर्मानुष्ठायी स त्यागी कदा पुनरसावकुशलं कर्म न द्वेष्टि कु
शले च नानुषज्जत इत्युच्यते सत्वसमाविष्टो यदा सत्वेनात्मानात्म
विवेकविज्ञानहेतुना समाविष्टः संव्याप्तः संयुक्त इत्येतत् अत एव
च मेधावी मेधयात्मज्ञानलक्षणया प्रज्ञया संयुक्तस्तदा मेधावी
मेधावित्वादेव छिन्नसंशयः छिन्नोऽविद्याकृतः संशयो यस्यात्म

श्री
गी॰टी॰
श्र॰

स्वरूपावस्थानमेव परं निःश्रेयससाधनं नान्यत् किंचिदितीमं
निश्चयेन छिन्नसंशयः १० ॥

आनंदगिरिकृतटीका २

कर्म्मतत्फलरागस्य त्यागस्यासशाह्यस्यो प्रकृतस्य त्यागो।
हीति त्रैविध्यं प्रतिज्ञाय प्रतिज्ञाविरोधेन द्विविधे बुध्याद्य तृती
यो विधान्तर्हि विरोधेन बुध्यादयतो भगवतोऽकौशलमापतितमि
ति शंकते नन्विति प्रक्रमप्रतिकूलमुपसंहारवचनमनुचितमि
मत्र दृष्टान्तमाह यथेति पूर्वान्तरविरोधेन शासमकौशलं प्रस्ता
दिशति नैष दोष इति कर्म्मत्यागफलत्यागयोस्त्यागत्वेन सादृश्या
५त्या त् कर्म्मत्यागनिंदया तत्फलत्यागस्तुतिमिदं वचनमित्युपगमात्
न विरोधोऽस्तीत्युक्तमेव व्यक्तीकर्त्तुं त्यागसामान्ये विशद
यति अस्तीति सति समासे निर्दिष्टस्य स्तम्यर्थत्वं समर्थ्ययते तत्रे
ति एवं पूर्वापरविरोधं परिहृत्य अनन्तरश्लोकतात्पर्यमाह य
स्त्विति फलरागादिनेत्यादिशब्देन कर्म्मस्वरूपासङ्गो गृह्यते अ
न्तःकरणमकलुषीक्रियमाणमितिच्छेदः विशुद्धेऽन्तःकरणे किं
स्यादित्याशंक्याह विशुद्धमिति मलविकलत्वं विशुद्धत्वं संस्कारत्वं
प्रसन्नत्वमिति भेदः क्रमेण श्रवणाद्याहृतिद्वारेणोपर्थ्यः तन्निष्ठे
त्यात्मज्ञाननिष्ठोक्ता काम्यकर्म्मणि त्याज्यत्वेन द्वेषमभिनयति
किमिति उभयत्र द्वेषं प्रीतिं च न करोतीति सामान्येनोक्तं कर्त्तारं
प्रश्नपूर्वकं विशेषतो निर्दिशति कुत इति त्यागी तूक्तं त्यागिन
मभिव्यनक्ति पूर्वोक्तेनेति कर्म्मणि संगस्य तत्फलस्य च त्यागेने
त्याचावत् उक्तमेव त्यागिनं विवृणोति यः कर्म्मणीति तत्फले च
त्यक्तेति सम्बन्धः काम्ये निषिद्धे च कर्म्मणि बन्धहेतावीति न द्वेष्टि नि
त्ये नैमित्तिके च मोक्षहेतावीति न प्रीयते तत्र कालविशेषं इच्छति
वेदेति नित्यादिकर्म्मणां फलाभिसन्धिवर्जितेनानुष्ठितेन कल्मष
प्रक्षये यथार्थग्रहणसमर्थमन्तःकरणे तेन समाविष्टदशायाम
कर्मणीति द्वेषयोरभावो भवतीत्याह उच्यत इति चतुर्थपादं व्याक

रोति अतएवेति सम्यग्दृश्यार्थग्रहणसामर्थ्यं सत्त्वसमाविष्टत्वाद्धिय
धीः छिन्नसंशयत्वमेव विशदयति आत्मेति परानिःश्रेयससाधनस्य च सा
धने सम्यग्ज्ञानमेवेतियोजना १० ॥

+एवंभूतसात्त्विकत्यागपरिनिष्ठित स्वामिकृतटीका ३ ॥

सलक्षणं ॥
+नद्वेष्टीति सत्त्वसमाविष्टः सत्त्वेनसंव्याप्तः सात्त्विकत्यागीअकुशले
दुःखावहे शिशिरेप्रातःस्नानादिकंकर्मनद्वेष्टि कुशलेचसुखकरे
कर्मणिनिदाघेमध्याह्नस्नानादौ नानुषज्जतेप्रीतिंनकरोतितत्रहेतुः
मेधावीस्थिरबुद्धिः यत्रपरापरिभवादिमहदपिदुःखंसह्यते स्वर्गादि
सुखंचत्यज्यते नतुकियदेतत्तात्कालिकंदुःखंसुखंचेत्येवमनुसं
धानवानित्यर्थः अतएवछिन्नः संशयोमिथ्याज्ञानंदैहिकसुख
दुःखयोरुपादित्सापरिजिहीर्षालक्षणंयस्यसः १० ॥

पिशाचभाष्यटीका ४ ॥

नद्वेष्टिनकुप्यतिअकुशलेदुःखसाधनेकर्मणिहेमंतेप्रातःस्नाने
सुखसाधनेपितस्मिन्नेवकालेअग्निसेवादौनानुषज्जतेत्यागीक।
र्मफलानांसत्त्वसमाविष्टः सात्त्विकीमेधावीविवेकीअतएवछि
न्नसंशयः सत्त्वशुद्ध्यर्थंनित्यानिकर्तव्यानिनिश्चयात् १० ॥

रामानुजभाष्यटीका ५ ॥

नद्वेष्टीति एवंसत्त्वसमाविष्टोमेधावीयथावस्थिततत्त्वज्ञानःअतए
वछिन्नसंशयःकर्मणिसंगफलकर्तृत्वत्यागीनद्वेष्टिअकुशलंकर्मकु
शलेचकर्मणिनानुषज्जति अकुशलंकर्मानिष्टफलंकुशलंचक
र्मेष्टरूपस्वर्गपुत्रपश्वान्नादिफलंसर्वस्मिन्कर्मणिममतारहि
तत्वसंगरहितत्वातितिक्षसर्वफलत्वात्स्वकर्तृत्वाच्चतयोःक्रियमा
णयोःप्रीतिद्वेषौनकरोति अनिष्टफलंपापंकर्मात्रप्रमादिनमभि
प्रेत्यनाचारतोदुश्चरिताच्चाशांतोनासमाहितः नाशांतमनसोवापि।
प्रज्ञानेनैनमाप्नुयादितिदुश्चरितावृतेज्ञानोत्पत्तिविरोधित्वश्रवणात्
अतः कर्मणिकर्तृत्वसंगफलानांत्यागः शास्त्रीयत्यागः नकर्मस्वरू
पत्यागइत्याह १० ॥ अभिनवगुप्तकृतटीका ६ ॥

स्पष्टार्थं १० ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥:

परमार्थप्रपा टीका ७ ॥

शुद्धे वे भूत सात्विकत्यागपरिनिष्ठितस्य लक्षणमाह नद्वेष्टीति
सत्वरजस्तमस्कः सत्वसत्वेन समाविष्टः प्रविष्ट एवं विधस्त्यागी अकु
शले देहपीडाकरे कर्म न द्वेष्टि एतत् कार्यमिति न मनुते तथा कुशले
निर्दोषेन ध्यानस्नानस्वदेहसुखावहे कर्मणि नैव सज्जते एतत् सुखक
रमिति प्रीतिं न कुरुते अत एवैकाय क्लेशभयात्यजेदित्यादिवद्राजसादि
भेदर्शिते यतो मेधावी बुद्धिमान् दैहिकसुखदुःखेषु समममानः प्र
तएवमनसावलत्वेन नछिन्नसंशयः १० ॥

वनमाली टीका ८ ॥

त्यागी सात्विकत्यागयुक्तः संगफलेछांच सत्यक्त्वा चित्तशुद्ध्यर्थे कर्मा
नुष्ठाता यदा सत्वसमाविष्टः सत्वेनात्मानात्मविवेकज्ञानहेतुनाविनग
तेनातिशयेन ज्ञानप्रतिबंधकरजस्तमोमलराहित्येनासत्वमेतात्फ
लाच्छाभिचारेणाविशेष्याप्तो भवति भगवदर्पितकर्मानुष्ठानान्निर
स्तसमस्तज्ञानोत्पत्तिप्रतिबंधकरस्यर्थः तदा मेधावी श्रवणम
नननिदिध्यासनादिजन्मा भगवद्विषयकापरोक्षधीर्मेधा तया ति
युक्तो भवति तदा भगवत्तत्वे छिन्नसंशयः तदानीं दुःखकर्मत्वात्
नद्वेष्ट्यकुशलं कर्म अशोभनं काम्यं निषिद्धं वा न प्रतिकूलतया म
त्वाकुशले शोभने नित्ये नानुषज्जते न प्रीतिं करोति यद्वा अकुश
ले दृष्टदुःखे शीते प्रातःस्नानादिके कुशले सर्वजन्मकृत ग्र
णप फले नुसज्जते शेषं प्राग्वत् १० ॥

अस्मदैवजयंती टीका ९ ॥

ननु सात्विकत्यागी कीदृशो भवतीत्यपेक्षायां तस्य लक्षणमाह न
द्वेष्टीति सत्वसमाविष्टः सत्वगुणेन सम्यगाविष्टो व्याप्तः यद्वा सत्व
मेतत्करणं मनस्तेन सम्यगाविष्टोऽत्यन्तस्थिरमना इत्यर्थः एवंभू।
तो यतो मेधावी यथार्थविदत एवात्मस्वरूपज्ञानी अत एव छिन्नसंश
यः जीवेशयोरैक्यमधिकमेदो वा स्वाभाविको वा मायामिथ्या वा
सत्यो वा जगत् नित्यमनित्यं वा जगत्कारणं किं कालो वा परमाणवो वा
प्रकृतिर्वा जीवो वेश्वरो वेत्याद्यनेकरूपाः छिन्नाः संशया यस्मात् त
थाभूतः ईदृशस्त्यागी अकुशले दुःखदे शीतकाले प्रातःस्नानादिरूप

कर्मनद्वेष्टिकुशलेशीघ्रमथ्यान्हस्नानादिरूपेसर्वदेकर्मणिना
नुसज्जते आग्रहंनकरोति १० ॥ + सात्विकस्यत्यागस्यादानायसत्वशुद्धिद्वारेणज्ञाननिष्ठाफलमाह॥

मधुसूदनी टीका १० ॥

+ यस्त्यागीसात्विकेनत्यागेनयुक्तः पूर्वोक्तेनप्रकारेणकर्तृत्वा।
भिनिवेशफलाभिसंधिचत्यक्तान्तःकरणशुद्ध्यर्थंविहितकर्म
मनुष्ठायीसयदासत्वसमाविष्टः सत्वेनात्मानात्मविवेकज्ञान
हेतुनाचित्तगतेनातिशयेनसम्यग्ज्ञानप्रतिबंधकरजस्तमो
मलराहित्येनसमावेशात् फलाऽव्यभिचारेणसमाविष्टोव्या
प्तोभवतिभगवदर्पितनित्यकर्मानुष्ठानात्पापमलापकर्षणल
क्षणेनज्ञानोत्पत्तियोग्यतारूपसत्वगुणाधानलक्षणेनचसं।
स्कारेणसंस्कृतमन्तःकरणंयदाभवतीत्यर्थः तदामेधावीश
मदमसर्वकर्मोपरमगुरूपसदनादिसामवायिकांगयुक्तेनम
ननिदिध्यासनाख्यफलोपकार्यंगयुक्तेनचश्रवणाख्येनवेदा
न्तवाक्यविचारेणपरिनिष्पन्नेनवेदान्तमहावाक्यकरणकेनिरस्त
समस्तप्रमाणप्रमेयादिशोकाकलंकेचिदात्मविषयकमहंब्रह्मास्मी।
तिब्रह्मात्मैक्यज्ञानमेवमेधातयानित्ययुक्तोमेधावीस्थितप्र
ज्ञोभवति तदाछिन्नसंशयः अहंब्रह्मास्मीतिविद्यारूपया
मेधयातदविद्योच्छेदेतत्कार्यसंशयविपर्ययशून्योभवतित
दाचक्षीणकर्मत्वाद्द्वेष्ट्यकुशलंकर्म अशोभनंकाम्यंनिषि
द्धंवाकर्मनप्रतिकूलतयामन्यते कुशलेशोभनेनित्येकर्म
णिनानुषज्जतेनप्रीतिंकरोतिकर्तृत्वाद्यभिमानरहितत्वे
नकृतकृत्यत्वात् तथाचश्रुतिः भिद्यतेहृदयग्रंथिश्छिद्य
न्तेसर्वसंशयाः क्षीयंतेचास्यकर्माणितस्मिन्दृष्टेपरावरे
इति यस्मादेवंसात्विकस्यत्यागस्यफलंतस्मात्महतापिप्रय
त्नेनसएवोपादेयइत्यर्थः [illegible]देवमात्मज्ञानवतःसर्वकर्म
त्यागः [illegible]
[illegible]त्यागसंभवेहेतुमा[illegible] १० ॥

सदानंदी टीका ११ ॥

श्री॰
गी॰टी॰
मु॰

47

सात्विकस्त्यागश्चादेयः सत्वशुद्ध्यात्मलब्धये इत्यकेनफलेत्यक्ते
निष्ठामाहाधुनाहरिः १ यस्त्यागो सात्विके नैव त्यागेन युतउत्तमः
त्यक्त्वा फलाभिसंधिं च कर्तृत्वाभिनिवेशनं २ यो शुद्धो विहितं क
र्म कुर्वन्भगवदर्पणं तत्प्रसादात्मधीशुद्धिस्तया सन्न्यासाधिकारिता
३ सत्वेन तत्व विज्ञानं देहनभूतेन संयुतः वैराग्यसहिवेकादियोगिना
सर्वकेन च ४ शुभेदिष्या विपर्येत्त्वे रोतवर्वसाः सदा विचारेण स
निष्पन्नाहेवत्वासीतियामतिः ५ सामेधायत्तयानिसंशुक्तो
मेधाशुद्धारथीः मेधाविवेन संछिन्नः संशयो यस्य मोहजः ६
स्वात्मावस्थानमेवास्ति परं मोक्षैकसाधनं नैवान्यत्किंचिदित्येवं
निश्चयेन प्रमात्मना ७ वेदेवत्तीणकर्मत्वात्काम्यकर्मायशोभनं
प्रतिकूलतयानायममन्येतस्वात्मनिस्थितः ८ कुशलेशोभनेनि
त्येनकर्मणिरतिस्तुधीः कर्तृत्वतयात्मस्यकर्तृत्वधीयतः ९
भियतेहृदयग्रंथिश्छिद्यंते सर्वसंशयाः क्षीयंते चास्यकर्माणि तस्मिन्दृ
ष्टेपरावरे १० त्यागस्य सात्विकस्यास्ति यस्मादेवं फलं ततः महतापि
प्रयत्नेन सम्यादेयो मुमुक्षुणा ॥११॥१०॥ः

नीलकंठी टीका १२ ॥

एवं मुख्यसात्विकत्यागमुक्त्वा सत्वोत्तमाह न द्वेष्टीति सत्वेन सम
गाविशेषात्मस्त्यागीमतः सात्विकस्त्यागी संन्यासी मेधावी अकुशले
अशुभं प्रदं कर्म त्रिवर्णस्नानवत्रैगाणां च भिक्षाटनादि प्रयासरू
पं न द्वेष्टि कुशले मिष्टान्नभिक्षादौ नानुषज्जते न संगं काकवत्प्रीतिं
करोति यद्वा कर्म अकुशले सेवादि कर्म कुशले शिष्यादौ न सज्जते
तत्राकुशलत्वात् न द्वेष्टि एतेन रागद्वेषशून्यत्वमस्य दर्शितं न द्वेषि
कुतस्तत्परिवाधामाह मेधावीति ऊहापोहकुशलतया नित्यानि
त्यवस्तुविवेचनादौ प्रज्ञावान् अतएव छिन्नसंशयः किं कर्माणो
वमुक्तिसाधनमाहोस्वित् संन्यासएवेति विचिकित्सारहितः एवं च त्या
गीमन्येन यज्ञदानतपः कर्मत्याज्यमित्युक्तादत्यागाच्चाहनिः
मेधावीत्यनेन मोहात् तस्य परित्यागस्तामसत्वमामसत्यागाच्चाहनिः
सर्वदा द्वेष्टि रागद्वेषाभावप्रतिपादनेन कायक्लेशभयात्यजेदित्य।

कात्राजसत्यागाद्व्याहृतिः छिन्नसंशयत्रमनेनकार्यमित्येवयत्क
र्मेत्येकादशव्याख्येसात्विकत्यागाद्व्याहृतिः नद्वेष्टीकर्मणोनकुशलंस
न्यासस्यमहाभागपत्वेवतनवतोवेददेवेत्वणामपिकर्मणेनतिष्टत्
नहिदाहोपशमार्थीतिकस्यजाक्रवीमहाफदंजालनश्रीव्योमप्र
तमपाद्यसिपल्वलेतणामपिरमेतन संशयछेदेपिहेतुः सत्वसमा।
विष्टइति यतः सर्वेनैवकर्माससम्यगाविशेषेणनतस्रुपेपसत्वमाश्रितइति
महान्विशेषः एवंचपूर्वश्लोकोक्तस्यसात्विकत्यागरूपस्यकर्मयोग
स्यफलभूतोयेमव्यं संन्यासोविविदिषूणामनुष्ठेयोयदहरेवविरजे
तदहरेवप्रव्रजेत् एतमेवप्रव्राजिनोलोकमिच्छंतः प्रव्रजंतीतिश्रु
तिप्रसिद्धः भाष्येन नव्यकर्मपरित्यागाद्विविधः संन्यासइतिवप्रकृतः
तत्रनामसोराजसश्चोक्तस्त्यागः कथमिह संगफलत्यागस्तृतीयोवे।
नोच्यते यथात्रयोब्राह्मणाआगतास्तत्रषडंगविदोद्वावित्यस्तृतीय
इतिनद्वत् नैषदोषः त्यागसामान्येनतुल्यार्थत्वात् श्रुतिकर्मसंन्या
सस्यफलाभिसंधित्यागस्यचत्यागत्वसामान्यं तत्रराजसतामसत्वेनक
र्मत्यागनिंदयाकर्मफलाभिसंधित्यागः सात्विकत्वेनस्तूयतेसत्यागः
सात्विकोमतइतिश्रेष्ठेनत्यागत्रैविध्यंसमाधाय एवंसंगफलत्यागरू
पेकैनित्यकर्मानुष्ठानेनविशुद्धांतःकरणस्यात्मज्ञानाभिमुखस्यतत्
त्रिष्ठाक्रमकथनार्थोयंश्लोकइत्युक्तं तथैवश्लोकंव्याख्यायपूर्वोक्त
स्यकर्मयोगस्यप्रयोजनमनेनश्लोकेनोक्तमित्युपसंहृतं श्रुत्येनफला
भिसंधिविशिष्टस्यकर्मणस्त्यागस्त्रिविधः विशेषणाभावात् विशे।
ष्याभावात्उभयाभावाच्च शायोचैवविधित्सितः द्वितीयस्तुतामसरा
जसभेदेनद्विविधोपिद्वैवनिंदितः तृतीयस्तुकर्मानधिकारिणाविवि
दिषुणाविदुषाचकर्तव्योपोद्विविधः तत्रांसः स्थितप्रज्ञलक्षणादोश
व्याख्यातः शायस्तुनैष्कर्म्यसिद्धिंपरमामित्यत्रवक्ष्यते तत्रभाष्येतिसद्व
त्यागविधाः प्रतिज्ञायद्वेयथावत्प्रदर्शयत् तृतीयोपिकेनचित्सामान्येन
प्रतिपादिता शुक्लत्यकस्याहयोरंतर्भावरूक्तत्वादेवंविधेउपपाद
तृतीयाप्रदेशांतरेप्रतिमितिप्रकृतेप्रनिताग्राज्ञानिर्वादइतिविशे
षः १० ॥

श्री॰
गी॰ टी॰
अ॰

आनंदी टीका १३

अकुशलं दुःखोत्पादकं परैः प्रयुक्तमवमाननताडनादि न द्वेष्टि पू
र्वकृतफलमिदं मयावश्यं भोक्तव्यमिति मत्वा कुशले सुखोत्पा
दके परैः प्रयुक्ते लाभपूजादौ संगमासक्तिं न करोति इत्थं सत्वेन
प्रकाशेन समाविष्टः मेधावी गुणदोषावच्छपर्यालोचयन् अत एव
छिन्नसंशयस्तत्त्ववित् विगतरागद्वेषो नियतकर्मानुतिष्ठन्नेव
त्यागीत्युच्यते ॥ १० ॥

+ तस्यैवंविधसात्विकस्य त्यागिनः स्वरूपं प्रतिपादयितुमाह॥

रामकंठी टीका १४

+ योऽयमनन्तगुणीभूतरजस्तमस्कत्वेन विशुद्धसत्वमात्रेण समावि
ष्टो व्याप्तान्तःकरणः स त्यागी यथोक्तेन संगफलाभिसंधिरहि
तनियतकर्मानुष्ठानरूपेण त्यागेन त्यागफलहेतुत्वात्त्याग
त्वमापन्नेन युक्तो न एव मेधावी प्रशस्यप्रज्ञस्तेनाच्छिन्नसंशयः
यथोक्तस्य परब्रह्मस्वरूपस्य तत्त्वस्यैकस्यास्तित्वे इति तत्संदेहः
स सर्ववस्तुष्ववगम्यमानपरमात्मैकस्वरूपत्वादकुशलं संसा
राभिमुख्यस्य साधनभूतं कर्माग्निहोत्रादि शारीरक्लेशावह
न द्वेष्टि तात्त्विकेनैव शत्रुद्वेषलक्षणदोषाभावात्प्रीत्याभावयति
नापि कुशले कर्मत्यागादौ स्वसाधनभूते नुषज्जते संगं
न वध्नाति तस्यैवंविधस्य त्यागिनो नित्यादितानन्तनिजानंद
निर्भरस्यात्मभूतसर्वभावस्य क्वचिद्द्वेषो नापि रागः शास्त्रचो
दितत्वादवश्यकरणीयमित्येवं सर्वं नियतं कर्मानुतिष्ठन्नेवा
सौ सर्वत्यागीत्यर्थः [illegible]
[illegible] १० ॥

+ अथैवंविधस्य सात्विकस्य त्यागिनः स्वरूपं प्रतिपादयति॥

लासिकी [illegible] टीका १५

+ सत्वेनाहन्तया समाविष्टो व्याप्तः सात्विकस्त्यागी मेधावी तत्त्व
बोधनित्यसंबंधः छिन्नसंशयस्त्रुटितदेहाभिमानः अकुश
लशरीरायासक्लेशदायि प्रातःस्नानादिकं कर्म न द्वेष्टि अप्री
त्या न भावयति तथा कुशलो देहानुकूलं निदाघे मध्याह्नस्ना
नादौ नानुषज्जते रतिं न वध्नाति [illegible]
[illegible]

पैवोलेटीका

एवंतस्यनित्यकर्मानुष्ठानेनविशुद्धांतःकरणस्यात्मज्ञानाभिमुखे
स्यक्रमेणयथात्मज्ञाननिष्ठास्यात्तंप्रकारंआह नद्वेष्टीति माणीकर्म
स्वसंगफलत्यागवान् सत्वसमाविष्टःसत्वेनआत्मविवेकज्ञानेनहेतु
नासमाविष्टःसंयुक्तःअतएवमेधावीमेधयाआत्मज्ञानलक्षणयासं
यायुक्तःछिन्नसंशयोयस्यसःछिन्नसंशयः अकुशलमशोभनंकाम्य
कर्मसंसारकारणंनद्वेष्टिकुशलेशोभनेनित्येकर्मणिसत्वशुद्धिज्ञा
नोत्पत्तिद्वारेणमोक्षसाधनेनानुषज्यतेप्रीतिंनकरोति १०

रणवीरसमिद्बोधिनी

एवंत्यागंलक्षयित्वात्यागिनःस्वरूपंप्रतिपादयितुमाह नद्वे
ष्टीतियःअकुशलंदुःखबोधवाद्धिंसाजनकत्वेन निर्मंगलं
स्ववर्णोचितंयुद्धादिलक्षणंकर्मनद्वेष्टि कुशलेपरवर्णोचिते
चकृषिवाणिज्यादिकेसुखप्रायत्वात्संगत्वेकर्मणिनसंसक्तो
भवतिसत्यागीप्रशस्यत्यागवान्कथ्यते इतिशेषः कीदृशःस
त्वेनगुणेनधैर्येणवा समाविष्टःदोषच्छेदेनाविष्टोव्याप्तांतःकर
णः तथामेधानिश्चयग्राहिणीधीरस्यास्तीतिमेधावी अतए
वछिन्नःसंशयोयस्यसछिन्नसंशयः १०॥

मधुभाष्य

१०॥

49

भाषा अनुवाद ॥

एवम्भूत सात्विक त्याग मे प्रकृष्ट निष्ठायुक्त पुरुष के लक्षण कहते हैं कि सतोगुण से सात्विकत्यागी पुरुष अकुशल कहे दुखदायी अर्थात् शिशिर कहे जाडे से प्रातःस्नान आदि कर्म्म मे द्वेष नहीं करते और कुशल कहे ग्रीष्म काल के मध्यान स्नान आदि कर्म्म मे प्रीति नहीं रखते हैं इसका कारण यह है कि वे लोग स्थिरबुद्धि अर्थात् विवेकसे भ्रमकृत पराभव अनादर आदि महा दुख भी सहते हैं और स्वर्गादि सुखको भी त्याग करते है फेरि सुख औ दुःख जो क्षणिक कहे क्षणमात्र रहनेवाला है यह निश्चय जानते है औ जिस का दैहिक सुख दुख का ग्रहण औ त्याग की इच्छारूप जो मिथ्या ज्ञान नष्ट हो गया है सो छिन्नसंशय पुरुष है १० ॥

दोहा

अकुशलादिकर्म न द्वेषहि कुशलमे न बंधाय त्यागीसत्व
सें युक्त जो सुधी असंशय कहाय १०

50

न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः । यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते ॥ ११ ॥

शांकरभाष्यटीका १ ॥

योऽधिकृतः पुरुषः पूर्वोक्तेन प्रकारेण कर्मयोगानुष्ठानेन क्रमेण संस्कृतात्मा सन् जन्मादिविक्रियारहितत्वेन निःक्रियमात्मानमात्मत्वेन संबुद्धः स सर्वकर्माणि मनसा संन्यस्य नैव कुर्वन्न कारयन्नासीनो नैष्कर्म्यलक्षणां ज्ञाननिष्ठामश्नुत इत्येतत् पूर्वोक्तस्य कर्मयोगस्य प्रयोजनमनेन श्लोकेनोक्तं यः पुनरधिकृतः सन् देहात्माभिमानित्वेन देहभृदज्ञोऽबाधितात्मकर्तृत्वविज्ञानतयाहं कर्तेति निश्चितबुद्धिस्तस्याशेषकर्मपरित्यागस्याशक्यत्वात् कर्मफलत्यागेन चोदितकर्मानुष्ठान एवाधिकारो न त्यागे इत्येतमर्थं दर्शयितुमाह नहीति न हि यस्माद्देहभृता देहं बिभर्तीति देहभृद्देहात्माभिमानवान् देहभृदुच्यते न हि विवेकी स हि वेदाविनाशिनमित्यादिना कर्तृत्वाधिकारान्निवर्तितोऽतस्तेन देहभृताज्ञेन न शक्यं त्यक्तुं संन्यसितुं कर्माण्यशेषतो निःशेषेण तस्माद्यस्त्वज्ञोऽधिकृतो नित्यानि कर्माणि कुर्वन् कर्मफलत्यागी कर्मफलाभिसंधिमात्रसंन्यासी स त्यागीत्यभिधीयते कर्म्यपि सन्निति स्तुत्यभिप्रायेण तस्मात् परमार्थदर्शिनैवादेहभृता देहात्मभावरहितेनाशेषकर्मसंन्यासः शक्यते कर्तुं ॥ ११ ॥

आनंदगिरिकृतटीका २ ॥

नहेहेत्यादिना श्लोकेनोक्तमर्थं संक्षिप्यानुवदति योऽधिकृत इति पूर्वोक्तप्रकारेणेति कर्माणि तत्फले च संगत्यागेनेत्यर्थः कर्मात्मयोगस्यानुष्ठानेन संस्कृतात्मा सन् क्रमेण श्रवणाद्यनुष्ठानद्वारेण कूटस्थब्रह्मात्मकत्वेन संबुद्ध इति संबंधः परस्य निःक्रियत्वे हेतुमाह जन्मादीति उक्तज्ञानवतः सर्वकर्मत्यागद्वारा मुक्तिभाक्त्वं दर्शयति सर्वेति आत्मज्ञानवतः सर्वकर्मत्यागसम्भावनामुक्त्वा तद्धीनस्य तदसम्भवे हेतुवचनत्वेन अनन्तरश्लोकमवतारयति यः पुनरिति नबाधितमात्मनि कर्तृत्वविज्ञानमस्येत्यज्ञस्तथा तस्य भावस्तत्ता तयेति यावत् एतमर्थं दर्शयितुमज्ञस्य सर्वकर्मसंन्यासासम्भवे हेतुमाहेति योजना

श्री॰
गी॰ टी॰
प्र॰
51

यस्मादित्यस्यतस्मादित्यनेनसंबंधः विवेकिनोपि देहधारितया
देहभृत्वाविशेषे कर्माधिकारः स्यादित्याशंक्याह नहीति कर्तृत्वाधि
कारस्तत्पूर्वके कर्मानुष्ठाने तस्मादिति यावत् ज्ञानवतो देहधारणे
पि तदभिमानित्वाभावान्नायमर्थः प्रकृतस्य सर्वकर्मत्यागायोगम्
के हेतूकृत्य फलितमाह तस्मादिति कर्मानुष्ठायिनस्त्यागित्वोक्तिर
युक्तेत्याशंक्याह कर्मणीति कर्मिणोपि फलत्यागेन त्यागित्ववचने
फलत्यागस्तुत्यर्थमित्यर्थः कस्य तर्हि सर्वकर्मत्यागः संभवती
त्याशंक्य विवेकवैराग्यादिमतो देहाभिमानहीनस्यैवेत्युक्तं निग
मयति तस्मादिति ॥ ११ ॥

स्वामिकृतटीका २ ॥

नन्वेवंभूतात्कर्मफलत्यागाद्वरं सर्वकर्मत्यागः तथा सति कर्मवि
क्षेपाभावेन ज्ञाननिष्ठा सुखं संपद्यते इत्यत आह नहीति देहभृता देहा
त्माभिमानवता निःशेषेण सर्वाणि कर्माणि त्यक्तुं न शक्यं तदुक्तम्
न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत् इत्यादिना तस्माद्यस्तु
कर्माणि कुर्वन्नेव कर्मफलत्यागी स एव मुख्यस्त्यागीत्यभिधीयते
[illegible] कर्मफलत्यागस्य फलमाह ॥ ११ ॥

पिशाचभाष्य टीका ४ ॥

देहंबिभर्तीति देहभृत् विद्यावान्देहात्मदर्शी तेन देहभृता कर्माण्यशे
षतः त्यक्तुं न शक्यं यस्तु विद्यावान्सर्वकर्माणि कुर्वन्कर्मफल
त्यागी स कर्मसंन्यासीति कथ्यते ॥ ११ ॥

रामानुजभाष्य टीका ५ ॥

तदाह नि नहीति नहि देहभृता ध्रियमाणशरीरेण कर्माण्यशेषतस्त्यक्तुं श
क्यं देहधारणार्थानामशनपानादीनां तदनुबंधिनां च कर्मणामवर्ज
नीयत्वात् तदर्थं च महायज्ञाद्यनुष्ठानमवर्जनीयं यस्तु तेषु महायज्ञा
दिकर्मसु फलत्यागी स एव त्यागेनैके अमृतत्वमानशुरित्यादिशास्त्रे
ष्वत्यागीत्यभिधीयते फलत्यागीति प्रदर्शनार्थः फलकर्तृत्वकर्मसंगा
नां त्यागी त्रिविधः संप्रकीर्तितः इति प्रक्रमात् ननु कर्माग्निहोत्रद
र्शपूर्णमासज्योतिष्टोमादीनि महायज्ञादीनि च फलसंबंधितया
विधीयंते नित्यनैमित्तिकानामपि प्राजापत्यं गृहस्थानामित्यादिफल

मेवेपितयाविधाने प्रतस्तत्फलसाधनस्वभावतयावगतानां।
कर्मणामनुष्ठानेबीजावापादीनामिवानभिसंहितफलस्यापीष्टा
निष्टरूपफलसंबंधोवर्जनीयः प्रयोगमात्रविषयेपिफलेसवमस्य
त्यागात्कर्मानुष्ठेयमिमिमनत्तवमात्र ११ ॥

अभिनवगुप्तकृतटीका ६

दोषवद्धिंसादिमत्त्वात्पापयुक्तेनफलेनाज्येनसंर्वशुभफलमिति
केचिद्योगविशेषमस्मेनेसांख्यागरत्याइव यमेनमीमांसकेनु।
कात्यविशिष्टः क्रतुर्योहिंसाद्यादवगम्यतइतितयानस्माद्वैदि
दिकेहिंसीत्यादिनयेनेतिकर्तव्यांशभागिनीहिंसेववभवति न
हिंसादितिसामान्यशास्त्रस्यतत्रबाधनाच्छेनादिवनतहिंसाफला
शेभावनायाश्चमनयोर्विधायकइति अर्थसहकारीहिंसादियो
गितोपिनत्यजेत् यासैकशरणकार्याकार्यविभागः पंडिताः
इतिमन्यंते तत्रतयेनिश्चयःप्रागलक्षितगुणस्वरूपेवविधात्या
गस्यैवसत्वरजस्तमोमयत्वविनहन्याक्रियमाणस्यतद्विशिष्टस्व
भावाववभासवत्तस्यपिसात्त्वत्यागोनामपरब्रह्मविदांसिद्धमिति।
द्याद्विभसमनयारागद्वेषपरिहारेणफलप्रेप्साविरहेणकर्मणां
निर्वर्तने प्रतप्रवाहराजसंतामसंवत्यागंकृत्वानकिंचित्फलसंब
यइति सात्विकस्तत्त्यागाख्याख्यार्थपालनात्मकफले त्यक्तगुण
ग्रामग्रहस्यवर्त्मनिः समतस्त्यागवाचोयुक्तिरुपपत्तिमती ११॥

परमार्थप्रपाटीटीका ७ ॥

नदेवाह नहीति देहभृतादेहाभिमानवतादैहिकव्यवहारायक
रवरणव्यापारंकुर्वतागशेषतःसर्वाणिसकुनहिशक्यं कायक्लेश
भयात्कथंत्यक्तुंशक्यंतस्मादर्थः नहिकश्चित्क्षणमपीतिरुक्तमेवोक्त
प्रायस्तुकर्माणिकुर्वन्नपिकर्मफलत्यागीसएवत्यागीत्यभिधी
यतेकर्माकरणेनत्यागीनभवतीत्यर्थः ११ ॥

वनमालीटीका ८ ॥

नन्वेवंमहताकर्मफलत्यागाहंसर्वकर्मपरित्यागःविहितकर्मप
रित्यागोवात्यागशब्दार्थःकर्ममात्रस्यमनोविक्षेपकत्वादित्यतआह

श्री.
गी. टी.
प्र.

52

नहीति देहभृता देहधारणपोषणार्थं चेष्टारूपं वैतावशेषतो निःशे-
षाणि कर्माणि त्यक्तुं न हि शक्यं न शक्यानि देहपोषणार्थं लौकि-
ककर्मणामावश्यकत्वात् स्वोचितकर्मणो देहाभिमानिना कारणप्र-
सवाद्यापरित्याज्यत्वाद्देहादावहंममेत्यभिमानस्तावल्लौकिकवैदि-
कादिकर्म त्यक्तुमशक्यमित्यर्थः तस्माद्यस्तु विकारी सन्नन्तःशुद्ध्यर्थं कर्मा-
णि कुर्वन्नपि भगवदर्पणतया तत्फलत्यागी तस्य सत्त्वशुद्धिलाभतदो-
त्तनार्थः सत्यागीत्यभिधीयते त्यागफलस्यैतेन सम्यक्प्राप्त्यनाङ्क्षी-
णत्वात्स त्यागीति कथ्यते अशेषकर्मत्यागस्तु निहतदेहाभिमा-
निनैव प्रकर्षेण सम्भवत्यत्र सत्यासमर्थ इति भावः ११ ॥

उसमवैजयंती टीका ९ ॥

न च फलकर्तृत्वादित्यागस्यापि प्रयासविक्षेपायनेकविप्रकृते
नैतान न निष्ठाबाधकत्वात्कर्मस्वरूपत्यागस्यैव वरीयस्त्वस्यादित्याश-
कां न तत्स्वरूपत्यागः केनापि शक्यस्त्याह नहीति देहभृता देहं बिभ-
र्त्तीति तथा तेन चिन्मयमात्मशरीरेण केनापि प्रकर्षेण कर्माणि नित्यनै-
मित्तिकमहापातकादीनि निखिलानि निःशेषतः साकल्येन त्यक्तुं हातुं न
शक्यं न शक्यानि भवेतिहीत्यनेन तत्त्वाग्रेसरैर्विदेहादिभिरपि सक-
मशक्यास्यैर्देहात्माभिमानिभिः किमवक्तव्यमिति केवलतिकेसू-
च्यते कर्मणा स्थितोज्जनकादयः न हि कश्चित्क्षणमपि जातु ति-
ष्ठत्यकर्मकृदित्याद्युक्तत्वात् तस्मात्तु शब्दादेवं निश्चियो यस्तु क-
र्मफलत्यागी [illegible] कर्मफलस्यत्यागशीलवान् कर्माणि कुर्व-
न्नेव तत्फलत्यागी भवति स एव त्यागीत्यभिधीयते त्यागेनैके अमृतत्व-
मानशुरित्यादिश्रुतेरुच्यते नाविरतो दुश्चरितान्नाशान्तो नासमाहितः
नाशान्तमनसो वापि प्रज्ञानेनैनमाप्नुयादिति दुश्चरिताविरतेर्नाशान्तो
न्तःकरणरोधित्वश्रवणादतः कर्माणि कर्त्राभिनिवेशं तत्फलेच्छां च
परित्यज्य ज्ञानार्थी सर्वकर्माणि कुर्वीत न तत्स्वरूपं त्यजेदिति पा-
र्थसारथेराशयः ११ ॥

मधुसूदनी टीका १० ॥

+ मनुष्योऽहं ब्राह्मणोऽहं गृहस्थोऽहमित्याद्यभिमानेनाबाधितेन देहः कर्मा-
धिकारहेतुर्वर्णाश्रमादिरूपः कर्तृत्वभोक्तृत्वाद्याश्रयः स्थूलसूक्ष्मशरीरं

+ तदेवमात्मज्ञानवतां सर्वकर्मत्यागः संभाव्यते कर्मप्रवृत्तिहेत्वोः रागद्वेषयोरभावादित्युक्तं
संप्रति बद्धस्य कर्मत्यागासंभवे हेतुरुच्यते ॥

द्रियसंघातंबिभर्ति अनाद्यविद्यावासनावशाद्व्यवहारयोग्यत्वेनक
ल्पितमसत्यमपिसत्यतयास्वभिन्नमपिस्वाभिन्नतयापश्यन्नारोपयति
पोषयतिचेतिदेहभृत् अबाधितकर्माधिकारहेतुदेहाभिमानःतेन
विवेकज्ञानशून्येनदेहभृताकर्मप्रवृत्तिहेतुरागद्वेषदोषकलुषेनसत
तंकर्मसुप्रवर्तमानेनकर्माण्यशेषतःनिःशेषेणत्यक्तुंसंन्यसितुंहि
यस्मान्नशक्यंनशक्यानि तस्मात्कारणसामग्र्यांकार्यत्यागस्याशक्य
त्वात् तस्माद्यस्त्वज्ञोधिकारीसन्नवश्यकर्तव्यकर्माणिकुर्वन्नपिभगवद
त्कर्मण्यधायत्तफलत्यागी नशाहृत्तस्यदुर्लभत्वेनतार्थः सत्या।
गीत्यभिधीयतेगौण्यावृत्त्यास्तुसर्वकर्मत्यागपिसन्नशेषकर्मसंन्यासस्त
परमार्थदर्शिनैवादेहभृताशक्यतेकर्तुमितिसएवमुख्ययावृत्त्यात्या
गीत्यभिप्रायः नतुदेहभृतःपरमात्मज्ञानशून्यस्यकर्मणोपिकर्म।
फलाभिसंधित्यागित्वेनगौणसंन्यासिनःपरमात्मज्ञानवतोदेहाभि
मानरहितस्यसर्वकर्मत्यागिनःमुख्यसंन्यासिनश्चकःफलेविशेषो
यल्लाभेनगौणत्वमेकस्ययल्लाभेनचमुख्यत्वमन्यस्यकर्मफलत्या
गित्वतुल्ययोरपितयोरनयोर्विशेषोवाच्यउच्यते ११ ॥

सदानंदी टीका ११ ॥

एवमात्मविदःसर्वकर्मत्यागोपिसंभवेत् कर्मप्रवृत्तिहेतोरसंभ
६१ वाद्द्वेषरागयोः १ यत्तुस्वकर्मणांत्यागासंभवेहेतुरुच्यते ब्राह्मणो
हमेवभूतोहमित्याद्याध्यासिकेनच अबाधिताभिमानेनदेहंवर्णाश्र
माश्रये कर्तृत्वाद्याश्रयंस्थूलसूक्ष्मसंघातमाग्रहात् ३ बिभर्ति
नाद्यविद्यादिवशादात्मतयासच देहभृत्तेनकर्माणिकर्मण्यधि
कारिणा ४ विवेकज्ञानशून्येनरागद्वेषवतासदा त्यक्तुंनिःशेष
तोयस्मान्नशक्यानिकर्हिचन ५ तस्मात्कारणसामग्र्यांकार्यत्यागोति
दुष्करः तस्मादज्ञोधिकारीयःकुर्वन्कर्माण्यशुद्धये ६ फलाभिसं
धित्यागीनशक्नोतिदुर्लभः सत्यागीस्यादमुख्येनगौण्यावृत्त्यामत्वो
स्तुतत्त्ववित् ७ ईश्वरानुग्रहात्कर्मफलत्यागितयासुधीः पुज्यतेतत
त्त्वबोधेननामस्यैत्याशयोहरेः ८ ॥ ११ ॥

नीलकंठी टीका १२ ॥

अमुख्यमेवसात्विकंत्यागमनूद्यतस्यप्रयोजनमाहद्वाभ्यां नहीति दे

श्री
गी० टी०

53

देहभृता देहाभिमानिना हि यस्मात् अशेषतः कर्माणि त्यक्तुं न शक्यं
अशक्यं प्राणयात्रालोपप्रसंगात् तस्मादधिकृतः सन् यः कर्मफलत्या
गशीलः तत्राह्यपवार्थे स एव त्यागीत्युच्यते यस्त्वशेषतः कर्माणि
त्यक्तुं शक्नोति परमार्थदर्शी स मुख्यस्त्यागी मुख्यः ॥ ११ ॥

आनंदटीका १२

कर्मसंन्यासमपवदति देहभृता ध्रियमाणशरीरेणाशेषतः
कायिकवाचिकमानसिकसामस्त्येन कर्माणि त्यक्तुं न शक्यं कर्म
अवश्यंभाविनामपरिहार्यत्वात् यस्तु पुनरनेनाऽकर्मकारेणाऽकुर्व
न्नेव कर्माणि यः फलत्यागी स त्यागीत्युच्यते न निरग्निर्न चाक्रिय
इति सिद्धम् ॥

रामकंठी टीका १४

+एतदेव पूर्वप्रोक्तमपि स्मा
रयन्नुद्दृढयितुमाह ॥ +पूर्वमेव व्यक्तशो व्याख्यातत्वादत्रार्थमेवैतत् यथाकर्माविविप
...नुमीनामनुष्ठानमित्याफलमाह ॥

+ननु एवंविधस्य सात्त्विकस्य त्यागि
नः कर्मत्याग एव व...र किं कर्मानु
ष्ठानेनेति नेत्याह ॥

लासिकी ~~[illegible]~~ टीका

+देहभृता ज्ञानिनापि देहं बिभ्रता सर्वाणि कर्माणि त्यक्तुं नैव
शक्यं तस्माद्यस्तु कर्माणि कुर्वन्नपि कर्मफलत्यागी स एव
मुख्यस्त्यागीत्यभिधीयते ... ११

पंचोलेटीका

यस्तु देहाभिमानवान् तस्य कर्मफलत्यागेन कर्मानुष्ठाने प्रयिका
रेण कर्मत्यागे स्वेन दर्शयितुमाह नहीति हि यस्माद्देहभृ
ता देहाभिमानवता कर्माणि अशेषतो निःशेषेण त्यक्तुं न शक्यं त
स्मात् यो नित्यानि कर्माणि करोति कर्मफलत्यागी कर्माभिसंधि
मात्रस्य संन्यासी स कर्मापि समुख्यत्यागीत्यभिधीयते ॥

रणवीरसमिद्बोधिनी

ननु फलत्यागपूर्वककर्मानुष्ठानाद्वरं सर्वकर्मत्याग एव
बंधनिमित्तभूत पुण्यपापमूलकारणाभावात्सर्वदुःखध्वंस
लक्षणमोक्षेऽपि स्वयं सिद्धत्वादित्याशंक्य पूर्वोक्तमेव स्मार

यदुक्तमेवार्थं द्रढयितुमाह नचेति नहिकश्चित्क्षणमपीत्य
नेन व्याख्यातप्रायमेतत् ११ ॥

अथ भाष्य

नहीति त्यागं स्तौति ११ ॥

भाषा अनुवाद

जो कहो कि पूर्वोक्त कर्मों के फल त्याग से कर्मों ही का त्याग
करना ही श्रेष्ठ क्यों न होय जिस हेतु विक्षेप करनेवाले कर्म्म
हर होने से अविक्षेप क्रमसे ज्ञाननिष्ठारूप जो लाभ सो सम्भव
होयगा इस पर कहते हैं कि देहअभिमानयुक्त मनुष्य तावत् स
व कर्मों का सम्पूर्ण त्याग नहीं कर सकते हैं इस मे प्रमाण तीस
रे अध्याय के पंचवें श्लोक आदि से कहा है कि न कश्चित् क्षण
मपि जातु तिष्ठत्यकर्मकृत् इति इससे जो सकल कर्मों का
अनुष्ठान करके भी फलके त्यागी हैं वेई पुरुष प्रधान त्यागी हैं
११

दोहा

नहिंजीवकों शक्य है त्याग न कर्म अशेष   कर्महि के फ
लत्यागी जो सो कह्यो त्यागी विशेष ११

अनिष्टमिष्टंमिश्रंचत्रिविधंकर्मणःफलं भ
वत्यत्यागिनांप्रेत्यनतुसंन्यासिनांक्वचित् १२

शांकरभाष्यटीका १ ॥

किंपुनस्तत् प्रयोजनं यत्सर्वकर्मपरित्यागात् स्यादित्युच्यते अनिष्टं
नरकतिर्यगादिलक्षणं इष्टंदेवादिलक्षणं मिश्रं इष्टानिष्टसंयुक्तं मनु।
ष्यलक्षणंचैव त्रिविधं त्रिःप्रकारं कर्मणोधर्माधर्मलक्षणस्य फलंबा
ह्यानेककारकरूपं व्यापारनिष्पन्नं सदविद्याकृतमिंद्रजालमायोपमं
महामोहकरं प्रत्यगात्मोपसर्पीव फल्गुतया लयमदर्शनं गच्छतीति
फलनिर्वचनं तदेतदेवंलक्षणं फलं भवत्यत्यागिनामज्ञानां कर्मिणाम
परमार्थसंन्यासिनां प्रेत्यशरीरपातादूर्ध्वं नतुपरमार्थसंन्यासिनां परम।
हंसपरिव्राजकानां केवलज्ञाननिष्ठानां क्वचिन्न हि केवलंसम्यक् दर्श
ननिष्ठाःविद्यादिसंसारबीजं नोन्मूलयन्ति कदाचिदित्यर्थः १२ ॥

आनंदगिरिटीका २ ॥

उक्ताधिकारिणः सर्वकर्मसंन्यासासंभवेपि फलाभावे कुतस्तस्य कर्त
व्यतेतिशंकते किंपुनरिति गौणस्य मुख्यस्य वा संन्यासस्य फलं विव
क्षितमिति विकल्पयति उच्यतइति सर्वकर्मत्यागोनाम तदनुष्ठानेपि
तत्फलाभिसंधित्यागः सचामुख्यसंन्यासस्तस्य फलमाह अनिष्टमिति
मुख्ये तु संन्यासे सर्वकर्मत्यागे सम्यग्धीद्वारा सर्वसंसारोच्छित्तिरेव फ
लमित्याह नत्विति पादत्रयं व्याकरोति अनिष्टमित्यादिना तिर्यगादीत्या
दिपदमवशिष्टनिकृष्टयोनिसंग्रहार्थं देवादीत्यादिपदं विशिष्टोत्कृष्ट
योनि ग्रहणार्थमिति विभागः फलशब्दं व्युत्पादयति बाह्येति कारणद्वा
रकमनेकविधत्वमुक्त्वा मिथ्यात्वमाह अविद्येति तत्कृतत्वेन दृष्टि
मात्रदेहत्वे दृष्टान्तमाह इंद्रेति प्रतीतितोरमणीयत्वं सूचयति महा
मोहेति अविद्योत्थायास्याविद्याश्रितत्वादात्माश्रितत्वे वस्तुतो नास्तीत्याह
प्रत्यगिति उक्तं फलं कर्मिणामिष्यते चेदमुख्यसंन्यासफलोक्तिपर
त्वे पादत्रयस्य कथमिष्टमित्याशंक्याह अपरमार्थेति फलाभिसंधि
विकलानां कर्मिणां देहपातादूर्ध्वं कर्मानुरोधि फलमावश्यकमित्यर्थः

श्री॰
गी॰टी॰
प्र॰

55

कर्म्मिणामेव सतामफलाभिसन्धीनामप्यसंन्यासित्वान्नदीयाप्यसं
संन्यासस्य फलमुक्ता चतुर्थपादं व्याचष्टे नत्विति मुमुक्षुसंन्यासमनन्त
रमुक्ते व्यवच्छिनत्ति परमार्थेति तेषां प्रधानं धर्ममुपदिशति केवले
ति क्वचिद्देशे काले वा नास्ति यथोक्तं फलं तेषामिति संबंधः नहि पर
मार्थसंन्यासोऽफलत्वात् नानर्थायेत्याशंक्य तस्य मोक्षावसायित्वान्मैव
मित्याह नहीति १२ ॥

+ एवंभूतस्य कर्मफलत्यागस्य फलमाह ॥

स्वामिकृतटीका ३ ॥

+ अनिष्टमिति अनिष्टं नारकित्वं इष्टं देवत्वं मिश्रं मनुष्यत्वं एवं त्रिविधं यत्
पापस्य पुण्यस्य च उभयमिश्रस्य च कर्मणो यत्फलं प्रसिद्धं तत्सर्वं मत्यागि
मा नां सकामानामेव प्रेत्य परत्र भवति तेषां त्रिविधकर्मसंभवात् न तु संन्यासि
नां क्वचिदपि भवति संन्यासिशब्देनात्र फलत्यागसाम्यात् प्रकृताः कर्मफ
लत्यागिनो गृह्यन्ते अनाश्रितः कर्मफलं कार्यमित्येवमादौ फलत्यागि
षु संन्यासिशब्दप्रयोगदर्शनात् तेषां सात्विकानां पापासंभवात् ईश्वरा
र्पणेन च पुण्यफलस्य त्यक्तत्वात् त्रिविधमपि कर्मफलं न संभवतीत्यर्थः
१२ ॥

पैशाचभाष्यटीका ४ ॥

अनिष्टं द्वेष्यमिष्टमिष्यमाणं मिश्रमुभयात्मकं दृष्टानिष्टकर्मणः फले
फलत्यागालीयत इति फलं तत्त्रिविधं प्रकारं भवति जायते अत्यागि
नामज्ञानां कर्मिणां साक्षात्कृतात्मतत्त्वानि निष्क्रियात्मकानि कथितानि
निष्कृतार्थैव इत्थोक्तानीत्यर्थः सिद्ध्येति निष्पन्नयेत्सर्वकर्मणां शरीरादी
नां १२ ॥

अथो मोक्षफलत्वेन मुक्तत्वेन कर्मानुष्ठेयमित्यत उत्तरमाह ॥

रामानुजभाष्यटीका ५ ॥

+ अनिष्टमिति अनिष्टं नरकादिफलं इष्टं स्वर्गादिफलं मिश्रं भिन्ने।
भिन्नं पुत्रार्थादिरूपं यां सिद्धिरूपं त्रिविधं कर्मणः फलमत्यागिनां कर्तृ त्व
त्वममतायफलत्यागरहितानां प्रेत्य भवति प्रेत्य कर्मानुष्ठानोत्तरकाल
मित्यर्थः न तु संन्यासिनां क्वचित् न तु कर्तृत्वादिपरित्यागिनां क्वचि
दपि मोक्षविरोधि फलं भवति एतदुक्तं भवति यथाग्निहोत्रमहाय
ज्ञादीनि नामेव तथापि जीवनादिकारयोरिव मोक्षाधिकारेवविनि।
योगपृथक्त्वेन परिहृयते मोक्षविनियोगश्च तमेतं वेदानुवचनेन।
ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेनेत्यादिभिरिति
तदेवं क्रियमाणेष्वपि कर्मसु कर्तृत्वादिपरित्यागः शास्त्रसिद्धः संन्या

सत्त्व एव च त्यागीत्युक्ते इहैवी भवति गुरुणोक्तेन मार्गेण कर्तृत्वाभि
मे यानेनात्मनः कर्तृत्वाभिमानप्रकारमाह तत एव फलं कर्मणाम
पि ममतापरित्यागो भवतीति परमगुरुणा हि स्वकीयेन जीवात्मना
स्वकीये शुभकर्मफले च त्यागिनः स्वनीलादिप्रयोजनाय कर्मणां परम
ते अतो जीवात्मगते शुभादिकमपि फलं तत्साधनभूतं च कर्म परम
गुरुष्वेव १२ ॥ अभिनवगुप्तकृतटीका ६ ॥

अत्यागिनां फलमयानां अशुभनाशव्यवहारदशायामपि पंचस्वपि कर्म
हेतुष्वस्थितेष्वलादेवासौ अविद्यायाः अंशांशः स्वात्मन्येव सकलक
र्तृभावभारमारोपयन्तो निजयैव विधात्मानं बध्नन्ति तत एव त्या
ग्यास्वयं यत्नः प्रदिश्यते १२ ॥

परमार्थप्रपा टीका ७

अथ कर्मफलत्यागस्य फलमाह अनिष्टमिति अनिष्टं नारकि
त्वं इष्टं देवत्वं मिश्रं मनुष्यत्वं एवं त्रिविधं पापस्य पुण्यस्य मिश्रस्य
च कर्मणो यत्फलं तत्सर्वं अत्यागिनां सकामानामेव प्रेत्य पर
त्र भवति तेषां त्रिविधकर्मसंभवात् न तु संन्यासिनां किंचिदपि भ
वति संन्यासश्चेनाच फलत्यागिनो गृहीते अनाश्रितः कर्मफलं का
र्यं कर्म करोति य इत्येवमादौ फलत्यागे संन्यासप्रयोगदर्शनात् १२

वनमाली टीका ८ ॥

एतादृशकर्मफलत्यागस्तौति अनिष्टं नारकत्वादि इष्टं स्वर्गित्व
त्वादि मिश्रं मिश्रानिष्टसंयुक्तं मानुषत्वलक्षणमिमं त्रिविधमिद
न्त्वादेहपतनादूर्ध्वं अत्यागिनां सकामानां फलासक्तानां प्रेत्य परलो
के देहान्तरे वा भवति न तु संन्यासिनां क्वचित् फलेच्छाशून्यानां कर्म
कुर्वतां यद्वा अत्यागिनां कर्मफलत्यागिनोपि कर्मानुष्ठायिनामसत्त्वानां
गौणसंन्यासिनां प्रत्यविविदिषापर्यन्तसत्त्वशुद्धेः श्रीगवम्नतानां सर्व
कृतस्य कर्मणः फले देहग्रहणं भवति न तु फले कर्मणि त्रिविधत्वा
त् त्रिविधं पापस्यानिष्टं प्रतिकूलवेदनीयं नरकतिर्यगादिरूपं।
पुण्यस्येष्टमनुकूलवेदनीयं स्वादि मिश्रस्य पापपुण्ययुगलस्य मि
श्रं मानुषादि एवं गौणसंन्यासिनां देहपातानन्तरं देहान्तरग्रहणमा
वश्यकमित्यतः मुख्यसंन्यासिनां परमात्मसाक्षात्कारेणाविद्यायां

श्री॰
गी॰ टी॰
प्र॰
56

निवृत्तौ कैवल्यमेवेत्याह न तु संन्यासिनां क्वचित् परमात्मज्ञान
वतां मुख्यसंन्यासिनां प्रेत्य कर्मणः फलं देहग्रहणम् अनिष्टमि
ष्टं मिश्रं च क्वचिद्देशे काले वा न भवत्येवेत्यवधारणार्थस्तुशब्दः
भिद्यते हृदयग्रन्थिश्छिद्यंते सर्वसंशयाः क्षीयंते चास्य कर्माणि त
स्मिन् दृष्टे परावरे इति श्रुतेः १२ ॥

उत्तमवैजयंती टीका ९ ॥

एवंभूतफलकर्तृत्वादित्यागाभावे मोक्षाभाववत्त्यादित्यागाश्रयेणा
ह अनिष्टमिति अनिष्टं नारकित्वं इष्टं स्वर्गित्वं मिश्रं मनुष्यत्वं।
दुःखसुखवत्त्वं त्रयमप्ययोगी तत्त्रिविधं अत्यागिनां फलकर्तृत्वा
दित्यागरहितानां सकामकर्मकर्तॄणां प्रेत्य कर्मानुष्ठानोत्तरका
ले कर्मणः फलं भवति तेषां तत्फलमेवेति यतस्तत्कर्तृत्वा
भिमानेन तथा च मोक्षाभाव इत्याशयः न तु संन्यासिनां क्वचित् तु
पुनः क्वचिदपि इहामुत्र च लोके अपि साधनसिद्धकालेऽपि वा सं
न्यासिनां फलकर्तृत्वादित्यागवतां मोक्षविरोधिरूपमनेन फ
लं न भवति किं तु तेषां कर्मांतर्गतात्मज्ञानेन मोक्षो भवतीत्य
भिप्रायः १२ ॥

मधुसूदनी टीका १० ॥

अत्यागिनां कर्मफलत्यागित्वेऽपि कर्मानुष्ठायिनामज्ञानां गौ
णसंन्यासिनां प्रेत्य विविदिषापर्यंतसत्त्वशुद्ध्यंगेवस्थितानां सर्वकृ
तस्य कर्मणः फलं शरीरग्रहणं भवति इंद्रजालमायामयं फल्गु त
यालयमदर्शनेन गच्छतीति निरुक्तेः कर्मण इति जात्यभिप्रायमेकव
चनं एकस्य त्रिविधफलत्वानुपपत्तेः तच्च फलं कर्मणस्त्रिविधत्वा
त् त्रिविधं पापस्यानिष्टं प्रतिकूलवेदनीयं नारकतिर्यगादिलक्षणं
पुण्यस्येष्टमनुकूलवेदनीयं देवादिलक्षणं मिश्रस्य पापपुण्यफ
लस्य मिश्रं इष्टानिष्टसंयुक्तं मानुष्यलक्षणमित्येवं त्रिविधमित्यनुवादो
हेयत्वार्थः एवं गौणसंन्यासिनां शरीरपातानंतरं शरीरांतरग्रहणमा
वश्यकमित्युक्त्वा मुख्यसंन्यासिनां परमात्मसाक्षात्कारेणाविद्यातत्का
र्यनिवृत्तौ विदेहकैवल्यमेवेत्याह न तु संन्यासिनां क्वचित् परमात्म
ज्ञानवतां मुख्यसंन्यासिनां परमहंसपरिव्राजकानां प्रेत्य कर्मणः फलं श
रीरग्रहणम् अनिष्टमिष्टं मिश्रं च क्वचिद्देशे काले वा न भवत्येवेत्यवधारणार्थ

त्तशब्दः ज्ञानेनाज्ञानस्योच्छेदेन कार्याणां कर्मणामुच्छिन्नत्वात् तथा
च श्रुतिः भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः क्षीयन्ते चास्य कर्माणि त
स्मिन्दृष्टे परावरे इति पारमार्थिकत्वेन तदधिगम उत्तरपूर्वाघयोरश्लेषवि
नाशौ तद्व्यपदेशादिति परमात्मज्ञानादशेषकर्मनाशं दर्शयति तेन गौण
संन्यासिनोऽपुनः संसारः मुख्यसंन्यासिनां तु मोक्ष इति फलविशेष उक्तः
अत्र कश्चिदाह अनाश्रितः कर्मफलं कार्यं कर्म करोति यः स संन्यासी चे
त्यादौ कर्मफलत्यागिषु संन्यासिशब्दप्रयोगात् कर्मिण एवात्र फलत्या
गसाम्यात् संन्यासिशब्देन गृह्यन्ते तेषां च सात्त्विकानां नित्यकर्मानुष्ठानेन
निषिद्धकर्माननुष्ठानेन च पापासंभवात् अनिष्टफलं संभवति नापीष्टका
म्यानुष्ठानादीश्वरार्पणेन फलस्यानुक्तत्वाच्च अत एव मिश्रमपि नेति
त्रिविधकर्मफलासंभवः अत एवोक्तं मोक्षार्थी न प्रवर्तेत तत्र काम्यनि
षिद्धयोः नित्यनैमित्तिके कुर्यात् प्रत्यवायजिहासयेति प्रत्यवायः शब्द
स्यार्थस्य च मर्यादानतिक्रमो भवतीति तथाहि गौणमुख्ययोर्मुख्ये
कार्यसंप्रत्यय इति शब्दमर्यादा यथा अमावास्यायामपराह्णे पिण्डपि
तृयज्ञेन चरन्तीत्यत्र अमावास्याशब्दः कालमुख्यः तत्कालीनत्वेन कर्म
णि च गौणः य एवं विद्वानमावास्यां यजत इत्यादौ तत्रामावास्याका
लमिति कर्मग्रहणे पितृयज्ञस्य तदङ्गत्वात् फलं कल्पनीयमिति वि
धेर्लाघवमिति पूर्वपक्षिते कात्यायनेन अङ्गं वा समभिव्याहारादिति
गौणार्थस्य मुख्यार्थोपस्थितिपूर्वकत्वात् मुख्यार्थस्य चेहाबाधाद
मावास्याशब्देन काल एव गृह्यते फलकल्पनागौरवं तु तत्काली
नप्रमाणवत्त्वादङ्गीकार्यमिति सिद्धान्तितं जैमिनिना पितृयज्ञः स्व।
कालत्वादनङ्गं स्यादिति एवं स्थिते संन्यासिशब्दस्य सर्वकर्मत्यागिनि
मुख्यत्वात् कर्मिणि च फलत्यागसाम्येन गौणत्वात् मुख्यार्थस्य चे
हाबाधात् संन्यासिशब्देन ग्रहणमिति शब्दमर्यादया सिद्धे स
न्यासकारणस्याभ्यासं कार्यं स्यादिति चार्थमर्यादा तथाहि ईश्वरार्पणेन
त्यक्तकर्मफलस्यापि सत्त्वशुद्ध्यर्थं नित्यानि कर्माण्यनुतिष्ठतः अन्तरा
ले मृतस्य प्रागर्जितैः कर्मभिर्निर्विघ्नं शरीरग्रहणं केन वार्यते यो वा एत
ददक्षरं गार्ग्यविदित्वास्माल्लोकात्प्रैति स कृपण इति श्रुतेः अन्ततः स
त्त्वशुद्धिफलज्ञानासामर्थ्ये तदधिकारिशरीरमपि तस्यावश्यकमेव अत

श्री·
गी·टी·
प्र·

57

एवं विविदिषासंन्यासिनः श्रवणादिकं कुर्वतः अन्तराले मृतस्य योगभ्र
ष्टशब्दवाच्यस्य शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते इत्यादिना ज्ञानाधि
कारिशरीरप्राप्तिरवश्यंभाविनीति निर्णीतं षष्ठेऽध्याये यत्र सर्वकर्मत्यागि
नोऽप्यज्ञस्य शरीरग्रहणमावश्यकं तत्र किं वक्तव्यमज्ञस्य कर्मिण इति त
स्मादज्ञस्यावश्यं शरीरग्रहणमित्यर्थमर्थाद्यासिद्धं पराक्रान्तं चैकभवि
कपक्षनिराकरणेन सूरिभिः तस्माद्यथोक्तं भगवत्पूज्यपादभाष्यकृत
व्याख्यानमेव ज्यायः तदयमत्र निष्कर्षः अकर्त्रभोक्तृपरमानन्दाद्वि
तीयस्वप्रकाशब्रह्मात्मसाक्षात्कारेण निर्विकल्पेन वेदान्तवाक्यज
न्येन विचारनिश्चितप्रामाण्येन सर्वप्रामाण्येन सर्वप्रकाराप्रामाण्यशंका।
शून्येन ब्रह्मात्मज्ञाननिष्ठो नत्कार्यकर्तृत्वाभिमानरहितः परमार्थसं
न्यासी सर्वकर्मोच्छेदकृत् केवलः सन्न विद्याकर्मादिनिमित्तेन पुनः शरी
रग्रहणेन न भवति सर्वभ्रमाणां कारणोच्छेदेनोच्छेदात् यस्त्वविद्या
वान्कर्तृत्वाद्यभिमानी देहभृत् त्रिविधः रागादिदोषप्राबल्यात्
काम्यनिषिद्धादि यथेष्टकर्मानुष्ठायी मोक्षशास्त्रानधिकारी एकः अपर
स्तु यः प्राक्कृतसुकृतवशात्किंचित्क्षीणरागादिदोषः सर्वाणि क
र्माणि त्यक्तुमशक्नुवन्निषिद्धानि काम्यानि च परित्यज्य नित्यानि नैमित्ति
कानि च कर्माणि फलाभिसंधित्यागेन सत्त्वशुद्ध्यर्थमनुतिष्ठन् गौणसं
न्यासी मोक्षशास्त्राधिकारी द्वितीयः ततो नित्यनैमित्तिककर्मानुष्ठाने
नांतःकरणशुद्ध्या समुत्पन्नविविदिषः श्रवणादिना वेदनं मोक्षसा
धनं संपिपादयिषुः सर्वाणि कर्माणि विधितः परित्यज्य ब्रह्मनिष्ठगुरु
मुपसर्पति विविदिषासंन्यासिसमाख्यस्तृतीयः तत्राद्यस्य संसारित्वे
सर्वप्रसिद्धे द्वितीयस्य त्वनिष्टमित्यादिना व्याख्याते तृतीयस्य त्वयतिः
श्रद्धयोपेत इति प्रश्नमुत्थाप्य निर्णीतं षष्ठे अतस्य संसारित्वेऽथवै कार
णसामग्र्याः सत्त्वात् तत्र कस्य विज्ञानानन्तरं कस्य विज्ञानानन्तरग्र।
णमिति विशेषः विज्ञस्य तु संसारकारणाभावान्न तत्प्रवक्तव्यमिति
द्वौ पदार्थौ सूचितावस्मिन् श्लोके [illegible]
[illegible] कर्मत्यागासंभवः न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषत इति
तत्राज्ञस्य कर्मत्यागासंभवे को हेतुः कर्मदेहाद्यभिमानादि[illegible]
[illegible] श्लोकैः संपादयति तत्र प्रथमेन।

सदानंदी टीका ॥ १ ॥

नतु कर्मफलत्यागिनयादेहाभिमानिनः गौणसंन्यासिनोज्ञानवृत्त
त्यागिचकर्मणः १ देहाभिमानत्वस्यसत्वात्संन्यासिनस्तथा त्यागित
मुभयथापित्वमस्तीतिगम्यते २ तयोः फलेविशेषः कोयुद्द्वाभेन
गौणेन पक्रस्यामस्यफलाभेमह्यानुमितिचेच्छृणु ३ कर्मनदृशापि
नैकर्मफलत्यागिनश्चापिच गौणसंन्यासिनोविनष्टदेहः प्रागेव कालतः ४
स्तानोप्राकृतस्यास्तिशरीरग्रहणेफले मायिकेफलत्रभाविनाद
शीनेलयमेतियत् ५ एकत्वकर्मणाछ्रितिज्ञानमभिप्रायतः स्मृते प्र
त्यागिविधंतत्यात्कथमेकस्यकर्मणः ६ कर्मणस्त्रिविधत्वात्त्रि
विधंफलमीरितं पापस्यानिष्टमावीचितिर्यगादिकलक्षणं ७ देवा
दिलक्षणंचेष्टपुण्यस्यफलमीरितं मिश्रस्यपुण्यपापात्मनुग्गलस्यत
लक्षणं ८ इष्टानिष्टश्चतेप्रोक्तंफलंदेहगतयाविलं गौणसंन्यासिनामे
वदेहपातादनंतरं ९ देहांतरस्यग्रहणमावश्यकमितीरितं सत्वसं
न्यासिनोब्रह्मसाक्षात्कारेणनहिंदा १० अविद्यादिनिवृत्तोत्मकेव
ल्यात्मकनिर्वृतिः नदेहग्रहणंतेषांकाविकालियवादिशि ११ श्रुति
ष्टमिष्टमिश्रंचत्रिविधंकर्मणः फलं ज्ञानेनाज्ञानवाधेहितत्कार्यत्राव
कर्मणं १२ उच्छिन्नत्वान्ननदेहग्रहणंसंभवेत्कथं नीपतेवास्यकर्मा
णीयेवेश्मक्वापुदीरितं १३ गौणसंन्यासिनोतेनसंसारोहरिणोरितः
सत्वसंन्यासिनोमोक्षोविशेषोयंफलेतयोः १४ प्रथमंचात्तिनिष्क
दः सर्वोकस्यविवेचनात् नित्यशुद्धपरानंदस्वरूपैकतत्त्वतः १५
साक्षात्कारेणवेदांतवाक्यजेयेनभास्वता स्वनिष्ठितप्रभावेनतत्वज्ञाने
नसर्वथा १६ अज्ञानध्वांतवाधेनतत्कार्यकर्तृत्वबाधनात् यःपरमा
र्थसंन्यासीकर्मोच्छेदात्सुनिर्मलः १७ नाविद्याकामकर्मादिनिमित्तं
त्रिविधंफलं शरीरग्रहणंभूयोनभवत्येवसर्वथा १८ कारणोच्छेदतः
सर्वभ्रमाणांविनिवृत्तितः यस्त्वजोदेहभृत्सोयंत्रिविधोभवतिद्विजो
१९ रागादिदोषप्राबल्यात्प्रत्यक्षाचारसंभवः कर्मकाम्यनिषिद्धादिस
माचरतिमूढधीः २० एकोयमोक्षशास्त्रेयोनधिकार्यतिपामरः अप
रसाकृतैःपुण्यैःकिंचित्क्षीणमलःश्रमान् २१ त्यक्त्वाकाम्यनिषिद्धेच
नित्यनैमित्तिकंशुभं फलाभिसंधिसंत्यागात्स्वनुष्ठाय्यमाचरन् २२

श्री॰
गी॰ टी॰
प॰

58

सचायं गौणसंन्यासी मोक्षशास्त्राधिकारवान् क्रमाद्धीशुद्धिमासाद्य
श्रवणादिपरायणः २३ विवेकी बलवित्कार्येप्रवृत्तो यस्तृतीयकः त
त्राद्यस्य महानर्थभाक्स्यात्प्रत्यवायमेव हि २४ द्वितीयस्याप्यनिष्टादिफले
न त्रिविधं स्मृते तृतीयस्य तु राघवेष्वध्याये विनिर्णयः कृतः २५ द्विती
यस्यापि सत्कर्मतारतम्यात्कृतेरपि तारतम्यं स्मृतो वेदनिर्णीतेन च म।
नीषिभिः २६ संसारित्वं फलं देहाद्यभिमानिनिरूक्षे अविद्याकाम
कर्मादिसामग्र्यां संभवादिति २७ सा च संसारिता ज्ञानानन्त्यात्कस्यचि
द्भवेत् कस्यचित्तत्त्वमेवं विशेषस्तत्र बोधितः २८ न तत्त्वस्य तु सं
सारकारणाभावतः स्वतः सिद्धं कैवल्यमेवास्तीत्यत्राचार्यैस्सुचिंताउ
भौ २९ तावत्कर्मफलेत्यागमविरतेः संसारवागे नित्या विशिष्टानिष्टवि मि
श्रजन्मनि विंडंभोग्याकुलता नो भवेत् यावत्सज्जनचेचरीकविवहस्ता
ग्रेरसैकास्पदे श्रीमत्कृष्णपदांबुजेन मनसा मोक्षतीरताघस्वदी ३॥ १२

नीलकंठी टीका १२ ॥

एवंभूतस्य त्यागस्य फलमाह अनिष्टमिति अनिष्टं नरकतिर्यगादि
रूपं इष्टं देवत्वादिरूपं मिश्रं मानुषभावरूपं त्रिविधं कर्मणः कर्मजातीयस्य
फलं त्रिविधं प्रेत्य मरणानन्तरं भवत्यत्यागिनां सर्वकर्मस्वत्वसंन्यासहीनानां भ
वति न तु मुख्यसंन्यासिनां तत्र न कश्चित्तद्भवति तेषां कर्तृत्वाभिमानाभा
वात् अन्येषां तु गौणसंन्यासिनामेवायं कर्मालेपरत्वाद्धः तथा च आ
ख्यातेन कार्यमित्येव यत्कर्म मत्र अस्यत्यासंन्यासिनो गौणसंन्यासिनो च
विशेषानस्यात् न चैवं मुख्यसंन्यासिनो गौणसंन्यासिनो वा विशेषाप
त्तिरिति वाच्यं उभयेषामन्तरकर्मालेपेषु साम्येपि पूर्वकर्मदाहादाहकृ
तस्य विशेषस्य सत्वात् गौणसंन्यासिनां जन्मान्तरादिकमपि पूर्वक
र्मभिरेव भविष्यति आपस्तंबोक्ताम्रनिदर्शनेन योगभ्रष्टाणां वचनात्
रीयके वा नन्तस्य प्रधाने फले स्वर्गादिभवितमर्हस्यनुद्दिष्टत्वादिति
१२ ॥

आनंदी टीका १२

कर्मफलत्यागिनं स्तौति अनिष्टं नरकादि इष्टं स्वर्गादि मिश्रं मा
नुषकम् अत्यागिनां कर्मफलाभिसंधायिनां प्रेत्य जन्मान्तरे भव
ति न तु संन्यासिनां कर्मफलत्यागिनां क्वचित्स्वर्गनरकादौ पतनं भ
वति तेहि काम्यं न कुर्वन्ति नापि प्रतिषिद्धं यदि कदाचिन्निषिद्धमा
पतितं तदापीन्द्रियाणीन्द्रियार्थेषु वर्तन्ते नाहमेषां कर्तेत्यहंकाराप

गमाद्दपनीतप्रायमित्युक्तं वक्ष्यतः १२ ॥

रामकंठीटीका ४

यथोक्तत्यागिविपरीतवृत्तीनाम त्यक्तॄणां फलमाह ॥

ये यथाप्रतिपादितपारमार्थिकत्यागरहितास्तेषामत्यागिनां प्रेत्य पर
लोके त्रिविधं फलमनिष्टमित्यादि तत्रानिष्टमभिप्रेतरहितं दुःखात्म
कं यत्तामसचित्तैस्तामसश्रद्धैः कर्तृभिरनुष्ठितात्तामसात्कर्मण उपजा
तं स नरकतिर्यग्योन्यादौ लब्धोपपत्तिभिस्तैर्भुज्यते इष्टमभिप्रेतं सु
खात्मकं यद्रजोलेशानुगतसत्त्वप्रधानचित्तैः स्वर्गादिफलभूमिषु ता
दृक्श्रद्धैर्यथाविधिविहितात्कर्मण उत्पन्नं तत्पुरुषैरुपभुज्यते तथा
मिश्रं सुखदुःखात्मकं यद्रजःप्रधानचित्तैस्तादृक्श्रद्धैः कर्तृभि
रनुष्ठितात्कर्मण उपजातं यत्कर्मभूमौ मनुष्ययोनिगतैस्तैस्तैरुप
भुज्यत इत्येवं त्रिविधं कर्मणः फलं ज्ञानशून्यसंसारिपुरुषविषयं
संन्यासिनां तु यथोक्तत्यागवतां ज्ञानविज्ञाननिष्ठानां मन
सा कर्मयोगिनां तन्नोपपद्यते ततस्ते त्यागिनः कुशलाकुशलकर्मणि
रागद्वेषत्यागानुतिष्ठन्तीति पूर्वेणासंबंधः [illegible]
[illegible] तुमाह १२

लासिकी [illegible]टीका

फलस्यैत्रैविध्यमाह ॥

अनिष्टमनभिप्रेतं दुःखात्मकं नारकित्वादि इष्टमभिमतं सुखा
त्मकं देवत्वादि मिश्रं सुखदुःखात्मकं मनुष्यत्वादि इत्येवं पापस्य
पुण्यस्योभयमिश्रस्य च कर्मणो यत्फलं प्रसिद्धं तत्सर्वमत्यागिनां
कर्मानुष्ठातॄणां तत्फलात्यागिनां प्रेत्य परलोके भवति संन्यासि
नां कर्म कुर्वतामपि फलत्यागिनां क्वचिदपि इह वा परत्र वा न भव
ति अभिसंधिनैव कर्मणां फलावहत्वात् [illegible]
[illegible]
[illegible] माह १२

पंचोलीटीका

एवंभूतस्य कर्मफलत्यागस्य फलमाह अनिष्टमिति अनिष्टं नरकं

गी. तिर्यगादिलक्षणं रष्टं देवादिलक्षणं मिश्रं इष्टानिष्टसंयुक्तं मनुष्य
टी. लक्षणं एवं त्रिविधं त्रिप्रकारं कर्मफलं अत्यागिनां असंन्यासिनां कर्मि
ग्र. णां अपरमार्थसंन्यासिनां प्रेत्य शरीरपातादूर्ध्वं एवंविधं तेषां भवति
एवं संन्यासिनां केवलज्ञाननिष्ठानां कदाचिन्न भवति १२

59

रणवीर समिद्धोपिनी

त्यागस्य फलमाह अनिष्टमिति अनिष्टमनभिप्रेतं दुःखप्रायं यन्नामसैर्नारकैस्तिर्यग्योन्यभिजातैश्चोपभुज्यते इष्टमभिप्रीतं सुखप्रायं यत्स्वर्गादौ सात्विकैरुपभुज्यते मिश्रं सुखदुःखप्रायं यद्राजसैर्मनुष्यलोके उपभुज्यते इत्थं कर्मणो यज्ञादेस्त्रिप्रकारं फलं तत्तद्धाहरूपं तच्चसंगफलाभिसंधिना कर्माण्याचरतामत्यागिनां प्रेत्य परत्र भवति संन्यासिनां तु प्रोक्तविधिष्टरूपतया विहितकर्माण्यनुतिष्टतां न भवति नाहशाफलाभावेनच मद्धामप्राप्तिलक्षणा मुक्तिस्तेषां भवतीति भावः १२॥

मधुभाष्य

अनिष्टमित्यादिना पुनःसंन्यासं प्रपंचयितुं कर्मकारणान्याह १२॥

अब पूर्वोक्त त्यागका फल कहते हैं कि अनिष्ट कहे नरक औ इष्ट क
हे देवत्व तथा मिश्र कहे मनुष्यत्व येई पाप पुन्य मिले हुये कर्मों के
फल है सो काम्य कर्म करनेवालों को देहान्त होने पर प्राप्त होते हैं औ
कि सकाम मनुष्यों को पाप पुन्य औ दोनो से मिले त्रिविध कर्म सम्भ
वहै परन्तु ये कर्म संन्यासी पुरुष को किसी तरह सम्भव नहीं हो
ते और संन्यासी इस प्रसंग मे कर्मफल का त्यागी ही लेते है यहां अ
माणा जानो कि अनाश्रितः कर्मफलं कार्यं कर्म करोति यः स संन्यासी च
योगी च इति ६ अध्यायके प्रथमश्लोक से लेकर कहा है और कर्मफल
त्यागी पुरुष को सब जगह संन्यासी कहा इससे यह फल त्यागी सा
त्विक मनुष्य को पाप के असंभव हेतु से और भगवान को अर्पण करनेसे
पुन्यफलके भी त्याग होने से त्रिविध जो कर्मफल वे किसी प्रकार से
भी नहीं होते है १२

दोहा

प्रिय अप्रिय मिश्रित त्रिविध कर्मनि को फल होय अत्या
गी को प्रिय होत है संन्यासी को नहि सोय १२ ॥

60

पंचैतानि महाबाहो कारणानि निबोध मे
सांख्ये कृतान्ते प्रोक्तानि सिद्धये सर्वकर्मणां १३

शांकरभाष्यटीका १ ॥

अतः परमार्थदर्शिन एवाशेषकर्मसंन्यासित्वे संभवत्यविद्याध्या।
रोपितत्वादात्मनि क्रियाकारकफलानां न त्वविदुषोऽधिष्ठानादीनि
क्रियाकर्तॄणि कारकाण्यात्मत्वेन पश्यतोऽशेषकर्मसंन्यासः संभव
ति तदेतदुत्तरैः श्लोकैर्दर्शयति पंचेति पंच एतानि वक्ष्यमाणानि
हे महाबाहो कारणानि निर्वर्तकानि निबोध मे मम इत्युत्तरत्र चे
तःसमाधानार्थं वस्तुवैषम्यप्रदर्शनार्थं च तानि च कारणानि ज्ञा
तव्यतया स्तौति सांख्ये ज्ञातव्याः पदार्थाः संख्यायन्ते यस्मिन् शास्त्रे
तत् सांख्यं वेदान्तः कृतान्त इति तस्यैव विशेषणं कृतमिति कर्मो
च्यते तस्यान्तः परिसमाप्तिर्यत्र स कृतान्तः कर्मान्त इत्येतत् या।
वानर्थ उदपाने सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यत इत्यात्म।
ज्ञाने संजाते सर्वकर्मणां निवृत्तिं दर्शयति अतस्तस्मिन्नात्मज्ञाना
र्थे सांख्ये कृतान्ते वेदान्ते प्रोक्तानि कथितानि सिद्धये निष्पत्त्यर्थं सर्वक
र्मणां १३ ॥

आनंदगिरिकृतटीका २ ॥

ननु अपरमार्थसंन्यासवदविशेषादज्ञानां परमार्थसंन्यासोऽपि किं
न स्यात्त्यागस्य सुकरत्वात्तत्राह अतः परमार्थेति तस्य सम्यग्दर्शि
नादविद्यानिवृत्तौ तदारोपितक्रियाकारकादिनिवृत्तेरिति हेत्वर्थः
विद्यावतः सर्वकर्मसंन्यासित्वसंभावनामुक्त्वा एवकारव्यावर्त्यं द
र्शयति न त्विति अविदुषोऽशेषकर्मणां तदेतन्नोच रागादीनां मा
र्गायोगे कारकेष्वधिष्ठानादिष्वात्मदर्शने हेतुमाह क्रियेति कथमा।
धिष्ठानादीनां क्रियाकर्तृत्वे कथम्वा विदुषस्तेष्वात्मत्वधीरित्याशंक्या
नन्तरश्लोकचतुष्टयस्य तात्पर्यमाह तदेतदिति कर्माधिष्ठानधिष्ठा
नादीनामसाधारणीकृत्याशंकामादावुक्तां पंचेति उत्तरत्वेनाधिष्ठा।
नादिषु वक्ष्यमाणेष्वित्यर्थः वस्तूनां तेषामेव वैषम्यं निर्दिदर्शयिषि

श्री·
गी टी
अ·

61

ते नहि चेतःसमाधानाद्दृते ज्ञाने शक्ये तत् सांख्यशब्दः सु
त्पादयति ज्ञातव्येति आत्मा त्वंपदार्थस्तत्पदार्थो ब्रह्म तयोरैक
यमङ्गयोगिनश्च श्रवणादयः पदार्थास्ते संख्यायन्ते सुम्याय
न्ते कृतान्तशब्दस्य वेदान्तविषयत्वं विभजते कृतमित्यादिना
वेदान्तस्य तत्त्वीद्वारा कर्मावसानभूमित्वं वाक्योपक्रमाद्बहु
ल्य दर्शयति यावानिति उदपाने कूपादौ यावानर्थः स्नानादिः
तावानर्थः समुद्रे सम्पद्यते एतोयथा कूपादिकृतं कार्यं सर्वं
समुद्रेऽन्तर्भवति तथा सर्वेषु वेदेषु कर्मार्थेषु यावत् फलं ताव
त् ज्ञानवतो ब्राह्मणस्य ज्ञानेऽन्तर्भवति ज्ञानेप्राप्तस्य कर्तव्या
नवशेषादित्यर्थः तदेव वाक्यान्तरमनुक्रामति सर्वमिति उदा
हृतवाक्यार्थोक्तमर्थमाह आत्मेति आत्मज्ञाने सति सर्वकर्म
निवृत्तावपि कथं वेदान्तस्य कृतान्तत्वमित्याशंक्याह एतदिति
तानि मद्वचनतो निबोधेति पूर्वेण संबंधः १३ ॥

स्वामिकृतटीका ३ ॥

ननु कर्म कुर्वतः कर्मफलं कथं न भवेदित्याशंक्यासंगत्यागिनो नि
रहंकारस्य सतः कर्मफलेन लेपो नास्तीत्युपपादयितुमाह पञ्चैता
नीति पञ्चभिः सर्वकर्मणां सिद्धये निष्पत्तये इमानि वक्ष्यमाणानि पञ्च
कारणानि मे वचनात्त्वं विबोध जानीहि आत्मनः कर्तृत्वाभिमाननिवृ
त्यर्थं श्रवणमेतानि ज्ञातव्यानीत्येवं तेषां तत्त्वमर्थमाह सम्यक् ख्याय
ते ज्ञायते परमात्मानेनेति सांख्यं कृतं कर्म तस्यान्तः समाप्तिर्यस्मि
न्निति कृतान्तः तस्मिन् वेदान्तसिद्धान्त इत्यर्थः यद्वा सांख्यं येन गणेन त
त्त्वान्यस्मिन्निति सांख्यं कृतं प्रोक्तानि यो यस्मिन् सांख्यशास्त्रमेव त
स्मिन् प्रोक्तान्यतः सम्यग्विबोधेत्यर्थः १३ ॥

पिशाचभाष्य टीका ४ ॥

तानि कानीति प्रोच्यते परमार्थमेत्यास्मिं केवलज्ञाननिष्ठे तोत
कृतसर्वकर्मसंन्यासात्तत भवतीति कृतेन संबंध इति कर्मानुष्ठा
ने न फलाभिसंधिरहितेन प्राप्तसत्त्वशुद्धीनां सकलकर्मसंन्यासोऽभि
धीयते १३ ॥

रामानुजभाष्य टीका ५ ॥

पंचेति सांख्ये कृतांते यथावस्थितविषयया वैदिक्या
बुद्ध्यानुसंहितनिर्णये सर्वकर्मणां सिद्धये प्रोक्तानि पंचेमानि का
रणानि तानि निबोध मे मम सकाशात् अवस्थैव यसवैदिकी ।
हि बुद्धिः शरीरेंद्रियप्राणजीवात्मोपकरणं परमात्मानमेव का
र्तारमवधारयति य आत्मनि तिष्ठन्नात्मनोंतरो यमात्मा न वे
द यस्यात्मा शरीरं य आत्मानमंतरो यमयति स त आत्मांतर्याम्य
मृतः अंतःप्रविष्टः शास्ता जनानां सर्वात्मेत्यादिश्रु [illegible]

अभिनवगुप्तकृतटीका ६ ॥

स्पष्टार्थं १३ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपादी टीका ७ ॥

ननु भजिक्रियां कुर्वतस्तु निर्भवती स्यतमवे कर्म कुर्वतः फले ।
कथं न भवेदित्याशंक्यासंगत्यागिनो निरहंकारस्य सतः कर्मले
पो नास्तीत्युपपादयितुमाह पंचैतानीति सर्वकर्मणां सिद्ध
ये निष्पत्तये एतानि वक्ष्यमाणानि पंच कारणानि मे मत्तः सकाशा
न्निबोध जानीहि आत्मनः कर्तृत्वाभिमाननिरासार्थमेतानि ज्ञातव्या
नीत्येवं तेषां स्तुत्यर्थमाह सांख्य इति किंभूतानि सांख्ये कृतांते प्रो
क्तानि यदा सम्यक् ख्यायते ज्ञायते परमात्मा तेनेति सांख्यं सम्य
ग्ज्ञानं परिगम्यते तेन तत्वानि यस्मिन्निति सांख्यं कृतांतः सिद्धांतस्तस्मि
न्वेदांतसिद्धांते इत्यर्थः १३ ॥

वनमाली टीका ८ ॥

न केवलं काम्यकर्मत्यागः संन्यासः किंत्वंतर्यामिप्रेरितदेहेंद्रिया
दीं कर्माण्यायुक्तेनाहं कर्मकर्तेत्याद्यभिमानत्यागश्च संन्यास इति
प्रागुक्तं संन्यासस्य पंचयितमात्मनोकर्तृत्वे कथं क्रियानिष्पत्तिः
कर्तृत्वे च कथमभिमानत्याग इति शंकानिराकरणायाह पंचेति
एतानि वक्ष्यमाणानि पंच सर्वकर्मणां सिद्धये निष्पत्तये कारणानि
हे महाबाहो मे मम परमात्मनः स्ववचनान्निबोध यथायथ सांख्यानो मि
भव किमेतानि प्रमाणकान्येव त्वद्वचनानीत्याह सांख्ये ।
कृतांते प्रोक्तानि निरतिशयपुरुषार्थं ज्ञानं तत्वानि जीवेश्वरप्रधा
नानि श्रवणादयश्च पदार्थाः संख्यायंते प्रतिपाद्यंते स्मिन्निति [illegible]

न्ति सांख्येन वेदांतशास्त्रेन तत्त्वात्मप्रतिपादके तस्मिन् किमर्थे
लोकसिद्धानि च कर्मकारणानि पंच प्रतिपाद्यंते इत्यतः शास्त्र
विशेषणं कृतांत इति कृतमिति कर्मोच्यते तस्यांतः परिसमाप्ति
स्तत्त्वज्ञानोत्पत्त्यावधि तस्मिन् कृतांते शास्त्रे आत्मनो कर्तृत्वज्ञानाय
प्रोक्तानि यद्वा सांख्ये कपिलप्रोक्ते सेश्वरे कृतांते सिद्धांते प्रो।
क्तानीत्यर्थः १३ ॥

अ हनुमवैजयंती टीका ८ ॥

तत्त्वनिर्दिष्टे चतुर्दशी स्वमीमांसज्योतिष्टोमादीनि महायज्ञादीनि च क
र्माणि कुर्वतोऽनंतफलानि कृतोऽन स्त्रीमांशंकस्यस्मिन्न योजकक
र्तृत्वनिश्चयेन च तेषां नानि न भवंतीत्याह पंचभिः पंचेनानीति हे
महाबाहो मामुर्द्धिकश्रुरुष्टलतनाव्यात्त्रिनाहेन यघण्यन्यैषां स
र्वकर्मसिद्धिहेतुभूतानि पंचैतानि दुर्बोधानि स्वस्तत्यापि तव म
हाबाहुत्वान्हेबोधानि भवंतीति सूचितं सर्वकर्मणां सर्वेषां यज्ञ
तपोदानादीनां कर्मणां सिद्धये निष्पत्तये प्रोक्तानि वक्ष्यमाणानीमा
नि पंच कारणानि मे मत्तः सकाशात्त्रिबोध त्वज्ञानी हि न तत्र
किं प्रमाणमिति चेत्तत्राह सांख्ये इति कृतांते कृतातोऽतो निर्णयो
यस्मिस्तस्मिन्नघज्ञात्मनि निश्चितात्मनोऽतरो यमात्मानवेदय
आत्मानमंतरो यमयति सत्त अत्मातर्यम्यमृतः श्रुतेः प्रविष्टः
शास्ताजनानामित्यादिना परमात्मनस्सर्वविद्विदस्त नियम
त सर्वकर्महेतुतां प्रवर्तकत्व सर्वांतर्यामित्वे चेति निर्णयकारिणीम
र्थः सांख्ये सम्यक्ख्यायते ज्ञायते परमात्मानेन सम्यक्ख्यायते ग
म्यते न तत्त्वान्यस्मिन्निति सांख्यं तदेव सा[illegible]चिद्विद्वीश्वरतत्त्वप्रति
पादकं वेदांतशास्त्रं तस्मिन्प्रोक्तानि साङ्ख्येति विशिष्टं निश्चितं तस्य
सम्यक्निबोधेत्यर्थः १३ ॥

+तत्रात्मज्ञानरहितस्य संसारित्वे
हेतुः कर्मत्यागः संभवत्युक्तः नहि
देहभृता शक्यं त्यक्तुं कर्माण्यशेष
त इति तत्रात्मस्य कर्मत्यागासंभवे
को हेतुः कर्महेतावधिष्ठानादिपं
चके तादात्म्याभिमान इतीममर्थं
चतुर्भिः श्लोकैः प्रपंचयति तत्र प्रथमेनाधिष्ठानादीनि पंच वेदांत
प्रमाणमूलानि हेयत्वार्थमवश्यं
ज्ञातव्यानीत्याह॥

मधुसूदनी टीका १० ॥

+इमानि वक्ष्यमाणानि पंच सर्वकर्मणां सिद्धये निष्पत्तये कार
णानि निर्वर्तकानि हे महाबाहो मे मम परमात्मनः सर्वज्ञस्य व
चनान्निबोध बोद्धुं सावधानो भव नत्यपेत इत्यनेनानि श्रुत
वहितचेतसा शास्त्रे ज्ञातमिति चेतः सावधानविधानेन तानि।
स्तौति महाबाहो तेन च सन्मुखत्वप्रवशात्कोत्साहमिति सूचयति

स्तत्पर्थमेव किमेतावत्प्रामाण्यकामेवततववचनाद्देयानितेषा
हंसे त्वा कृतोतेप्रोक्तानि निरति शयपुरुषार्थसाध्यर्थे सर्वान्थनि
हृमर्थेच ज्ञानत्वानि जीवब्रह्मतयोरैक्यं नहोयोपयोगितसूत्रव
णादयः पदार्थाः सेव्याधेतेषु सागंधेतेः स्मिन्निति सोऽयं वेदान्तशा।
स्त्रेतस्मिन् प्राम्भवस्तुमात्रप्रतिपादके किमर्थमनात्मभूतान्यव
स्तूनि लोकप्रसिद्धानि च कर्मकारणानि पंचप्रतिपाद्येन इत्यतःशा
स्त्रविशेषणं कृतो तेइति कृतमिति कर्मोच्यते तस्मात्तः परिसमाप्ति
रावे स्त्रार्थं[illegible]ततःप्रारब्धविशेषणं[illegible]इति कृतमिति कर्मो
च्यते तस्मात्तः परिसमाप्तिस्तत्त्वज्ञानेनास्मा पद्यतस्मिन्कृतोतेषा
स्त्रेप्रोक्तानि प्रसिद्धानि च लोके अनात्मभूतानि वात्मतया मिथ्या
ज्ञानारोपेण गृहीतान्यात्मतत्त्वज्ञानेनवाधसिद्धये हेयत्वेनो
क्तानि यदा हि प्रमयमेव कर्म्मात्मन्यविद्याध्यारोपित मिथ्य
तेतदाश्चह्यात्मज्ञानेनतद्वाधा कर्मणोऽतः कृतो भवति अतः शास्त्र।
नःकर्मासंवेद्यप्रतिपादनात्मभूतानामेव पंच कर्म कारणानि वेदा
न्तशास्त्रे मायाकल्पितानामनुदितानीति नाहैतात्ममात्रतात्पर्यहा
निस्तेषां तद्गतत्वेनैवतत्प्रतिपादनात् इहापि च सर्वकर्मा तत्त्व।
ज्ञानस्य प्रतिपादितं सर्वकर्माखिलंपार्थ ज्ञाने परिसमाप्यते इति
तस्मात्त्वज्ञानशास्त्रस्य कर्मान्तत्त्वमुपपन्नं[illegible]कर्म।
[illegible]
[illegible] १३ ॥

सदानंदी टीका ॥ ॥

तत्रात्मज्ञानस्य स्वस्य हेतोः शास्त्रविद्वत्तिकारणं प्रोक्तं स्वकर्मणिसाग
से भवो हरिणा स्वयं १ नहिदेहभृतेशक्यं दानीतसेवदेहिनः ३
च्यातेकर्मणांसागासंभवे संन्यस्तैतथा तदात्माध्यासकोहेतुरधिष्ठानादि
पंचके ३ अंशपंचयत्वर्थेस्मिल्लोके सत्रवभिरीश्वरः ३ इमानिवस्तुमा
णानि पंच निर्वर्तकानि च सर्वेषां कर्मणांचैव तनिष्ठत्वर्थं महाभुज
४ ममेश्वरस्य वचनाद्धोतुं भव समाहितः समाधानेविनाज्ञानेन
शक्नोतिइमान्यपि ५ सर्वानर्थनिवृत्यर्थं ज्ञातव्यानि प्रमाणतः जी
वो ब्रह्मतयोरैक्यं न हि ज्ञानोपयोगिनः ६ अवगम्याः पदार्थाश्च
साधेतेचशास्त्रके तत्रास्त्विनामवेदान्तशास्त्रेतस्मिन्कृतेतदयं ७

63

कृतमित्यश्रुते कर्मतत्स्यान्नस्त्वबोधतः सदा योजायते येन स
कृतो नास्ति न च च ८ प्रोक्तान्यनात्मभूतानि भोग्यात्मत्वेन लो
कितैः गृहीतान्यात्मबोधेन बाधसिद्ध्यर्थमेव हि ९ यत्नो हेय
नयोक्ता नित्त्वानत्यानीमनोपिया प्रमयधर्मीस्ति कर्मैनत्यायया
प्रसगात्मनि १० आरोपितमनोवाचात्कर्मणोतः कृतो भवेत्
अतएवात्मनः कर्मास्वेवध्यज्ञानसिद्धये ११ अविद्यारोपितात्वृहे ५४
नवः पंचकर्मणा अनूदितास्ते वेदांतशास्त्रोहोहेन बोधके १२
श्रुहेतमात्रतात्मर्थहानिर्नैवास्यतो यतः नु देंगत्वेन तेषां वसति
पादनमागमे १३ फलवत्त्वात्र्ययोयनजदंगमफलस्कृत इति
न्यायेन चैतेषामंगत्वेन फलबोधने १४। १३ ॥

नीलकंठी टीका १२ ॥

नन्वात्मनः कर्मालेपनिमित्तं परकर्तृत्वाद्यसंस्थाने तत्किं योषि
दग्निदृष्ट्यादिवदाहार्यं उत वास्तवमेव सदविद्याध्यस्तकर्तृत्वं।
नाद्यः तमिमि निशास्वदृष्ट्याकर्तृत्वनिरोधोनेना कर्तृत्वमेव भाव्यते
इत्याशंक्याश्रुतित्वेन दृष्टायां योषितिदृष्टत्वादर्शनेनैव कल्पिते
नाकर्तृत्वेन वास्तवस्य कर्मालेपस्यासंभवाद्वयोनिरस्य हितीय
मुपपादयितुमन्यां टिकामारचयति पंचेति हे महाबाहो सर्वक
र्मणां सिद्धये इमानि वक्ष्यमाणानि पंचकारणानि निवृत्तिकानि मे
मद्वचनान्निबोध बुध्यस्व स्ववचने विश्वासोत्पादनार्थं कारणा
नां समस्तत्वमाह सांख्ये कृतांते प्रोक्तानीति सम्यक् विविच्याख्या
यंते प्रकटीक्रियंते तत्त्वान्यात्मानात्मपदार्थरूपाणि यस्मिंस्तत्सा
ख्यं वेदांतशास्त्रं तदेव विशिनष्टि कृतांते कृतस्य कर्मणोंतः
परिसमाप्तिर्यस्मिन् सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते
इत्यात्मज्ञाने सति सर्वकर्मणां समाप्तिदर्शनात् तस्मिन्सां
ख्ये कृतांते प्रोक्तानि १३ ॥

आनंदी टीका १३

तदेवं देहभृतामपरिहरणीयस्य नियतस्य कर्मणः सिद्धिकार
णान्याह सांख्ये सम्यक् ख्यायन्ते विशेषैः कृत्स्नं तेन महाभूतादि
विकृतिप्रकृतिपुरुषकालपरमेश्वराख्याः पंचपदार्था यस्मिंस्त
स्मिन् सांख्यस्य मोक्षशास्त्रस्य सिद्धान्ते १३ ॥

+ अथात्यागिनस्त्रिविधकर्मफलेन युज्यन्ते न तु त्यागिन इत्यत्र हेतुं क्रमेण प्रतिपादयितुमाह॥

रामकंठीटीका १३ ॥

+ इहेमानि वक्ष्यमाणानि कारणानि निमित्तानि सर्वकर्मणां सकलशरीरसंबंधिनां मनोवाक्कायनिर्वर्त्यानामशेषक्रियाविशेषाणां कृतान्ते कृतनिष्ठे सांख्ये निश्चयशास्त्रे प्रोक्तानि प्रतिपादितानि निबोध निबुध्यस्व [illegible] १३ ॥

+ ननु कर्म कुर्वतः कर्मफलं कथं न भवेदित्याशंक्यासंगत्यागिनो निरहंकारस्य सर्वकर्मफलेन लेपो नास्तीत्युपपादयतुमाह॥

लासिकी [illegible] टीका

+ कृतान्ते कृत निश्चये सांख्ये शास्त्रे सर्वेषां मनोवाक्कायनिर्वर्त्यानां कर्मणां सिद्धये निष्पत्तये प्रोक्तानि प्रतिपादितानीमानि वक्ष्यमाणानि पंचकारणानि हेतून् हे महाबाहो मे वचनान्निबोधावधारय [illegible] १३

पंचोलीटीका

कर्मफलत्यागिनः अहंतः करणस्य परमार्थदर्शिनः अधिष्ठानादीनि अनात्मत्वेन जानतः कर्मलेपो नास्तीत्याह पंचैतानीति हे महाबाहो सर्वकर्मणो सिद्धये निष्पत्तये सांख्ये वेदान्ते कृतान्ते कर्मसमाप्तिलक्षणे प्रोक्तानि पंचकारणानि मे मत्तः तानि निबोध जानीहि १३

अमरावीरसमिद्बोधिनी

उक्तेऽर्थे हेतुं क्रमेण प्रतिपादयितुमाह पंचेमानीति इमानि वक्ष्यमाणानि पंचसंख्याकानि कारणानि सर्वेषां कायवाङ्मनोनिर्वर्त्यानां कर्मणां यथास्वं विहितानां प्रतिषिद्धानां व्यापाराणां सिद्धये निष्पत्तये मे मत्तो निबोध बुध्यस्व कीदृशानि सांख्ये कृतान्ते प्रोक्तानि संख्यं प्रतिष्ठितं तत्संबंधि सिद्धान्ते प्रतिपादितस्वरूपाणीत्यर्थः १३॥

मधुभाष्य

पंचेत्यादिना सांख्येकृतांतेतत्वानुसिद्धांते अधिष्ठानं दे
हादिः कर्ताविष्णुः सहिसर्वकर्तेत्युक्तं जीवस्यचाक
र्तृत्वेप्रमाणमुक्तं करणमिंद्रियादि चेष्टाः क्रियाः
हस्तादिक्रियाभिर्होमादिकर्माणिजायंते ध्याना
देश्चमानसीचेष्टाकारणं प्रवर्तनीचेष्टापिसंस्कार
कारणत्वेनभवति दैवमदृष्टं तथाचायास्यश्रुतिः
देहोत्रस्थार्थेंद्रियाणां क्रियाश्चतथादृष्टंपंचमंकर्म
हेतवरिति केवलंनिष्क्रियं पन्नंकेवलमात्मानंनिष्क्रि
यत्वाद्द्रष्टेतिहिश्रुतिस्तथैव नज्ञानंस्तौति १६॥

भाषा अनुवाद ॥

जो कहो कि कर्मी पुरुष को कर्मफल क्यों नहीं येगे इस शंका पर
संगत्यागी विद्वान मनुष्य को जो कर्मबन्ध नहीं यह सिद्ध करने
की इच्छा से यहां से पांच श्लोक से कहते हैं कि हे महाबाहो कर्मों
की निष्पत्ति मे ये पांच कारण मेरे वचन से जानो और अपने कर्तृ
त्व रूप अभिमान को निवृत्ति के अर्थ इन कारणों को अवश्य जान
ना चाहिये कि इस प्रकार परमात्मा सम्यक रूपसे प्रसिद्ध अर्थात
ज्ञान का विषय होता है इस अर्थ का सूचन करनेवाला जो सांख्य भा
वार्थ यह कि तत्व ज्ञान मे प्रकाशमान आत्मा वो यही को सांख्य कह
ते हैं और ऐसे कर्मों का अन्त कहे समाप्ति इस मे है इस अर्थ का सूच
क जो कृतान्त अर्थात सांख्य कृतान्त कहे वेदान्त सिद्धान्त से अथ
वा इस मे सब तत्व गने हैं इस अर्थ का सूचक सांख्य और इस
तरह से किया है अन्त अर्थात सकल निर्णय इस मे है इस अर्थ
का सूचक जो कृतान्त पद इन दोनो पदार्थों की सांख्य कहते हैं
सोर सांख्य ने ये पांचो कारण अच्छी प्रकार से कहा है इससे तु
म सम्यक प्रकार से जानो १३ ॥

दोहा

कारण पंच महाबाहु मो सों सुण यह सोय करे सांख्य
सिद्धांत में सर्व कर्म सिद्धि कोय १३

65

अधिष्ठानंतथाकर्त्ताकरणंचपृथग्विधं
विविधाश्चपृथक्चेष्टादैवंचैवात्रपंचमं १४

शांकरभाष्यटीका १ ॥

कानि तानीत्युच्यते अधिष्ठानमिति अधिष्ठानमिच्छाद्वेषसु
खदुःखज्ञानादीनामभिव्यक्तेराश्रयोधिष्ठानं शरीरं तथाकर्त्ता
उपाधिलक्षणो भोक्ता करणं च श्रोत्रादिकं शब्दाद्युपलब्धये पृ
थग्विधं नानाप्रकारं द्वादशसंख्यं विविधाश्च पृथक्चेष्टा वाय
वीयाः प्राणापानाद्या दैवं चैव दैवमेवात्र एतेषु चतुः पंचमं पंचा
नां पूरणमादित्यादि चक्षुराद्यनुग्राहकं १४ ॥

आनंदगिरिटीका २ ॥

कर्मणोधिष्ठानादीनि मानमूलत्वात् ज्ञेयानीत्युक्तमिदानीं
प्रश्नपूर्वकं विशेषतस्तानि निर्दिशति कानीत्यादिना प्रतीकमा
दाय व्याकरोति अधिष्ठानमिति उपाधिलक्षणो बुद्ध्यादिरुपाधि
र्लक्षणमस्य तत्स्वभावो बुद्ध्याद्यनविद्यावी तदभिमानात्मेति यावत्तदु
क्तिस्तस्यात्मस्वभावानुभवार्थः तत्र कार्यलिंगकमनुमानं सूचयति शब्दा
दीति ज्ञानेंद्रियाणि पंच पंचकर्मेंद्रियाणि मनोबुद्धिश्चेति द्वादशसं
ख्येत्वं चेष्टाया विशेषयत्वे नानाप्रकारत्वं तदेव स्पष्टयति वायवीया इ
ति पृथक्त्वमसंकीर्णत्वं नहि प्राणापानादिचेष्टानां मिथः सं
करोस्ति दैवं विशदयति आदित्यादीति १४ ॥

स्वामिकृतटीका ३

तान्येवाह अधिष्ठानमिति अधिष्ठानं शरीरं कर्त्ता चिज्जडग्रंथिरहंकारः दवि
पृथग्विधमनेकप्रकारं करणं चक्षुःश्रोत्रादि विविधाश्च कार्यतः स्वरू
पतश्च पृथग्भूताश्चेष्टाः प्राणापानादीनां व्यापाराः अत्रैतेष्वेव दैवं पंच
मं कारणं चक्षुराद्यनुग्राहकमादित्यादि सर्वप्रेरकोंतर्यामी वा १४ ॥

पिशाचभाष्यटीका ४ ॥

सांख्ये कृतांते प्रोक्तानि सिद्धये सर्वकर्मणां अधिष्ठानं शरीरं तथा कर्त्ता
त्मीयत्वेनाभिमन्यते करणं च श्रोत्रादीन्द्रियं पृथग्विधं पंचधा हि।
विधा नानाप्रकाराः पृथक्चेष्टाः प्राणादिगा भूतानां प्रवृत्तिसुखकारणा वा

श्री·
गी·टी·
अ·

पंचानो हेतवो दैवं १४ ॥

रामानुजभाष्यटीका ५

इदमाह अधिष्ठानमिति शारीरवाङ्मनोभिर्यत्कर्म प्रारभते शास्त्रसिद्धे विपरीते वा
निषिद्धे वा सर्वस्मिन्कर्मणि शारीरे वाचिके मानसे च पंचैते हेतवः अधि
ष्ठानं शरीरं अधिष्ठीयते जीवात्मनेति महाभूतसंघातरूपं शरीरमधिष्ठानं
तथा कर्ता जीवात्मा अस्य जीवात्मनो ज्ञातृत्वं कर्तृत्वं च संज्ञानपूर्वक
मीशास्त्रार्थवत्त्वादिति च सूत्रोपपादितं करणं च पृथग्विधं वाक्पाणि
पादादिपंचकं समनस्कं कर्मेंद्रियं पृथग्विधं पृथग्व्यापारं विविधाश्च पृ
थक् चेष्टाः चेष्टाशब्देन वायुरभिधीयते तद्वृत्तिवाचिना शरीरेंद्रिय
धारणस्य प्राणापानादिभेदभिन्नस्य च वायोः पंचात्मनो विविधाश्चे
ष्टा विविधा वृत्तयः दैवं चैवात्र पंचमं अत्र कर्महेतुकलापे पंचमं परमा
त्मा अंतर्यामी कर्मनिष्पत्तौ प्रधानहेतुरित्यर्थः उक्तं हि ॥ सर्वस्य चाहं हृदि सं

त्रिविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं चेति वक्ष्यति च ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति भ्राम
यन्सर्वभूतानि यंत्रारूढानि माययेति
परमात्मायत्तं जीवात्मनः कर्तृत्वं
परात्तु तच्छ्रुतेरित्युपपादितं १४॥

अभिनवगुप्तकृत टीका ६

स्पष्टोऽर्थः १४ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका ७ ॥

तदाह अधिष्ठानमिति अधिष्ठाने शरीरे कर्ता जडचेतनग्रंथिरहंकारः पृ
थग्विधं बहुविधं करणं चक्षुरादि विविधा अनेकप्रकाराश्चेष्टाः प्राणापा
नादिव्यापाराः एतेषु च पंचमं दैवं चक्षुरादीनामधिदैवं सूर्यादि सर्वप्रेर
कोऽन्तर्यामी वा १४ ॥

वनमाली टीका ८ ॥

प्रामाण्ये कारणानि पंचात्मनो कर्तृत्वज्ञानार्थं तानि तथानि कानीत्य
पेक्षायामाह अधिष्ठानमिति द्वाभ्यां अधिष्ठानं देहः तथा कर्ता
परमेश्वरः करणं चेंद्रियं देहे पृथग्विधं ज्ञानेंद्रियकर्मेंद्रियादिभेदेन
नानाप्रकारं करणं विविधा नानाप्रकाराः पंचधा वायुप्रसिद्धाः पृथग्ग
संकीर्णाश्चेष्टाः प्राणापानव्यानोदानसमानाः नागकूर्मकृकरदेवद
त्तधनंजयाख्योपभेदेन भिन्ना वायवः दैवमदृष्टं देहो ज्ञानेंद्रियाणि
क्रियाश्च तथा अदृष्टं पंचमं हेतुरिति निष्कृतेः यद्वा कर्तृशास्त्रार्थवत्त्वा
त्तस्मात्कर्ता जीवो देवमस्य नेतृत्वकरणादावंतर्भावः यथा च वायवः
क्रियायां हेतवस्तथा जीवोऽपि न तु केवलो जीवः प्रवर्तक इति भावः १४ ॥

ज्ञसमेवेजयेती टीका ९ ॥

कानि पंच कारणानीत्यपेक्षायां नामेव गणयति अधिष्ठानमिति
अधिष्ठाने अधिष्ठीयते जीवात्मनेत्यस्मिन्नधिष्ठीयते जीवात्मनाऽनेने
ति वा अधिष्ठानं पंचमहाभूतसंघातरूपं शरीरं तथा कर्ता जीवात्मा
कर्त्ता शास्त्रार्थवत्वादिति सूत्रमस्यास्वाभाविकं कर्तृत्वं वदति तथाश
ह्यादस्यात्तात्रमपि स्वाभाविकं शास्त्रसिद्धं च द्रष्टा श्रोता रसयिता
घ्राता स्प्रष्टा मंता बोद्धा विज्ञाता नात्मा विज्ञातारमरे केन विजानीयात् ज्ञाना
से वा येकरुषः नहि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते इ विनाशित्वा
नतोः नपावेमादिकं च पृथक् पृथग्विधं कर्मनिष्पत्तौ पृथग्व्यापारा
पकं करणं समनस्कं ज्ञानेंद्रियपंचकं कर्मेंद्रियपंचकं च पृथक् वि
विधाः पृथक् चेष्टाः प्राणादिपंचानां नानागादिपंचानां च नाना विधाभि
न्नभिन्नव्यापाराः च शब्देन वायोर्मनोरिंद्रियप्रवर्तनकारिणां सूर्या।
दिदेवताप्रवर्तकानां पूर्वोक्तनिर्गुणाकालाद्ययग्रहोते अत्रास्मिन्क
र्मनिष्पादके हेतुसमुदाये दैवं सर्वप्रेरकं सर्वाराध्यः परब्रह्मभूतः
सर्वान्तर्यामी अहमेव पंचमोमतोऽसौ हेतुर्भवतु भवामि सर्वस्य चाहं ह
दि संनिविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च तेनेत्युक्तत्वात् ईश्वरः सर्व
भूतानां हृद्देशेऽर्जुन तिष्ठति भ्रामयन्सर्वभूतानि यंत्रारूढानि माययेति
वचनाच्च ननु पंचककर्मनिष्पादकहेतुप्रवेषु परमात्मैव मुख्यो
हेतुस्तर्हि परेणाधीनकर्तृजीवस्य कार्यादौ विकर्मणि नियोजयत्वात्
पनिष्पाद्यादि विधिनिषेधशास्त्राणि च व्यर्थानि स्युः स्वपिपासावर्तितं
तु५ निवर्तितुं शक्तो नियोज्योऽदृष्टस्तिचेत्परमात्मनानादत्ते स्तेनेवाहि। न५
न शक्तिभिर्देहेंद्रियादिभिः सहाधारभूतो जीवात्मा परेणाहितशक्ति
कः सत्कर्मसिद्धये स्वेच्छयैव देहेंद्रियाद्यधिष्ठाने प्रवर्त्तते चारभते पर
मात्मा तु जीवात्मनः स्वस्मिन्न्यासमनिरद्धानः संस्तत्प्रेरयती निजी।
वस्यापि स्वपिपासाभृद्ध्यतिहेतुत्वमस्ति पूर्वस्तुत्काराप्याहृयतात्तुकुते
द्रियादिना यथा गुरुहननं रूपाणां भ्रिय चलनादि स्वहनिष्ठ वक्तुञ्ज
नसाध्यास्वतहननोहेतुत्वे पि विधिनिषेधभाक्त्वं पितृसाम्याज्ज्ञापान्
उपास्यैवमप्यहेतुत्वेन न तु वैत न जीविनोन्नया देहेंद्रियप्राणानां
कर्मसु हेतुत्वेऽपि परेणाज्ञया जीवस्यैवमप्यहेतुत्वं विधिनिषेधभक्त
त्वं चातः सर्वमनवद्यम् १४ ॥

+ प्रमाणस्थलानिकर्मकारणानिपंचात्मनोऽकर्तृत्वसिद्ध्यर्थंहेयत्वेनज्ञातव्यानीत्युक्तेऽका
नितानीत्यपेक्षायांतत्स्वरूपमाह द्वितीयेन॥

श्री॰
गी॰ टी॰
म॰

67

मधुसूदनी टीका १४ ॥

+ इच्छाद्वेषसुखदुःखवेदनाद्यभिव्यक्तेराश्रयोऽधिष्ठानंशरीरंतथाक
र्तायथाधिष्ठानमनात्माभोक्तेतिमायाकल्पितेसाममहस्यादिवत्
तथाकर्ताऽहंकरोमीत्याद्यभिमानवान्ज्ञानशक्तिप्रधानःपंचीकृत
पंचमहाभूतकार्योऽहंकारःअंतःकरणंबुद्धिर्विज्ञानमित्यादिपर्यायश
ब्दवाच्यःतदात्म्याध्यासेनात्मनिकर्तृत्वादिधर्माध्यारोपहेतुरनात्माभो
क्तेतिमायाकल्पितश्चेतितथाशास्त्रार्थःस्थूलशरीरस्यलोकायतिके
रात्मत्वेनगृहीतस्याप्यंतःपरीक्षकैरनात्मत्वेननिश्चयात्दृष्टांतेन ३८
तार्किकादिभिरात्मत्वेनपरिगृहीतस्यकर्तुरप्यनात्मत्वनिश्चयःस
करणंपृथग्विधंकरणंचश्रोत्रादिशब्दाद्युपलब्धिसाधनं चशब्दस्तथेत्य
नुकर्षार्थः पृथग्विधंनानाप्रकारंपंचज्ञानेंद्रियाणिमनोबुद्धिश्चेति
द्वादशसंख्यंकरणंबाह्यंमनोबुद्धिश्चेतिद्वयमितिविशेषो इतिमात्रंत्वहंका
रःकर्तैवचिदाभासस्तुसर्वत्रैवावशिष्टः विविधानानाप्रकाराःपंच
धादशधावाप्रसिद्धाः चशब्दस्तथेत्यनुकर्षार्थः पृथक्पृथक्संकीर्णाः
चेष्टाःतत्कृताःक्रियारूपाःक्रियाशक्तिप्रधानाः अपंचीकृतपंचमहा
भूतकार्याःक्रियाप्राधान्येनवायवीयत्वेनव्यपदिश्यमानाःप्राणा
पानव्यानोदानसमानाः नागकूर्मकृकरदेवदत्तधनंजयाख्यास्तद्दे
तभूताएव पृथक्स्वभावेनकरणस्यकर्तुर्लयेपिप्राणव्यापारदर्श
नाद्भेदव्यपदेशाद्वांतःकरणादपिभिन्नव्यपदेशःप्राणइतिकेचित् क्रिया
शक्तिज्ञानशक्तिमदेकमेवजीवोपाधिभूतमपंचीकृतपंचमहा
भूतकार्यंक्रियाशक्तिप्राधान्येनप्राणइतिज्ञानशक्तिप्राधान्येनचांतः
करणमितिव्यपदिश्यतइत्याभियुक्ताः सईक्षांचक्रेकस्मिन्नहमुत्क्रा
न्तउत्क्रान्तोभविष्यामिकस्मिन्वाप्रतिष्ठिते प्रतिष्ठास्यामीतिसप्राण
मसृजतेतिश्रुतावुक्तोलिंगात्मापिवेप्राणसोकेतथासुधीः
स्वप्नोभूत्वेमंलोकमतिक्रामतिमृत्योरूपाणिध्यायतीवलेलाय
तीवेत्यादिश्रुतावुक्तोऽयमुपाधिरेवमुक्तंभेदव्यपदेशस्तुशक्तिभे
दात्तुभेदोवज्ञानशक्तिभागलयेपिक्रियाशक्तिभागदर्शनमेकत्वे
पिनविरुद्धमनुभवसिद्धत्वात् दृष्टिसृष्टिनयेसर्वलयेपिप्राणाद्यव
हारवच्छरीरस्यसुषुप्तौपश्यमानस्यवेदृशैःपरैःकल्पितत्वाच्चनसाक्षुभ
यथाविव्यपदेशभेदउपपन्नः दैवंचानुग्राहकंदेवताजातंतचशब्दस्त

शेषस्तु कर्षार्थैः अष्टकारणवर्गं पंचमेपच संख्याष्टगणपव शाहस्त।
प्याशब्देन संवध्यमानः अनात्मत्वभौतिकत्वकल्पितत्वाघ्रवधारणा
र्थः पंचानामपि तत्र शरीरस्य कर्तृकरणक्रियाधिष्ठातृसदेवनाह
थिवीयत्रास्य कूद्रक्षमस्तस्याग्निर्वागध्यात्विवात्रस्याणि चक्षुरादि
त्ये दिशः श्रोत्रमनस्थ्रं हृदय्थिवीशरीरमितिस्त्रतौ वागाद्यधिष्ठात्र
ऽग्न्यादिभिः सहशरीराधिष्ठातृत्वेन पृथिवीपादातृ कर्तृमहंकारस्या
धिष्ठात्री देवता रुद्रः पुराणादिषु प्रसिद्धः करणानां चाधिष्ठात्र्यो देव
ताः प्रसिद्धाः श्रोत्रत्वक्चक्षुरसनघ्राणानां दिग्वातार्कप्रचेतोऽश्विनः
वाक्पाणिपादपायूपस्थानां वह्नीन्द्रोपेन्द्रमित्रप्रजापतयः मनोबु
द्ध्यहंकारहृदयस्य तीति पंचप्राणानां क्रियारूपाणां सद्योजातवाम
देवाः घोरतत्पुरुषेशानाः पुराणप्रसिद्धाः भाष्ये देवमाद्यिमादि
चक्षुरादयनुग्राहकमिप्यधिष्ठानादिदेवतानामप्युपलक्षणं स्वर
पचमन्योतेणापंचालोकर्गेरेतत्रमाहन्नीयेन ॥

सदानंदी टीका ॥ ॥

कानि तानि तेषु पंचानां तत्स्वरूपमिहोच्यते इच्छाद्वेषाद्यभिव्यक्ते
श्री॰ रधिष्ठानं शरीरकं १ दृष्टा नार्थस्तथा शब्दो विज्ञेयो त्र मनीषिभिः य
याधिष्ठानमप्यस्य शरीरं भौतिकं जडं २ तथैवाहं करोमीति क
र्तीहंकार आत्मनि कल्पितो मर्ययास्त्र भूतकार्यतया जडः ३
यथा स्थूलशरीरस्य चार्वाकैरात्मनाधिया गृहीतस्यापि वेदज्ञैरना
त्मत्वेन निश्चयात् ४ तदृष्टान्तेन कर्तृत्वे तार्किकैरात्मनाधिया गृ
हीतस्याप्यनात्मत्वनिश्चयः स्यात् कर्तृभवेत् ५ श्रोत्रादिकरणं चैव
शब्दादिज्ञानसाधने दशेन्द्रियमनोबुद्धिरूपेणास्ति षण्विधं ६
इत्थं भेदमनोबुद्धी अहंकारस्तु हतिमान् क्रियाशक्तिप्रधानास्तु
प्राणा नानाविधाः क्रियाः ७ दशधा पंचधा वापि प्राणपानादिद्
पनः अस्तं कीर्णाः क्रियारूपा भौतिकाः कल्पिताः परे ८ अनुग्राह
कमर्कादिदेवचक्रमधिदैव अष्टकारणवर्गत्वं च संख्यामष्टके
९ तथेमन्तु कर्षणार्थस्य शब्दो स्ति स्थूलत्रये नेनाध्यस्तत्वमेते।
षां भौतिकत्वमनात्मता १० प्रतिमात्मत्व संगो स्ति संपञ्चानामीश्व
रोऽज्ञतो ११ ॥ १४ ॥

नीलकण्ठीटीका

श्री॰
गी॰टी॰
प्र॰

68

तामेवपंचगणयति अधिष्ठानमिति अधिष्ठानंइच्छाद्वेषसुखदु
ःखज्ञानादीनामभिव्यक्तेराश्रयोदेहः तस्यानात्मत्वंचार्वाकव्यति
रिक्तसमस्तवादिसिद्धं तथाकर्ताचचिद्विशिष्टश्चिदाभासः अमानाना
माहंममयविषयोहंकारः तस्येमनेनष्टेवानात्मत्वंतेनैवपरस्यक्त
देहस्यैवसुषुप्तौप्रलयेचतस्योत्पत्तिविनाशयोर्दर्शनात् पृथक्वविशे
षणेनाश्चादिविशिष्टनाशविशेषणोस्याचविशिष्टेननिमभिप्रेत्यसू
यते विज्ञानघनएवैतेभ्योभूतेभ्यःसमुत्थायतान्येवानुविनश्यती
ति यथाग्नेःक्षुद्राविस्फुलिंगाव्युच्चरंत्येवमेवैतस्मादात्मनःसर्वेप
तआत्मानोव्युच्चरंतीतिच विशिष्टस्यचानतिरेकादर्शनात्स्वात्मत्व
सिद्धं करणंचशब्दाद्युपलब्धिसाधनंपृथग्विधंद्वादशविधंपंच
कर्मेंद्रियाणिपंचज्ञानेंद्रियाणिमनोबुद्धिश्च तथाविविधाश्चपृ
थक्चेष्टाः वायवीयाःप्राणनादिरूपाः दैवंश्रोत्रपादरूपंतत्त
त्करणानुग्राहकसूर्यादिदेवतारूपं पंचमंपंचानांपूरणं १४॥

आनंदीटीका १४ ॥

तामेवाह अधिष्ठानंशरीरंभूतेंद्रियादिप्रकृतिविकृतिसंघातरूपं
कर्ताजीवात्मापुरुषः करणंपृथग्विधमेकादशेंद्रियवर्गःपृथ
क्चेष्टाःसंकल्पविकल्पाश्रवणादिकेगमनादिचेंद्रियव्या
पाराःदैवंवाक्स्वरूपेणांतर्यामिस्वरूपेणचपरमेश्वरेणा
कृतकर्मफलभोगंप्रतिप्रेरणम् १४ ॥

रामकंठीटीका १४

कानितानीत्याह॥ — अधिष्ठानंतत्क्रियानुगुणमधिकरणंशरीरादियदधिष्ठा
नकर्तृत्वंतत्कर्मकर्तृशक्यं तथा कर्तानतंदेहादिनिबद्धाहंम
त्ययःपुरुषः करणंपृथग्विधं विविधाश्चपृथक्चेष्टाःतत्र
तत्क्रियानुगुणशरीरेंद्रियव्याप्तिभिः अत्रत्रतत्पृथग्यानुकू
ल्येनतत्फलाभ्यासिद्धासिद्धिकारणंदैवंपंचमं दैवापरपर्याय
प्राक्तनंकर्मेत्यर्थः अत्रास्यतत्कूलेधिष्ठानादीनांसाधनानांसाफ
ल्यमननुकूलेतुसंनिहितानामपिवैफल्यमतस्तत्तन्न्याय्यान्याय
पृथक्प्रस्फारके एतेषांपंचानामेवकर्मसिद्धिहेतुत्वमितिगमयति १४

तासिकी[illegible]टीका

+कानितानीत्याह ॥

+अधिष्ठानं शरीरं कर्ता चिज्जडग्रन्थिरहंकारः पृथग्विधं नानाप्रका-
रं करणं चक्षुःपाण्याद्यन्तःकरणात्मकं तथा स्वस्वरूपतः पृथग्भूताः
कार्यतो विविधाश्च चेष्टाश्चक्षुरादीनां प्राणापानादीनां च व्यापाराः
अत्रैवैतेषु चतुर्षु चक्षुराद्यनुग्राहको देवसमूहः पंचमं पंचसंख्या-
पूरणं देवसमूहः पुराणप्रसिद्धो यथा कर्तुरहंकारस्याधिष्ठात्री देव-
ता रुद्रः बुद्धीन्द्रियाणामधिष्ठात्री देवता दिग्वातार्कप्रचेतोश्विनः क-
र्मेन्द्रियाणां वह्नीन्द्रोपेन्द्रप्रजापतयः मनोबुद्ध्योश्चंद्रबृहस्पती पंचप्रा-
णानां क्रियारूपाणां सद्योजातवामदेवाघोरतत्पुरुषेशाना इति १
तेषामेवं पंचानां सर्वकर्महेतुत्वे निगमयति १४

पंचोलीटीका

तामेवोपदिशति अधिष्ठानमिति इच्छादीनामभिव्यक्तिरधिष्ठानं आ-
श्रयः शरीरं उपाधिलक्षणो देही कर्ता भोक्ता करणं च श्रोत्राद्युपलब्धिहेतुः
श्रोत्रादि पृथग्विधं नानाप्रकारं च द्वादशसंख्याकं च पृथक् विविधा पृथ-
क् चेष्टा व्यापारा यथा प्राणापानादीनामपनेषु चतुर्षु दैवं पंचमं न[illegible]दैविकं
चक्षुराद्यनुग्राहकं आदित्यादि १४

रणवीरसमिद्धोधिनी ॥

कानितानीत्याह अधिष्ठानमिति अधितिष्ठंत्यस्मिन्नित्यधिष्ठानं शु-
द्धादिकर्मानुष्ठानोचितः कुरुक्षेत्रादिप्रदेशः तथा कर्ता योद्धा अने-
कप्रकारं च धनुःखड्गादिरूपं करणं क्रियायाः साधनं अनेकप्रकारश्चस्व-
रूपेण कार्येण च विलक्षणो व्यापारः अत्र चैवं पंचमं दैवं प्राक्तनं कर्म
च पंचमं प्रधानं कारणं १४ ॥

मधुभाष

१४ ॥

64

भाषा अनुवाद ॥

सोई सर्वकर्म सम्पत्तिके विषयमे कारण कहतेहैं कि अधिष्ठान
कहे शरीर औ कर्त्ता कहे चित्त औ जड्की ग्रंथिरूप अहंकार औरभि
न्न भिन्न अनेक प्रकार करणस्वरूप चक्षु आदि इंद्रीय और विविध
कहे कार्य से या स्वरूप से भिन्न भिन्न चेष्टा अर्थात् प्राण अपानादि
वायु के व्यापार समूह और अत्र कहे अधिष्ठान शरीर आदिसब
के मध्यमे पंचम स्वरूप दैव अन्तर्यामी सर्वनियन्ता अथवा च
क्षु आदि इंद्रियोंके अनुकूलकारी सूर्य आदि देवता जानो इन्हो
चिन्का अर्थ जानहै १४ ॥

दोहा

अधिष्ठान तथा कर्त्ता कारण भिन्न विधजोय चेष्टाविवि
ध प्रकारकी दैव हि पंचम होय १४॥

70

शरीरवाङ्मनोभिर्यत्कर्म प्रारभते नरः न्या
य्यं वा विपरीतं वा पंचैते तस्य हेतवः १५॥

शांकरभाष्य टीका १॥

शरीरेति शरीरवाङ्मनोभिर्यत्कर्म त्रिभिरेतैः प्रारभते निर्वर्तय
ति नरः न्याय्यम्वा धर्म्यं शास्त्रीयं विपरीतं वा अशास्त्रीयं अधर्म्यं
यच्चापि निमिषितचेष्टादि जीवनहेतुस्तदपि पूर्वकृतधर्माधर्म
योरेव कार्यमिति न्याय्यविपरीतयोरेव ग्रहणेन गृहीतं पंचैते य
थोक्तास्तस्य सर्वस्यैव कर्मणो हेतवः कारणानि ननु अधिष्ठाना
दीनि सर्वकर्मणां कारणानि कथमुच्यते शरीरवाङ्मनोभिः प्रा
रभतइति नैषदोषः विधिप्रतिषेधलक्षणं सर्वं कर्म शरीरादित्रय
प्रधानं तदंगतया दर्शनश्रवणादिच जीवनलक्षणं त्रिधैवं राशी
कृतमुच्यते शरीरादिभिरारभतइति फलकालेपि तत्प्राधान्येन भुज्यते
इति पंचानामेव हेतुत्वं न विरुध्यते १५॥

आनंदगिरिकृत टीका २॥

पंचानामधिष्ठानादीनामुक्तानां सर्वकर्महेतुत्वं स्फुटयति श
रीरेति ननु जीवनहेतुं निमिषोन्मेषादि कर्मान्तरं साधारणमस्ति
तत्कथं राशिद्वयकरणमिति तत्राह यच्चेति अधिष्ठानादीनां क
र्ममात्रहेतुत्वं प्रतिज्ञाय शरीरादित्रिविधकर्महेतुत्वोक्तिरयुक्तेति
शंकते नन्विति पूर्वापरविरोधं परिहरति नैषदोषइति ननु जीवन
कृतानि स्वाभाविकानि कर्माणि दर्शनादीनि विधिनिषेधबाह्यत्वा
न्न देहादिनिर्वर्त्यानीत्याशंक्याह तदंगतयेति तस्य देहादित्रयस्य प्र
धानस्यांगत्वद्वारादि तन्निष्पाद्यत्वेन जीवनकृतं दर्शनादि प्रधानक
र्मणा लब्धं तमिति त्रैविध्यमविरुद्धमित्यर्थः देहाद्यारम्भे त्रिविधे
कर्मणि सर्वकर्मान्तर्भावेपि कथं पंचानामेवाधिष्ठानादीनां तत्र
हेतुत्वं फलोपभोगकाले करणान्तरापेक्षासम्भवादित्याशंक्य जन्म
कालभाविनो भोगकालभाविनश्च सर्वस्य कारणस्य तेष्वेवान्त
र्भावान्नैवमित्याह फलेति १५॥

श्री
गी॰ टी॰
अ॰

स्वामिकृतटीका २ ॥

तेषां सर्वकर्महेतुत्वमाह शरीरेति पञ्चभिः प्रारभ्यमा
णं कर्मविषेशोवर्भिन्नश रीरवाङ्मनोभिरित्यकैः शारीरं वाचिकं मा
नसं च त्रिविधं कर्मेति प्रसिद्धेः शरीरादिभिर्यत्कर्म धर्म्यं वा अधर्म्यं
वा करोति नरस्तस्य सर्वस्य कर्मण एते पंचहेतवः ॥ १५ ॥

पिशाचभाष्यटीका ४ ॥

शरीरेण वाचा मनसा शरीरवाङ्मनोभिर्यत्कर्म क्रियया प्रारभते नरः
न्याय्यं वा शास्त्रीयं वा तत्कर्मणस्ते पंचहेतवः ॥ १५ ॥

रामानुजभाष्यटीका ५ ॥

[illegible]
[illegible]
[illegible]
[illegible] ननु एवं परमात्मायत्तत्वाज्जीवात्मनः कर्तृत्वे जीवा
त्मा कर्मण्यनियोज्यो भवतीति विधिनिषेधशास्त्राण्यनर्थकानि
स्युः इदमपि नोपपद्यते कारणपरिहृतेन कृतप्रयत्नापेक्षं विहितप्र
तिषिद्धं वैयर्थ्यादिभ्य इति एतदुक्तं भवति परमात्मना दत्तैस्तदा
धारैश्च करणकलेवरादिभिः तदाहितशक्तिभिश्च स्वयं च जी
वात्मा तदाधारस्तदाहितशक्तिः सन् कर्मनिष्पत्तये करणाधिप
नाकारेण प्रयत्नचारभते तदन्तर्वस्थितपरमात्मा स्वानुमतिदानेन
तं प्रवर्तयति जीवस्यापि स्वबुद्ध्यैव प्रवृत्तिहेतुत्वमस्ति यथा गुरुतर
शिलामहीरुहादिप्रवृत्तिषु बहुपुरुषसाध्यासु बहूनां हेतुत्वं विवि
धविनिवेधभाक्त्वं चेति ॥ १५ ॥

अभिनवगुप्तकृतटीका ६ ॥

स्पष्टार्थं ॥ १५ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपाटीटीका ७ ॥

एतेषामेव सर्वकर्महेतुत्वमाह शरीरेति नरः शरीरवाङ्मनोभि
र्न्याय्यं धर्म्यं विपरीतमधर्म्यं वा यत्कर्म प्रारभते तस्य हेतव उक्ता एव
चैते ॥ १५ ॥

वनमालीटीका ८ ॥

तेषां कारणत्वमुपपादयति शरीरेति शारीरं वाचिकं मानसं च त्रिवि

प्रतिषेधरूपं त्रिविधं कर्म धर्मशास्त्रप्रसिद्धं शरीरेण वाचा म
नसा वा यत्कर्म प्रारभते नरः मनुष्याधिकारत्वाच्छास्त्रस्य
कीदृशं न्याय्यं शास्त्रीयं धर्मं विपरीतं वाऽशास्त्रीयमधर्मं यच्चानि
मिषितचेष्टितादि जीवनहेतुस्तदप्यविहितप्रतिषिद्धं समं तत्सर्वं
पूर्वकृतधर्माधर्मयोरेव कार्यमिति न्याय्यविपरीतयोरेवानुभूतौ।
पंचैते यथोक्ताधिष्ठानादयस्तस्य सर्वस्यैव कर्मणो हेतवः १५ ॥

ऊसमवैजयंती टीका ९ ॥

पुनरप्येतेषां कर्महेतुत्वं वदन्सर्वकर्मणां त्रैविध्यमाह शरीरेति
नरो नीतिमान्मनुष्यः शरीरवाङ्मनोभिः शरीरेण वाचा मनसा
च यत् शरीरं वाचिकं मानसं त्रिविधमेव न्याय्यं शास्त्रीयमथवा वि
परीतमशास्त्रीयं कर्म आरभते करोति तस्य कर्मणः पंचैतेऽधिष्ठाना
दयः पंच हेतवो भवंति १५ ॥

+ स्वरूपश्चकातेषां पंचानां कर्महेतुत्वमाह

मधुसूदनी टीका १० ॥

तृतीयेन + शारीरं वाचिकं मानसिकं च विधिप्रतिषेधलक्षणं त्रिविधं कर्म
धर्मशास्त्रप्रसिद्धं श्रुतपादेनचोक्तं प्रवृत्तिर्निवृत्तिरूपं शरीरारंभ
इति बुद्धिमनः श्रोत्रः करणप्राधान्याभिप्रायेणोच्यते शरीरेण।
वाचा मनसा वा यत्कर्म प्रारभते निर्वर्तयति नरः मनुष्याधिका
रत्वाच्छास्त्रस्य कीदृशं कर्म न्याय्यं वा शास्त्रीयं धर्मं विपरीतं वाऽ।
शास्त्रीयमधर्मं यच्चानिमिषितचेष्टितादि जीवनहेतुरमहाविहि।
तप्रतिषिद्धसममनन्तरं तदपि पूर्वकृतधर्माधर्मयोरेव कार्यमिति।
न्याय्यविपरीतयोरेवानुभूतं पंचैते यथोक्ताधिष्ठानादय
स्तस्य सर्वस्यैव कर्मणो हेतवः कारणानि १५ ॥

सदानंदी टीका ११ ॥

उक्तान्स्वरूपं पंचानामेतेषां कर्महेतुतां प्राहेदानीं जगत्त्राता
भगवान्करुणानिधिः देहेन मनसा वाचा निर्वर्तयति कर्म यत्
शास्त्रीयं वाप्यशास्त्रीयं धर्माधर्मात्मकं नरः १ निमेषोन्मेष
चेष्टादि निमित्तं जीवनेऽस्ति यत् धर्माधर्मफलं तत्तु तेवानुभूतेन
योर्द्वयोः २ न्याय्याद्वा विपरीताद्वा भिन्नं कर्म न किंचन सर्व

स्यकर्मणाऽर्जुनेयथोक्ताःपंचहेतवः ४ ॥ १५ ॥

नीलकंठी टीका १२ ॥

शरीरेति न्याय्यं धर्म्यं शास्त्रीयं विपरीतमन्याय्यमधर्म्यम शास्त्रीयं तत्र शरीरादिभिस्त्रिभिरारभ्यते पंचैते तस्य हेतव इति च विप्रतिषिद्धमुच्यते नैष दोषः अत्रापि शरीरपदेना। धिष्ठानस्य नरपदेन कर्तुर्वाङ्मन इति करणस्य आरभत इति चेष्टानां न्याय्यमिति धर्माधर्मरूपस्य दैवस्य च संग्रहात् सर्वेषु कर्मसु पंचानां समानेष्वपि योगे विचित्रनिषेधफलत्वेन त्रैविध्यमेव कर्मशास्त्रे प्रसिद्धमिति इदं शारीरं कर्म इदं मानसमिदं वाचिकमिति व्यपदेशो देहादीनां प्राधान्यापेक्षयेति न कश्चिद्विरोधः १५ ॥

आनंदीटीका १२

यत्तदेवलक्षयति न्याय्यं शास्त्रचोदनया विहितं विपरीतं निषिद्धम् १५ ॥

+एषांपंचानां सर्वकर्मसिद्धिहेतुत्वं निगमयति॥

रामकंटीटीका १४

+यः कश्चित्कर्मी कायेन वचसा चेतसा वा यत्कर्म कर्तुं प्रक्रमते तत्रैते पूर्वोक्ताः पंचहेतवः कारणानि तस्य एतेषामन्यतमाभावेपि चिकीर्षितकर्मासिद्धेः कीदृशं कर्म आरभते न्याय्यं शास्त्रप्रोक्तान्नियमरूपान्न्याय्यादनपेतं वा विपरीतं वा यथाशास्त्रवादन्याय्यं किंच १५ ॥

+एतेषामेव पंचानां सर्वकर्महेतुत्वं निगमयति॥

लासिकी [illegible] टीका

+यत्तेषु सर्वस्मिन्कर्मणि करणत्वेन प्रसिद्धैः शरीरवाङ्मनोभिर्यत्कर्म धर्म्यमधर्म्यं वा नरः करोति तस्य सर्वस्य एते अधिष्ठानादयः पंचहेतवः कारणानि

पंचोलीटीका

एतेषामेव सर्वकर्महेतुत्वमाह शरीरेति नरो यत्कर्म एतैः शरीरवाङ्मनोभिस्त्रिभिर्यत्कर्म न्याय्यं वा धर्म्यं वेदोक्तं यद्वा अधर्म्यं।

मशास्त्रीयमुदासीनं वा निषिद्धं वेत्यादिजीवनहेतुमारभते तत्र
तेषुकर्मसु सर्वेषूक्ताः पंचाधिष्ठानादयो हेतवः कारणानि १५

रणवीरसमिद्धोधिनी

एतदेव निगमयति शरीरेति न्याय्यं शास्त्रचोदितं वा तदर्थं वा विप
रीतं मतथावादपर्यंवायक्षुरीरादिनिर्वर्तितं त्रिविधं कर्म तस्यैते
थिष्ठानादयः पंचहेतवो भवंति एतेषामन्यतमाभावे विकीर्षि
त कर्मासिद्धेरितिभावः १५॥

मधुभाष्य

१५॥

23

भाषा अनुवाद

इन्ही पांचों को सर्व कर्म मे कारणत्व कहतेहै कि इन्ही पांचो के कारण से आरम्भ किये जाते जो कर्म सकल तिन को शरीरादि मे अन्तर्गत कहै मानिके इस श्लोक मे कहा है कि जिस हेतु कर्ममात्र जो शारीरिक औ वाचनिक तथा मानसिक होते है यह प्रसिद्ध है श्लोक का अर्थ यह है कि शरीर वचन औ मन के द्वारा सब मनुष्य जो कोई धर्म वा अधर्म करतेहै सोई सकल कर्म के कारणहै येइ अधिष्ठान कहै शरीर आदि पांच कर्मो के हेतुहै १५

दोहा

देह वाक मनसें हि जो अर्जन कर्महि होय न्याय हि वा
विपरीत वा पंच हेतु तिह कोय १५॥

74

तत्रैवं सति कर्त्तारमात्मानं केवलं तु यः प
श्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः १६

शांकरभाष्य टीका १ ॥

तत्रेति तत्रेति प्रकृतेन सम्बध्यते एवं सति एवं यथोक्तैः पंच
भिर्हेतुभिर्निर्वर्त्ये सति कर्म्मणि तत्रैवं सतीति दुर्म्मतित्वस्य हे
तुत्वेन सम्बध्यते तत्रैतेष्वात्मानन्यत्वेनाविद्यया परिकल्पि
तैः क्रियमाणस्य कर्म्मणोऽहमेव कर्त्तेति कर्त्तारमात्मानं केवलं
शुद्धं तु यः पश्यत्यविद्वान् कस्माद्वेदान्ताचार्योपदेशन्यायैरकृत
दुः बुद्धित्वादसंस्कृतबुद्धित्वाद्योऽपि देहादिव्यतिरिक्तात्मवाद्यप्यात्मान
मेव केवलं कर्त्तारं पश्यत्यसावकृतबुद्धिरतोऽकृतबुद्धित्वा
न्न स पश्यत्यात्मनस्तत्वं कर्म्मणो वेत्यर्थः अतो दुर्म्मतिः कुत्सिता वि
परीता दुष्टाजस्रं जननमरणप्रतिपत्तिहेतुभूता मतिरस्येति दु
र्म्मतिः स पश्यन्नपि न पश्यति यथा तैमिरिकोऽनेकं चंद्रं यथा
वाभ्रेषु धावत्सु चंद्रं धावंतं यथा वा वाहन उपविष्टोऽन्येषु
धावत्स्वात्मानं धावंतं पश्यति १६ ॥

आनंदगिरिकृत टीका २ ॥

क्रियाकर्तृत्वमधिष्ठानादीनामुपपाद्य विदुषस्तेष्वात्मदृष्टिम
नुवदति तत्रेति तत्पदपरामर्शयोग्यं प्रकृतं सर्वकर्मप्रती
कमाश्रयहेतुना सहार्थतोऽर्थं कथयति एवमिति अधिष्ठाना
दीनामुक्तरीत्या कर्तृत्वे सम्पन्ने कर्तृत्वमात्मनोऽध्यारोप्य पश्य
तोऽदुर्मतित्वमित्याशंक्य कर्तृत्वे पश्यन्नित्याह तत्रैवमिति कर्त्तार
मित्यादि यावदेष तत्रेत्यादिना तेष्वधिष्ठानादिषु तेभ्योऽधिष्ठानादि
भिरात्मत्वेनानन्यभावेनेत्यर्थः अकर्त्तारमात्मानं कर्त्तारं पश्यतीति स
म्बन्धः हेतुमाह कस्मादिति नन्वशास्त्रसंस्कृतबुद्धिरेवा
तिरिक्तात्मवादी कर्तारं पश्यति नासौ कर्तृत्वमात्मनि पश्य
न्नपि भवत्यकृतबुद्धिरित्याह योऽपीति तस्यापि शास्त्रपूर्वकमाचा
र्योपदेशेन तदनुसारिन्यायेनाभावादकृतबुद्धित्वसिद्धि

मित्यर्थः कौटस्थ्यमात्मनस्तत्त्वे याथात्म्ये कर्मणोऽपि तत्त्वमवि
द्याकृताधिष्ठानादिकं तेनैनात्मा स्पृशीत मात्मकर्मणोस्तत्त्वदर्शि
नाभावेनः शास्त्रार्थः दुष्टत्वसंयोक्तृत्वं दुर्मतित्वं विवृणोति जन
नेति अहं कर्तेत्यात्मदर्शनवतोऽपि नाविदुषस्तद्दर्शनमस्तीत्य
त्र दृष्टान्तमाह यथेति तिमिरोपहतचक्षुरेकं चन्द्रं पश्यन्न
पि न तत्त्वतो नन्तं पश्यत्येवमविद्वानात्मानं कर्तारं पश्यन्नपि न
तत्त्वतो न तं पश्यतीत्यर्थः अधिष्ठानादिषु विषयाः सम्बन्धात्मनः
स्वात्मनि तत्कृतक्रियारोपे दृष्टान्तमाह यथा वेति अश्वेषु वा
हकेषु अश्वेषु धावनकर्तृषु वाहने स्थितः स्वात्मनि धाव
म नकर्तृत्वं विवेकाद् भिमन्यते तथाधिष्ठानादिषु क्रियाकर्तृषु
तत्कृते स्वात्मनि कर्तारं मन्यमानो दुर्मतिरित्यर्थः १६ ॥

स्वामिकृत टीका २ ॥

तत्र किमत आह तत्रेति तत्र सर्वस्मिन्कर्मण्येतेषु पञ्चसु हेतुषु स
त्सु सति केवलं निरुपाधिकमसंगमात्मानं यः कर्तारं पश्यति
शास्त्राचार्योपदेशाभ्यामसंस्कृतबुद्धित्वाद् दुर्मतिरसौ सम्यङ्-
पश्यति [illegible]
॥

पिशाचभाष्य टीका ४ ॥

तत्र कर्मणः एवं सति कर्तारं क्रियानिर्वृत्तिकारणेष्वत्रैव
रूपं केवलमसाहाय्येन यः पश्यति योऽज्ञानात् असंस्कृतबुद्धि।
त्वान् शास्त्राचार्योपदेशासंस्कृतबुद्धित्वात् स पश्यति न स।
ज्ञानाति दुर्मतिस्तस्यात्मनः कर्तृत्वमविद्याकृतं न वास्तवं क
र्तृत्वमस्तीति आत्मानं निरस्तहेतुहेतुमत्कस्वरूपप्रतिपाद्य
मानस्य साक्षात्सम्यग्ज्ञाननिष्ठस्य योगिनः सकलकर्मसंन्या
स एवेत्यभिप्रायः १६ ॥

रामानुजभाष्य टीका ५ ॥

तत्रैवमिति एवं सति परमात्मानुमतपूर्वके जीवात्मनः कर्तृ।
त्वे सति तत्र तत्र कर्मणि केवलात्मानमेव कर्तारं यः पश्यति स।
दुर्मतिः विपरीतमतिरकृतबुद्धित्वात् अनिष्पन्नयथावस्थि

तत्त्वहित्वाच पश्यति न यथावस्थितं कर्तारं पश्यति १६ ॥

श्रीमदभिनवगुप्तकृतटीका ६

स्पष्टार्थं १६ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका ७ ॥

१५ ततः किमत आह तत्रेति तत्रैवं सति कर्मणि पञ्चहेतुके एवं
सति केवले निरुपाधिमसङ्गमात्मानं यः कर्तारं पश्यति स शास्त्रा
चार्योपदेशाभ्यामकृतात्मबुद्धित्वान्मतिर्विशिष्टः स न सम्यक् प १६
श्यति १६ ॥

वनमाली टीका ८ ॥

केवले स्वस्यैव कर्तृत्वाभिमानिनं निन्दति तत्रेति तत्र कर्मणि एवं
सति पञ्चानां कारणानां यथात्मानं केवलं निःक्रियमपि स्वात्मानं श्रा
कर्तारं पश्यति सद्गुरूपदेशेनासंस्कृतबुद्धित्वान्मतिर्न पश्यति
सम्यग् ज्ञानानाभ्यर्थः केवलमिति देहगर्भविशेषणं अयं भा
वः ज्ञानानन्दस्वरूपस्य सतो निःक्रियस्य जीवस्यानाद्यविद्यया देहादा
वहं ममेत्यभिमानस्तदभिमानसंबन्धेन कर्म तज्जन्यादृष्टं च जीवे सं
बन्धेनाध्यासादृष्टजन्यकृत्यादिमनुरूपकर्तृत्वादिकं तज्जन्यका
दृष्टं चैतन्यसंबन्धेन जीवे वास्तवमेव संबध्यते यथाश्वे सकले
विकलेऽहमेव सकलो विकलश्चेत्यत्र स्वस्य भेदज्ञानेन बाधा
नाभेदोपमस्त्ययास्तु सदेहस्त्वादिभेदज्ञानेन बाधात् देहात्मनो
रभेदारोपः किंतूपचारिकोयं व्यवहारः आभिमानिकं वास्त
वं कर्तृत्वं पश्यत्यभिमानादिकं विहाय केवलात्मन एव पश्यति ।
स दुर्मतिः स क्रोधपर्यन्तं नादिकर्तृत्वं स्वरूपभूतमिदानीमविद्या
हते भगवन्महापश्यतादात्मविभ्रमे तेन न त्रिगुणक्रियते किं वसम
वेधार्थस्य भाविकं यत्कर्तृत्वं तदेवानर्थहेतुस्तदेव च शास्त्रे
णानिवार्यत इति १६ ॥

प्रमेयवैजयन्ती टीका ९ ॥

एवमविज्ञानतोऽदुर्मतित्वमाह तत्रैवमिति एवं सति जीवा
त्मनः परमात्मावमतिशुद्धकेककर्तृत्वेन हठ देहेन्द्रियादिसापेक्षत्व
सति तत्र कर्माणि न शास्त्रान्यथा रणाध्यक्षः केवलमेवात्मानं जी
वात्मानमेव कर्तारं तत्र कर्मारेयः शास्त्रकार्योपदेशाभ्यासो

श्री भा गी टी अ

इदानीमेतेषामेव कर्मकर्तृत्वादात्मनो नकर्तृत्वमित्यधिष्ठाना दिनिरुपणफलमाह ^

76

दुर्मतिर्दुर्बुद्धिः पश्यति जानाति सः अकृतबुद्धित्वादलब्धशास्त्री-
यज्ञानत्वाच्च पश्यति जडोऽथवालकरश्च किंचिदपि न जानातीत्यर्थः
॥१६॥ मधुसूदनी टीका १ ॥

^ तत्रकर्मणिप्रागुक्ते सर्वस्मिन् एवंसति अधिष्ठानादिपंचहेतुके स-
ति तैर्निर्वर्त्यमाने आत्मानं सर्वजडप्रपंचस्य भासकं सत्तास्फूर्तिरूपं
स्वप्रकाशपरमानंदमबाध्यं केवलमसंगोदासीनमकर्तारमवि-
क्रियमद्वितीयं तत्त्वं परमार्थतः अविद्ययात्वधिष्ठानादेशक्ति।
विविक्तमादित्यमिव तोयेन तद्धर्मकमनन्यत्वेन परिकल्प्य तोय-
चलनेनादित्यश्चलतीतिवदधिष्ठानादिकर्मणाहमेवकर्तेतिसा-
क्षिणमपिसंतं कर्तारं क्रियाश्रयं यः पश्यत्यविद्ययाकल्पयति।
रज्जुमिवभुजंगं स एवं पश्यन्नपि न पश्यत्यात्मानं तत्त्वेन स्वरूपा-
ज्ञानकृतत्वादध्यासस्य भ्रमात् विपरीतमेव पश्यति न यथात-
त्त्वमित्यत्र को हेतुरित्यत आह अकृतबुद्धित्वात् शास्त्राचार्योपदेश-
न्यायैरनुपजनितविवेकबुद्धित्वात् नहिरज्जुतत्त्वसाक्षात्कारा-
भावेभुजंगभ्रमेकश्चनबाध्यते एवं शास्त्राचार्योपदेशन्यायैः प-
रिनिष्ठितेहमस्मिमतेज्ञानमनेनतमकर्तृभोक्तृपरमानंदघनम-
नवस्थमद्वयंब्रह्मेतिसाक्षात्कारेऽनुपजनितेऽतोमिथ्याज्ञा-
नतत्कार्यबाधः एतादृशंसाक्षात्कारमेवगुरुमुपसन्नवेदा-
न्तवाक्यविचारेणाकृतोनजनयतीमतत्प्राह दुर्मतिः दुष्टा।
विवेकप्रतिबंधकपापेनमलिनामतिर्यस्य सः अतोऽकृतबु-
द्धित्वान्निमित्तानिसवस्तुविवेकादिरूपत्वेन तत्त्वज्ञानायोग्य-
त्वादकर्तारमपि कर्तारं केवलमात्मानमविद्ययाकल्पयन्
संसारीकर्माधिकारी देहभृदकृतबुद्धिः कर्मकर्तृत्वादात्मा-
भिमानात्कर्मत्यागासमर्थः सर्वदाजननमरणप्रतिबंधेना-
निष्टमिष्टमिश्रंचकर्मफलमनुभवति एतेनयस्तार्किकोदेहा-
दिव्यतिरिक्तमात्मानमेवकर्तारंकेवलंपश्यतिसोऽप्यकृतबुद्धि-
त्वेनव्याख्यातः अन्यस्त्वाह आत्माकेवलोनकर्ताकिंत्वधिष्ठा-
नादिभिः संहतः सन्परमार्थतः कर्तैवकर्तारमात्मानंकेवलं
पश्यन्दुर्मतिरितिकेवलशब्दप्रयोगादिति अयमपरमार्थतः

सर्वक्रियास्वप्यस्याः संगस्यात्मनो ऽधिष्ठानादिभिः संहतत्वाच्चोप
पत्तेः जलसूर्यकादिवत्ताविषयकेन संहतत्वेन कर्तृत्वमपिता
दृशमेव अधिष्ठानादीनामप्याविषयकत्वाच्च केवलशब्दस्तस्या
भावसिद्धमात्मनोऽसंगत्वं द्वितीयरूपत्वमनवद्यत्विकर्तृत्वदर्शी
नो दुर्मतित्वहेतुत्वेनेसदोषः मनैवेंद्रचर्मभिः श्लोकैरनिरूपितमिदं
देवत्रिविधकर्मणां फलं भवत्यत्यागिनां नैवमिति चरणाच्चयेष्यो
त्यागेतिदानीनत्रेतस्या [illegible] कविधिरिति [illegible] च [illegible] मेकेन
[illegible] १६ ॥ सदानंदी टीका ॥

एतेषामेव कर्तृत्वे सर्वस्यापीह कर्मणः आत्मनो नास्ति कर्तृत्व
मित्याह भगवान्हरिः १ तत्र कर्मणि सर्वाणि सर्वस्मिन्नेव हेतुभिः
निर्वर्त्यमाने सति यः आत्मानं सर्वसाक्षिणं २ स्वप्रकाशं परं।
नेदं सर्वं पश्येत् केवलं परं उदासीनमकर्तारमद्वितीयमविक्रियं ३
व्यक्तं तु संगिनं संतमधिष्ठानादिकर्मणः कर्ताहमिति वा पश्य
त्यकर्तारं हि क्रियाश्रयं ४ पश्यत्यविद्यया रज्जुं भुजंगमिव मूढ
धीः महामोहाहतत्वेन पश्यत्यतथ्यां मतिः ५ शास्त्राचार्यो
पदेशाभ्यामसंस्कृतमतिः कुधीः प्रतिबंधवशात्पापेन दुष्टाशयस्मम
तिः सच ६ न पश्यत्येव विभ्रांतात्मस्वात्मानं वभासतः अतोऽसृहृ
मनस्कत्वाद्विवेकाद्विरागवान् ७ ज्ञानयोगयतायासेनमकर्ता
रमविक्रियं कर्तारं विक्रियावंतं कल्पयन्मायया परं ८ संसारी दे
हमंत्रकर्माधिकारी कर्मकर्तृत्व नात्मन्यध्यासतः कर्म प्रकुर्वन्नेव ते
म्रियते ९ एतेन तार्किकोपस्तदेहादिभ्यो विलक्षणं आत्मा
नं केवलं प्रत्याकर्तारं पश्यन्नीनरः १० प्रकृतत्वमनया सोऽपि व्या
ख्यातो ना मदर्शनः कर्तृत्वकल्पितेनेमिदं देहादिजडपंचके ११
प्रयोगात्मा क्रियः सिद्धो वाक्यात् भगवतो हरेः १२ सकलजडवि
काराध्यासतनश्चिद्रूनेकुर्कुतमतिरक्ततबुद्धिः कल्पयन्कर्तृभावे
भ्रमतिमवभयाध्यौतर्कविद्योपदेशात्स्नि निवदति हरिर्यस्तत्प्र
येमकृतम् १५ १६ ॥ नीलकंठी टीका १२ ॥

यत्त्वातिपादनफले कर्तृत्वस्यारोपितत्व मिष्टि कर्तृत्वस्यस्वा।

भाविकत्वमिति दृष्टान्ताभ्यां श्लोकाभ्यां दर्शयति तत्रेति तत्रत
स्मिन्कर्मणि एवमुक्तरीत्या पंचभिर्निर्वर्त्यमाने सति केवलं त्वकर्तार
मप्यात्मानमेवतं साक्षीचेताकेवलोनिर्गुणश्चेतिश्रुतेः अधिष्ठा
नादिपंचकप्रकारदर्शितमुदासीनमपि यः कर्तारं करोत्वाश्रयं प
श्यति सदुर्मतिः पापाभिभूतमतिर्नैव पश्यति अयमेवास्य अद
र्शने हेतुः अकृतबुद्धित्वादिति शास्त्राचार्योपदेशशमदमादि
संस्कृता बुद्धिर्यस्य स कृतबुद्धिस्तद्विपरीतोऽकृतबुद्धिस्तस्य भाव
स्तत्त्वं तस्मात् यथा स्वच्छस्योदपात्रसंसर्गिकत्वं पश्यता जलचा
ञ्चल्यमपि तस्यारोप्यते एवमात्मनो देहसंसर्गित्वं पश्यता बुद्धिध
र्मः कर्तृत्वादिरप्यात्मन्यारोप्यते इति भावः १६ ॥

आनंदीटीका १३

तत्रैवं तस्मिन्पंचके एवं समस्तत्वेन कर्तरि सति यस्त्वात्मानं के
वलमेकाकिनमनन्यापेक्षिणं कर्तारं पश्यति जानाति सदुर्म
तिस्तामसिकः अतएवाकृतात्मत्वाद्बुद्धिः सम्यग्ज्ञानाध्यव
सायो यस्य तस्याभावात्र पश्यति नालोचयति सदुर्मतिस्ताम
सिकः अतएवाकृतात्मत्वाद्बुद्धिः आत्मनः शरीरादिसंयोगे
नदर्पिष्ठात्स्वाहंकारात्कर्तृत्वम् योगसिद्धे तस्यकृत्स्यितस्य
त्वनकर्तृत्वमित्यर्थः १६ ॥

रामकंठीटीका १४

तत्रपंचके एवमुक्तक्रमेण समष्टीर्षिक्रयाकारणभूते सति वि
द्यमाने यः कर्मादेवक्त्तविशेषः केवलमेकमेवात्मानं मोहवशा
दनात्मभूतदेहादिविशिष्टं हमस्मयं कर्तारं कर्म संपादयन्पश्य
ति बुध्यते स न पश्यति विपरीतेन तस्य ज्ञानमित्यर्थः कुतो न प
श्यत्यकृतबुद्धित्वात् अकृता यथोक्तज्ञाननिष्ठत्वात्रिषु या बुद्धिः
प्रज्ञा यस्य स तथोक्तः नकृतबुद्धिरकृतबुद्धिः सम्यग्ज्ञानशून्यतर
मतिरतएव नष्टधीः किमुक्तं भवति एकः परमेश्वरः स्वशक्ति
प्रसरभूतस्य सकलजगज्जावकीडनकचक्रस्यात्मकस्वस्वरूपभां
तस्यावभासयिता पारमार्थिकः कर्तेति सम्यग्ज्ञानाभावादकृतबु

द्विजत्वाद्यभिमानावच्छिन्नं देहं तत्स्वरूपमात्मानं कर्तारं मन्यमानो य
स्करोति तस्यैतदधिष्ठानादिविभागेन त्रिविधं कर्मफलं नित्ययज्ञोक्तस्य
न्यास्तिवः परमात्मन एवं सर्वज्ञानचक्षुषा पश्यतो न पश्यतीत्यस्मात् तादृशी
तिर्मिप्रतिपादयितुमाह १६ ॥

लासिकी [illegible]टीका

ततः किमत आह तत्र सम्मुदिते एवाधिष्ठानादिपंचके एवमुक्तक्रमेण समग्रशीर्षि-
कयाकारणभूते सति यः कश्चित्पुरुषः केवलमात्मानं कर्तारं क
र्मसंपादकं पश्यति बुध्यते स पुरुषो न पश्यति न सम्यक् पश्यतीति ।
कुतोऽकृतबुद्धित्वाद्धेतोः न कृता न सम्पादिता बुद्धिर्देहादि
व्यतिरिक्तस्यात्मनो बोधो येन स भावस्तस्मात् यतोऽमतिर्दुष्टा वि
परीतभावनाभिभूता मतिः प्रज्ञा यस्य स ... ... न्यासिनो लक्ष्य
... १६

पेचोलीटीका

ततः किं तत आह तत्रेति तत्र पुनः यतः तत्र सर्वलोकव्यवहारमधिष्ठा
नादिभिः पंचभिः निष्पाद्ये सर्वस्मिन् कर्मणि आत्मानमकर्तारं के
वलं विशुद्धं अहं कर्तेति कर्तारं पश्यति स मन्दमतिः दुर्मतिः अकृतबु
द्धित्वात् आचार्योपदेशवेदान्तन्यायैः संस्कृतबुद्धित्वात् आत्मनः
तत्त्वं न पश्यति १६

रणवीर समिद्बोधिनी

ततः किमित्याह तत्रैवमिति तत्र पंचके प्रोक्तक्रमेण सर्वकर्मसु
कारणभूते सति यः कश्चिदात्मानमेव केवलं कर्तारं कर्मनिवर्त
कं पश्यति स दुर्मतिर्भ्रष्टधीर्न पश्यति सम्यगिति शेषः तत्र हेतुः
न कृता निष्पन्ना बुद्धिर्निश्चयात्मिका यस्य तस्य भावस्तत्त्वं तस्माद्दृढ
निश्चयत्वादित्यर्थः किमुक्तं भवति एक एव परमेश्वरः सर्वत्र
कर्मणि स्वतन्त्रः कर्तेति ज्ञानशून्यस्य पुण्यपापयोर्विषये स्वात्मन ए
व कर्तृत्वाभिमानेन त्रिविधं फलं परमेश्वरेणैतदेव संपाद्यं निमित्त

मावस्त्वदमिति निश्चयेन कत्वामि संधिं विहाय स्वधर्ममनुष्ठातः उ
नैनैतदिति २८॥

मध्यभाष्य

२८॥

तो इसमे फेरि क्या होता है इस अपेक्षा पर कहते है कि उन कर्म्मोके हेतु जो अविद्यानादि पात्रमात्र है और कई हेतु नही है सो होनेसे भी शास्त्र श्री आचार्यो के उपदेश सेनही शोधीगई बुद्धि इस कारण जो दुर्म्मति मनुष्य उपाधि रहित अव्यंगरूप आत्माको कर्त्तारूप देखते है इस से ये दुर्म्मति मनुष्य सम्यक दर्शी नही है १६

दोहा

याहि अहंकृति भावनाहि याकी बुद्धि लिपेन सोहनके
यहलोक को हनेन फिर बंधेन १७

दोहा

ताभें कर्त्ता आत्मकोकेवल देषतजोय याहि अकृता
यबुद्धिसें दुर्मतिलषेनसोय १६ ॥

यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते ह
त्वापि स इमाँल्लोकान्न हन्ति न निबध्यते १७

शांकरभाष्यटीका १ ॥

कः पुनः सुमतिर्यः सम्यक् पश्यतीत्युच्यते यस्येति यस्य शा
स्त्राचार्योपदेशन्यायसंस्कृतात्मनो न भवत्यहंकृतो अहं कर्ते
त्येवंलक्षणो भावो भावना प्रत्यय एव पंचाधिष्ठानादयोऽविद्यया
त्मनि कल्पिताः सर्वकर्मणां कर्तारो नाहमहन्तु तद्व्यापारा
णां साक्षिभूतः अप्राणो ह्यमनाः शुभ्रोऽक्षरात्परतः परः केव
लोऽविक्रिय इत्येवं पश्यतीति एतद्बुद्धिरन्तःकरणं यस्यात्मन उपा
धिभूता न लिप्यते नानुशयिनी भवतीदमहमकार्षं तेनाहं नरकं
गमिष्यामीत्येवं यस्य बुद्धिर्न लिप्यते स सुमतिः स पश्यति हत्वापि
स इमांल्लोकान् सर्वान्प्राणिन इत्यर्थः न हंति हननक्रियां न करो
ति न निबध्यते नापि तत्कार्येणाधर्मफलेन संबध्यते ननु हत्वापि
न हंतीति विप्रतिषिद्धमुच्यते यद्यपि स्तुतिः नैष दोषः लौकिक
पारमार्थिकदृष्ट्यपेक्षया तदुपपत्तेः देहाद्यात्मबुद्ध्या हन्ताहमिति
लौकिकीं दृष्टिमाश्रित्य हत्वापीत्याह यथा दर्शितां पारमार्थिकीं दृ
ष्टिमाश्रित्य न हंति न निबध्यत इति तदुभयमुपपद्यत एव नन्व
धिष्ठानादिभिः संभूय करोत्येवात्मा कर्तारमात्मानं केवलं त्विति
केवलशब्दप्रयोगान्नैष दोषः आत्मनोऽविक्रियस्वभावत्वेऽधिष्ठाना
दिभिः संहननानुपपत्तेः विक्रियावतो ह्यन्यैः संहननं संभवति संह
त्य वा कर्तृत्वं स्यात्तु अविक्रियस्यात्मनः केनचित् संहननमस्तीति न
संभूय कर्तृत्वमुपपद्यते अतः केवलत्वं आत्मनः स्वाभाविकमि।
ति केवलशब्दोऽनुवादमात्रं अविक्रियत्वं चात्मनः श्रुतिस्मृतिन्याय
प्रसिद्धं अविकार्योऽयमुच्यते गुणैरेव कर्माणि क्रियंते शरीरस्थो।
ऽपि न करोतीत्याद्यसकृदुपपादितं गीतास्वेव तावत् श्रुतिषु च ध्या
यतीव लेलायतीवेत्येवमाद्यासु यानि वाक्यानि दर्शितान्यायतश्च
निरवयवमपरतंत्रमविक्रियमात्मतत्त्वमिति राजमार्गः विक्रिया

वत्वाभ्युपगमेप्यात्मनः स्वकीयैव विक्रिया यस्य भवितुमर्हति
नाधिष्ठानादीनां कर्म्मण्यात्मकर्तृकाणि स्युर्नहि परस्य कर्म्मप्र
वेणाकृतमन्यगंतुमर्हति यत्तु विषयागमितं ततस्य यथा रजतत्व
न शुक्तिकाया यथा वा तलमलवत्त्वं बालैर्गमितमविषया नाकाश
स्य तथाधिष्ठानादिविक्रियापि तेषामेवेति नात्मनः तस्मात् युक्तमु
४० क्तं युद्धे हननत्वबुद्धिलेपाभावात् विद्वान्न हंतीति निषिध्यत इति नायं
हंति न हन्यत इति प्रतिज्ञाय न जायत इत्यादिहेतुवचनेनाविक्रियत्व
मात्मन उक्तं वेदाविनाशिनमिति विदुषः कर्माधिकारनिवृत्तिशा
स्त्रादौ संक्षेपत उक्तं मध्ये प्रसारितं च तत्र प्रसंगं कृत्वा इहोपसंह
रति शास्त्रार्थपिंडीकरणाय विद्वान्न हंतीति निषिध्यत इति एवं च
सति देहमूलाभिमानानुपपत्तावविद्याकृताशेषकर्म्मसंन्यासोपप
त्तेः संन्यासिनामनिष्टादि त्रिविधं कर्मणः फलं न भवतीत्युपपन्ने त
द्विपर्ययाच्चेतरेषां भवतीत्येतच्चापरिहार्यमित्यशेषगीताशास्त्रस्या
र्थ उपसंहृतः स एष सर्ववेदार्थसारो निपुणमतिभिः पंडितैर्विचा
र्य प्रतिपत्तव्य इति तत्र तत्र प्रकरणविभागेन दर्शितोऽस्माभिः
शास्त्रन्यायानुसारेण २१ ॥

आनंदगिरिकृतटीका २ ॥

१५ किं तेन हंतृत्वमित्यत्र विदुषः सम्यग्दृष्टेः स्वमतित्वं प्रश्नपूर्वक
माह कः पुनरित्यादिना अद्धे कर्त्तेत्यात्मनि कर्तृत्वस्य सर्वथाभावे
ज्ञ कर्तृत्वधीरित्याशंक्याह पुनरिति कथं तर्हि अकर्तृत्वधीरा
त्मनीत्याशंक्याधिष्ठानादीनां दृश्यापाराणामुसादित्वादित्याह्येका ३५
ह श्रद्धेवेति आत्मनो न स्वतोऽस्ति क्रियाशक्तिमत्त्वमित्यत्र प्रमाण
माह अप्राणोहीति नापि तस्य स्वतो ज्ञानशक्तित्वमित्याह अमना इति
उपाधिद्वयासंबंधे शुद्धत्वे फलितमाह शुभ्र इति कारणसत्त्वस्याद
शुद्धिमाशंक्योक्तं अक्षरादिति कार्यकारणयोरात्मस्पर्शित्वेन पा
र्थक्येसहितीयत्वमाशंक्य तयोरविद्याकल्पितत्वादद्वैतमित्याह
केवल इति जन्मादिसर्वविक्रियारहितत्वेन कौटस्थ्यमाह अवि।
क्रिय इति उक्तविशेषणमादायावेदेत्युक्तेरिति नानशायनीनामुपा

यवती नक्लेशशालिनीत्यर्थः द्वितीयपादस्यावतार्थमुक्त्वावा
क्यार्थमाह इदमिति पापकर्म्म इदमात्मस्वरूपेते लोकानामग
म्यत्वाभावे ऽतोहिंसेत्याशङ्क्याह यागेनेति विकल्पार्थो वाशब्द
निरूपितश्चेति शङ्कते नन्विति विरोधं परिहरति नैषदोषइति लौ
किकदृष्टिमवष्टभ्याह हन्तापीति निर्द्देशं विशदयति देहादीति ता
त्विकीं दृष्टिमास्थाय नहन्तीति निर्द्देशमुपपादयति यथेति ना
हं कर्त्ता किन्तु कर्त्तृव्यापारयोः साक्षी क्रियाज्ञानशक्तिमदुपाधि
द्वयविनिर्मुक्तः शुद्धः सन् कार्यकारणासम्बद्धो द्वितीयो विक्रियस्त
मेवं पारमार्थिकदृष्ट्यपेक्षया दर्शितत्वं द्रष्टव्यं हन्तापीत्येतन्नहन्तीत्या
दि चोभयं उभितयावस्मादुपपन्नमित्युपसंहरति तदुभयमिति
केवलमेवात्मानं कर्त्तारं पश्यन् दुर्म्मतिरित्यत्रात्मविशेषणसमर्प्पक
केवलशब्दसामर्थ्यादात्मनोविशिष्टस्य कर्त्तृत्वमिति शङ्कते नन्विति
शात्मनोविशिष्टयोगात्त्वविशिष्टस्यापि कर्त्तृत्वमिति दूषयति नैष
दोषइति अविक्रियत्वाभावेऽपि कथमात्मनो हन्तृत्वमित्याशङ्क्या
ह अविक्रियेति अधिष्ठानादिभिरात्मनः संहतत्वेऽपि न कर्त्तृत्वम
विक्रियस्य क्रियान्वयव्यवधानादित्याह संहत्येति संहतत्वानुपपत्ति
मङ्गीकरोति नन्विति असंहतत्वे फलितमाह तेनेति निकृष्य नहि
केवलत्वमात्मनि केवलशब्दाद्युक्तं तदाहन्तत इति कर्त्तृत्वमात्मनोऽनु
पपन्नं तस्याविक्रियत्वमपैतीत्याशङ्क्याह अविक्रियत्वेचेति नचस्त
निवाक्यान्तराहरति अविकार्योऽयमिति नायं हन्ति नहन्यत इत्यादिवा
क्यमादिशब्दार्थः उक्तवाक्यानामात्माविक्रियत्वे तात्पर्य्यं सूचयति
अस्तक्तुदिति निष्कलं निष्क्रियं शान्तमित्यादिवाक्यं स्मृत्यादिश
ब्दार्थः यानि वाक्यानि तैरात्मनोविक्रियत्वं दर्शितमिति योजना
न्यायतश्च न दर्शितमिति पूर्वेण सम्बन्धः न्यायमेव दर्शयति निर
वयवमिति न तावदात्मा स्वतोविक्रियते निरवयवत्वादाकाशवत्वा
पि परतो संगत्याकार्यस्य पराधीनत्वायोगादित्यर्थः किंवात्मनः स्व
निष्ठा वा विक्रियाधिष्ठानादिनिष्ठा वा नाद्यः स्वनिष्ठाविक्रियानुपपत्ते
रात्मनोदर्शितत्वादित्याशयेनाह विक्रियावत्त्वेति साधारणकर्म्म
विशेषः द्वितीयं दूषयति नेत्यादिना अधिष्ठानादिकृतमपि कर्म्म न

श्री॰
गी॰ टी॰
म॰

८१

योगादात्मन्यागच्छतीत्याशंक्य तदागमने वास्तवमाविर्येवेति
विकल्पाद्यं दूषयति नहीति द्वितीये निरस्यति यद्येति आत्म
मविद्याध्यारोपिते कर्मणि नात्मीयमिति तत्दृष्टान्ताभ्यामुपपादयति य
थेत्यादिना आत्मनो विक्रियत्वेन कर्तृत्वाभावे फलितमाह तस्मा
दिति ननु प्रागेवात्मनो विक्रियत्वं प्रतिपादितं तदिह कस्मादुच्यते
तत्राह नायमिति शास्त्रादौ प्रतिज्ञाय हेतुपूर्वकं सेतिप्योक्ता म
ध्ये तत्प्रसंगं कृत्वा प्रस्तावितो कर्माधिकारनिवृत्तिमिहोपसंहरती
ति सम्बन्धः प्रतिज्ञातस्य हेतुनोपपादितस्यान्ते निगमनं किमर्थ
मित्याशंक्याह शास्त्रार्थेति कर्माधिकारो विदुषो नेति स्थिते तस्य
देहाभिमानाभावे तत्पविरोधस्य सर्वकर्मत्यागसिद्धेरनिष्टमिष्टं मि
श्रं चेति त्रिविधं कर्मफलसन्न्यासिनो नेति प्रागुक्तं युक्तमेवेति पर
मप्रकृतमुपसंहरति एवं चेति ये पुनरविद्वांसो देहाभिमानिनस्तेषां। मा॰
त्रिविधं कर्मफलमवश्यमेवेति हेतुवचनमिदमर्थं निगमयति त
द्विपर्ययाच्चेति कुपितनादिकृतं कर्म नात्मकृतमविदुषामेव
कर्माधिकारो देहाभिमानित्वेन तत्त्यागयोगाद्देहाभिमानाभावा
त्तु विदुषां कर्माधिकारनिवृत्तिरित्युपसंहृतमर्थं संक्षिप्याह इमे
ष इति उक्तं च गीतार्थो वेदार्थत्वादुपादेय इत्याह स एष इति कथम
यमर्थो वेदार्थोऽपि प्रतिपन्नः स्यादिति तत्राह निर्गुण इति भाष्यकृता
मानत्र क्रिद्भ्याविभज्यानुक्त्वा चास्यार्थस्योपादेयत्वमित्याशंक्याह त
त्रेति १७ ॥ स्वामिकृत टीका ३१ ॥

+ कस्तर्हि स्वमतिर्यस्य कर्मलोपो नास्तीत्यपेक्षायामाह॥

+यस्येति अहं कर्तेत्येवंभूतो भावोऽभिप्रायो यस्य नास्ति यद्वाहं
कर्ताहंकारो यस्य यः स्वभावः कर्तृत्वाभिनिवेशो नास्ति यस्य शरीरादी
नामेव कर्मकर्तृत्वालोचनादित्यर्थः अत एव यस्य बुद्धिर्न लिप्यते इ
ष्टानिष्टबुद्ध्या कर्मसु न सज्जते अत एवंभूतो देहाद्व्यतिरिक्तात्मद
र्शी इमां लोकान् सर्वानपि प्राणिनो लोकदृष्ट्या हत्वापि विवेकयाम्
(तत्र) दृष्ट्या न हंति न च तत्फलैर्निबध्यते यत्तेन प्राप्नोति किंतु नः सतत्त्व
विहारः परोक्षज्ञानो नित्यहेतुभिः कर्मभिस्तस्य बंधशंकेत्यर्थः त
दुक्तं ब्रह्मण्याधाय कर्माणि संगं त्यक्त्वा करोति यः लिप्यते न स पापे
नेति हत्वापि न हंति न निबध्यते १७ [illegible]

[illegible] कर्मणि [illegible] सकर्मफलादीनां विशेषणान्यकर्त्वाहं निर्गुणा
[illegible] नवैयोनासौ [illegible] कर्मोपचार १६

पैशाचभाष्य टीका ४ ॥

न केवलं तस्य योगिनः सकलकर्मसंन्यास एव वस्तुतः यस्य शास्त्राचा
र्योपदेशमात्रैः संस्कृतात्मनः अहं कर्तेत्येवंभूतो भावः यस्य यो न भ
वति यतएवाधिष्ठानादयो ऽधिष्ठानकर्तृकरणचेष्टादीनि सर्वकर्म
णां कारणानि गुणविषयाश्चैव कल्पितानि सर्वकर्मणां कर्तारो नाहं इ
हेन तद्व्यापाराणां साक्षिमात्र इति पश्यतो विवृद्धिर्निश्चयो यस्मात्तु
धी धीर्विनीं भवति तदहमकार्षं तेन नरकं गमिष्यामीति न लिप्यते
हत्वापि स इमान्लोकान्प्राणिनः न हन्ति न च हन्तैनं कर्मणा निब
ध्यते न च हत्वापि न हन्ति न निबध्यत इति १७ ॥

रामानुजभाष्य टीका ५ ॥

यस्येति परमपुरुषकर्तृत्वानुसंधानेन यस्य भावः कर्तृत्वविशि
षेण मनोवृत्तिविशेषो नाहंकृतः नाहमभिमानकृतः अहं करोमी
ति यस्य न विद्यत इत्यर्थः बुद्धिर्यस्य न लिप्यते अस्मिन्कर्मणि मम
कर्तृत्वाभावादेतत्फलं न मया संबध्यते न च मदीयमिदं कर्मेति य
स्य बुद्धिर्जायत इत्यर्थः स इमांल्लोकान्युद्धे हत्वापि न हन्ति न केवलं भी
ष्मादीनित्यर्थः १८ न तेन युद्धाख्येन कर्मणा निबध्यते न तत्फलं ना
नुभवतीत्यर्थः [illegible]
[illegible]
[illegible] १७ ॥

अभिनवगुप्तकृत टीका ६ ॥

स्पष्टार्थः १७ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपाटी टीका ७ ॥

कस्तर्हि पण्डित इत्याह यस्येति अहमित्यहंकारेणाकृतो नित्याहि
तो भावः स्वभावः कर्तृत्वाभिनिवेशो यस्य नास्ति शरीरादीनामेव कर्म मक
र्तृत्वालोचनादित्यर्थः अत एव यस्य बुद्धिर्न लिप्यते इष्टानिष्टबुद्ध्या।
कर्मसु न सज्जते स एवंभूतो देहादिभ्यो निर्भिन्नात्मदर्शी इमांल्लोका ना^

श्री·
गी·टी·
अ·

८२

न सर्वान् प्राणिनो लोकत्रयस्थान् हत्वापि विविक्ततया स्वदृष्ट्या न हंति
न चन्तत्फलेन निबध्यते बंधं न प्राप्नोति किंपुनः स्वल्पहिंसाया अपरो
क्तज्ञानोत्पत्तिहेतुभिस्तत्सर्वं यशकेत्यर्थः ब्रह्मण्याधाय कर्मा
णि संगं त्यक्त्वा करोति य इत्यादि स्वयमेवोक्तमस्ति १७ ॥

वनमाली टीका ८ ॥

अविद्यादेर्देहेंद्रियादिसंबंधविमुक्तः केवलमात्मानं योऽकर्तारं प
श्यति नेत्याह यस्येति यस्य नित्यस्य ज्ञानैश्वर्यापरोक्षस्य निहताशेषा
विद्यस्य जीवन्मुक्तस्य देहादौ निहतोऽहंममेत्यभिमानस्य अ
हमित्यहंकृतो जातो भावोऽभिप्रायो यस्य देहादौ नास्ति शुद्धस्वतः
कर्तृत्वाभिमानो नास्तीत्यर्थः अत एव बुद्धिर्यस्य न लिप्यते इष्टा
निष्टबुद्ध्या कर्मस्वनुसज्जते स लोकानिमान् प्राणिनो हत्वापि न
हंति लोकदृष्ट्या हननकर्तापि विवेकदृष्ट्या हन्मीति भावाभावान्न
हंति न वा हननफलपापादिना निबध्यते यद्यपि जीवन्मुक्त
स्य प्राक्तनपालितहिंसादिधर्मस्य संस्कारवशात् प्रेरणा एवं
केवानर्हिंसादिदुष्टकर्मकर्तृत्वं तथापि हत्वापीत्यपिना कैमु
त्यन्यायेन जीवन्मुक्तोऽकर्तृत्वज्ञानवान् स्तूयते यद्वात्मनोऽक
र्तृत्वमनुसंदधानः सोऽविहितकर्म कुर्वन्नपि तत्फलेन न लिप्य
ते तद्विधस्य धर्माभिप्रायेणाहत्वापीत्युक्तं आत्मनोऽकर्तृत्व
ज्ञानवत्तद्विधः स्वधर्मबुद्ध्या सर्वलोकान् हत्वापि तत्फलेन
पुण्यादिजन्यस्वर्गादिना न लिप्यत इत्यर्थः न वा निबध्यते त
त्फलभोगपरंपरार्थं संसारी न भवतीत्यर्थः १७ ॥

उत्तमवैजयंती टीका ९ ॥

यद्येवं तर्हि नेत्रवान्को मतिः को भवेदित्यपेक्षायामाह यस्य
नाहमित्यस्य सत्कारस्वत्तस्य सदाचार्योपदेशवतः शुद्धस्व
स्वभावोऽहमेवेदं करोमीति स्वकर्तृत्वविशेषणो मनोवृत्तिर्वि
शेषो नाहंकृतोऽहमेवेदं करोमीत्यभिमानकृतो न भवेत् य
स्य बुद्धिर्न लिप्यते इदमीदृशं कार्यं तत्कर्म मदीयेनात्मसिं
त्कर्मणि मम कर्तृत्वाभावादेतत्फलमपि मानवभागिनस्य

+तदेवं चतुर्भिः श्लोकैरनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलं भवत्यत्यागिनां प्रेत्येति चरण-
त्रयं व्याख्यातं इदानीं न तु संन्यासिनां क्वचिदिति तुरीयं चरणमेकेन व्याचष्टे ॥

परमेश्वरार्पितत्वादित्येवं यस्य बुद्धिर्जायते शुभकृतः इमान् चतु-
र्दशपरिमितान् लोकान् भवनानि हत्वापि न तु भीष्मद्रोणादीनेव न
हंति हननक्रियायाः कर्ता न भवति न च निबध्यते सर्वलोकहनन-
रूपेणानेन कर्मणा च न लिप्यते १७ ॥

मधुसूदनी टीका ० ॥

+यस्य पूर्वोक्तविपरीतस्य शुभैः कर्मभिः क्षपितेषु विवेकविरोधि-
पापेषु नित्यानित्यवस्तुविवेकादिसाधनचतुष्टयेन संपन्नवतः शास्त्रा-
चार्योपदेशन्यायजनिताकर्त्रभोक्तृस्वप्रकाशपरमानंदाद्वितीय-
ब्रह्मात्मसाक्षात्कारस्याज्ञानेन सकार्येण बाधितेन भवमहं कर्ताहं कर्तेत्ये-
वंरूपो भावः प्रत्ययो यस्याभावः सद्भावः अहंकृतोहमिति व्यपदेशार्ही-
न अहंकारबाधेन अहंस्वरूपमात्रपरिशेषादिति वा अहंकृतोऽहं-
कारस्याभावः तस्मादात्मैव स्वतो विवेकेन बाधितत्वादिति वा बाधिता
नहंतावपि एतत्प्रपंचाधिष्ठानादयो माययापि सर्वात्मनि कल्पि-
ताः सर्वकर्मणां कर्तारो मया स्वप्रकाशचैतन्येनासंगेन कल्पितसंबंधे-
न प्रकाश्यमानाश्चाहं तु न कर्ता किं तु कर्तृतद्व्यापाराणां साक्षिभूतः
क्रियाज्ञानशक्तिमदुपाधिरहितः निर्मलः शुद्धः सर्वकार्यकारणासंबद्धः
कूटस्थो नित्यो निर्द्वयः सर्वविकारशून्यः असंगोऽद्वयस्वरूपः साक्षी चे-
ता केवलो निर्गुणश्च अप्राणो ह्यमनाः शुभ्रो अक्षरात्परतः परः अजरा-
त्मा महानध्रुवः सलिल एको द्रष्टाद्वैतः अजो नित्यः शाश्वतोयं पुराणो
निष्कलं निष्क्रियं शान्तं निरवद्यं निरंजनमित्यादिश्रुतिभ्यः अविका-
र्योयमुच्यते प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः अहंकार-
विमूढात्मा कर्ताहमिति मन्यते तत्त्ववित्त्वसंगते शरीरस्थोपि कौंते-
य न करोति न लिप्यते इत्यादिस्मृतिभ्यश्च तस्मान्नाहं कर्तेत्येवं परमार्थ-
दृष्टेः बुद्धिरन्तःकरणं यस्य न लिप्यते नानुशयिनी भवति इदमहम-
कार्षमेतत्फलं भोक्ष्ये इत्यनुसंधानेन कर्तृत्ववासनानिमित्तो लेपोनु-
शयः स च शुभेषु कर्मसु हर्षरूपः पापेषु पश्चात्तापरूपः ईदृशेन हि द्विविधे-
नापि लेपेन तु द्विविधेन लिप्यते कर्तृत्वाभिमानबाधात् तथा च श्रुति-
रत्यश्रुतिः एतमु हैवैते न तरत इति अतः पापमकरवमिति अतः कल्या-

श्री॰
गी॰ टी॰
३॰

८३

णामकर्तृत्वमित्यभिप्रेत्य हेत्वधिष्ठानेतरतत्त्वेनैककर्तृताकृतेतत्पतः तदेत
दृचाभ्युक्तमेष नित्यो महिमा ब्राह्मणस्य न वर्द्धते कर्मणा नो कनी।
यान् तस्यैव स्यात्पदवित्तं विदित्वा न लिप्यते कर्मणा पापकेनेति
पापकेनेति पुण्यस्याप्युपलक्षणं वर्द्धते कनीयानिति च पुण्यपा
पयोः फलोपचयापचयाभिप्रायं एवं यस्य नाहंकृतो भावो बुद्धिर्य
स्य न लिप्यते तत्पूर्वोक्तमिति विलक्षणः स्मृतिः परमार्थदर्शी
पश्यमकर्तारमात्मानं केवलं स कर्तृत्वाभिमानाभावादनिष्टादि
त्रिविधकर्मफलभागी न भवतीत्येतावति शास्त्रार्थे अहंकाराभाव उ
क्तो लेपाभावो स्तोत्रमाह हत्वेति हत्वापि स इमाँल्लोकान्
प्राणिनः न हन्ति हननक्रियायाः कर्ता न भवति अकर्तृस्वरूपस्या
त्माकारात् न निबध्यते नापि तत्कार्येण धर्मफलेन संबध्यते
अत्र नाहंकृतो भावः स्यात् फलेन हेतौ निबद्धितो लिप्यते तस्म
स्य फलेन निबध्यते इति श्रुतेन च कर्मालेपप्रदर्शनेनेतिशयमा
त्रमुक्तेन तु सर्वप्राणिहननेऽपि भवति हत्वापीति कर्तृत्वाभ्युपगत्या
बाधितकर्तृत्वदृष्ट्या लौकिकानां हन्तीति कर्तृत्वनिषेधः शास्त्री
यया परमार्थदृष्ट्येति न विरोधः शास्त्रादौ नायं हन्ति न हन्यते
इति सर्वकर्मासंस्पर्शित्वमात्मनः प्रतिज्ञाय न जायते इत्यादि हे
तुवचनेन साधयित्वा वेदाविनाशिनमित्यादिना विदुषः सर्व।
कर्माधिकारनिवृत्तिः संक्षेपेणोक्ता मध्ये च तेन तेन प्रसंगेन प्रपं
चितेह शास्त्रार्थेनावध्यप्रदर्शनायोपसंहृता च न हन्ति न निबध्यत
इति एवं चाविद्याकल्पितानामधिष्ठानाद्यनात्मकृतानां सर्वेषा
मपि कर्मणामात्मनि विद्ययात्मत्वबोधादपगतेः परमार्थसंन्यासिना
मनिष्टादि त्रिविधं कर्मफलं न भवतीत्युपपन्नं परमार्थसंन्यास
स्याकर्तात्ममानाकारपर्यवसानकादीनामेतादृशसंन्यासित्वेपि व
लवदारब्धकर्मवशात् बाधितानुवृत्त्या परपरिकल्पनया वा क
र्मदर्शनेन विरुद्धं परमहंसानामीदृशानामभिवादनादिवत् शुद्ध
एवं तानफलभूतो विहितसंन्यास उच्यते साधनभूतस्तु विविदि
षासंन्यासो नैव विधीयते यस्मादनन्तरकाले ज्ञानोत्पत्तावेवावा।

योऽभवन्नीतिवद्यते एवमधिष्ठानादिपंचकस्य क्रियाहेतुत्वेना।
त्मनः सर्वकर्मासंस्पर्शत्वमुक्त्वेत्थंभूतमेवार्थज्ञानं ज्ञेयादिप्रक्रि
यारत्नत्रयात्रैगुण्यभेदव्याख्यया च विवरीतुमुपक्रमते १८ ॥

सदानन्दी टीका ॥ ॥

स्लोकैस्त्रिभिरेवं न दृगोणसंन्यासिनो फले प्रतिष्ठादिविपाकोक्ते
व्याख्यातं हेतुभिः सह १ इदानीं निर्णयपादेन ब्रवीति श्रव्यत्यन्तसंरुप
वीक्ष विपरीतस्य यस्य स्वत्वविदः सतः २ शास्त्राचार्योपदेशाभ्यास
स्कृतात्मैकासन्मतेः स्वप्रकाशविदानंदाकर्तृभोक्तात्मवेदिनः ३
सकार्यैवाधिनिज्ञानेनास्यैवाहंकृतामतिः अहंकर्तेति रूपो यः
स्य यत्नस्य नास्तिता ४ नास्त्यहंकारतादात्म्ययस्य शुद्धात्मदर्शि
नः अधिष्ठानादयः पंच मायया मयि कल्पिताः ५ कर्ताऽहं क
र्मणो नाहं कर्तोदासीनभावनः किं तु साक्षित्वयाप्तेषां व्यापृतेरव
भासकः ६ इत्येवं यस्य शुद्धात्ममतेर्नाहंकृतिर्भवेत् यस्मात्तः कारण
बुद्धिर्नैवानुशायिनी फले ७ प्रकार्षमिदमत्राहं भोक्ष्ये एतत्फलमि
ति कर्तृत्ववासनाहेतुर्लेपो नानुशयात्मकः ८ स परमार्थदर्शो।
ऽप्यप्यज्ञात्मानमक्रियं हित्वाखिलांल्लोकांस्त्याज्याणिनः का
लधर्मिणः ९ हननक्रियायाः कर्ता न भवत्यनहंकृतिः नचाध
र्मफलेनासौ संबध्यत उदारधीः १० अत्रनाहंकृतोभावो न हेतोः स।
ल्लिनस्फलं बुद्धिर्नैलिप्यते न स्मन निवध्यत इत्यपि ११ अनेनाति
शायोक्तेन कर्मालेपः प्रदर्शितः हत्वापीति न लोकिकात्दृष्ट्या
बाधितयेरिते १२ याशीयायाहं नेति न विरोधो मनागपि एवं
मायाकृते सर्वत्र्याकरस्य रंचजगत् १३ मत्वासंन्यासिनो नाति
त्रिविधं कर्मणः फलं परमार्थसंन्यासी ब्रह्मबोधेन चापरः १४
ब्रह्मात्मैक्यपरिज्ञानेनष्टेऽज्ञाने सकार्यके स्वतः सिद्धोऽस्तिसंन्यासः
सर्वेषामेव कर्मणां १५ संन्यासिनेपि श्वैषां जनकादेर्महीक्षितां
प्रारब्धकर्मणां तेषां लोकदृष्ट्या क्रियावतां १६ स्वदृष्ट्या नैव क्रिया।
काचिन्न कर्ता कर्मवान्न कश्चित् भिक्षाटनादिके कर्मण्ययथा संन्यासिना

वाधित^

धिया १७ ^ सर्वेषांसकारणानांसर्वथाभवेत् तथातत्त्वविदांसर्वक
र्मसौतेवलौकिके १८ गृहस्थानामपिस्वीयहष्टावाधितेमेवसत्
न्वेपकेयतस्तेषांप्रतिगात्मनिकेवले १९ सदास्थितिर्नदेहादीज
इवर्गेविनश्वरे भ्रतोनिरंकुशास्तिःकृतकृत्यतयास्थिरं २० यस्मादे
वजषट्पदीमतिरियेसकाविलाईकाति स्वात्मानंदस्तेननतुत्रविष
येरंतेमनागीप्सति यद्दोयामतशङ्खेतपियेकाविल्क्रियानस्थे
तेश्रीकांतमनर्घ्यामविभ्रंतेनेसमङ्केदंभजे २१।। २७ ।।

नीलकंठीटीका १७ ।।

द्वितीयंप्रयोजनमाहयस्येति यस्यप्रमातुर्भावः स्वरूपमात्रस्वरू
पश्चात्मा नाहंकृतः शुद्धमिवकृतः अहंकारतादात्म्यापितोऽहं
कृतस्तथान यस्यबुद्धिर्नलिप्यतेप्रात्मभावेनयत्र्जितानभवति
यस्यबुद्धेरतिरिक्तमात्मानंपश्यतोबुद्धिधर्माःकर्तृत्वादयोनात्म
निभ्रतीयन्तेश्रसिकर्तृत्ववादितार्किकनिरासः यस्यचस्रात्मधर्मोबुद्धे
स्तस्मादयोवर्त्तेनससत्त्वेनतश्तिबुद्धिमेवचेतनांवदतोबौद्धस्यनि
रासः चिदचितोरन्योन्यसंक्रमसोऽन्यमीथ्यासोवाप्यतेइतिद्रष्टव्या
दिसंसर्गनिषेधेनभोक्तृत्वाभावोदर्शितः हत्वापिसइमांल्लोकान्न
हंतिननिवध्यतेइतितुस्तुतिमात्रं कर्तृत्वस्यैववाधेनहंतृत्वाद्यो
गात् दृश्यपटवत्कर्तृत्वान्हत्वापिहंतुनक्रियायोग्यवतेकस्मादरा
गद्वेषादेरभावात् एतेनात्मनस्तात्विकमकर्तृत्वंभावयताक्र
तेकर्मणांतात्विककर्तृत्वाभिमाननिमित्तेनफलेनसंस्तोतुंनार्हतीति
दर्शितं नहिरज्जुसर्पेरज्जुबुद्धिंकुर्वतात्रस्तःसर्पदोभयेदेशना
दिफलेभवति सर्पेतथाकुर्वतस्तज्जवश्येवतद्वदिदमपिद्रष्टव्य
म १७ ।।

आनंदीटीका १७

एतदेवप्रकटमाह अहमेवैकाकीकर्तानतुपंचकसामग्रीत्ये
वंप्रकारोऽहंकृतोभावोयस्यनास्ति यस्यचैवंसात्विकस्यबुद्धि
र्नलिप्यते पंचकस्यकर्मविनाशस्वात्मनोऽवश्यंभाव्यमकर्तृत्वेनम

नाते स इमांल्लोकान्हत्वापि न हंति कर्तृत्वानभिमानात् न बध्यते
न च तस्य तत्कर्म बंधकमित्यर्थः अत्र कपिलैर्यदुक्तम् आत्मनः
स्वस्वभावत एव कर्तृत्वं नास्ति विक्रियाप्रसंगादिति तदयुक्तम्
न हि क्रियायोगमात्रेण विक्रिया न हि पचनक्रियादेवदत्तस्य वि
क्रियास्वरूपविच्युतिर्भवति विक्रिया हि सावयवस्यावयवविश्ले
षादिना स्ववर्णादेः कुण्डलत्वादिनेवेति शास्त्रसिद्धान्तः १७ ॥

नन्वयथोक्तस्य त्यागिनः परमा रामकंठीटीका १८ त्ममयं सर्वज्ञानचक्षुषा पश्यतो तत एव तस्य तादृशी वृत्तिं प्रतिपादयितुमाह ॥

यस्यात्ममयस्य समस्तवस्तुनो भावश्छिन्नहृत्तिर्नो हंकृतो देहादावनित्ये
हंममेत्यग्रहणेन संपादितो न तथा यस्य बुद्धिः सं विन्न लिप्यते रागद्वे
षादिभिर्मलैर्मायोपहतस्य समस्तजीवनिवहैर्नैकलुषीक्रियते स परमे
श्वरभावसमाविष्टः कर्मेहयोद्भवस्थितान्लोकान्हत्वा व्यापाद्या
पि न निबध्यते न तद्वधसाधनेन क्रियाफलेन युज्यते पारमार्थिक
स्य नित्यस्य ब्रह्मस्वरूपस्यात्मनो नानाभावाच्छरीरादेश्चानित्यविनश्व
रस्वभावत्वादत्र नायं हंति न हन्यते इत्यादिना प्रतिपादित एव हेतुः प्रा
क् अतस्त्वं यथोक्तत्यागवान्कार्यकर्मेदमाचरेत्यर्थः (अथ त्यागपत्या
गिशब्दप्रतिपादितयोगिसंसारिपुरुषविषयतया ज्ञानकर्मक
र्तृणां गुणनिमित्तकं भेदं प्रतिपिपादयिषुः सर्वदेहसाधारणयो
र्ज्ञानकर्मणोः फलसंपत्तिहेतुं तावत्प्रतिपादयितुमाह १८ ॥

+ अथ संन्यासिनो लक्षणमाह ॥

लासिकी [illegible]टीका

+ यस्य स्वं स्वरूपप्रतिष्ठस्य कर्मकर्तुरपि अहंकृतो हंकारस्य भावः स्व
भावः अहं करोमीत्येवं देहाद्यभिमानाभावान्नास्ति बुद्धिश्च य
स्य न लिप्यते नानुशायिनी भवति स गुरुपदेशेद्दमान्योद्भवस्थि
तानिमान्सर्वान्वा लोकान्प्राणिनो हत्वापि न हंति कर्तृत्वाभिमा
नाभावात् न निबध्यते तत्फलैश्च न [illegible]युज्यते वासनानादानात्
निष्ठत्तु तावत्कर्महेतोः पंचविधत्वं लोकप्रसिद्धं त्रैविध्यमेव ज्ञान
कर्महेतोः प्रतिपादयामीत्याह १८

पैवोलीटीका

कः पुनः सुमतिः यः पश्यतीत्यपेक्षायामाह यस्येति यस्य शास्त्राचा
र्योपदेशन्यायसंस्कृतान्तःकरणस्याहंकृतोऽहंकर्तेत्येवंलक्षणो भा
वो न भवति यस्य बुद्धिरन्तःकरणं मया कर्म कृतमस्य कर्मणः फ
लं स्वर्गनरकादि अहं भोक्ष्य इति न मन्यते न लिप्यते स बुद्धिरिमां
ल्लोकान्सर्वान्प्राणिनः हत्वापि लोकदृष्ट्या हननं कृत्वापि परमा
र्थतोऽपि न हन्ति न निबध्यते न तस्य फलेन संबध्यते १७

रणवीरसमिद्धायिनी ॥

अत एव तस्य स्तुतिं प्रतिपादयति यस्येति यस्य कर्मानुष्ठातुः अह
मेव करोमीति भावो मानसो व्यापारो न भवति परमेश्वरस्यैव सर्व
कर्तृत्वात् अत एव यस्य बुद्धिर्न लिप्यते प्रोक्तलक्षणरागद्वेषादिम
लैर्न कलुषीक्रियते स भगवद्रूपः कर्माधिकारी अस्मान्योग्यमवस्थि
तांल्लोकान्हत्वापि न हन्ति हिंसाजन्यपापानाक्रान्तबुद्धित्वात् अत
एव न निबद्धो भवति १७ ॥

मधुभाष्य

यस्येति यस्त्वीषद्दृश्यते सर्वेषु देहंकारीव एवं सर्वं हि न
ब्रूत एव मपेक्ष्य विधिः अकर्तृत्वादित्यत आह १७ ॥

भाषा अनुवादः ॥

जिस को कर्म्म लेप नहीं है ऐसा सुमति कौन है इस अपेक्षा से
कहते है कि मैने यह कर्म्म किया औ मै कर्ता हू ऐसी वासना जिस
के नहीं है अथवा शरीर औ इंद्रीमात्र को कर्तृत्व देखने से अहंका
र स्वभावरूप कर्तृत्व का भी लेश जिसको नहीं है इस हेतुसे जिस
कीबुद्धि इष्ट अनिष्ट विचार से सकल कर्म्ममे आसक्त नहीं होती है
ऐसा जो देहादि से भिन्नरूप आत्मदर्शी पुरुष प्राणियोंकी लोक
दृष्टि से हनन करके भी सब मे अभिन्नरूप आत्मदृष्टि हेतुसे किसी
का भी हनन नही करता है और कर्म्मफलसे बन्धको नहीं पाव
ता है सत्वशुद्धि के द्वारा अपरोक्ष कहे प्रमत्त ज्ञान उपजव हेतु
से निष्काम कर्म्मके द्वारा उसको बन्धनकी शंका और काहेस
हे ५ अध्यायके १० श्लोक मे कह चुके हैं कि जोकर्म्म फलकी
आसक्ति छोड भगवदर्पण पूर्वक कर्म्मका अनुष्ठान करते हैं
ते मनुष्य जलके बीच वर्तमान पद्मपत्र के समान पुण्य पाप
समस्त कर्म्म से अछेले रहते लिप्त नही होते है १७ ॥

दोहा

याहि अहंकृति भाव नहि याकी बुद्धि लिपे न सो हनके
यहलोक को हनेन फिर बंधे न ७

96

ज्ञानंज्ञेयंपरिज्ञाता त्रिविधाकर्मचोदना
करणंकर्मकर्तेति त्रिविधःकर्मसंग्रहः १८

शांकरभाष्य टीका २ ॥

अथेदानीं तेषां कर्मणां प्रवर्तकमुच्यते ज्ञानमिति ज्ञानं ज्ञाय
ते ऽनेनेति सर्वविषयविशेषेणोच्यते तथा ज्ञेयं ज्ञातव्यं तदपि
सामान्येनैव सर्वमुच्यते तथा परिज्ञातोपाधिलक्षणो ऽविद्याक
ल्पितो भोक्ता इत्येतत्त्रयमेषामविशेषेण सर्वकर्मणां प्रवर्तिका
त्रिविधा त्रिःप्रकारा कर्मचोदना ज्ञानादीनां हि त्रयाणां सन्निपाते
हानोपादानादिप्रयोजनः सर्वकर्मारंभः स्यात् ततः पंचभिरधिष्ठा
नादिभिरारब्धं वाङ्मनःकायाश्रयभेदेन त्रिधा राशीभूतं विभक
रणादिषु संगृह्यते इत्येतदुच्यते करणं क्रियते ऽनेनेति बाह्यं श्रो
त्रादि अन्तःस्थं बुद्ध्यादि कर्मेप्सिततमं कर्तुः क्रियया व्याप्यमानं क
र्ता करणानां व्यापारयितोपाधिलक्षण इति त्रिविधः त्रिःप्रकारः
कर्मसंग्रहः संगृह्यते ऽस्मिन्निति संग्रहः कर्मणः संग्रहः क
र्मसंग्रहः कर्म एषु हि त्रिषु समवैतीति तेनायं त्रिविधः कर्मसंग्रहः १८

आनंदगिरिकृतटीका २ ॥

शास्त्रार्थोपसंहारानन्तर्यमथेत्युक्तमिदानीमिति प्रवर्तकापेक्षा
पेक्षावस्थोक्ता कर्मणां येषु विदुषो नाधिकारो ऽविदुषो वाधिकार
स्तेषामित्यर्थः ज्ञानशब्दस्य करणव्युत्पत्त्या ज्ञानमात्रार्थत्वमाह ज्ञा
नमिति ज्ञेयशब्दस्यापि तद्वदेव ज्ञातव्यमात्रार्थत्वमाह तथेति उ
पाधिलक्षणत्वेन तत्प्रधानत्वमुपादिशन् तत्स्वाव स्तवार्थमवि
द्याकल्पितविशेषणमेतदेव त्रयं सर्वकर्मप्रवर्तकमित्याह इत्ये
तदिति सर्वकर्मणां प्रवर्तकमित्यत्राद्ददेव चोदनेति क्रियायाः
प्रवर्तकं वचनमिति भाष्यानुसारेण चोदनाशब्दार्थमाह प्रवर्ति
केति सर्वकर्मणामित्युक्तेषां संबंधः त्रैविध्ये ज्ञानादीनां प्रागु
क्तं कर्मणो चोदनेति विग्रहः तेषां सर्वकर्मप्रवर्तकत्वमनुभवेन

+इत्येतदेवोपपादयितुं कर्मचोदनायाः कर्माश्रयस्य च कर्मफलादीनां च त्रिगुणात्मकत्वात्त्रिगुणस्यात्मनस्तत्संबंधो नास्तीत्यभिप्रायेण कर्मचोदनां कर्माश्रयं चाह॥

साधयति ज्ञानादीनामिति ज्ञानोपादानादीनामादिपदेनोपादानावि
वक्षिता करणमित्यादेस्तात्पर्यमाह ततइति ज्ञानादीनां प्रसिद्धक
त्वादित्यर्थः उक्तेर्थे श्लोकभागमवतारयति इमे तावदिति बाह्यम
न्तस्थं च द्विविधं करणमुक्तमनुवदयति करणमिति उक्तलक्ष
णं कर्मैव स्फुटयति कर्त्रेति स्वतंत्रोहि कर्ता स्वातंत्र्यं च कार
कप्रयोक्तृत्वं तत्प्रयोक्तृत्वमित्याह कर्त्रेति कथमुक्ते त्रिविधक
र्मसंग्रहस्तेनेत्याह कर्मेति कर्मणो हि प्रसिद्धकारकाश्रयत्वमिति।
भाव: १८ ॥ स्वामिकृत टीका ३ ॥

+ज्ञानमिष्टसाधनमेतत्प्रवृत्तिहेतु: ज्ञेयमिष्टसाधनं कर्म परिज्ञा
ता एवंभूतज्ञानाश्रय: एवं त्रिविधा कर्मचोदना चोद्यते प्रवर्त्य
तेऽनयेति चोदना ज्ञानादित्रितयं कर्मप्रवृत्तिहेतुरित्यर्थ: यद्वा
चोदनेति विधिरुच्यते तदुक्तं भट्टै: चोदना चोपदेशश्च विधिश्चै
कार्थवाचिन इति तेनायमर्थ: तदुक्तलक्षणं त्रिगुणात्मक
ज्ञानादिमयमवलंब्य कर्मविधि: प्रवर्तत इति तदुक्तं त्रैगुण्य
विषया वेदा इति तथा च करणं साधकतमं कर्म च कर्तुरीप्सि
ततमं कर्ता क्रियानिर्वर्तक: कर्मसंग्रहस्तेनास्मिन्निति संग्रह: क
रणादि त्रिविधं कारकं क्रियाश्रय इत्यर्थ: संप्रदानादिकारक
त्रयं तु परंपरया क्रियानिर्वर्तकमेव केवलं न तु साक्षात्क्रिया
याश्रयमत: करणादित्रितयमेव क्रियाश्रय इत्युक्तं [illegible]
[illegible] १८ ॥

पिशाचभाष्य टीका ४

ज्ञायतेऽनेनेति ज्ञानं प्रकाशनं ज्ञायतेऽनेनेति ज्ञेयं ज्ञानक्रियायाः क
र्मीभूतं परिज्ञाता ज्ञानक्रियाकर्ता अविद्याकल्पित एतत्त्रिविधं
कर्मण: क्रियायाश्चोदना प्रवर्तिका एतत्त्रितयं सर्वस्य हि ना
र्थस्येत्यतस्त्रयं कर्मचोदना ज्ञानेन ज्ञेयं परिज्ञानात्मिका क्रियते ने
नेति करणं श्रोत्रादि बुद्धीन्द्रियं वागादिकर्मेन्द्रियं च कर्म कर्तुः
क्रियायाप्तुमिष्टतमं कर्ता योऽहं करोमीति मन्यते एतत्त्रितयं क

+ सर्वमिदं कर्तृत्वाद्यनुसंधाने सत्वगुणवृद्ध्यैव भवतीति सत्वस्योपादेयादेयताज्ञापनाय
+ कर्मणि सत्वादिगुणकृतं वैषम्यं प्रपंचयिष्यन् कर्मचोदनाप्रकारं तावदाह ॥

र्मसंग्रहः कर्मक्रियालक्षणं संगृह्यते आत्मनिष्ठत्वस्याश्रयेणेति
तिसंग्रहः करणकर्मकर्तृभेदैः सर्वं कर्मसमवेतमतोयं त्रिविधः
कर्मसंग्रह इत्युच्यते १८ ॥

रामानुजभाष्यटीका ५ ॥

ज्ञानमिति ज्ञानं कर्तव्यकर्मविधिविषयं ज्ञानं ज्ञेयं कर्तव्यं कर्म परि
ज्ञाता कर्मणः तस्य बोद्धेति त्रिविधा कर्मचोदना बोध्यबोधकबोद्धृ
युक्तो ज्योतिष्टोमादिकर्मविधिरित्यर्थः तत्र बोध्यरूपं कर्म त्रिवि
धं संगृह्यते करणं कर्म कर्तेति करणं साधनभूतं द्रव्यादिकं कर्म
यागादिकं कर्म यागादिकर्तानुष्ठातेति १८ ॥

अभिनवगुप्तकृतटीका ६ ॥

कर्मणि चोदना प्रवृत्तौ ज्ञानज्ञेययोरेषां बोधमात्रमिष्टत्वाज्ज्ञाने
ज्ञेयत्वात् स्फुटीभावनानेषामेव संग्रहणं रूपेण फलाभिसंधा म्प८
नेनात्मीयत्वस्वीकरणं अहमनेनोद्देश्यतो मया कृतमिदं वह
येत्तस्मयेतथानिर्वर्तनावसरे करणकर्मकर्तृशब्दाभिधेयत्वमावि
ष्टत्वात् अतो योगिनामावेशो नास्तीति नात्रानिकरणादिगिरां प्रसं
गोनास्ति अपितु ज्ञानादिमात्र एव तात्पर्यम् १८ ॥

परमार्थप्रपाटी टीका ७ ॥

न देवोपपादयितुं कर्मचोदनायाः कर्माश्रयस्य च कर्मफलानां त्रि
गुणात्मकत्वात् निर्गुणस्यात्मनस्तत्संबंधो नास्तीत्यभिप्रेत्याह ज्ञान
मिति ज्ञानमिष्टसाधनमिति बोधः ज्ञेयमिष्टसाधनं कर्म परिज्ञा
ता एवंभूतज्ञानाश्रयः एवं त्रिविधा कर्मचोदना चोद्यतेऽनयेति न
येति चोदना ज्ञानादित्रयं कर्मप्रवृत्तिहेतुरित्यर्थः यद्वा चोदनोपदे
शः तदुक्तं चोदना चोपदेशश्च विधिश्चैकार्थवाचिन इति ततश्चा
यमर्थः उक्तलक्षणं त्रिगुणात्मकं ज्ञानादित्रयमेवास्य कर्मविधेः लं८
प्रवर्तनं इति ज्ञानेन करणं साधकतमं कर्म च कर्तुरभीप्सिततमं क
र्ता च क्रियानिर्वर्तकः कर्मसंगृह्यतेऽस्मिन्निति कर्मसंग्रहः १८ ॥

वनमाली टीका ८ ॥

श्री
गी. टी.
प्र.

88

नन्वपदिष्टो जीवो न कर्त्ता तर्हि तं प्रति प्रवृत्तस्य विधिनिषेधशास्त्र
स्य वैयर्थ्यं स्यात् तत्राह ज्ञानमिति ज्ञानं विधिविषयं ज्ञेयं परिज्ञाता ।
प्रयत्नलक्षणं चाधिष्ठानादिलक्षणं करणं चेष्टालक्षणं च परिज्ञाता
सर्वज्ञ ईश्वरः सर्वप्रेरक इति त्रिविधा कर्मचोदना कर्मविधिः निमि
त्ततो भेदोपचारात् त्रिविधेत्युक्तं एतत्त्रिविधनिमित्तमपेक्ष्य कर्म
विधिः प्रवर्त्तत इत्यर्थः एतदुक्तं भवति न स्वतन्त्रकर्तृत्वं विधिवि
षयत्वे प्रयोजकं येन जीवं प्रति कर्मविधिवैयर्थ्यं स्यात् तथा स
तीश्वरस्यापि विधिविषयत्वं स्यात् किन्तु यस्य स्वसंबंधितया विधि
ज्ञाने कर्म तत्फले चोदितरूपे ज्ञाते तदनुगुणश्च प्रयत्नाधिष्ठानादिसं
विधानं कर्मसेवयः फलभाक् चास्ति तं प्रति कर्मविषयः प्रवर्त्तते
शास्त्रे चेदं समस्तं परमेश्वराधीने जीवे इति कथं तं प्रति कर्मविधि
यः स्यादिति स्वतन्त्रोपीश्वरो जीवे विधिज्ञानमनपायेवेक्षाप्रयत्नौ
कारयित्वा लोकशरीरादि पंचकारणैः कर्म च कारयित्वा च फलं नि
यमेनैव ददातीति यद्यप्युपेक्ष्य यावता तत्सर्वमीश्वराधीनं जीवस्ति
स्ततोपि न विधिवैयर्थ्यं स्यादिदं प्रवृत्तविधिवैयर्थ्यं यदि जीवस्य कि
यासाक्षात्प्रलक्षणं कर्तृत्वं सर्वथा स्यात् नैवेश्वरायत्तस्यात्त्वा
[illegible]कारात् ईश्वराधीनापेक्षया तदभावोक्तेः नैवं जडलोष्टज
डेष्विव ज्ञानदाप्रक्रमेण नोदनादिना क्रिया प्रवर्त्तते न चागंतुक
कारणस्वेच्छया जीवस्तु नादिसिद्धया परमेश्वरप्रसादायत्तया स।
तानल्पया क्रियाशक्त्या कर्त्तेति तं प्रति कर्मविधि रीति विधिज्ञा
ने समर्पिते ज्ञानप्रयत्नादौ तेन तदनुभवसिद्धे ईश्वराधीनं तद्यथा
नियुक्तोस्मि तथा करोमीत्याद्यागमात्तु सिद्धे ग्रहणादेरीश्वरस्य स
र्वकर्मसु प्रेरकत्वमवधानत्वेरणस्य सर्वेक कर्मकारणानि संक्षिप्या
ह करणं कर्म कर्त्तेति त्रिविधः कर्मसंग्रहः कारणानां पंचानां संग्रहः
संक्षेपः कर्मशब्देन तत्कारणानि लक्ष्यन्ते करणमिति मध्यमपदलो
पो वा क्रियते अनेनेति करणं साधनं वा कर्मशब्दः यद्वा देवशब्दो।
दिनेश्वरमिव मन्यकर्त्तृत्वात् स्वतन्त्रस्वतन्त्रकर्त्रोरीशजीवयोः क

नेशाद्देनोक्तः कारणानां त्रैविध्यमित्यर्थः केचित्तु प्रिशनादि।
पंचकस्य क्रियाहेतुत्वमुक्तानेसेव ज्ञानज्ञेयादिरूपत्रयात्त्रैगुण्यभे
दं व्याख्यानरूपक्रमते ज्ञानमिति ज्ञानं विषयप्रकाशक्रियाहेतु
नस्य कर्मणः परिज्ञाता तस्याश्रयः कर्ता एतत्त्रयं सकर्मणां प्रवर्तकं न
देवाह त्रिविधा कर्मचोदना चोदनेति प्रवर्तकमुच्यते चोदनापरशास्त्र
नयाप्रतीयते तथापि वचनं विहाय प्रवर्तकमात्रमिह लक्ष्यते ज्ञा
नादिभ्रवचनत्वाभावात् तथा करणसाधकतमं वाह्यश्रोत्रादेस्तस्य तु
ह्यादि कर्म कर्तुरीप्सिततमं क्रियया आप्यमानं उत्पाद्यमानं विकार्यं
संस्कार्यं च कर्ता स्वतन्त्रः कारकाणां प्रयोजक इति सकलकारकाणां प्रयो
क्ता त्रिविध इति प्रकारः कर्मसंग्रहः संगृह्यते अस्मिन्निति कर्मसंग्रहः कर्माश्रयः
प्रेरणीयरूपेव त्रिविधा कर्मचोदना कर्मक्रिया प्रवृत्तिरूपव्यापाररूपार्थ
भावना तद्विषया चोदना प्रेरणाविधिरूपा शाब्दीभावनेत्यर्थः तथा क
रणसंक्षेतिकर्त्तव्यताकलापेनोपायेनेत्यर्थः कर्म भाव्यं स्वर्गादि फलं कर्ता फ
लकामवान् पुरुषः क्रियायां निर्वर्तकः एवं त्रिविधः कर्मसंग्रहः क
र्मणां व्यापाररूपस्यार्थभावनायाः संग्रहः संक्षेपः स्मात् ॥ १८ ॥

कृतमवेजयंतीटीका ९ ॥

शुद्धेषु सत्वगुणहेतुत्वा कर्तृत्वायनुसंधानेन भवन्मतः सत्वगुणस्यो
पादेयत्वेन कर्मणामन्वादिगुणक्रमेन वैषम्यं च प्रपंचयिष्यन् आदौ त्रि
विधायाः कर्मचोदनायाः प्रकारत्रयमाह ज्ञानमिति ज्ञानं इष्टकर्म
साधनेनोपः नैयकर्तव्यमिष्टसाधनं कर्म परिज्ञाता कर्ता तस्य सकर्म
णो वोद्धा इत्येवं त्रिविधा वोध्यवोद्धव्यवोद्धृ इति त्रिकं मुख्या कर्मचोदना
वोध्यते प्रवर्त्यते नः न त्वेवं चोदना चोपदेशश्च विधिश्च कार्यता चिन्ता।
२४ इतिभेदोक्तेः न त्रिकमेव सम्यक् निकरण मित्यनि ज्ञायते नेनेति करणं
केचिद्धानेन देवकर्म साधकतमं करणकारकमित्यर्थः यजते यका।
नेनं ज्योतिष्टोमादि तेन देवकर्म ईप्सिततमं कर्म कारकमित्यर्थः
नेयकर्तृत्वं ज्योतिष्टोमादिनेदेव [illegible]
यस्तं तस्य कर्मणः परितोनष्टानेन ज्ञातावोद्धा स तत्त्वज्ञानाश्रयः लौकि २४
योज्यमस्य क्रियानिर्वर्तकः कर्तेति कर्ता कारकमित्येवं त्रिविधः कार

श्री·
गी·टी·
अ·

89

णकर्मकर्तेति त्रयस्याश्रयः कर्मसंग्रहः कर्म संगृह्यतेऽस्मिन्निति क
र्मसंग्रहः कर्मविधिर्भवतीति चोदनासंग्रहयो रैक्यार्थौ संप्रदानापा
दानाधिकरणकारकत्रयाणां परंपरया क्रियानिर्वर्तकत्वेन तत्साक्षा
त्करणादित्रयांतर्भावादेवमाशयः ॥ १८ ॥

मधुसूदनी टीका ॥ १८ ॥

ज्ञानं विषयप्रकाशक्रियात्मेयेनस्य कर्म परिज्ञाता तस्याश्रयो भो
क्तांतःकरणोपाधिपरिकल्पितः एतेषां त्रयाणां सन्निपाते हि
हानोपादानादिसर्वकर्मारंभः स्यादत एतत्त्रयं सर्वेषां कर्मणां प्र
वर्तकं तदेतदाह त्रिविधा कर्मचोदनेति प्रवर्तकवचनं चोद
नेति क्रियाप्रवर्तकं वचनमाहुरिति भाष्ये चोदना चोपदेश
श्च विधिश्चैकार्थवाचिन इति भाट्टैर्वचने क्रियाप्रवर्तकव
चनत्वं यद्यपि चोदनापदशक्यतावच्छेदकं तथापि वचनत्व
विहाय प्रवर्तकमात्रमिह लक्ष्यते ज्ञानादिषु वचनत्वाभावात्
एवं च प्रेरणीयत्वं प्रेरकत्वं चात्मन एव नात्मन इत्यभिप्रायः त
थाकरणं साधकतमं बाह्यं श्रोत्रादि अंतःस्थं बुद्ध्यादि कर्म कर्तुरी
प्सिततमं क्रियया व्याप्यमानमुत्पाद्यमाप्यं विकार्यं संस्कार्यं च
कर्ता चेतनः कारकाणां प्रयोजकः इति सकलकारकाणां प्रयोक्ता
क्रियाया निर्वर्तकश्चिदचिद्ग्रंथिरूप इति त्रिविधस्त्रिप्रकारः क
र्मसंगृह्यतेऽस्मिन्निति संग्रहः कर्माश्रयः चकारार्थादितिश
ब्दात्संप्रदानमपादानमधिकरणं च राशित्रयांतर्भूतमेवंकार
कषट्कमेव त्रिविधं क्रियायाश्रयो न तु कूटस्थ आत्मेत्यर्थः
कर्मप्रेरकस्य कर्माश्रयस्य च कारकरूपत्वात्त्रैगुण्यात्मकत्वाद्वा
क्° कारस्वभावो गुणातीतस्त्वात्मा सर्वकर्मासंस्पर्शीत्यभिप्रायः अ
थवा ज्ञानेन प्रेरणारूपालिङादिशब्दजन्यं ज्ञेयं तस्य ज्ञानस्य विष
यत्वेन लिङादिशब्दस्वरूपे प्रेरकं परिज्ञाता तस्य ज्ञानस्याश्रयः
प्रेरणीयः इत्येवं त्रिविधा कर्मचोदना कर्मक्रियापुरुषव्यापा
ररूपार्थीभावना तद्विषया चोदना प्रेरणा विधिरूपा शाब्दी भा
वनेत्यर्थः तथाकरणं सेतिकर्तव्यताकं साधनं तथार्थः कर्म

भाव्येस्वर्गादिफलेकर्त्ताफलकामनावान्पुरुषःक्रियायांनि
वर्त्तकश्चेतिविविधःकर्मसंग्रहःकर्मणःपुंव्यापाररूपस्यार्थभाव
नायाःसंग्रहःसंक्षेपःतदेवमर्थभावनारूपंप्रयत्नस्यविधेयस्या
भावात्शब्दभावनारूपोविधिर्नेतुमात्मानंगोचरयतिकारकाश्र
यत्नाहिविधिविधेययोः तदुक्तं वैशिष्ट्यविषयावेदनिसैवशेषोभवा
र्थेनेतिकारकाणांवैशिष्ट्यरूपत्वमनन्तरमेवव्याख्यास्यतइत्यभि
प्रायः तत्रप्रसंगाद्विधिर्निरूप्यते प्रवृत्तिहेतुत्वेनप्रेरणानावत्वस
र्वलोकानुभवसिद्धाराज्ञाप्रेरितोबालेनप्रेरितोवाक्येनप्रेरितो
ऽहमितिहिप्रवर्त्तमानानांव्यवहारोभवतितत्रचप्रवर्त्तनाप्रवर्त्तकव्या
पारादिनिष्ठाततोत्कृष्टस्यनिकृष्टंप्रतिप्रवर्त्तनाज्ञाप्रेषणमिति
चोच्यतेनिकृष्टस्योत्कृष्टंप्रतिप्रवर्त्तनायाञ्चाध्येषणमितिचोच्यते
समस्यसमंप्रत्युत्कर्षनिकर्षविरहिणीप्रवर्त्तनानुज्ञानुमतिरिति
चोच्यतेतेनचाज्ञादयोज्ञानविशेषाइच्छाविशेषावाचेतनधर्मास्सर्
वलोकेप्रसिद्धाःवेदेनविधिनाहंप्रेरितःकरोमीतिव्यवहा
रोभवतितत्रस्वयमचेतनत्वादपौरुषेयत्वाच्चवैदिकस्यविधेर्न।
चेतनधर्मेणाज्ञादिनाप्रेरकत्वंसंभवत्यतःस्वधर्मेणैवस्य।
प्रयोक्तृव्यापारस्येतरासंभवात् सएवधर्मश्चोदनाप्रवर्त्तनाप्रेर
णाविधिरुपदेशःशब्दभावनेतिचोच्यते तत्रकेचिल्लौकिकमे
वशब्दव्यापारंकल्पयंति प्रमेतन्तर्हिसेनैवोपपन्नोलौकिकक
ल्पनासहत्वेन प्रवर्त्तनाहिप्रवृत्तिहेतुर्व्यापारः विधिशब्दस्यचा
ख्यातत्वेनदशलकारसाधारणेनोपाधिनापुरुषप्रवृत्तिहेतुरूपा
र्थभावनांप्रतिवाचकत्वेनज्ञानहेतुत्वमितियावत् साचज्ञाने
नानुष्ठानेशक्यतइतितद्धेतोरपिशब्दस्यतद्धेतुत्वंपरंपरया
भवत्येव तत्रविधिशब्दस्यपुरुषप्रवृत्तिरूपभावनाज्ञानहेतु
व्यापारस्तुतावकशक्तिमत्तयाविधिशब्दज्ञानं सएवचतस्यप्र
वृत्तिहेतुर्व्यापारःइतिप्रवर्त्तनाभिधानीयकंलभते ज्ञानद्वारेणै
वशब्दस्यप्रवृत्तिजनकत्वात् ज्ञानजनकव्यापारातिरिक्तव्या।
पारकल्पनेमानाभावात् ज्ञानजनकव्यापारस्तस्यसत्त्वज्ञानेश

श्री
गी·टी
ष्ठ·

90

क्तिज्ञाने शक्तिविशिष्टस्वज्ञानेन तज्ञापयोरनन्तरं शाब्दभा
वनायां स्तीयस्य तत्तत्करणत्वमिति विवेकः पदेष्विति
ष्कर्षः विधिना स्वज्ञानेन जनमनेप्रवर्तनात्मनाभिधीयतेपीति
विधिज्ञानमेव शाब्दभावना तस्यां च पुरुषप्रवृत्तिरूपार्थभावने
व भाव्यतयान्वेति करणतया च पुरुषप्रवृत्तिवाचकशक्तिम
द्विधिज्ञानमेव भावनासाध्यस्यापि फलावच्छिन्नाभावनान्वेति
करणत्वे फलकारणत्वादेव यागस्य स्वर्गभावनायामन्वितत्वविरुध्य
ते तथा च पुरुषः स्वप्रवृत्तिं भावयेत् नेतिकरणांशः करणकथ के०
मित्याकांक्षायामर्थवादैः स्तुत्येनेतिकर्तव्यतांशः करणो ३
पगोः क्रत्वेति लौकिके विधौ वक्तृज्ञानजीवहन्नाश्यपरा
समोसमीनेत्यादिलौकिकार्थवादवत् तत्त्वाख्यानत्वेनवि
धिशाब्दाद्युपस्थितात्पुरुषप्रवृत्तिभाविनयान्वेतकरणत्वकथ
मन्वपस्थितमन्वेति उच्यते विधिशब्दस्तावच्छक्तेनोपस्था
पितत्वस्य पुरुषप्रवृत्तिवाचकशक्तिरपि स्मरणेनोपस्थापि।
तात्तदुभयवैशिष्ट्यं तद्विशिष्टज्ञानं तत्तावमतमेतिवाचकशक्ति
मन्वयाज्ञाता विधिशब्दोपस्थितमेव श्रुतेन यच्छक्त्यान्तरज्ञाव
येदिति प्रतिशब्दस्याध्याय विधिनामर्थोच्छ्रुतितिरिक्तेनोप।
स्थितमपि शब्दादेवाप्येभासत एव यथा ज्योतिष्टोमादिनामधे
येयथावालिंगाविति योज्योमन्त्रः तद्वत् मावार्थकृष्टिद्रव्यक
रणाश्च नपस्थितविशेषणविशिष्टबुद्धिर्भवति तद्वन्नमि
हित विशेषणेनि एवमर्थवादानामुपस्थितिः श्रोत्रेण शा
शास्त्रस्यन्तैरेवलक्षणयातदुभयनिष्ठज्ञानं तत्तायस्तुमन
मे स्पर्थः वादैः प्रशस्तत्वेनज्ञात्वेतीतिकर्तव्यतांशः त्वयोपि
पन्नएव तन्न किंप्राशस्त्यं तत्ताव फलसाधनत्वे ततस्य यागेन
भावयेत् स्वर्गमित्यर्थभावनान्वयवशेन विधिवाक्यादेव ल
भ्यत्वात् नामतः प्रवृत्तावनुपयोगात् उच्यते बलवदनि।
ष्टानन्वधिप्राशस्त्यं तद्धे नेष्टहेतुत्वज्ञाना लभ्यते ३ष्टहे
तावपि कलञ्जभक्षणादावनिष्टहेतुत्वस्यापि दर्शनात् वि

हितरूपेण फलस्यावगतत्वप्रयुक्तानिष्ठानवैधित्वेऽदृष्टं श्रुतो यावत्ता
यत्नस्य फलस्यानिष्टहेतुत्वं नोच्यते तावदिष्टहेतुत्वेन ज्ञातेपि तत्र
पुरुषो न प्रवर्तते श्रुतप्रशंसोक्तफलतोपि च यतः कर्म नानर्थेनानुबद्ध
ते केवलश्रीतिहेतुज्ञानं कर्मेत्यनिरूप्यत इति ततः स्वतः फलतो
वानर्थानवैधित्वरूपप्राशस्त्यबोधनेनार्थवादा विधिशक्तिस्तम्भ
ति कउत्तम्भः स्वतः फलतो वानर्थानवैधित्वेशंकायाः प्रवृत्तिप्रति
वैधिकाया विरामः इदमेव च विधेः प्रवृत्तिजनने साहाय्यमर्थ
वादैः क्रियत इति विधिरर्थवादसाकांक्षः एवमर्थवादाश्च प्रयाणमिय
या गौण्या वाहत्याभूतमर्थं वदन्तोपि स्वाध्यायविध्यापादितप्रयोज
नवत्त्वलाभाय विधिसाकांक्षाः सोयं नष्टाश्वदग्धरथवत्संप्रयोगः
यथैकस्य दग्धरथस्य जीवद्भिरश्वैरश्वस्य विद्यमानरथस्याविद्य
मानाश्वस्य संप्रयोगः परस्परस्यार्थवत्त्वाय तथार्थवादानां प्रयोज
नांशो विधिना पूर्यते विधेश्च शाब्दभावनाया इतिकर्तव्यतांशोऽर्थ
वादैरिति तदिदमुभयोः स्ववाक्यस्थानमेव वाक्यैकस्य स्वत्वात्त
स्यस्य कल्पनया पूरणीयस्य प्राप्तस्य नापेक्षितलाभालाभेन इति
विध्यर्थवादयोः अन्योन्याकल्पने प्रतितिष्ठति इत्यावयोरैकवाक्यत्वेनाराधी
रुपयन्ती स्वार्थवादे विशेषः तथा च सूत्रं विधिना त्वेकवाक्यत्वा
त्स्तुत्यर्थेन विधीनां स्युरिति विधिना स्वनिराकांक्षेण प्रयोजन
साकांक्षाणामर्थवादानामेकवाक्यत्वान्ना हि विधीनां विधेयानां स्तुत्यर्थे
न स्तुतिप्रयोजनेन स्तुतिरूपेण लाक्षणिकेनार्थेन वार्थवत्त्वमा
वादर्थवादानां नन्वयमेवं लौकिकाः शब्दास्त एव वैदिकास्त एव
चामीषामर्था इति न्यायाद्विधिवादस्य लोके प्रवृत्तिरहितानां वैदि
कस्य तदर्थकेनैवानेन भवितव्यं लोके च प्रेरणादिरूपधर्मवाचि
त्वं क्रमशमिति वेदे शाब्दभावनावाचित्वं कथमुपपद्यते उच्यते लो
कवेदयोरैकरूप्यमेव तथा हि लोके प्रेरणादिकं तेनैव तेन रूपे
ण विधिपदवाच्यं श्रुतेनुगमेन नानार्थत्वप्रसंगात्तदेव भावना
वाचित्वोपपत्तेश्च किं तत्प्रेरणायां प्रेरणा नाम स्वात्मप्रवर्तनानुकूल
कत्वं शाब्दव्यापारेपि तल्लमिति तत् देवालिङादिपदवाच्यं न च लो

श्री·
गी·टी·
स्त्र·

91

किं कथं चेन्नास्त्येव तत्र राजादीनामेव प्रवर्तकत्वात् प्रवर्तकव्यापार एव
हि प्रवर्तना प्रवर्तकत्वं च राजादेरिव वेदस्याप्यनुभवसिद्धं न च वेदेऽपि
प्रवर्तनावानीश्वरः कल्प्यतां लोके राजादिवत् तदुक्तं विधिरेव तावद्
गर्भश्रवश्रुतिकुमार्याः प्रयोगमात्रमिति न वेदस्यापौरुषेयत्वात्
न हि वेदस्य कर्ता पुरुषो लोके वेदे वा प्रसिद्धः न च कल्प्येत न तज्ज्ञानप्र
माणाभावेन तया वेदवचनत्वेऽसमानेऽपि भेदवाक्येन प्रमाणं वेदवाक्येन
प्रमाणमिति सत्त्वभगाभिवक्तकस्यापत्त्या संगः महाजनानां स्वभयसि
द्धत्वाभावेन तत्संपरिग्रहापरिग्रहाभ्यामपि विशेषानुपपत्तेः ईश्वर
प्रेरणया लोकवेदसाधारणत्वेन लोकेऽपि राजादीनां प्रेरकत्वेन स्या
त् ईश्वरप्रेरणयास्थितायामेव राजादिरप्यसाधारणतया प्रेरकत्व
ति चेत् हन्त साधिष्ठानत्वं वा किं त्विहाप्यसाधारणाः प्रेरको वेद एव
राजादिस्थानीयः स्यात् गतेमार्गे ईश्वरप्रेरणायाः साधारणायाश्च।
साधारणप्रेरणासहकारित्वेनैव प्रवर्तकत्वात् किं च ईश्वरप्रेरणा।
यां सर्वोऽपि विहितं कुर्यादेव न तु कश्चिदपि लंघयेत् निषिद्धेऽपि चे
श्वरप्रेरणास्त्येव अस्मद्यानकोऽपि तत्र प्रवर्तेतेति तदपि विहितं स्यात्
तथा चोक्तं अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः ईश्वरप्रेरि
तो गच्छेत् स्वर्गं वा श्वभ्रमेव वा तस्मात् राजादिरिव वेदोऽपि स्वप्रवर्तनाज्ञा द्रा
पयतृत्वोपहारसाविन्यप्रवर्तयतीति सिद्धं लोकवेदयोरेकरूप्य
र्थं मीमांसकानां स्वतन्त्रो वेदः अत्र लमीमांसकानां तत्त्वं विवर्तनस्तत्सर्व
न्तं वेदः इति यद्यपि विशेषस्तथापि नियमितत्वेन वेदस्यापौरु
षेयत्वस्य भयेषामपि समाने अत एव प्रयत्नानुकूलव्यापारत्वं प्रवर्त
नात्वं सर्वत्र शेषः तत्र वाप्यनितास्मिन् विधिपदशक्योऽपि तदाश्रयवि
शेषोऽपस्थितिर्गौर्वादितिस्त्येव प्रयत्नानुकूलव्यापारत्ववाशक्यप्रवृत्तिसंश
क्त्वाद्व्यानत्वेन शक्तेन लभ्यत एव दृष्टीप्यत्र सर्ववाधि निमित्तपर्व
प्रकृत्यर्थदेशेशवत् फलसाधनतावोधप्रवृत्तेरणानामेव उक्तेव
न्न प्रेरको विधिरतः फलसाधनत्वे च प्रेरणात्वेन विधिपदशक्योऽति
मेदनाचार्याः फलसाधनतावाच्यभावनात्वपलमेवत्वं तत्प्राक
रममेव चपदं तत्पार्थसाराधिप्रभृतयः पण्डिताः प्रतिपन्नाः अपि तु

घटानामपि केषाञ्चिदिष्टसाधनतावादिनैनैव मतेनोपपादनीयः
इष्टसाधनत्वस्वरूपेणौ वलिङादिपदशक्तेन प्रेरणात्वेनेति तार्कि
काः तत्र गौरवादनलम्भवादनन्यथाः योग्यतावदशा विषयसा
धनत्वापेक्षया प्रवर्तनात्वमतिलघुं इच्छातद्विषययोरप्रवेशात् इ
च्छातात्स्यापि प्रवृत्तिज्ञानवत् प्रवृत्तिहेतुत्वापातात् वस्तुगत्याय
इच्छाविषयत्वस्य साधनमितिशब्देनप्रतिपादयितुमशक्यत्वात् सा
धनत्वमात्रस्यैव शक्यत्वेन तेनैव यत्नेनोपस्थापितया स्वरूपमात्रसह
क्षमात्तदन्वयसम्भवे पदान्तरोपस्थापितस्वर्गस्य वाक्येनतदन्व
याःसंभवात् प्रवर्तनात्वपर्यवसानं तत्कृत्वा वाक्यस्य बाधात्तु प
सयस्कृते पदश्रुतिनोपि वलीयस्त्वेन पशुना यजेतेत्यत्र कामपदप
श्रेविहायप्रसायार्थेन कारणेन सहैवैकत्वस्यान्वयादेकं कारणं पश्चरि
तिवचनत्वमात्रकत्वेगत्वमेकत्वस्य स्थितं किमवरुद्धपदान्तरसम
भिव्याहाररूपाद्वाक्यादलीयस्त्वमिति वाक्याद्यान्वयलम्भनाद्बनेष्ट
साधनत्वपदार्थः तथाहि प्रवर्तनाकर्मभूतात्कृष्णप्रवृत्तिरूपार्थभा
वना किं केन कथमिति शब्दत्रयवतीविधिनालभ्यत्वेनप्रतिपाद्यतेऽस्ति
तेषांप्राक् प्रकृतत्वाद्धार्थकर्मकार्याञ्चतस्याप्रवर्तनात्वपदार्थेकपदो
पस्थापितमप्यकृष्णार्थयान्वयविहायभिन्नपदोपात्तमस्य विशेषण
मपिकर्मपदसम्बन्धेन साध्यतान्वययोग्यस्वर्गमेवकृष्णार्थसंभाव्य
तयान्वेवनियमात् स्वर्गकामयजेत स्वर्गकामश्चेति कर्मणि द्वितीया
याश्रुतमेनत्वात् यजेतेत्यकर्मकत्वेन स्वर्गमिस्रकेतनयाथ श्रुतपदव
त्रकर्मपदं नश्रूयतेतत्रापितत्कल्प्यते यथा ज्योतिष्टोमेति ह्ववाय।
पत्नारांचीरूपयंतोस्मातेप्रतिष्ठाकामा रात्रिसत्रमुपेयुरित्यादिप
वेचलत्वभावाद्यान्तस्यासमानपदोपस्थापितोयान्वयप्रवकरणं।
तथान्वेति भावार्थस्य कर्मविधेयेगावरुद्धत्वात् सद्विभक्तिपो
गो यान्वयनामधेये ज्योतिष्टोमादीनत्नीयाश्रवणात् यन्त्रापिनाम
धेयेद्वितीयाश्रूयते तत्रापिव्यपानुशासनेन तत्तीयाकल्पनात् त
उक्तं महाभाष्यकारैः अग्निहोत्रं जुहोतीति तृतीयार्थे द्वितीयेति प्र
तपत्तेः प्रकृतिप्रत्यययोः प्रकृतिप्रत्ययार्थसम्बन्धतलयोः प्रत्ययार्थः
साध्यात्मेन प्रकृत्यर्थगुणत्वेनेति प्रत्ययार्थभावनाप्रतिपादनस्य।

प्री-
गी-टी
प्र-
92

गुणत्वेन करणत्वमुक्तं स्याख्यातेन क्रियाप्रधानमिति वदद्भिर्निरुक्त
कारैर्यथेन देवोक्तं भावार्थाधिकरणे च तथैव स्थितेनैतेन सर्वत्र स्त
याथ्यतिपान्वयस्य करणत्वेनैवान्वयनियमः अतएव गुणवि
धिष्वप्यन्वर्थविधेयानर्थानुवादेन केवलगुणविधौ च मत्वर्थ
लक्षणाविधेर्विप्रकृष्टविषयत्वं च यथा सोमेन यजेतेति विशि
ष्टविधौ सोमवता यागेनेति द्भाज्जहातीति गुणविधौ तु सोमता
होमेनेति नामधेयान्वयेन सामानाधिकरण्योपपत्तेर्मत्वर्थमा
त्रविधानाच्च न मत्वर्थलक्षणा न वा विधिविप्रकर्षः तदेवं ज्योतिष्टो
मेन यजेत स्वर्गकाम इत्यत्राख्यातार्थो भावयेदिति किमित्याकां
क्षायां कर्मविषये स्वर्गमिति विशिष्टेर्बलीयस्त्वादाकांक्षायाउ
त्कटत्वाच्च तथा च स्थिते षष्ठ्याद्याये नतः केनेत्यपेक्षिते यागेनेति
तृतीयान्तपदसमानाधिकरणत्वात् करणत्वेनैवान्वयनियमाच्च
किन्नामकेनेत्यपेक्षिते ज्योतिष्टोमेनेति तत्राप्यन्वयः साक्षाद्रूपास्थि
तोपि ज्योतिष्टोमशब्दो भासतत्पदशाद्वाच्ये भावे नोपस्थापित।
सामर्थ्यवशात् नामधेयान्वयेन विभक्त्यर्थोपहारं न त्वाधर्यान्व
यत्वेनेन मत्वर्थलक्षणामेतरेणैव ज्योतिष्टोमशब्दवेत्तेनन्वयला
भः तथा च कविप्रयोगः हिमालयो नाम नगाधिराज इति हिमाल
य नाम वा निरर्थः एवं इत्यभिन्नकमलोदरे मधूनि मधुकरः पि
वतीत्यादावरहीनसंगतिकेकपदत्वनिवाके मधुकरादिपदे स्वरूपे
णैवभासते नामधेयवत् नार्थमपस्थापयति प्रागरहीनसंगति
कत्वात् अतएव मधुकरशब्दवाच्यस्य पिलक्षणया नान्वयः शक
तानर्थकत्वाल्लक्ष्यतानस्य स्वरूपतस्तु शब्दभानेन वाच्यवाचकसंबं
धः पश्चात्कल्पनेनैसर्गिकं विहायेति तदयं वाक्यार्थः ज्योतिष्टो
मनाम्ना यागेन स्वर्गमिष्टं भावयेदिति कथमित्यपेक्षितेत्र कृति।
लिंगवाक्यप्रकरणस्थानसमाख्याभिः सामवायकारादुपकारा।
कांगग्राममहर्षेति विकृतौ प्रकृतिवदित्यपवंधेन निमेययाश
कीन्यपवंधेन समाख्यातानभिप्रतितिनिधायापीति यावत्सायलंभमतस्
र्गं एवं च यागस्य स्वर्गावच्छिन्नभावनाकरणत्वेन स्वर्गकरणत्व
करणत्वेन च सामानाधिकरण्यापारविषयत्वं रूपं कृतिसाध्यत्वं च।

तदर्थाभावेऽलभ्यत इति तदुभयमपि न लिङादिपदवाच्यं अथान्येषा
मसमर्थं वदितिन्यायात् अनन्वयाच्चेष्टसाधनमिति समासेऽगुणम्
न मिष्टपदस्वर्गकामइति समासोऽतरगुणभूतेन स्वर्गपदेन कथमन
न्वियात् इष्टस्वर्गसाधनमिति नहि राजपुरुषो वीरः अत्र इत्यत्र वीरप
दराजपदयोरन्वयोऽस्ति पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेनेति
न्यायात् कस्यापि विभक्त्यन्तं ज्योतिष्टोमादिना मधेपानन्वयप्रसंगादि
दोषाश्च अस्मिन् पक्षे दुष्टत्वात् एतेनेष्टसाधनत्वमनिष्टसाधनत्वे कृ
न८ तिसाधनमिति त्रयमपि विध्यर्थ इत्यपास्तं प्रतियोगित्वादर्थवादानां
सर्वथा वैयर्थ्यापत्तेश्च अत एव कृतिसाध्यत्वमात्रं विध्यर्थ इत्यपि न।
भावनाकरणत्वेनार्थस्य लभ्यत्वादिति केचित् अलौकिको नियोगस्तु लौ
किकत्वादिष्वन विध्यर्थः पराक्रान्ते चात्र सूरिभिः तस्मादनन्यलभ्यात्ल
ब्धत्वाच्च प्रेरणैव लिङादिपदवाच्येति स्थिते प्रवर्तकं तज्ज्ञानं वाक्या
र्थमर्यादालभ्यमस्मदेव सर्वेषामपि वादिनां आख्यातार्थ एव च वि
शेष्यतया भासते तेन यागेनार्थो न नामार्थः स्वर्गकामो वेति चोक्तप्रा
यमेव तेन च यागान्तु कूलकृतिमान् स्वर्गकाम इति नार्थः किं कमनेन
पुरुषविशेष्यकवाक्यार्थज्ञानमपास्तं संक्षेपेण मतं भाट्टमिदम
त्रोपपादितं यदत्रक्षयामिहामतदत्तं संधेयमाकरात् इदानीं
[illegible]
[illegible]
२८ ॥

सदानन्दी टीका ॥

क्रियाहेतनयाशोकमधिष्ठानादिपंचकं कर्मासंस्पर्शिनात्महृदा
त्मनस्तद्विदस्तथा १ सोऽधुनेदानीं तमेवार्थं ज्ञानं ज्ञेयादिभेदतः त्रैगु
णभेदाख्यात्यातु समुपक्रमते हरिः २ वस्तुभानक्रियाज्ञानं ज्ञेयं
तस्यास्ति कर्म च तस्याश्रयापरिज्ञाता भोक्ता द्रष्टा श्रुपादिकः ३ त्र
याणां सन्निपातेन प्रारंभः सर्वकर्मणां अत एतत्त्रयं प्राह सर्वकर्म
प्रवर्तकं ४ चोदनेति क्रियायाश्च प्राक्तत्र प्रवर्तकं चोदना चोपदे
शश्च विधिश्चैकार्थवाचिनः ५ इत्येवं शावरभाष्ये चोदनानिर्णयः ७०
कृतः एवं च प्रेरणीयत्वेप्रेरकत्वमनात्मनः ६ नात्मनस्त्रैगमिष्यः।

यस्त्रिविधेनकिंतोहेरैः वाह्यश्रोत्रादिकरणं तत्साधकतमंस्मृते ७
श्रोतस्य तत्सूक्ष्मबुद्ध्यादिकरणं द्विविधंस्मृते क्रियया व्याप्यमानंयत्कर्त्तु
रंमितमीप्सितं ८ तत्कर्मणोच्यतेतच्चोत्पाद्याप्यादिचतुर्विधं स्वतंत्रः
कारकैरंगैः प्रयोज्यःस्वयंहि यः ९ समस्तकारकाणांचकर्त्ता सा
साप्रयोजकः निर्वर्तकः क्रियायाश्चविद्विद्भिस्त्रिरूपदृक् १० कर्म
संगृह्यतेचास्मिन्नमवैतीतिसंग्रहः कर्माश्रयोस्तित्रिविधश्चार्था
दितिप्रयोगतः ११ संप्रदानमपादानमाधारश्चत्रयंत्रिषु त्रैतन्मत
मैनेनोक्तंकारकषट्कगाक्रिया १२ तत्त्वात्मनिक्रियातीतेसकृदध्या
यतस्त्विति कर्माश्रयस्यकर्मात्प्रेरकस्यचसर्वतः १३ कारकात्म
तयात्मैक्यत्रैगुण्यात्मतयातथा प्रकाश्यत्वभावोयंगुणातीतोनकि।
योचलः १४ सर्वकर्माश्रयस्याश्रीमद्भिप्रायोहरेर्विभोः १५ ॥ १८ ॥

नीलकंठी टीका १८ ॥

समासः सात्विकत्यागोपपादनोपयोगीआत्मनोऽकर्तृत्वोपपाद
नप्रकारः प्रश्नाद्दमोक्षः यद्यप्युक्तंपंचैतेनतस्यहेतवइतियच्चोक्तंनहे
तीतितन्मृष्यामहे नह्यपरिणामीचेतनःपरिस्पंदात्मकस्यका।
यिकादिभेदेनत्रिविधस्यकर्मणःकर्ताभवतीतिवक्तुंशक्यते यत
ननिवध्यतइतिभोक्तृत्वमकर्मपिप्रत्याख्यातेनतन्मृष्यामहे नहि
कुलालादयःस्वप्रयुक्तापवचदादीन्निर्वर्तयंतिकिंतुभोक्तृपुरुष
प्रयुक्ताः अन्यथाभोक्तृणामभावेव्यर्थैवतत्सृष्टिःस्यादितिप
वेप्रधानमात्राभिहताः कर्मोदयः पुरुषस्यभोगापवर्गसाधनप्रयुक्ताः
सर्वाणिकर्माणिनिर्वर्तयंति तस्मात्पुरुषस्यभोक्तृस्वभावत्वाद
कर्तृत्वात्संधानःसर्वकर्मपिकृतेनकर्मभोक्तुःस्वरूपमेवभोक्तृत्वा
मितिसात्विकत्यागोपिकर्मणेपवचनमसंगतमिति प्रश्नइतिवि
धत्ते ज्ञानंज्ञेयमिति ज्ञानंज्ञायतेप्रकाश्यतेवस्तुतत्त्वमनेनेतिप्रम
णादिप्रमाणजन्योवृत्त्यादिप्रकाशः सचवर्तमानोतीतोवा ज्ञेयंवे
द्यंविषयोघटादिः परिज्ञाताविषयीसाभासधीरूपोयोभोक्तेत्युच्य
ते एवंरूपप्रकारत्रयवतीत्रिविधाकर्मणांचोदना प्रेरकसमग्रीत्वेनस
त्कर्माणिप्रवर्तककर्मसमर्थः समापितेयेज्ञातारिवाज्ञानेप्रवृत्तत्वप

ते: ज्ञाने ज्ञातरि च सति देशकालव्यवहिते ज्ञेये प्रवृत्त्यनुपपत्तेः
सत्यपि संस्कारात्मके ज्ञाने ज्ञेये च सन्निहिते तथापि स्वभ्रमोऽश्मा
त्रभावात्प्रवृत्त्यदर्शनादेतत्त्रयं त्रिविधं इष्टभवदभ्यासायेदं सत्।
हानोपादानोपायसत्ये पेक्षाबुद्धिरूपं कार्यं जनयित्वा हानाद्यनुकू
ले व्यापारे प्रवर्तयतीति कर्मपदाभिधेयमित्यर्थः चोदनेति कर्तरि
ल्युडादिसमर्थनात्तेन चोदनाशब्दः कर्तृवाची लिङ्गत्वविव
क्षिते लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्येति वा तथा करणमिन्द्रि
यं कर्मेत्यनेन क्रियमाणविषयग्रहणं कर्ता शरीरीक एव परिज्ञा।
ता एतत्त्रयं समुदितं सत् कर्मसंग्रहः कर्मणः ईप्सिततमस्य भोग्य
स्य संग्रहः संगृह्यतेऽस्मिन्निति संग्रहः संस्थानं भोक्त्रित्यर्थः सत्यपि भो।
क्तरि करणे च क्रियां विना भोगासंभवात् क्रियायाश्चाश्रयं विना
स्वरूपालाभादाश्रयस्य करणं विना भोक्तृत्वायोगात्कर्तृत्वानुपपत्ते
श्चैतत्त्रयं मिलितं सत् भोक्तृत्वप्रयोजकमित्यर्थः तथा च श्रुतिः आत्मे
न्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिण इति इन्द्रियं प्रसिद्धं मनश्चानेन
बुद्धिरपि गृह्यते युक्तं इन्द्रियद्वारा मनो भोग्येन सह संबंधक्रिया इन्द्रि
यं च मनश्च युक्तं चेति विग्रहे इन्द्रियमनोयुक्तमिति द्वंद्वैकवद्भावः
एतत्त्रयं भोक्तात्मेत्याहुर्मनीषिण इत्यर्थः एवं हि श्रुतिस्व
भोक्तव्यानेतयोर्मेलनमन्तर्भावो युज्यते नान्यथा तथा च कर्तृत्वत्
भोक्तृत्वापि ज्ञानात्मगणापतितत्वाद्देहत्वं भोगकर्तृत्वमिति निर्वच
नाद्यः कर्ता स एव भोक्तेति प्रतिपादनादहमकर्ता भोक्तेति चात्मसं
धानपूर्वकं कर्माणि कुर्वतः कर्तृत्वभोक्तृत्वकृतः कर्मलेपो नास्ती।
ति सिद्धं भाष्यस्य चायमेवार्थः येन करणं क्रियायाः साधकतमं दश
विधं वाह्यमनोबुद्धिरूपमान्तरं कर्म कर्तुरीप्सिततमं क्रियया व्याप्य
मानं तूत्पाद्यमाप्यं विकार्यं संस्कार्यं चेति चतुर्विधं कर्ता कारकान्तर
प्रयोजकश्चिदचिद्ग्रन्थिः एतत्त्रयं कर्मसंग्रहः कर्माश्रयः कर्तेत्यर्थः
तथा ज्ञानं विषयप्रकाशनशक्तिः ज्ञेयं विषयः परिज्ञाता ज्ञानाश्रयो
भोक्ता एतत्त्रयं कर्मणः प्रवर्तकमित्युक्तं व्याचष्टे तेषामप्यात्मानक
त्वेनापि सोपाख्यानामिव भोक्तृत्वेन प्रकृतेः प्रवर्तकत्वमेवाशयः तथापि।
क्रियया व्याप्यमानस्य वस्तुमात्रस्याविकारादिभेदानर्हस्य चेतनादिरूपस्य क

श्री॰
गी॰ टी॰
प्र॰

95

र्मिणः कर्तृकोटिप्रवेशायोगः तस्य क्रियाश्रयत्वमात्रविवक्षायां
प्रकृते तत्कथनानुपयोगश्च स्पष्टः तथाच स्वाकेतत्र घटादिव्याप
कक्रियायाः कर्मशब्दवाच्यत्वेनाभावे कर्तृकोटिप्रवेशस्य क्रियाक्रिया
वतोर्धर्मधर्मिणोरभेदापेक्षयाभ्युपगमे तथा ज्ञाने प्रकाशनक्रिये
ति मते क्रियाश्रयेऽस्मिन् प्रवर्तकज्ञानान्तरस्यापेक्षेति तत्र तत्रान्यस्या
न्यस्यापेक्षेत्यनवस्था दुर्निवारा १८ ॥

आनंदीटीका १८

सामस्त्येन सर्वेष्वेव कारकेषु सत्सु क्रियया निष्पत्तिर्न त्वेकस्मि
न्कस्मिंश्चिदसतीति दर्शयति चक्षुषा त्वं रूपं पश्येत्यादिकं क
र्मणः प्रवर्तकं सामान्यवचनं कर्मचोदना ज्ञानं ज्ञेयं परिज्ञातेत्यभि
हितं त्रिविधा त्रितयसंयोगादेव सिध्यति नत्वेकतरापाये तथा
हि ज्ञेयं वस्तु येनेंद्रियादिना करणेन ज्ञायते तज्ज्ञानं यो हि जा
नाति स परिज्ञाता ज्ञेयवस्तुपरिज्ञानकर्ता पुरुषः तस्मात्क
र्मसंग्रहः कर्मणः ज्ञानादिसंबंधेन ग्रहणं करणं कर्म कर्ते
ति त्रिविधः त्रयाणां संबंधेन सामस्त्येन समुदायेनैव भवति
नत्वेकतरापाये व्यस्तत्वेनेत्यर्थः तथाहि चक्षुषा त्वं रूपं पश्ये
ति दर्शनक्रियाचोदनायां चक्षुरिति अतिशायितं करणं साध
ककरणं तृतीयान्तम् रूपमिति क्रियया प्राप्तुमिष्टं कर्म द्वि
तीयान्तम् त्वमिति करणस्य कर्मणः प्रवर्तकः क्रियायाश्च
सम्पादकः प्रथमान्तः कर्तेति तस्मात्करणादिसाधारण्ये
न कर्मसिद्धौ तत्कथं केवल आत्मा कर्तेति वाक्यान्वयः १८ ॥

रामकंटीटीका १८

अत्र प्रथमेन कर्मशब्देन ज्ञानात्मिकायाः क्रियायास्तन्मिलनलक्षणं फ
लमुच्यते कारणेन कार्योपचारात् तेन तादृशे क्रियाफले विष
येऽत्राधीनत्वात्त्रिप्रकारा चोदना प्रवर्तना त्रीण्येतानि तन्मिलनलक्षणज्ञा
नात्मकक्रियाफलं चोदयंति प्रवर्तयंतीत्यर्थः कानि त्रीणि ज्ञानं
येन ज्ञायते तदिंद्रियादि ज्ञेयं च यज्ज्ञायते सघटः रूपनीलपीता
दि परिज्ञाता फलमिदं योऽहमिदं सघटः घटादि जानामीत्यनुभव
सति त्रयाणामेषां सामग्री तन्मिलनलक्षणफलं चोदयतीत्यर्थः एव

मेवकर्मणिकर्मफलेनतत्कार्यनिष्पत्तिलक्षणोसंग्रहोयेनसंगृह्यते
सोक्रियतेसोपित्रिविधस्त्रीण्येतानिसंग्रहयन्तिकानि करणंहस्ता
दिकर्मघटादिकार्यविषयाचेष्टा कर्त्ताघटादिव्यापृतकुंभकारादि
एतत्त्रितयसामग्रीवशाद्घटादेःकार्यस्यस्वरूपनिष्पत्तिलक्षणोभव
नि तीत्यस्थितेन कीदृशिज्ञानादीनियोगविषयाणीतिप्रक्रान्तप्रतिपाद
यितमाह १८ ॥

लाभिकी [illegible]टीका

ज्ञायतेनेनेतिज्ञानमिंद्रियादिकं ज्ञेयंयज्ज्ञायतेघटवस्तुःस्वनी त×
लपीतादि परिज्ञाताज्ञानाश्रिकायांक्रियायास्वतंत्रइत्येवंकर्म
णःक्रियायाश्चोदनाप्रवृत्तिहेतुः तथाकरणंसाधकतमंहस्ता
दि कर्मक्रियानिर्वर्त्यघटादि कर्त्ताक्रियानिवर्तकइत्येवंकर्मणः
क्रियायाःसंग्रहःनिष्पत्तिहेतुर्नामसंक्षेपः [illegible] १८

पंचोलेटीका

अथेदानींपूर्वोक्ताधिष्ठानादिभिः पंचभिरारभ्यमाणानांप्रवर्तक।
माह ज्ञानमिति ज्ञानमविशेषेणसर्ववस्तुविषयंतथाज्ञेयमवि
शेषेणसर्ववस्तुपरिज्ञाताउपाधिलक्षणोविद्याकल्पितोभोक्ता
एतत्त्रयंत्रिविधंत्रिप्रकाराकर्मचोदनाकर्मप्रवर्तनाकरणं[illegible]त्रा।
दियाणिदशबाह्यान्तःकरणमेकादशमनोबुद्ध्यादिकरणंउभयात्मा
र्थसंस्कार्यं [illegible] विकार्यंचेतिचतुर्विधंकर्मकर्त्ताकरणानामिंद्रियाणां
व्यापारकर्त्ताअयंत्रिविधःकर्मसंग्रहःसर्वकर्मअस्मिन्संगृह्यते १८

मणवीरसमिहोधिनी ॥

उक्तमेवार्थमुपपादयति ज्ञानमिति ज्ञायतेनेनेति ज्ञानंनिश्चय
साधनंप्रमाणं ज्ञेयं तत्प्रतिपादितोधर्मस्तस्यचपरिज्ञाताधिका
रीत्येवं त्रिप्रकाराकर्मणि कारणेकार्योपचारात्कर्मफलेचोदना
प्रवर्तना ज्ञानादित्रयंकर्मफलेप्रवर्तयतीत्यर्थः प्रमाणेनसुपदेशुः
सकाशाल्लब्धेतदर्थेचपरिज्ञायानुष्ठितेधिकारिणस्तदुक्तंफलं
भवतीतिभावः यद्वा ज्ञानादित्रयंसत्वेकर्मणिप्रवृत्तिविषयीभवं
तीत्यर्थः प्रकारांतरेणवाह करणमिति करणंयेनातिशयेनकि

यमाप्यते तदनुष्ठादिकं कर्म शुद्धादिव्यापारविषयः कर्ता तद्व्या
पृतोधिकारी क्रियानिर्वर्तकमित्येवं त्रिप्रकारः कर्मसंग्रहः गीण्ये
तानि स्वधर्मभूतं कर्म संपादयंति स्वीकारयंतीति तदर्थः कारक
त्रयमेव सर्वक्रियाश्रय इति तात्पर्यार्थः १८ ॥

मधुभाष्य

ज्ञानमिति त्रिविधा कर्मचोदना एतत्त्रिविधमपेक्ष्य कर्म
विधिरिति त्रिविधेत्युच्यते करणानि संग्राह्य करणमि
ति कर्मसंग्रहः कर्मकारणसंक्षेपः अधिष्ठानादि करण
एवांतर्भूतं तथाप्युपदेशविलेषु ज्ञानं ज्ञेयं ज्ञातेति चाप
पेक्ष्य विधिः कथ्यते करणं चैव कर्ता च कर्मकारणसंग्र
ह इति प्रकर्तृत्वेपि विधिहानेश्वरप्रसादादि च्छेत्यक्तो क
कारणैः कर्महानिशुभबाधा भवतीति ईश्वराधीनत्वेपि
विहितानि पतत्येतेनैव यदि वेच्छादिर्नीयते तर्हि कारितमे
वेश्वरेण फलं च तन्निय वक्तृतोऽकर्तृत्वेपि श्रीभिमानि
कं कर्तृत्वं तस्यैव स्वातंत्र्यतः अपेक्ष्या तिच प्रवृत्तिविधि
वैयर्थ्यं सर्वं चैतदनुभवोक्तप्रमाणसिद्धमिति न पृथक्
प्रमाणमुच्यते पुनःसाधनप्रयोजनाय अन्नमेदानादह १८

भाषा अनुवाद

कर्म्म मे अभिनिवेश जो इच्छा औ आशक्ति कहे तनमन से ल
गे रहना इन दोनो से रहित अरुष हनन करके भी हनन नही
करते और बन्धन को नही प्राप्त होते इस पूर्वोक्तवाक्यमात्र के
कहने केलिये कर्म्म की विधि है औ कर्म्म श्रेय कहे कल्याणकर
है और कर्म्मफल आदि सबको त्रिगुणात्मकत्व हेतुसे गुणातीत
जो आत्मा तिसको इस कर्म्मविधि आदिके साथ कछु सम्बन्ध
नही है इस कहने की अभिप्राय से कर्म्मविधि औ कर्म्म श्रेयकह
ते है कि ज्ञान कहे यही इष्ट का साधन है ऐसा जो बोध औ ज्ञेय
कहे इष्टके साधन स्वरूप जो कर्म्म और परिज्ञाता कहे ऐसे ज्ञा
नका आश्रयभूत जो मनुष्य यही त्रिविधकर्म्मविधि कहे प्रेरणा
है अर्थात् इसी प्रेरणा से लोग कर्म्म मे प्रवृत्त होते है श्लोकार्थ
यह है कि कर्म्मविषयक जो विधि सो उक्तरूप त्रिगुणात्मक ज्ञान
आदि को अवलम्बन करके प्रवृत्त होतीहै यह दूसरे अध्यायके
४५ श्लोक मे कहा हैकिहे अर्जुन त्रिगुणात्मक सकाम अधि
कारी के सम्बन्ध वेद मे कहा है और करण कहे साधन श्रोक
र्म्म कहे कर्त्ता की अत्यन्त इच्छा की अधिकई से किया जायजो
व्यापार और कर्त्ता कहे क्रियाका करने हारा और सब कर्म्म संग्रह
णरूपसे इसी मे गृहीत होते है इस अर्थ के सूचन करनेवाले
पदको कर्म्मसंग्रह कहते हैं करण कर्म्म कर्त्तारूप तीन कारक ये
क्रियाके आश्रय है और सम्प्रदान अपादान औ अधिकरण ये तीन
केवल परस्पर आक्रमण से क्रियाके प्रवर्तक है साक्षात् क्रियाके
आश्रय स्वरूप नहीहै इसीसे पूर्वोक्त तीन कारणो को क्रियाके
आश्रय स्वरूप कहाहै १८ ॥

दोहा

ज्ञान ज्ञेय ज्ञाता त्रि विधकर्म प्रेरनाहोय करणकर्मकर्त्ता
त्रिविधकर्मसंग्रह पदसोय १८ ॥

96

ज्ञानंकर्मचकर्ताचत्रिधैवगुणभेदतः प्रो
च्यतेगुणसंख्यानेयथावच्छृणुतान्यपि ॥१९

शांकरभाष्य टीका १

अथेदानीं क्रियाकारकफलानां सर्वेषां गुणात्मकत्वात् सत्त्वर
जस्तमोगुणभेदतः त्रिविधोभेदोवक्तव्यइत्यारभ्यते ज्ञानंकर्मेचे
ति ज्ञानं ज्ञायतेऽनेनेति कर्मचक्रियतइतिक्रियानकारकं पारिभाषिक
मीप्सिततमं कर्मकर्ताचनिर्वर्तकः क्रियाणां त्रिधैवावधारणं गुणव्य
तिरिक्तजात्यन्तराभावप्रदर्शनार्थंगुणभेदतः सत्त्वादिभेदेनेत्यर्थःप्रो
च्यते कथ्यते गुणसंख्याने कापिले शास्त्रे कापिलमपि गुणसंख्यान
शास्त्रंतदपि गुणभोक्तृविषये प्रमाणमेव परमार्थब्रह्मैकत्वविष
ये यद्यपि विरुध्यते तथापि तेहिकापिलागुणगौणव्यापारनि
रूपणेऽभियुक्ताइति तच्छास्त्रमपि वक्ष्यमाणार्थस्तुत्यर्थत्वेनोपा
दीयतइतिनविरोधः यथावद्यथान्यायं यथाशास्त्रं शृणु तान्य
पि ज्ञानादीनि तद्भेदजातानि गुणभेदकृतानि शृणु वक्ष्यमाणे
ऽर्थे मनःसमाधिंकुर्वित्यर्थः १९ ॥

आनंदगिरिकृतटीका २॥

अनंतरश्लोकत्रयतात्पर्यमाह अथेति ज्ञानादिप्रस्तावानन्त
र्यमथशब्दार्थः इदानीं प्रस्तुतज्ञानाद्यवान्तरभेदापेक्षायामित्य
र्थः तेषां गुणभेदाद्वैविध्ये हेतुमाह गुणात्मकत्वादिति वक्तव्यो वक्ष्य
माणः श्लोकत्रयेणेतिशेषः प्रवेक्ष्यतेप्रथममवान्तरभेदप्रतिज्ञा
क्रियतइत्याह इत्यारभ्यतइति कर्तुरीप्सिततमं कर्मेति यत्तत्परिभा
ष्यते तत्रात्र कर्मशब्दवाच्यमित्याह नेति गुणातिरेकेण विधान्तरं
ज्ञानादिषु नेति निर्धारयितुमवधारणमित्याह गुणेति ज्ञानादी
नांप्रत्येकंगुणभेदप्रयुक्ते त्रैविध्ये प्रमाणमाह प्रोच्यतइति ननु
कापिलं पातंजलमित्यादिशास्त्रं विरुद्धार्थत्वादप्रमाणं कथमिह
प्रमाणीक्रियतेतत्राह तथापीति विषयविशेषविरोधेऽपि प्रकृते
ऽंशमात्रेप्रमाणमविरुद्धमित्यर्थः यद्यपि कापिलादयोगुणाहीनविचारे

पा

श्री
गी टी
३

97

गौणत्वात्तस्य भोगादेर्निरूपणेन निगुणात्तथापि कथं न दोषं
शास्त्रमत्र प्रमाणीकृतमित्याशंक्याह तेहीति ज्ञानादिषु प्रमेकम
वान्तरभेदो व्याख्यायतामित्यतस्तत्र तेजान्तरेऽपि प्रसिद्धिं कथयन् स्तौति
त्वादर्थेनकापिलादिमतोपादानमिहोपयोगीत्यर्थः तृतीयपाद
स्याविरुद्धार्थत्वं निगमयति तेनेति यथावदित्यादिव्याचष्टे यथाशा
स्त्रमिति १९ ॥

स्वामिकृत टीका ३ ॥

ततः किमतआह — ज्ञानमिति गुणाः सम्यक्कार्यभेदेन संख्यायन्ते प्रतिपाद्यन्ते अस्मि
न्निति गुणसंख्यानं सांख्यशास्त्रं तस्मिन् ज्ञानं कर्म च कर्ता च प्र
त्येकं सत्त्वादिगुणभेदेन त्रिधैवोच्यते तान्यपि ज्ञानादीनि वक्ष्यमा
णानि यथावच्छृणु त्रिधैवेत्येवकारो गुणत्रयोपाधिव्यतिरेके
णात्मनः स्वतः कर्मादिप्रतिषेधार्थः चतुर्दशेऽध्याये तत्र सत्त्व
निर्मलत्वादिना दिगुणानां बन्धकत्वप्रकारो निरूपितः सप्तद
शेऽध्याये यज्ञे तेसात्त्विकादेवानिसादिनागुणकृतत्रैविध्यस्वभा
वनिरूपणेन रजस्तमः स्वभावपरित्यज्य सात्त्विकाहारादिसेव
यासात्त्विकः स्वभावः संपादनीय इत्युक्तमिह तु क्रियाकारकफ
लादीनामात्मसंबन्धो नास्तीति दर्शयितुं सर्वेषां त्रिगुणात्मकत्व
मुच्यत इति विशेषो ज्ञातव्यः

॥ पिशाचभाष्य टीका ४ ॥

अथेदानीं क्रियाकारकफलानां सर्वेषां सत्त्वरजस्तमात्मकत्वात्।
त्रैविध्यमुच्यते ज्ञानेत्यर्वीक् कर्म क्रियारूपं कर्ता ज्ञानानिर्वर्तयि
ता च त्रिधा त्रिप्रकारा गुणभेदतः प्रोच्यते कथ्यते गुणसंख्याने
गुणप्रतिपादके शास्त्रे यथावद्यथान्यायं तान्यपि ज्ञानादीनि
१९ ॥

रामानुजभाष्य टीका ५

ज्ञानमिति कर्तव्यकर्मविषयं ज्ञानं क्रियमाणं कर्म तत्क
र्ता त्रयं सत्त्वादिगुणभेदतः त्रिधैवोच्यते गुणसंख्याने गुणका
र्यगणने यथावच्छृणु तान्यपि तानि गुणतो भिन्नानि ज्ञानादी
नि यथावच्छृणु १९ ॥

अभिनवगुप्तकृत टीका ६

अथैषां प्रत्येकामपि संदेहे येन गुणभेदाद्भेदं दर्शयितुमाह

गुणानां संख्याने निरूप्यो यत्र तत्र सांख्ये प्रोक्तानि तेज्ञानादित्रिविध
मध्ययनेन यथावच्छृणु विविच्य इति। ज्ञानमित्यनेन ज्ञानेन क्रियायोगश्च।
त्करणानां द्विविधमुक्तं पदं कर्मेति ज्ञेये कार्यं च कर्तेति ज्ञाता कर्ता
चेति तत्र सर्वभूतेष्वित्यादिना श्लोकत्रयेण ज्ञानकरणस्य त्रैरूप्यमु
क्तं। तत एव येनेति तृतीयायाः प्रयोगाद्वा ज्ञानकरणसामान्यस्य स्वरूप
मुक्तं नियतमित्यादिना श्लोकत्रयेण कर्मणो ज्ञेयकार्यरूपस्य त्रै
विध्यं मुक्तसंग इत्यादिना श्लोकत्रयेण कर्तुर्द्विरूपस्य संबंधेने
ण स्वरूपं कारणविशेषस्य स्वरूपभेदप्रतिपादनार्थं बुद्धेर्वि
ध्यं निरूप्यते तद्द्वारेण करणानां गुणानामपि त्रैविध्यमुपलक्षिते
१९ करणानि तिकर्तव्यतायेदतादितिकर्तव्यतायाश्च सुखादिरूपक
रूपत्वेपि प्रवृत्त्याख्यरूप्यमुक्तत्वाद्धि विविदिषा विविदिषायोग्य इति
सत्त्वाभ्यासादिना तयोरपि त्रैविध्यं प्रत्येकमनेन सत्त्वविविदिषानीति
त्येनेतानीति नत्वाह ५ ॥

परमार्थप्रपा टीका ७

ततः किमत आह ज्ञानमिति गुणाः सम्यक्कार्यभेदेन ख्यायन्ते
प्रतिपाद्यन्ते यस्मिन्निति गुणसंख्यानं सांख्यशास्त्रं तस्मिन् ज्ञानं च
कर्म च कर्ता च प्रत्येकं सत्त्वादिगुणभेदेन त्रिधैवोच्यते तान्यपि
ज्ञानादीनि वक्ष्यमाणानि यथावच्छृणु त्रिधैवेत्येवकारेण गु
णत्रयोपाधिव्यतिरेकेणान्यतः स्वतः कर्मादिप्रतिषेधार्थः १९ ॥

वनमाली टीका ८ ॥

इदानीं ज्ञानज्ञेयज्ञातृरूपस्य करणकर्तृकर्मरूपस्य च त्रिविध
स्य त्रिगुणात्मकत्ववक्तव्यमिति तदुभयं सेद्धुं त्रिगुणात्मकत्वं
प्रतिजानीते ज्ञानमिति ज्ञानं प्रागव्याख्यातं कर्म क्रिया त्रिविधः
कर्मसंग्रह इत्यत्रोक्तः कर्ता क्रियानिर्वर्तकः गुणाः सत्त्वरजस्त
मांसि सम्यक्ख्यायन्ते अस्मिन्निति कापिलोक्तं सांख्यं गुणसं
ख्यानं तत्र ज्ञानं क्रिया च कर्ता च गुणभेदतः सत्त्वरजस्तमोभेदेन।
त्रिधैव प्रोच्यते यथावद्यथाशास्त्रं शृणु तानि ज्ञानादीनि अपि
च शास्त्रान्तरे ज्ञानानि च गुणभेदकृतानि च तत्र दर्शनेन समत्व।

श्री॰
गी॰ टी॰
ग्र॰

९८

निर्मलत्वादिधर्मादिना गुणानां वैधर्म्यप्रकारो निरूपितो गुणाती
तस्य जीवन्मुक्तस्य निरूपणाय सप्तदशे यत्नेन सात्त्विका देवा।
निधर्मादिना गुणकृतत्रिविधस्वभावनिरूपणेनासुरराजसतामसः
स्वभावेपरिसंख्य सात्त्विकाहारादिसेवया देवः सात्त्विकः स्वभा
वः संपाद्य इत्युक्ते इहतु स्वभावतो गुणातीतस्यात्मनस्त्रिगुणा
कार्यक्रियादिसेवैव नास्तीति दर्शयितुं तेषां सर्वेषां त्रिगुणा
त्मकत्वमेव वक्तव्यं तत्र प्रसिद्धेनात्मसेवयितानामादिलक्ष्यतन्त्र
तिनिषु तत्र तत्कि: १९ ॥

ऊत्कर्षवैजयन्ती टीका ९

ततः किमित्यपेक्षायां तेषां ज्ञानादित्रयाणां गुणभेदात्त्रैवि
ध्यमाह ज्ञानमिति गुणसंख्याने गुणाः सम्यक्ख्यायन्ते का
र्यभेदेन प्रतिपाद्यन्ते अस्मिन्निति गुणसंख्यानं गुणनिरूपकं
सांख्यशास्त्रं तस्मिन्गुणभेदतः सत्त्वादिगुणभेदेन ज्ञानेनैकत्र
कर्मविषयकर्मानुष्ठीयमानं यत्तादिकं कर्तानस्या नुष्ठाता हि त्रिविधैव
प्रोच्यते तान्यपि यथावच्छृणु तिवै विधेति यथावद्यथा स्वरूपमेव
गुणसांख्यानतस्तत्र वर्णात्कृते [illegible]
[illegible]
[illegible]
[illegible]
के ज्ञानमाह १९ ॥

मधुसूदनी टीका १० ॥

+ ज्ञानेन प्राप्यत्वात् ज्ञेयस्य ज्ञान एवान्तर्भूतं ज्ञातुर्ज्ञानोपाधिकत्वात् ज्ञेयत्व
स्य कर्म क्रिया त्रिविधः कर्मसंग्रह इत्युक्तश्च चकारात्कारणं।
कर्मकारकयोरेवान्तर्भावः क्रियोपाधिकत्वात् कारकत्वस्य क
र्ता क्रियाया निर्वर्तकं चकारात् ज्ञाता च कर्तुः क्रियोपाधिकत्वे
पि पृथक्त्वेन गणकत्वेनेऽकर्ता किं कर्मकालेतानात्मत्वनिवारणा
र्थं नैरिकर्मैवान्यैर्निमग्ने ते गुणाः सत्त्वरजस्तमांसि सम्यक्कार्य
भेदेन ख्याय ते यति प्रतिपाद्यन्ते अस्मिन् इति गुणसंख्यानं कापिलं शास्त्रं त
स्मिन् ज्ञानं क्रिया च कर्ता च गुणभेदतः सत्त्वरजस्तमोभेदेन त्रिधै

+ इदानीं ज्ञानज्ञेयज्ञातृरूपस्य
करणकर्मकर्तृरूपस्य च त्रिक
द्वयस्य त्रिगुणात्मकत्वं वक्तव्य
मिति तदुभयं संक्षिप्य त्रिगुणात्म
कत्वं प्रतिजानीते ॥

४०

वप्रोच्यते एवकारो विपरीतनिवारणार्थः यद्यपि कापिलशास्त्रं
परमार्थब्रह्मैकत्वविषये न प्रमाणं तथापि परमार्थगुणगौणभेदनि
रूपणे व्यावहारिके प्रामाण्यं भजत इति वक्ष्यमाणार्थस्तस्य यथागुण
संख्याने प्रोच्यमान इत्युक्ते तेष्वांतरैरपि प्रसिद्धमिदं न केवलमस्मिन्नेवेति च
इति स्मृतिः यथावत्यथाशास्त्रं शृणु श्रोतुं सावधानो भव तानि ज्ञा
नानीति अपि शब्दात्तदुद्गतानि च गुणभेदकृतानि अत्र चैवमपो
न रुक्तं द्रष्टव्यं चतुर्दशेऽध्याये तत्र सत्वे निर्मलत्वादित्यादिना गुणानां
बंधहेतुत्वप्रकारो निरूपितो गुणातीतस्य जीवन्मुक्तत्वनिरूपणा
य सप्तदशे पुनर्यजंते सात्विका देवानित्यादिना गुणकृतत्रिविधस्व
भावनिरूपणेनाहारे राजसतामसस्वभावे परित्यज्य सात्विकाहारादिसे
वया दैवः सात्विकस्वभावः संपादनीय इत्युक्तं इह तु स्वभावतो गुणा
तीतस्यात्मनः क्रियाकारकफलसंबंधो नास्तीति दर्शयितुं तेषां स
र्वेषां त्रिगुणात्मकत्वमेव न तु रूपांतरमस्ति ये नात्मसंबंधिता स्यादि
त्युच्यते इति विशेषः [illegible]
[illegible]
[illegible] ॥

सदानंदी टीका ॥ ॥

ज्ञानादिकत्रिकस्याध्यकरणादित्रिकस्य च वक्तुं त्रिगुणात्मत्वमि
त्युपक्रमते हरिः १ ज्ञानं प्रागेव व्याख्यातं ज्ञेयमनंतरं ज्ञातात्विह ज्ञानो
पाधिकता यस्मात् ज्ञेयत्वस्य तत्तस्तथा २ कर्मशब्दात्क्रियाग्राह्या चका
रादुभयोरपि ग्रहणं भावः क्रियायाः स्यात्करणस्य च कर्मणः ३ क्रियो
पाधिकता यस्मात्कारकत्वस्य सर्वथा निर्वर्तकः क्रियायाश्च कर्ता
ज्ञाता च वा तथा ४ गुणाः सत्वादयः सम्यक्ख्यायंते यस्मिन् कापि
ले शास्त्रे त्रिविधभेदेन सत्वादेः प्रोच्यते यतः ५ यथाशास्त्रं शृणु श्रो
ते सावधानो भवेति च यद्यपि कापिलशास्त्रं ब्रह्मैकत्वनिरूपणे ६
अप्रमाणं तथाप्यत्र गुणगौणनिरूपणे व्यावहारिकप्रामाण्यं भज
ते चेत्यदोषकृत् ७ ॥ १९ ॥

नीलकंठी टीका १९

सर्वस्मिंल्लोके ज्ञानादिषट्कं परिज्ञाता कर्ता चैक एवेति परिगणिताः

श्री
गी टी
अ

99

ऽचैतेषां सर्वेषां प्राकृतत्वेन त्रिगुणात्मकत्वमेवमेतज्ज्ञेयकरणयोर्जडयोर्दृ
क्कर्तृकल्पयोः परिसंख्यार्थं त्रयाणामेव प्रत्येकं त्रैविध्यं विवरीतुं
प्रतिजानीते ज्ञानमिति ज्ञानं कर्म कर्ता चेति त्रयमेव गुणभेदतस्त्रिधा न
त्वेकरूपेण गुणसंख्याने कापिलशास्त्रे यद्यपि तत्र प्रकर्षः प्रमदायामभि
र्भिः सुखं जायते तत्पतिं तस्याः सत्त्वोद्भूतत्वात् तामविन्दत्सपत्न्याः दुःखं
जायते तत्प्रति तस्याः रजउद्भूतत्वात् तस्यामेव सपत्न्या दृष्ट्वा मुह्यति।
तस्यास्तमउद्भूतत्वात् प्रमदयैव सर्वे भावा व्याख्याता इति कापिलानां
ज्ञेयकरणयोरपि त्रैविध्यं प्रसिद्धं तथापि प्रमदादयप्रकर्षस्यैव तत्तन्नि।
मित्तभेदेन प्रीतिदुःखद्वेषविषयात्वमपि भवन्तीति स्वीकर्तव्यस्यायानिमि
त्तत्वात् प्रीत्यादीनां कर्तृसमवायित्वप्रतीयमानानामालंबनभूतायाः
प्रमदायाः प्रीत्याद्यात्मकत्वं कल्पितं तेन शाक्यानामिति न भगवता तयोस्त्रि
विधत्वं व्याख्यायते अक्षरार्थः स्पष्टः १९ ॥

आनंदीटीका १९

गुणभेदतः गुणानां सत्त्वादीनां विभागात् गुणसंख्याने स्व
रूपभेदादिकथनेन विचार्यते यस्मिन्निति गुणसंख्याने शास्त्रे १९

रामकंठीटीका १९

प्रतिपादितस्वरूपं ज्ञानादित्रितयं चेत्तद्गुणसंख्याने गुणानां स्वरूप
भेदकथने प्रत्येकं त्रिधा त्रिभिः प्रकारैः सत्त्वादिगुणभेदात् प्रोच्य
ते कथ्यते न हि त्रिस्तानि ज्ञानादीनि मत्तोऽपि यथावत्सम्यगुच्यमा
नानि सात्त्विकराजसतामसभेदेन प्रत्येकं त्रिप्रकाराण्यवधारय
येन तानि प्रहेयानि अत्यभिज्ञास्यसि तत्र ज्ञानं त्रिविधमाह तत्र सा
त्त्विकं तावत् १९ ॥

लाक्षि[illegible]टीका

ततः किमत आह ज्ञानं कर्म कर्ता चेत्येतत्त्रयं प्रत्येकं सत्त्वादिगुणभेदेन गुणानां
संख्यानं निश्चयो यत्र तत्र सांख्यशास्त्रे प्रोच्यते तान्यपि ज्ञा
नादीनि वक्ष्यमाणानि यथावच्छृणु १९

१९

पंचोलेटीका

अथेदानीं क्रियाकारकफलानां सर्वेषां त्रिगुणात्मकत्वात्सत्वा
दिगुणभेदतः त्रिविधो भेद उच्यते ज्ञानमिति वचनः ज्ञानं कर्मेव
पुनः कर्त्तैतत् क्रियाकारकफलात्मकं गुणभेदतः सत्वादिगुणभे
देन सर्वं त्रिविधा विभक्तः गुणसंख्याने कपिलशास्त्रे त्रिविधं च त्रि
प्रकारमेवोच्यते तान्यपि यथावच्छृणु १९ ॥

स्तावीर सामिद्धोधिनी

ततश्च किमित्याह ज्ञानमिति ज्ञानादित्रयं सत्वादिभेदेन त्रिप्रकारं
प्रोच्यते गुणविभागविद्भिरिति शेषः गुणसंख्याने गुणाः संख्या
यन्तेऽस्मिन्निति व्युत्पत्त्या यत्तुर्वेदशास्त्रे तान्यपि यथावत्स्वो
नतिरिक्तत्वेन शृणु अवधारय १९ ॥

मधुभाष्य

ज्ञानमित्यादिना गुणसंख्याने गुणगणनप्रकरणे प
कं भावं विसृं परकृतं दोषं दीर्घकालकृतमप्यनुचित
यः सूचयति सदीर्घसूत्री परेणायः कृतो दोषो दीर्घका
लकृतोपि वा यस्तस्य सूचको दोषा त्वीर्घसूत्री स उच्यत
इत्यभिधानात् यथार्थं च नियमाभावो राजस्याः शत्रु
यातामसस्याभेदाभावात् नैष्कर्म्यसिद्धिं नैष्कर्म्यफला
योगसिद्धिं यथायेनोपायेन सिद्धिं प्राप्तो ब्रह्माप्नोति तं
यानि बोधं या सिद्धिर्ज्ञानस्य परा निष्ठा ब्रह्मभूयाय क
ल्पते ब्रह्मप्राप्ति भावो ब्रह्मभूयं ब्रह्मणि स्थितिः सर्वेदा तन्म
नस्कतेत्यर्थः पुनरंतरंगसाधनान्युक्तोपसंहरति १९

भाषा अनुवाद

अब क्रिया कारक औ फल को गुणात्मता से सत्व रज तम कृत त्रिवि
ध भेद कहा चाहते है इस अपेक्षा पर कहते है कि इसीमे गुणकार्य
भेद से संपूर्ण प्रतिपादन करके कहते है इस अर्थ का सूचन करने
वाला संख्यान कहे सांख्यशास्त्र तिस मे सात्विक आदि गुणभेद क्रम
से तथा कार्य के द्वारा ज्ञान औ कर्म तथा कर्त्ता ये अनेक त्रिविध
स्वरूप कहे गये है सोई मे यथावत् कहता हूं तिनको भी तुम श्रवण
करो १९ ॥

दोहा

ज्ञान कर्म कर्त्ता त्रिविध होत भेद गुण सोय कहियत
गुणसंख्यान मे यथावत सुणहू सोय १९

सर्वभूतेषु येनैकं भावमव्ययमीक्षते अ
विभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्विकं २०

शांकरभाष्य टीका १

ज्ञानस्य तावत् त्रिविधत्वमुच्यते सर्वेति सर्वभूतेषु अव्यक्ता
दिस्थावरान्तेषु भूतेषु येन ज्ञानेनैकं भावं वस्तुभावशब्दो वस्तुवा
ची एकमात्मवस्त्वित्यर्थः अव्ययं न व्येति स्वात्मना तद्धर्मेण वा कूट
स्थं नित्यमित्यर्थः ईक्षते येन ज्ञानेन पश्यति तच्च भावमविभक्तं
प्रतिदेहं विभक्तेषु देहभेदेषु न विभक्तं तदात्मवस्तु व्योमवत् निर
न्तरमित्यर्थः तत् ज्ञानं अद्वैतात्मदर्शनं सात्विकं सम्यक् दर्शनं वि
द्धीति २० ॥

आनंदगिरिकृत टीका २

ज्ञानादीनां प्रत्येकं त्रैविध्यं ज्ञातव्यं प्रतिज्ञाय ज्ञानत्रैविध्यार्थं श्लो
कत्रयमवतारयति ज्ञानस्येति तत्र सात्विकं ज्ञानमुपन्यस्यति स
र्वेति भूतानि कार्यकारणात्मकानुपाधिजातानि अद्वितीयत्वं
ऐकरस्यं प्रत्यगात्मभूतमबाधितत्वं ज्ञेयत्वेन विवक्षितमित्याह
एकमिति विवक्षितमव्ययत्वं संक्षिपति कूटस्थमिति प्रतिदेहमवि
भक्तमित्युक्तं व्यनक्ति विभक्तेष्विति तत् ज्ञानमित्यादि व्याकरोति
अद्वैतेति २० ॥

स्वामिकृत टीका ३ +तत्र तत्वज्ञानस्य सात्विकादित्रैविध्यमाह॥

+सर्वभूतेष्विति त्रिभिः सर्वेषु भूतेषु ब्रह्मादिस्थावरान्तेषु विभक्ते
षु परस्परं व्यावृत्तेषु विभक्तमनुस्यूतमेकमव्ययं निर्विकारं भा
वं परमात्मतत्वं येन ज्ञानेनेक्षते आलोचयति तज्ज्ञानं सात्विकं वि
द्धि ॥

पैशाचभाष्य टीका ४

अव्यक्तादिस्थावरान्तेषु येन ज्ञानेनैकं भावं शब्दो वस्तुवाची एक
मात्मवस्त्वित्यर्थः ईक्षते पश्यति येन ज्ञानेन कंभूतं भावम
विभक्तमपि भिन्नेषु ब्रह्मादिस्थावरान्तेषु भूतेषु देहभेदेषु व्योमवत्

श्री॰
गी॰ता
टी॰अ॰

रेतरेमाभुज्ञानेविद्धिसात्विकेसत्वनिर्द्दिते २० ॥

रामानुजभाष्यटीका ५

सर्वभूतेष्विति ब्राह्मणक्षत्रियब्रह्मचारिगृहस्थादिरूपेणावि
भक्तेषुभूतेषुकर्माधिकारिषुयेनज्ञानेनैकाकारमात्माख्यंभावंत
त्राप्यविभक्तंब्राह्मणाद्यनेकाकारेष्वपिभूतेषुसितदीर्घादिवि
भागवत्सुज्ञानेनैकाकारमात्मानंविभागरहितंअव्ययंव्य
यस्वभावेष्वपिसर्वेष्वविकृतंफलादिसंगानर्हंचकर्माधिकारवे
लायामीक्षतेतज्ज्ञानंसात्विकंविद्धि २० ॥

अभिनवगुप्तकृतटीका ६ अनेनैवत्यनेनसर्वंविदा

नीमित्यनेनचोक्तमितितदाह॥ स्पष्टार्थं २० ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपाटीका ७ ॥

अथसात्विकंज्ञानमाह सर्वभूतेष्विति सर्वेषुभूतेषुब्रह्मादिस्था
वरांतेषुविभक्तेषुनामरूपकर्मभिःपरस्परंव्यावृत्तेषुअविभक्त
मनुस्यूतंघटपटादिष्वाकाशमिवएकमद्वितीयमव्ययंनिर्वि
कारंभावंसद्रूपंपरमात्मतत्वंयेनेक्षतेआलोचयतितज्ज्ञानंसात्वि
कंविद्धि सात्विकादिकंसंपादनमाहारादिकंरवंवेशोकेमेव श्रु
तिरपिशानपश्यी यद्वैतन्नपश्यतिपश्यन्वैतन्नद्रष्टव्यंनपश्यं
ति नहिद्रष्टुर्दृष्टेर्विपरिलोपोविद्यतेऽविनाशित्वान्नतुतद्द्विती
यमस्तिततोन्यद्विभक्तंयत्पश्येदितिभाष्यं अविनाशीअरेवाअ
यमात्मानुच्छित्तिधर्मामात्रासंसर्गस्त्वस्यभवतीतिश्रुतेश्चआत्म
५१ नोविनाशित्वंद्रष्टीनांचतदाश्रयवर्त्तित्वमुक्तंतदेवदर्शयतियेनत
मात्मानंयद्वाप्रकारांतरेणेंद्रियादिनानपश्यतिकिंत्वात्मनैवा
त्मानंपश्यतिश्रुयनेयानेनात्मानंपश्यन्नपिपश्येद्वारोवर्त्तिपदा
६४ र्थंद्रष्टव्यमित्याकारेणनपश्यतीतियस्मात्कारणाद्रष्टुः
प्रकृष्टस्यद्रष्टेर्विपरिलोपोनविद्यते कुतः अविनाशित्वात्ए
कपदार्थज्ञानेनेष्टमतिपदार्थांतरज्ञानंभवतिप्रकृतेहितीय

स्याभावात् इष्टविपरिलोपो विपर्ययो नसंभवति यतस्तद्धिती
येनस्याहितीये दैनास्तियतस्तत्त्वात्मनःसकाशाद्वि
भक्तयन्नशेतस्मादात्मातिरिक्तेनाकिमपिपश्येदित्यर्थः २० ॥

वनमाली टीका ८

ज्ञानत्रैविध्यमाह सर्वभूतेषु इति भवेति त्रिविधेन इति भूतानि जी
वाः भवेन येन इति भूतानि जडानि तेषु विभक्तेषु जडेश्वराभ्यां
जीवेश्वराभ्यां परस्परं च यथायोग्यं पंचभेदवत्सु तथानानारतम्य
लक्षणविभागवत्सु चिदचिद्रूपसर्ववस्तुषु स्थिते अविभ
क्तेस्वस्यावतारगुणाकर्मादिषु भेदतारतम्यादिरूपविभागरहि
ते अव्ययं दुःखोत्पत्तिनाशादिविकाररहितं पंके समाभ्यधिक
रहितं सर्वोत्तमं भावं सदास्तं श्रीहरिं येन ज्ञानेनेक्षते विषयीक
रोति तज्ज्ञानं सात्त्विकं विद्धि येन साधनेन ज्ञानाति तज्ज्ञानसा
धनं सात्त्विकमिति वा जीवजगतस्याभिन्नं लक्षणं च सर्वोत
मत्वं केसर्वव्यापकं सदनं तगुणाश्रयोयेभगवतेयज्ज्ञानेनवि
षयीकरोति तज्ज्ञानं सात्त्विकमिति भावः २० ॥

+ त्रिविधेत्येवकारेणजीवात्मनोर्यद्गुणत्रितये
ज्ञातत्वं कर्मित्वं कर्तृत्वं च तत्संहाराहेतु
र्यतस्वाभाविकं तन्मोत्तहेतुरितितद्विध
त्वमिति ज्ञाने सात्त्विकादिगुणभेदतो
ज्ञानादीनां त्रैविध्यं तदेवाह नवभि
र्ज्ञानादीनां ज्ञानस्य त्रैविध्यवक्तव्यत्व
मं सात्त्विकं ज्ञानमाह ॥

श्रीमद्वैजयन्ती टीका ९ ॥

+ सर्वभूतेषु स्थितिमत्सु वेश्वति विलेषु भूतेषु स्वरूपतां दिदेहेषु येन ज्ञा
नेनैकं ज्ञानैकाकारमव्ययं व्ययस्वभावेषु देवमनुष्यादिदेहे
षु विकारशून्यं पुनः विभक्तेषु चतुराननपंचाननषडाननप
चाननसहस्राननैकाननदीर्घह्रस्वस्थूलकृशादिरूपेणाभि
यो भिन्नेषु अप्यविभक्तं ज्ञानैकस्वरूपत्वेन विभागरहितं भावं त
द्रूपं जीवात्मानमीक्षते सत्वगुणान्वितो जनो वीक्षते तज्ज्ञानं सा
त्त्विकं विद्धि उपनिषत्सु तिपाद्य प्रकृतिविविक्तात्मज्ञानं तत्त्वज्ञा
नी ही त्यर्थः २० ॥

मधुसूदनी टीका १०

+ सर्वभूतेषु अव्याकृतहिरण्यगर्भविराट्समष्टिबीजसूक्ष्मस्थू
लरूपेषु समष्टिव्यष्ट्यात्मकेषु सर्वेषु भूतेषु येनैव निर्विहेभूते।

+ एवं ज्ञानस्य कर्मणः कर्तुश्च प्रत्येकं त्रैविध्ये ज्ञातव्यत्वेन प्रतिज्ञाते प्रथमं ज्ञानत्रैविध्यं निरूपयति त्रिभिः
श्लोकैः तत्राद्वैतवादिनां सात्त्विकं ज्ञानमाह ॥

103

क्षिप्यते न भवन न यन्मिकत्वमुच्यते तेनोत्पत्तिविनाशशीलेषु दृश्यवर्गे
षु विभक्तेषु परस्परं व्यावृत्तेषु भूतानां कारणेषु प्रवाहरूपेणोत्पत्तिविनाशा
दिसर्वविक्रियाशून्यं सद्रूपमविभक्तमव्यावृत्तं सर्वत्रानुस्यूतमधि
ष्ठानतया बाधावधितया चैकमद्वितीयं भावं परमार्थसत्तारूपं
स्वप्रकाशानन्दमात्मानं येनान्तःकरणपरिणामभेदेन वेदान्तवाक्य
विचारपरिनिष्पन्नेनेक्षते साक्षात्करोति तन्मिथ्याप्रपञ्चबाधकम
द्वैतात्मदर्शनं सात्त्विकं सर्वसंसारोच्छित्तिकारणं ज्ञानं विद्धि द्वैतदर्श
नेन राजसेन तामसेन च संसारकारणेन सात्त्विकमित्यभिप्रायः २०॥

धनपती टीका ॥ ॥

हेयोपादेयरूपेण गुणव्याख्याप्रपञ्चये गुणाः निरूपिता इदानीमा
त्मनस्त्रैगुण्ययोगिनः १ गुणातीतस्य संबंधः स्वाभाविकात्सात्त्विकादि
कैः इति तेषां गुणानां त्रैविध्यं निरूप्यते २ ज्ञाने त्रैविध्यमेवादौ
त्रिभिः श्लोकैरिहोच्यते अद्वैतवादिनां ज्ञानं सात्त्विकं ह्युच्यते
३ ब्रह्मादिस्थावरान्तेषु सर्वभूतेषु नैकधा दृश्यवर्गेषु चान्योन्यव्या
वृत्तेषु विनाशिषु ४ जन्मादिविक्रियाशून्यमव्याहतमदृश्यकं
अधिष्ठानतया बाधावधिमात्मानमद्वयं ५ स्वप्रकाशं परानंदं ये
न ज्ञानेन पश्यति तन्मिथ्यादृश्यबाधेन चिदद्वैतात्मदर्शनं ६ सात्त्वि
कं सर्वसंसारोच्छित्तिहेतुमेव हि भोः राजसं तामसं द्वैतदर्शनं बंध
कारणं ७ हेयं ग्राह्यं तु सत्त्वोत्थं ज्ञानं मोक्षैकसाधनं ८॥ २०॥

नीलकंठी टीका २० ॥

एवं ज्ञानादित्रयस्य त्रैविध्यं वक्तुं प्रतिज्ञाय ज्ञानत्रैविध्यं तावदा
ह सर्वभूतेष्विति यथा कटककुंडलादिषु व्यावर्तमानेषु तत्त्व
विदेकं कांचनमेवेदमिति पश्यति एवं येन ज्ञानेन सर्वभूतेषु
विभक्तेषु नानानामरूपभेदभिन्नेष्वव्ययमपरिणामिनमेकं
भावं चिन्मात्ररूपं ईक्षते सर्वं ब्रह्मैवेदमिति पश्यति तज्ज्ञानं सा
त्त्विकं विद्धि ऐकात्म्यज्ञानमेव सात्त्विकमित्यर्थः २०॥

आनंदीटीका १२

उक्तसर्वब्रह्मात्मैक्यप्रकारकंज्ञानंयत्तत्सात्विकंविद्धीत्यर्थः २० ॥

रामकंटीटीका १४

तत्सात्विकंसत्त्वभूतरजस्तमस्कंविशुद्धसत्त्वमात्रहेतुकंज्ञानंसंवेद
नंविद्धिजानीहि किंतद्येनसाधनभूतेनदेशकालाकारादिभेदेनवि
विभक्तेषुपरस्परपृथग्भावेनव्यवस्थितेष्वपिसर्वेषुभूतेषुचेतनाचे
तनेषुसत्त्वेषुविभक्तमभिन्नरूपंचिदात्मकंभावंसत्तामीक्षतेपश्य
तेबुध्यतेइत्यर्थः इहविशुद्धचिन्मात्रस्वभावआत्मैवैकंतत्त्वंपरमा
र्थसत्तत्तद्व्यतिरिक्तंकिंचनपदार्थान्तरंतत्त्वतस्संभवति केवलंतदी
यनिरतिशयैश्वर्योज्ञावितमायामलमुषितस्वप्रकाशज्ञानमये
चक्षुषितदेकमेवतत्त्वंनानात्वेनप्रतिपद्यतेदेहभृतः तदेवयदात्मज्ञा
नमयंचक्षुः परमेश्वरानुग्रहशक्तिशलाकापरिमृष्टमलत्वान्नि
र्मलीभवतितदासर्वमेवेदमेकत्वेनयोगिनःपश्यन्तीत्यर्थः रा
जसंज्ञानमाह २० ॥

लासिकीटीका

तत्रत्रिविधज्ञानमध्यात्सात्विकं ज्ञानमाह

येनज्ञानेनकरणभूतेनसर्वेषुब्रह्मादिस्थावरान्तेषु विभक्तेषुप
रस्परंव्यावृत्तेष्वविभक्तमनुस्यूतमेकमव्ययंशाश्वतंचिदात्मानंतत्त्व
मीक्षते स्वात्मतयासाक्षात्करोति तज्ज्ञानंसंवेदनंसात्विकंविद्धि २०
२०

पंचोलेटीका

तत्रसात्विकंज्ञानमाह सर्वेति येनज्ञानेनसर्वभूतेषुब्रह्मकादिस्था
वरान्तेषुभेदवत्स्वाकाशवत्सर्वगतंअव्ययं कूटस्थमेकंभेदरहितं
भावमीक्षते गृह्णातितत्समदर्शनेनतज्ज्ञानंसात्विकम् २० ॥

रणवीरसमिद्धायिनी॥

तत्रज्ञानस्यत्रैविध्यंदर्शयंस्तावत्सात्विकंलक्षयति नज्ञानेनयनाब्रह्मा
सर्वेषुस्थीयेषुपरेषुचविभक्तेषुपृथक्पृथग्अवस्थितेषुतत्तत्संबंधभे
देनभिन्नेषुवाविषयेविभक्तमेकरूपमेवव्यक्तात्मेवविषयीकरोति

104

मित्यर्थः एकंसत्यमव्ययंस्थिरंभावं सर्वेषां येऽनुमागतानामेषां
निग्रहः परमोयमेतत्यभिप्रायमीक्षते विलोकयति तस्माद्विवेकं
ज्ञानंविद्धिजानीहि एतच्चोपादेयं २०॥

मधुभाष्य

२०॥

भाषा अनुवाद

इस श्लोक से ले तीन श्लोक से इस ज्ञान का सात्विक आदिभेदसे
तीन प्रकार कहतेहैं कि ब्रह्मादि स्थावर पर्यंत परस्पर भिन्न भि
न्न सकल वस्तु मे प्राप्त एक निर्विकार स्वरूप अव्यय परमात्मत
त्व का जिस ज्ञान से आलोचन किया जाय उस ज्ञान को सात्विक ज्ञा
नजानो २० ॥

दोहा

सर्वभूतमें एकजिह अखंडभाव लषहोय अभिन्नहिभि
न्नमेज्ञानजो सात्विकहि यह सोय २०॥

105

पृथक्केन तु यज्ज्ञानं नानाभावान्पृथग्विधान्
वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसं २१ ॥

शांकरभाष्य टीका १ ॥

यानि द्वैतदर्शनान्यसम्यकृतानि राजसानि तामसानि चेति त्रीण्युक्ता
न् संसारोच्छित्तये भवेति पृथक्केनेति पृथक्केन तु भेदेन प्रतिशरी
रमन्यत्वेन यत् ज्ञानं नानाभावान् भिन्नानात्मनः पृथग्विधान्
पृथक्प्रकारान् भिन्नलक्षणानित्यर्थः वेत्ति विजानाति यज्ज्ञानं
सर्वेषु भूतेषु ज्ञानस्य कर्तृत्वासंभवाद्येन ज्ञानेन वेत्तीत्यर्थः २१ ॥

आनंदगिरिकृत टीका २ ॥

द्वैतदर्शनान्यपि कानिचिद्भवंति तानि द्वैतानि सम्यंचीत्याशंक्याह
यानीति तेषामसम्यक्त्वे हेतुमाह राजसानीति प्रतिदेहमन्यत्वेन भिन्ना
त्मनो येन ज्ञानेन जानाति तत् ज्ञानं राजसमिति व्याचष्टे भेदेने
ति पृथक्के पृथग्विधत्वेच पुनरुक्तमित्याशंक्य हेतुभेदमन्वेन
विभागं विवक्षित्वाह भिन्नेति ज्ञानस्य ज्ञानकर्तृत्वमयुक्तमि
त्याशंक्याह येनेति २१ ॥

स्वामिकृत टीका ३ ॥

राजसं ज्ञान
माह पृथक्केनेति यज्ज्ञानमित्यस्यैव विवरणं सर्वेषु भूतेषु देहेषु नाना
भावान्वस्तुतः एकानेकान् क्षेत्रज्ञान् पृथग्विधान् सुखित्वदुःखित्वा
दिरूपेण विलक्षणान् येन ज्ञानेन वेत्ति तज्ज्ञानं राजसं विद्धि २१ ॥

ना. पिशाचभाष्य टीका ४ ॥

पृथक्केन भेदेन नानाभावान् पृथग्विधान् भिन्नप्रकारान् वेत्ति जानाति
कारणं कर्तृत्वेनोपचर्यते सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसं २१ ॥

रामानुजभाष्य टीका ५ ॥

पृथक्केनेति सर्वेषु भूतेषु ब्राह्मणाद्याकारेषु पृथक्केनात्मस्वाभावानां ना ना
भूतानि तन्दीर्घादि पृथक्केन च पृथग्विधान् फलादि संयोगयोग्यान्क
र्माधिकारवेलायां यज्ज्ञानं वेत्ति तज्ज्ञानं राजसं विद्धि २१ ॥

श्री·
गी·टी·
पु·

106

अभिनवगुप्तटीका ६ ॥

स्पष्टार्थः २१ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका ७

राजसमाह पृथक्त्वेनेति सर्वेषु भूतेषु देहेषु नानाभावान् तेषु ज्ञान
हेतुत्वे सुखदुःखित्वादिमतो भावस्तान् पृथग्विधान् पृथग्विधान् ज्ञा
नेन वेत्ति तद्राजसं ज्ञानं विद्धि २१ ॥

वनमाली टीका ८ ॥

सर्वभूतेषु स्थितमीश्वरं पृथक्त्वेन भूतेभ्यो भिन्नत्वेन न त्वेतीति यज्ज्ञा
नेन शङ्कः सर्वात्मतत्त्वज्ञानेनावर्तते यानि भूतेभ्यो भिन्नत्वेन न तु स
र्वात्मत्वेनेत्यर्थः तथा नानावस्तुतो भिन्ना जीवा अन्योन्यं पृथग्वि। २
धाद्वेति विषयीकरोति यज्ज्ञानं तद्राजसं स्मृतं यदा कर्मकरोति जी
वस्तदा स्वभावतः कर्त्तैव यदा स्वर्गनरकादौ सुखादिकं भुङ्क्ते तदा।
स्वभावतस्तत्सुखादिभोक्तैवेति यज्ज्ञानं विषयीकरोति न तु सर्वा।
सु सुखदुःखभोक्तृत्वकर्मकर्तृत्वावस्था स्वतन्त्रा न चिदानन्दस्व
नेकर्मरूपाविद्याकर्तृत्वभोक्तृत्वादिप्रयुक्तमपि स्वभावतस्तद्दृष्टि
ने जीवस्वरूपं विषयीकरोति तज्ज्ञानं स्वर्गनरकसंसृतिहेतुत्वाद्राज
समिति भावः २१ ॥

ऊरुमवैजयन्ती टीका ९ ॥

राजसं ज्ञानमाह पृथक्त्वेनेति सर्वभूतेषु देवमनुष्यादिशरी
रेषु तत्र पुनः पृथक्त्वेन सुरनरादिदीर्घह्रस्वादिदेहाकारभिन्नत्वे
न यद्वा नेकस्वदीर्घाकारकोदेहस्थजीवस्तन्नाशे तस्य नाशः स्या ५४
कारकं नानाभावान् ह्रस्वदीर्घादिपृथक्त्वेन नानाविधान् भावा ना
न् जीवात्मान् पृथग्विधान् भिन्नभिन्नप्रकारान् देह एवात्मा दे
हादन्यो देहपरिमाण एवात्मा तारिक विज्ञानमात्मा निमपविज्ञा
नमात्मानि मयविज्ञानमात्रो विभुरात्मा देहादन्यो ज्ञाताना दिगुणाश्र
योजडो विभुरात्मेत्येवं लोकायतिजैनबौद्धमायावादिना निकरुका
दिमतरूपकान् वेत्ति यज्ज्ञानं ज्ञानाति तज्ज्ञानं राजसं विद्धि जानीहि २१

१०६

मधुसूदनी टीका १० ॥

तुशब्दः प्रागुक्तसात्विकव्यतिरेकप्रदर्शनार्थः पृथक्त्वेन भेदेन स्थि
तेषु सर्वभूतेषु देहादिषु नानाभावान् प्रतिदेहमन्यानात्मनः पृथग्
विधान् सुखित्वदुःखित्वादिरूपेण परस्परविलक्षणान् येन ज्ञानेन वे
त्तीति वक्तव्ये यज्ज्ञानं वेत्तीति करणे कर्तृत्वोपचारादेधांसि पचन्तीति
वत् कर्तुरहंकारस्य तस्याभेदाद्वा तज्ज्ञानं विद्धि राजसमिति पूर्ववज्ज्ञा
नप्रमात्मभेदस्यानमनात्मभेदज्ञानं च परामृशतीति तेनात्मनो पर
स्परभेदस्तेषामीश्वराद्भेदस्तेभ्य ईश्वरादन्यो मतश्चाचेतनत्ववी।
स्वभेदश्चनौपाधिकभेदपंचकज्ञानेनेति तार्किकाणां राजसमेवे
त्यभिप्रायः २१ ॥

सदानंदी टीका ११ ॥

तुशब्दः सात्विकाज्ज्ञानाद्वित्रेतीदं द्विराजसे भेदेन सर्वभूतेषु स्थि
तेषु देहेनानात्व १ प्रतिदेहं विभिन्नात्मस्वरूपात्मनश्चांतरात् सु
खित्वादिकरूपेण परस्परविलक्षणात् २ येन ज्ञानेन तज्ज्ञानं तिमिद्धि
वे विद्धि राजसं ज्ञानेन वेत्तीति करणे कर्तृत्वोपचारिकं ३ यथैधां
सि पचंतीति प्रयोगोस्ति तथैव तत् आत्मानात्मनोर्भेदस्तेषां भे
दस्तथैव स्यात् ४ भेदोचेतनत्वगतस्तेभ्य ईश्वरात् स्यामिथः इत्या
नौपाधिको भेदस्तार्किकाणां च पंचधा ५ संमतो राजसत्वेन तत्
ज्ञानं हेयमेव हि ६ ॥ २१ ॥

नीलकंठी टीका १२ ॥

भेदज्ञानं राजसत्वमाह पृथक्त्वेनेति यत्पृथक्त्वेन भिन्नत्वेन ज्ञानं
तद्राजसमिति संबंधः पृथक्त्वेनैव तद्विशिनष्टि सर्वेषु भूतेषु
पांचभौतिकत्वेनाविशिष्टेषु नानाभावान् सुरनरतिर्यक्स्थावरत्व
भेदेन नानात्वानि बहुवचनमंशेन भेदप्रदर्शनार्थं पृथग्विधान्
एकजातीयेष्वपि नरादिषु पृथक् पृथक् विभिन्नप्रकारान् यज्ज्ञानं वेत्ति विष
यीकरोतीति येन ज्ञानेन वेत्तीति वक्तव्ये यथैधांसि पचंतीतिवत् यज्ज्ञा
नं वेत्तीति करणे कर्तृत्वोपचारो बोध्यः तेन आत्मनोः परस्परभेदः।

श्री· गी· टी· प्र·

स्त्रीषामीश्वराद्भेदस्त्वभ्यईश्वरादन्योन्यतस्त्रजउर्वशीसभेदश्चतत्रौपा
धिकभेदपंचकज्ञानेकुतार्किकाणांराजसमेवेत्यभिप्रायः २९

आनंदीटीका ११

नैस्तैस्तैर्नैर्हितत्तानाश्स्वक्रप्रकारकंराजसंज्ञानमित्यर्थः तथा
च ज्ञानयत्तेनवाप्यभ्येयजन्तोमात्रुपासेन एकत्वेनपृथक्
त्वेनैत्यपिनवमाध्यायोक्तंपरीक्षितम् २९ ॥

रामकंटीटीका १४

तद्वत्सर्वेषुभूतेषुसमस्तेषुमायीयेषुप्राणिषुवर्तमानंराज
संरजोगुणहेतुकंस्वरतंतत्वविद्धि: किंतद्यत्पृथक्केनात्मव्यति
रेकेणव्यवस्थितंनानाभावानपिवेद्यान्नानारूपान्विविन्नान्पृथ
ग्विधान्परस्परतोव्यतिरिक्तस्वरूपान्जानाति ज्ञानस्येवप्रधा
हेतुत्वाउपचारेणवेदनक्रियाकर्तृत्वंवेदितव्यमेतज्ज्ञविषयस
र्वगार्थलक्षणलाभकारणभूताइजसः समूरूनमसम्यग्द
र्शनहेतुत्वात्संसारिणरूपनियमितंहेयमेव प्रथनामसमा
ह २९ ॥

लाभिकी टीका

राजसंज्ञानमाह सर्वेषुचतुर्दशविधेषुभूतेषुप्राणिषुनानाभावाननेकात्ते·
नज्ञान्पृथग्विधान् सुविड:खित्वादिरूपेणस्थावरजंगमादि
भेदेनवापरस्परतोव्यतिरिक्तान्वेत्तीतियत्पृथक्त्वेनस्वतोभेदे·
नज्ञानंतद्राजसंविद्धि यथासांख्यतार्किकादीनां

२१ २९

पंचोलीटीका

राजसंज्ञानमाह पृथक्त्वेनेति तपुनःयज्ञानंसर्वेषुभूतेषु
पृथग्विधान्भिन्नप्रकारान्भावान्भिन्नात्मनःप्रतिशरीरंपृथ
क्केनभेदेनवेत्तियेनज्ञानेनजानातितज्ज्ञानंराजसंविद्धि २९ ॥

रणवीरसमिहोथिमी

राजसमाह पृथक्त्वेनेति सर्वेषुभूतेषुपृथक्त्वेनजीवोसोरत
मनदीरिपुरसोरतव्यक्तिभिन्नतथायज्ज्ञानं यतदेवविद्धीणोति

येनचनानाभावान् अनेकरूपाण्यतिपन्नान् पृथग्विधान् पृथक्त्वीयपरत्वेनभिन्नाविधायेषां तांस्तान्रूपान्वेत्ति जानाति तज्ज्ञानेनराजसंस्मृतं पतवद्देयमेव २१॥

मधुभाष्य

२१॥

भाषा अनुवाद

इस श्लोक मे राजस ज्ञान कहतेहैं किभूत कहे देहधारी मात्र मेना
ना भाव अर्थात् सब की शरीरमे क्षेत्रज्ञ आत्मा पृथक पृथक सुखी
दुःखी रूप से भिन्न भिन्न भी जाना जाय जिस ज्ञान से सोज्ञान राज
स जानो २१ ॥

दोहा

पृथकभावसें ज्ञानजो अनेकभावभिनकोय जानतसर्व
हिभूत मे राजस कहियतसोय २१

यत्तु कृत्स्नवदेकस्मिन्कार्ये सक्तमहैतु
कं अतत्वार्थवदल्पं च तत्तामसमुदाहृतं २२

शांकरभाष्य टीका १ ॥

यत्विति यत्तु ज्ञानं कृत्स्नवत् समस्तवत् सर्वविषयमिव एक
स्मिन् कार्ये देहे वहिर्वा प्रतिमादौ सक्तं एतावानेवात्मा ईश्वरो वा न
तः परमस्तीति यथा नग्नक्षपणकादीनां शरीरान्तर्वर्त्ती देहप
रिमाणो जीव ईश्वरो वा पाषाणदार्वादिमात्रं इत्येवं एकस्मि
न् कार्ये सक्तमहैतुकं हेतुवर्जितं अयुक्तिकं निःप्रमाणकमत
त्वार्थवत् अयथाभूतोऽर्थस्तत्वार्थः सोऽस्य ज्ञेयभूतोस्तीति तत्वा
र्थवदतत्वार्थवदहैतुकत्वादेवाल्पं चाल्पविषयत्वादल्पफलत्वाद्वा
तत्तामसमुदाहृतं तामसानां हि प्राणिनामविवेकिनामीदृशं ज्ञानं
दृश्यते २२ ॥

आनंदगिरीकृतटीका २ ॥

यत्विति सक्तत्वमेव व्यनक्ति एतावानिति एकस्मिन् कार्ये ज्ञानस्य
सक्तत्वमेव दृष्टान्तेन साधयति यथेत्यादिना यन्निर्युक्तिकं तद्देव
ज्ञानस्याभासत्वे कारणमित्याह अहैतुकत्वादिति स्वरूपतो
विषयतश्चाभासत्वे फलतोपीत्याह अल्पमिति तामसं ज्ञानम
फलत्वाभिमतज्ञानाज्जन्मभवं प्रमाणयति तामसानां हीति २२ ॥

स्वामिकृत टीका ३ ॥

तामसं ज्ञानमाह यत्विति एकस्मिन्कार्ये देहे प्रतिमादौ वा कृत्स्न
वत्परिपूर्णवत्सक्तं एतावानेवात्मा ईश्वरो वेत्याभिनिवेशयुक्तं
अहैतुकं निरुपपत्तिकं अतत्वार्थवत्परमार्थावलंवनशून्यं अतए
वाल्पं तुच्छमाल्पविषयत्वादल्पफलत्वाच्च यदेवंभूतं ज्ञानं तत्ताम
समुदाहृतं [illegible] ॥

पिशाचभाष्यटीका ४ ॥

यज्ज्ञानं कृत्स्नवत्सर्वविषयकस्मिन्कार्ये देहे प्रतिमादौ वा सक्तमिति।

श्री॰
गी॰ टी॰
श॰
109

हेतुनातः परमस्तीतिप्रहेतुकमेषु सक्तिर्निमित्तमतत्त्वार्थव
दल्पं चापरमार्थविषयमल्पवस्तुत्वात्तस्य विषयत्वादल्प।
फलं वा तज्ज्ञानं तामसं तमःप्रभवमुदाहृतं उक्तं तामसानां।
हि प्राणिनामविवेकिनामीदृशं ज्ञानं दृश्यते २२ ॥

रामानुजभाष्य टीका ५ ॥

यदिति यत्तु ज्ञानमेकस्मिन्कार्ये कस्मिंश्चित्कर्तव्ये कर्मणि प्रेतभू ९०
तगणाद्याराधनरूपेऽत्यल्पफले कृत्स्नफलवत्सक्तमहैतुकंव
स्तुतस्तु कृत्स्नफलतया न्याय्यविषयसंगहेतुरहितं अतत्त्वार्थव
त्सर्ववेद्यात्मनिरश्यकादिरुक्ततया मिथ्याभूतार्थविषयं अ
मत्यल्पफलं च प्रेताद्याराधनरूपं विषयत्वादल्पं च तत्तामसं तामस
मुदाहृतं [illegible]
[illegible]
[illegible] ५ ॥

अभिनवगुप्तकृत टीका ६

स्पष्टार्थं २२ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका ७ ॥

तामससमाह यत्त्विति एकस्मिन्कार्ये देहे प्रतिमादौ वा कृत्स्न
वत्परिपूर्णवत् सक्तं एतावानीश्वर एवेत्यभिनिवेशयुक्तं अ
हैतुकं निरुपपत्तिकं अतत्त्वार्थवत् परमार्थावलंबनशून्यं अत
एवाल्पं तुच्छं यदेवंभूतं ज्ञानं तत्तामसमुदाहृतं २२ ॥

वनमाली टीका ८ ॥

बहुषु भूतकार्येषु एकस्मिन्कार्ये भूतविकारे देहे अहैतुके
हैतुके हेतुयुक्तिस्तद्रहिते अमेषां भूतकार्याणामात्मत्वाभा
वे कथमेकस्यैवाहेशस्यात्मत्वमित्याद्यनुसंधानशून्ये कृत्स्नव
त्परिपूर्णवत्सक्तं एतावानेवात्मा नातः परमस्तीत्यभिनिवेशो
न लग्नं यद्यपि दिगंबराणां सावयवो देहपरिमाण आत्मेति।
यद्याचार्वाकाणां देह एवात्मेति अहैतुकत्वादेवातत्त्वार्थ

लेवने ऽप्यत्येव निष्पन्नाग्रहात् २२ ॥

ऊसमनवैजयंती टीका ९ ॥

नामसेत्ज्ञानमाह यतिरिति तु तः यत्स्थानमेकस्मिंश्चिल्लौकिके।
स्नानस्थानपानमांसभोजनयोषिविष्टसंगवेषणानृत्यदर्शनादौ भ-
तविनायकारायनरूपमारणमोहनोच्चाटनाद्यभिचारादौ।
वा कार्ये कर्मणि न तु वैदिकयज्ञदानादौ कृतत्वं वतनमया सर्वकर्म
कृतमनेनाधिकं किं विद्यतन्त्रात्सीमेवमयत्पफलेपिष्टावत्
सक्तविषयभोगाभिनिवेशयुक्तम् अहंतकेस्ताभाविनतशास्त्र
हेतोर्जीवनम् एतत्पवाननवार्यवतयज्ञजीवेशयोर्योयात्म्यस्वरूपा
यौनास्ति ततएवाल्पभृतविनायकाराधनरूपविषयत्वाद्दनि
तक्कचशाद्वैवेभृततानववानवक्फलत्वान्निःसमेसाविवेदवित
ईदृशमशास्त्रीयलौकिकेयज्ञानेनत्नामसेनमोगुणाश्रकम्वदाह्
तेषामवार्विद्भिः कथिते २२ ॥

मधुसूदनी टीका १० ॥

तशहोराजसादिनानिवद्धभूतकार्येषु विद्यमानेषु एकस्मिन्
कार्येभूतविकारे देहेयतिमादौवाग्रहेतकेदेहवरूपपतिस्तदहि
तेषुमेषाभूतकार्याणामात्मताभावेकथमेकस्यानादृशस्यात्म।
तमिमन्तसंधानस्यैसकृत्त्ववत् परिश्रणावत्सकेपलावानेवात्मा
ईश्वरोवा नातः परमस्तीत्यभिनिविशेनलग्नेययाद्दिगंवराणां।
सावयवो देहपरिमाणश्चात्मेति यथाचार्वाकाणां देहएवात्मेति
एवंपाषाणदार्वादिमात्रईश्वरइत्येकस्मिन्कार्येसक्तमहेतुकल्व
देवातत्वार्थवत् ननत्वार्थालेववनेप्यत्येव निश्छवविभुन्त्वाग्रहान्ई
दृशोनित्यविभुदेहादिरिक्ताव्मतत्यतिरिक्तेश्वरग्राहितार्किकज्ञानवि
लक्षणमनित्यपरिच्छिन्नदेहाद्यात्माभिमानरूपंचार्वाकादीनांयज्ज्ञा
नेतत्तामसमुदाहृतं तामसानांप्राकृतजनानामीदृशज्ञानेदर्शनं २२
[illegible]
[illegible]
[illegible] २२ ॥

सदानंदी टीका ११ ॥

श्री·
गी·टी·
अ·

110

भूतकार्येष्ववद्गुणविषमानेष्वनेकधा एकस्मिन्भौतिके देहे प्रति
मादौ विकारके १ अशेषां भूतकार्याणामात्मत्वाभावतः कथ्यप
कस्मादशास्त्राभावइत्यविचारतः २ परिशरणवदासक्तमेता
वानीश्वरोऽल्पकः आत्मावानःपरंनास्तीत्येवंचाभिनिवेशतः ३
दिगंबरमतेनयदुत्सावयवतयामतः आत्मादेहपरिमाणश्चा
वींकाणांयथाव३ः एवंपाषाणदार्वादिमात्रईश्वरोपिसंमतः
३एवास्मिंस्तदासक्तमेहेन्द्रकृत्येवच ५ तत्वार्थलवनेना
स्ति विभक्तार्थग्राहतया अल्पत्वाल्पविषयत्वादस्येनाल्पफल
त्वतः ६ एवंपचात्मिकादीनांज्ञानंतत्तामससंज्ञयैः प्राकृतानां
विमूढानांहेयत्वेनसूदाहृतम् ७ ॥ २२ ॥

नीलकंठी टीका २२ ॥

यत्तुज्ञानेनैकस्मिन्कार्ये देहेप्रतिमादौवा कृत्स्नवत्परिपूर्णमिव
देहात्मवादिनामीश्वरोयमिति सक्तमभिनिवेशयुक्तं अहैतुकं नि
रुपपत्तिकं अतत्वार्थवत्परमार्थावलंबनशून्यं अल्पंतुच्छ
विषयत्वादल्पफलत्वाच्च यदेवंभूतंज्ञानंतत्तामसमुदाहृतं २२

आनंदी टीका ३

अकृत्स्नवित् येनज्ञानेनकृत्स्नमुक्तप्रकारकं कर्मकरणैश्वी फ
दीनामेकं न ज्ञायते एकस्मिन्कस्मिंश्चित्कार्ये सुखसाधनेस
क्तमभिचारादौ अतत्वार्थवत् तत्वार्थःपरमार्थज्ञानेयत्रनवि
द्यते अल्पमदोविषयम् २२ ॥

रामकंठीटीका ४

तत्तामसंतमोगुणहेतुकंज्ञानमुदाहृतंशास्त्रेसुधीभिरितिम् किंतत्
तत्राह: सर्वस्माद्व्यतिरेकएव यदकृत्स्नवित् हिविषयीभूतंतेयसर्वमेकृ
त्स्नसकलंसर्वविशेषसंयुक्तंवेत्तीतिकृत्स्नवित्तस्मात्विकादि त
द्विपरीतमकृत्स्नवित्तामसं तथैकस्मिन्विषयेसुखसाधनभूतेक
स्मिंश्चित्कार्येसाध्येवस्तुनिसक्तंलीनं यदेवकिंचिदृष्टंसुखसाध
नमासादयति तत्रैवमुग्नतीत्यर्थः तथा हेतुकमुपपत्तिकारणम्
त्यंतामसं तथातत्वार्थवत्तत्वमात्मादिपरमार्थःसएवार्थोवस्तु

तत्त्वार्थः सविषयतेयस्य न तत्तत्त्वार्थवत् सात्त्विकादि तद्विपरीतं हि दमतत्त्वा
र्थवत् ह्यशरीरायवस्तु निष्टमित्यर्थः अल्पं च शील्पमर्थं [illegible] तद्धेतद्ज्ञा
नादिकारणभूतं तमोगुणसमुद्भूतत्वात्तद्विपरीतप्रत्ययहेतुत्वे
निकृष्टसंसारिविषयत्वात्तत्तामसं हेयम् अथ कर्मत्रिविधमाह २२

लासिकी [illegible]टीका

तामसंज्ञानमाह॥

एकस्मिन्कार्यभूते देहे प्रतिमादौ वा कृत्स्नवत्परिपूर्णवत्संसक्तं
ममेता वा नेवात्मा ईश्वरो वेत्यभिनिवेशेन लग्नं अहेतुकं निरुपपत्ति
कं अतत्त्वार्थवत्परमार्थावलम्बनशून्यं अत एवाल्पविषयत्वा
दल्पफलत्वाद्वाल्पं तुच्छं यदेवंभूतं ज्ञानं तत्तामसमुदाहृतम्
यथा चार्वाकादीनां [illegible]

२२ पंवोलीटीका

तामसं ज्ञानमाह यत्त्विति तु पुनः यज्ज्ञानमेकस्मिन्कार्ये देहे वहिः
प्रतिमादौ वा कृत्स्नवत् समग्रवत् सर्वविषयमिव सक्तं पत्नी वा नेवात्मा
ईश्वरो वा नातः परमस्तीति कृतनिश्चयं अहेतुकं युक्तिवर्जितं अतत्त्वा
र्थवत् यथाभूतार्थविषयं न भवति अल्पविषयत्वादल्पफलविष
यत्वाच्च अल्पं एवंविधं यत् ज्ञानं तत्तामसं २२

रणवीरसमिद्धोधिनी

तामसमाह यत्त्विति एकस्मिन्नेव कार्ये अन्येभ्यः कर्तव्येभ्यः सकाशा
देव यथावरणीये प्रधाने स्वधर्मे विषये कृत्स्नवत् साधारणकर्म
स्विव सक्तमभिनिवेशयुक्तं कोऽर्थः यथान्यानि सर्वसाधारणानि
तथा स्वधर्मेऽपि तत्त्वतीन्युत्पादकं क्वचिद्धि हिंसादोषः क्वचित्तु न
गुणः यत्तु तज्ज्ञानेन सर्वत्र पापबुद्धिरेव भवेत्तत्त्वाविधिप्रतिकृ
त्स्नवज्ज्ञानं तामसमिति अकृत्स्नवदिति पाठे तु कृत्स्नः साध्यसाध्या
नोपहार्यकारी तदन्योऽकृत्स्नो ब्राह्मणादिस्तद्वत् यथानेव यथानुष्ठे
यस्वधर्मे हिंसानन्यपापाभिनिवेशाकारकमित्यर्थः तथाहेतुकं

बुद्धिस्थत्वं प्रतत्वार्थवत् तत्वं सर्वोपरिवर्तमानः परमेश्वरस्तस्मै
मदं तत्वार्थं परमेश्वरप्रीणनार्थं मित्यर्थः ततो नञ्समासः
प्रतत्वार्थं सकामं कर्मवदति प्रतिपादयति यत् प्रतपवास्तं
फलेनविषयेणवात्यजत्यक्के यतार्थाञ्जानेनामसंन्यासिद्वहतं
कथितं पतत्वद्वेयं २२॥

मधुभाष्य

२२॥

भाषा अनुवाद

तामसज्ञान कहते हैं कि एक कार्य मे अर्थात् स्थूल शरीरमें अ
थवा प्रतिमा आदि मे सक्त कहे शरीरही आत्मा औ प्रतिमा हीई
श्वर है ऐसे निश्चय से युक्त और अहेतुक कहे युक्तिविरुद्ध औ प
रमार्थ अवलम्बन रहित जो ज्ञान उक्त कारणो से अल्प विषय अ
ल्प फल हेतु से तुच्छ है उस ज्ञान को शिष्टजनोने तामसरूप
निरूपण किया है २२ ॥

दोहा

जो सम वत इक कार्य में सक्त होत बिनहेत तत्वअर्थ बि
न तुच्छ जो सात्विक कहियत सेत २२

नियतंसंगरहितमरागद्वेषतःकृतं अ
फलप्रेप्सुनाकर्मयत्तत्सात्विकमुच्यते २३

शंकरभाष्य टीका १ ॥

अथ कर्मणो त्रैविध्यमुच्यते नियतमिति नियतं नित्यंसंगरहि
तमासक्तिवर्जितमरागद्वेषतः कृतं रागप्रयुक्तेन द्वेषप्रयुक्तेन
च कृतं तद्विपरीतं कृतमरागद्वेषतःकृतमफलप्रेप्सुना फलंप्रे
प्सतीतिफलप्रेप्सुः फलतृष्णस्तद्विपरीतेनाफलप्रेप्सुना कर्त्राकृ
तं कर्म यत्तत् सात्विकमुच्यते २३ ॥

आनंदगिरिकृत टीका २

त्रिविधं कर्म वक्तुमनन्तरश्लोकत्रयमित्याह अथेति तत्रसा
त्विकं कर्म निरूपयति नियत मिति २३ ॥

इदानीं त्रिविधं कर्माह –

स्वामिकृत टीका ३ ॥

नियतमितित्रिभिः नियतं नित्यतयाविहितं संगरहितमभि
निवेशशून्यं अरागद्वेषतः प्रवृत्तिमावाशत्रुद्विषेणवायत्कृ
तं न भवति फलंप्राप्तुमिच्छतीतिफलप्रेप्सुस्तद्विलक्षणेन नि
ष्कामेनकर्त्रायत्कृतंकर्मतत्सात्विकमुच्यते
२३ ॥

पिशाचभाष्य टीका ४

नियतंनित्यंसंगरहितंफलेच्छावर्जितमरागद्वेषतःकृतंशास्त्रचो
दितमित्यर्थः अफलप्रेप्सुनाकर्त्राकृतंकर्मयत्तत्सात्विकमुच्यते २३

एवंकर्तव्यकर्मविषयज्ञानस्याधिकारवेला
यामधिकार्यंशेनगुणतस्त्रैविध्यमुक्त्वा
ऽथैतस्यकर्मणोगुणतस्त्रैविध्यमा
ह ॥

रामानुजभाष्य टीका ५ ॥

नियतमिति नियतंवर्णाश्रमोदितंसंगरहितंकर्तृत्वादिसंगर
हितं अरागद्वेषतः कृतंकीर्तिरागादकीर्तिद्वेषाच्चनकृतंअदंभे
न कृतमित्यर्थः अफलाभिसंधिनाकार्यमित्येवकृतंयत्कर्मत
त्सात्विकंकर्मेत्युच्यते २३ ॥

अभिनवगुप्तकृत टीका ६

श्री
गी टी
भ्र

113

स्पष्टार्थं २३ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका ७

इदानीं त्रिविधं कर्माह नियतमिति त्रिभिः नियतं नित्यतया विहितं संगरहितमभिनिवेशशून्यं अरागद्वेषतः कृतं पुत्रेष्वात्मनि मानदंभादयार्थं शत्रुद्वेषेण तदपकर्षार्थं यन्न भवति फलप्राप्तिमिच्छतीति फलप्रेप्सुः तद्विलक्षणेन कृतं कर्म सात्त्विकमुच्यते २३ ॥

वनमाली टीका ८ ॥

कर्मत्रैविध्यमाह नियतमिति त्रिभिः नियतं यावद्देहोपसंहारासमर्थानामपि फलावश्यंभावव्याप्यं नित्यमिति यावत् असंगं संगो मदीयमिदं कर्मानेनेदं प्राप्स्याम्यहमित्यभिमानस्तद्रहितम् रागोनेन कर्मणा राजसंमानादि प्राप्स्यामीति बुद्धिः द्वेषः शत्रुमनेन नाशयिष्यामीत्यभिप्रायस्ताभ्यामकृतेन नयाप्यफलप्रेप्सुना फलेच्छारहितेन पुंसा यत्कृतं कर्म तत्सात्त्विकमुच्यते २३ ॥

ऊसमवैजयंती टीका ९ ॥

एवं कर्तृत्वकर्मानुष्ठानकाले कर्मणो विषयस्य ज्ञानस्याधिकारिभेदेन गुणतस्त्रैविध्यमुक्त्वेदानीमनुष्ठेयस्य कर्मणो गुणतस्त्रैविध्यमाह त्रिविधेष्वाद्यं सात्त्विकं कर्माह नियतमिति नियतं। स्ववर्णाश्रमविहितं संगरहितं कर्तृत्वाद्यभिनिवेशवर्जितं अरागद्वेषतः कृतं कीर्त्यादिरागात्कीर्त्यादिद्वेषाद्वा यन्न कृतं मदंभेन। कृतमित्यर्थः अफलप्रेप्सुना परमेश्वरार्चनबुद्ध्यैव फलेच्छारहितेन पुरुषेण कृतमीदृशं यत्कर्म भवेत्तत्कर्म सात्त्विकं न गुणमुक्तमुच्यते वेदविद्भिर्भण्यते २३ ॥

मधुसूदनी टीका १०

+नियतं यावद्देहोपसंहारासमर्थानामपि फलावश्यंभावव्यामेन नित्यमिति यावत् संगः अहमेवमहायास्तकस्मात्मभिमानरूपोहंकारापरपर्यायो राजसो गर्वविशेषः तेन शून्यं संगर

+तदेवमौपनिषदानामद्वैतानां मद्वैतात्मदर्शनं सात्त्विकमुपादेयं मुमुक्षुभिः द्वैतदर्शिनां तु नित्यविभुपरस्परविभिन्नात्मदर्शनं राजसं अनित्यपरिच्छिन्नात्मदर्शनं + तामसं हेयमुक्तं संप्रति त्रिविधं कर्मोच्यते ॥

हितेयावदत्तानेनकर्तृत्वभोक्तृत्वप्रवर्तितोहंकारोनवर्ततएव
वसात्विकसाधितदहितमसतनतविरोनकर्माधिकारइतिउक्त
मसत्कृत् रागोराजसेमानाश्विकमनेनेनलप्स्यइत्यभिप्रायः द्वेषः
शत्रुमनेनपराजेष्यइत्यभिप्रायःताभ्यांनकृतमरागद्वेषतःकृ
तं अफलप्रेप्सुनाफलाभिलाषरहितेनकर्त्रायत्कृतंकर्मयागा। नृ४.
दानहोमादितत्सात्विकमुच्यते २३ ॥

सदानंदी टीका ९ ॥

अहैतदर्शिनोज्ञानमुपादेयमुदीरितं तार्किकाणांनयादेयं
भेदज्ञानमनर्थदं १ तामसंतुच्छमप्येतेहेयंसहितकारणाद्
ग्रंथेत्रिविधंकर्मप्रोच्यतेहरिणाधुना २ नियमावश्यकंक
र्मरागोसक्तिविवर्जितं अनेनाहमिदंलप्स्यइत्याशयःस्मृ
तः ३ अनेनारिपुमेजेष्येद्वेषइत्याशयस्तयोः ताभ्यांनकृतं
मित्युक्तमरागद्वेषतःकृतं ४ फलाभिलाषशून्येनकर्त्राकर्म
हयत्कृतं यागदानादियाथोयंतत्सात्विकमुदाहृतं ५। २३ ॥

नीलकंठी टीका १२

अथकर्मत्रैविध्यमाह नियतमित्यादिना नियतंनित्यं संगरहि
तंअभिमानवर्जितं रागद्वेषौप्रीतिद्वेषौःनिष्टेःप्रीतिर्लाभात्क्रो
धेइष्टानिष्टप्राप्तिपरिहारार्थंकृतेरागद्वेषतःकृतं तदस्ररा
गद्वेषतःकृतंनिष्काममित्यर्थः फलावलीयतेचेतिफलं
क्रिययाप्राप्यमनात्मवस्तुतदस्यदफलमनागंतकंपरिहृ
र्तामविनाशिआत्मतत्त्वंतत्प्रेप्सुनाकृतंविविदिषितियज्ञेन
निष्कत्वात्मलाभार्थयज्ञादेर्विनियोगात् तत्कर्मसात्वि
कमुच्यते २३ ॥

आनंदीटीका १३

अथकर्मत्रैविध्यम् नियतमावश्यकंस्वजात्युक्तम् संग
रहितंलाभमजायर्थहीनम् २३ ॥

तत्कर्मसात्विकंसर्वंबहिर्मुखसत्वगुणहेतुकमभिधीयते किंतत
अफलप्रेप्सुनादृष्टादृष्टविषयसुखलिप्सारहितेनकर्त्रानिर्वर्त्य
ते कीदृशंनियतंवर्णाश्रमविभागेनावश्यकरणीयं तथासं
गेनोक्तलक्षणेनस्वत्वमतयैवसंगाभावात्तन्मूलरागद्वेषाभावेन
कृतंसंपादितं तदेतत्ज्ञानकारणभूतसत्वगुणोद्भूतत्वादपवर्ग
लक्षणोत्तमपुरुषार्थसाधनेयोगिविषयमुपादेयं २३

लासिकी [illegible]टीका

इदानींत्रिविधंकर्माह—नियतंनित्यतयाविहितं संगेनात्मनिष्ठत्वाभिमानविनत
याहितं अरागद्वेषतः पुत्रादिप्रीत्याशत्रुद्वेषेणवायत्कृतं
कर्मनभवति फलाभिलाषरहितेनकर्त्रायत्कृतंकर्म त
त्सात्विकमुच्यते [illegible]
२३

पंबोलीटीका

कर्मणांत्रैविध्येसात्विकंकर्माह नियतमिति यत्कर्मअफ
लप्रेप्सुनाफलकांक्षारहितेनसंगरहितंनियतंनित्यमेव एव
कर्तव्यंअरागद्वेषतः रागरहितेनद्वेषेणविनाकृतंतत्सा।
त्विकमुच्यते २३

रणवीरसमिद्धोधिनी

अथकर्मत्रैविध्यमाह नियतमिति नियतंशास्त्रचोदितं तथा
संगरागद्वेषाः पूर्वंव्याख्याताःतैरहितं फलाभिसंधिशून्येन
कर्त्रायन्निष्पाद्यते तत्कर्मसात्विकमुच्यते एतच्चोपादेयं २३॥

मधुभाष्य

२३॥

भाषा अनुवाद

अब इस श्लोक मे ले तीन श्लोक के द्वारा सकल कर्म्म को त्रिविध कहते है कि फलप्राप्तिकी इच्छाकरते है ऐसे जो फल के लोभी जनो से किये जाते है उन से भिन्न रूप निष्काम कर्म्म के अनुष्ठान करने वालो से नियत कहे नित्य रूप से विहित औ अभिनिवेश आशक्ति शून्य जो कर्म्म किये जाये और जो पुत्र आदिके प्रीत्यर्थ अथवा शत्रु पर क्रोध क्रमसे किये न होय ऐसे कर्म्म सात्विक है २३ ॥

दोहा

शास्त्रविहित संग रहित जो राग द्वेष बिन होय बिन फल
इच्छा कर्म जो सात्विक कहियत सोय २३

यत्तुकामेप्सुनाकर्मसाहंकारेणवापुनः
क्रियतेवहुलायासंतद्राजसमुदाहृतं २४

शांकरभाष्य टीका २ ॥

यत्त्विति यत्तु कामेप्सुना कर्मफलप्रेप्सुनेत्यर्थः कर्मसाहंका
रेणेति न तत्वज्ञानापेक्षया किंतर्हि लौकिकश्रोत्रियनिरहंकारा
पेक्षया योहिपरमार्थनिरहंकारआत्मवित्न तस्य कामेप्सुत्वव
हुलायासकर्तृत्वप्राप्तिरस्ति सात्विकस्यापि कर्मणोऽनात्मवित्
साहंकारः कर्ता किमुत राजसतामसयोर्लोकेऽनात्मविदपि श्रो
त्रियोनिरहंकारः उच्यते निरहंकारोयंब्राह्मणइति तस्मात्तद
पेक्षयैव साहंकारेणेत्युक्तं पुनःशब्दः पादपूरणार्थः क्रियते
वहुलायासं कर्म महतायासेन निर्वर्त्यते तत्कर्म राजसमु
दाहृतम् २४ ॥

आनंदगिरिकृत टीका २ ॥

राजसं कर्म निर्दिशति यत्त्विति फलप्रेप्सुना कर्त्रा यत् कर्म क्रि
यते तद्राजसमित्युत्तरत्र सम्बन्धः तत्वज्ञानवता निरहंकारेण
साहंकारेणानात्मज्ञेन क्रियते कर्मेति विवक्षां वारयति साहं
कारेणेति तत्वज्ञानवता निरहंकारेण कृतं कर्मापेक्ष्य साहंका
रेणानेन कृतमेतत् कर्मेति न विवक्ष्यते चेत्तर्हि किमत्र विवक्षि
तमिति पृच्छति किंतर्हीति योहि दुरितरहितः श्रोत्रियो लोकात्
नपेतस्तस्य यदहंकारवर्जितं कर्म तदपेक्षयेदं साहंकारेण कृतं
कर्मेत्युक्तमित्याह लौकिकेति नच तत्वज्ञानवतो निरहंकारस्य क
र्मकर्तृत्वमपेक्ष्य साहंकारेणेत्यादि किं नेष्यते तत्राह योहीति वि
शेषणान्तरवशात् तत्वविदो निवारितत्वात् तदपेक्षमिदं विशेष
णमित्यर्थः साहंकारस्यैव राजसे कर्मणि कर्तृत्वमित्येतत् कै
मुतिकन्यायेन साधयति सात्विकस्येति नन्वात्मविदस्तस्य निरहं
कारत्वायोगात् कथं तदपेक्षया साहंकारेणेत्युक्तं तत्राह लोकइति २४

श्री-
गी-टी-
पु.

+राजसंकर्माहयत्विति॥

स्वामिकृत टीका ३ ॥

+यत्तु कर्म कामेप्सुना फलं प्राप्तुमिच्छता साहंकारेण वा मत्तस्समः को
ऽन्यः श्रोत्रियोऽस्तीत्येवं निरूढाहंकारेण च क्रियते यच्च पुनर्बहु
लायासं अतिक्लेशयुक्तं तत्कर्म राजसमुदाहृतं २४ [illegible]

पैशाचभाष्यटीका ४ ॥

यत्तु कामेप्सुना फलार्थिना साहंकारेण कर्तास्मीति भावेन नापरमा
र्थज्ञानेन च बहुलायासं तद्राजसं २४ ॥

रामानुजभाष्यटीका ५ ॥

यदिति यत्तु पुनः कामेप्सुना फलप्रेप्सुना साहंकारेण वा शब्दश्चा
र्थे कर्तृत्वाभिमानयुक्तेन च बहुलायासं यत्कर्म क्रियते तद्राजसं
बहुलायासमिदं कर्म मयैव क्रियत इत्येवंरूपाभिमानयुक्तेन यत्।
कर्म क्रियते तद्राजसमित्यर्थः २४ ॥

अभिनवगुप्तकृत टीका ६ ॥

स्पष्टार्थं २४ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपाटी टीका ७

राजसमाह यत्त्विति कामेप्सुना फलं प्राप्तुमिच्छता साहंकारे।
ण मत्समः कोऽन्यः श्रोत्रियोऽस्तीति निरूढाहंकारेण कर्त्रा बहुला
यासमतिक्लेशेन यथा यत्कृतं तद्राजसं २४ ॥

वनमाली टीका ८ ॥

कामेप्सुना फलकामेन साहंकारेणाहमेव सम्यक् कर्म कर्तेति नि
श्चयेन वा शब्दः समुच्चये पुनरिति निपातः यावत्कामकाम्य।
साहंकृतेः बहुलायासं सर्वांगोपसंहारेण क्लेशावहं यत्काम्यं क
र्म क्रियते तद्राजसमुदाहृतं २४ ॥

अस्मत्तजयंती टीका ९

राजसं कर्माह यत्त्विति तत्पुनः कामेप्सुना फलाकांक्षिणा साहंकारेण वा
पुनः साहंकारेण कर्तृत्वाभिमानयुक्तेन प्रकर्षेण बहुलायासं बहु
तरक्लेशयुक्तं यत्कर्म क्रियते तत्कर्म राजसं रजोगुणयुक्तमुदाहृ

नेशास्त्रज्ञैः कथितम् २४ ॥

मधुसूदनी टीका ९

तुः सात्त्विकाद्भिन्नं कामेप्सुना फलकामेन कर्त्रा साहंकारे
ण प्रागुक्तसंगात्मकगर्वयुक्तेन वा शब्दः समुच्चये पुनरिति
क्रियते यावत्कामेन काम्याहेतोः बहुलायासं सर्वांगोपसंहारेण
क्लेशावहं यत्काम्यकर्म क्रियते तद्राजसमुदाहृतं अत्र सर्वविशे
षणैः सात्त्विकसर्वविशेषणव्यतिरेको दर्शितः २४ ॥

सदानंदी टीका ११ ॥

फलकामेन कर्त्रा पूर्ववृद्धेन वा कृतं यावन्निकामनाकाम्या
हेतोरनियते पुनः १ सकलांगोपसंहारात्क्लेशदं काम्यमथ कृतं
क्रियते कर्म यत्तद्राजसं समुदाहृतं २ सर्वैर्विशेषणैरत्र
सात्त्विकाद्दर्शिता भिदा ३ ॥ २४ ॥

नीलकंठी टीका १२ ॥

यत्तु कामेप्सुना फलार्थिना साहंकारेण यद्यपि सात्त्विको
ऽनात्मवित्साहंकारस्तथापि ब्रह्मैव कर्मकुशलो महान्
श्रोत्रियश्चेत्यभिमानी साहंकारस्तद्वता साहंकारेण वा शब्दश्चार्थे
क्रियते बहुलायासं प्रतिश्रमकरं तत्कर्म राजसमुदाहृतं २४

आनंदी टीका १२

कामेप्सुनैहिकामुष्मिकभोगेप्सुना साहंकारेण ब्रह्मा
र्पणबुद्धिं परित्यज्य शरीरादावहंभाववता यदस्मैर्महात्म
भिः कृतं तदहमपि कुर्वे इति गर्वेण च शरीरचित्तविक्षयया
यासभूयिष्ठं क्लेशावहं फलम् २४

रामकंठी टीका १४

अथ राजसं कर्माह तद्राजसं रजोगुणहेतुकं किं तद्यदैहिकामुष्मि
कभोगलिप्सुना तथा साहंकारेणात्मनि शरीरादावहंप्रत्यय

श्री· वताकर्त्राक्लेशबहुलं चित्तशरीरायाससंभूयिष्ठंक्रियतेतद्देतम
गी·टी· हृन्निहेतोः दुःखबहुफलाद्राजसः समुद्रतेनसंसारविषयत्वाद्
ग्र· हेयं २४ ॥

लाक्षिकी [illegible]टीका

राजसंकर्मीह— अनुबंधं पश्चाद्भाविशुभाशुभं क्षयं धनादिनाशं हिंसां प्राणिपीडां पौरुषं स्वसामर्थ्यमनवेक्ष्य पर्यालोच्य केवलं मोहादविवेकादेव यत्कर्मारभ्यते तत्तामससमुदाहृतं [illegible] २५

पंचोलीटीका

राजसंकर्माह यत्विति यत्कर्मकामेप्सुना वा पुनः साहं। कारेणसाभिमानेन बहुलायासेन महतायासेन क्रियते तद्वैविधं कर्मराजससमुदाहृतं २४ ॥

रगावीस्वामिहोयिनी

राजसमाह यत्विति फलमभिसंधाय च तथा साहंकारेण ममसमः कोन्यः स्त्येवं दम्भहेतभिमानसहितेन अथवा अहंकारः क्रोधकरणं तद्भावो अहंकारः क्रोधत्यागस्तत्सहितेन वा कर्त्रा यत्कर्मपरोचितं स्वोचितं वा क्रियते तद्राजसं कथितं कीदृशं क्लेशबहुलं चित्तशरीरायाससंभूयिष्ठं अतो हेयमेवेतत् २४

मधुभाष्य

२५॥

भाषा अनुवाद

और कर्म्मफल प्राप्ति का इच्छुक अथवा अहंकारी कहे जो अपने समान और को नही मानता है ऐसे अहंकारयुक्त मनुष्य से किये गये अथवा जो कर्म्म अति क्लेशयुक्त होय उन्ही को शिष्ट जन राजसस्वरूप कहते हैं २४ ॥

दोहा

जो अभिलाषि कर्म को कर अहंकार हि सोय क्लेश बहुत
है याहि में राजस कहिय सोय २४ ॥

118

अनुबंधं क्षयं हिंसामनपेक्ष्य च पौरुषं मो
हादारभ्यते कर्म यत्तत्तामसमुच्यते २५

शांकरभाष्य टीका १ ॥

अनुबंधमिति अनुबंधः पश्चाद्भावि यद्वस्तु सोऽनुबंध उच्य
ते तं चानुबंधं क्षयं यस्मिन् कर्मणि क्रियमाणे शक्तिक्षयोऽ
र्थक्षयो वा स्यात्तं क्षयं हिंसां प्राणिपीडां चानपेक्ष्य च पौरुषं पुरु
षकारं शक्नोमीदं कर्म समापयितुमित्येवमात्मसामर्थ्य
इत्येतानन्वंधादीननपेक्ष्य पौरुषांतानि मोहादविवेकत
आरभ्यते कर्म यत्तत्तामसं तमोनिर्वृत्तमुच्यते २५ ॥

आनंदगिरि टीका २ ॥

सम्प्रति तामसं कर्मोदाहरति अनुबंधमित्यादिना २५ ॥

स्वामिकृत टीका ३ ॥

तामसं कर्माह ॥
अनुबंधमिति अनुबध्यत इति अनुबंधं पश्चाद्भाविशुभा
शुभं क्षयं वित्तव्ययं हिंसां परपीडां च पौरुषं स्वसामर्थ्यं चा
नपेक्ष्यापर्यालोच्य केवलं मोहादेव यत्कर्मारभ्यते तत्तामसमुदा
हृतम् २५ ॥

पैशाचभाष्य टीका ४ ॥

अनुबध्यत इत्यनुबंधः कर्मणि क्रियमाणे येनानुसंबध्यते सोऽनुबं
धस्तमनपेक्ष्य कर्मनिमित्तां हिंसां पुरुषकारं चानपेक्ष्य मोहा
दज्ञानादारभ्यते तत्तामसं २५ ॥

रामानुजभाष्य टीका ५

अनुबंधमिति कृते कर्मण्यनुबध्यमानं दुःखमनुबंधः कर्म
णि क्रियमाणेऽर्थविनाशः क्षयः तत्र प्राणिपीडा आत्मनः कर्म
समापन सामर्थ्यं पौरुषं एतान्यनवेक्ष्याविमृश्य मोहात्
परमपुरुषकर्तृत्वाज्ञानात् यत्कर्म क्रियते तत्तामसमुच्यते
२५ ॥

अभिनवगुप्तकृत टीका ६

विभक्तेष्वेव मनुष्यादितया पृथक्त्वेन इदं मम प्रीति विद्धि मे द्वेष्य इत्यादिबुद्ध्या अहंतत्कं
कारणमविचार्यैव अभिनिवेशावेशवशात्क्रोधरागादिग्रहणं यत्तत्तामसं संज्ञं

नियतंकर्तव्यमिति क्लेशैरविद्याद्यैर्बहुलंवा मं मोहादभिनिवेशमयात्॥
स्पष्टार्थ २५ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका ७

नामसमाहअनुबंधमिति अनुबध्यतइत्यनुबंधःभावि शुभाशुभंतत्येवितत्वयंहिंसास्वपरपीडनंपौरुषंस्वसामर्थ्यं चअनपेक्ष्यअविगणय्यकेवलंमोहादेवयत्कर्मारभ्यतेतेनताम सं २५ ॥

वनमाली टीका ८

अनुबंधंपश्चाद्भाविशुभंतत्ये देहसामर्थ्यस्यधनादेश्चनाशं हिंसांप्राणिपीडांपौरुषमात्मसामर्थ्यमनपेक्ष्यानालोच्य मोहात्केवलादविवेकादेवारभ्यतेयत्कर्मतत्तामसमुच्यते २५ ॥

कृष्णवैजयंती टीका ९

तामसंकर्माह अनुबंधमिति अनुबंधंकृतेकर्मणि अनुप। श्चाद्भाव्यमानंदुःखमनुबंधंराजभटयमभटादिकृतंव्ययं कर्मणिक्रियमाणेधर्मार्थादिविनाशं हिंसांकर्मणिक्रियमा णेप्राणिपीडांचपौरुषंस्वस्यकर्मसमापनसामर्थ्यमनवे क्ष्याविविच्यमोहात्अहंतेच्छकर्तृत्वाभिनिवेशात्यत्कर्मारभ्यते तमोगुणप्रकृतेनजनेनक्रियतेतत्कर्मतामसंतमोगुणप्रकृत दाहृतमेवेदंविज्ञिकृतम् २५ ॥

मधुसूदनी टीका १०

अनुबंधंपश्चाद्भाविशुभंक्षयंशरीरसामर्थ्यस्यधनस्यसेना याश्चनाशं हिंसांप्राणिपीडांपौरुषमात्मसामर्थ्यंचानपेक्ष्य अपर्यालोच्यमोहात्केवलादविवेकादेवारभ्यते यत्कर्मयथा दुर्योधनेनयुद्धंतत्तामसमुच्यते [illegible] २५

सदानंदी टीका ११

पश्चाद्भाव्यशुभंदेहसामर्थ्यस्यधनस्यच विनाशंप्राणिनोपी डामात्मसामर्थ्यमेवच । अपर्यालोच्यमोहाद्यत्केवलादविवे कतः आरभ्यतेजडैःकर्मतत्तामसमुदाहृतम् २॥ २५ ॥

नीलकंठी टीका १२

अनुबध्यतेनेनेत्यनुबंधः फलं तं क्षयं शक्तेरर्थस्य च नाशं हिंसां परपीडां पौरुषं स्वसामर्थ्यं अनपेक्ष्य अनालोच्य केवलं मोहादविवेकतो यदारभ्यते कर्म तत्तामसमुदाहृतं २५

आनंदीटीका १३

अनुबंधं फलं शुभमशुभं वेत्यनवेक्ष्याविचार्य तथा क्षयं द्रव्यादिव्ययं हिंसां परपीडां पौरुषं स्वसामर्थ्यं चानवेक्ष्य मोहाद्विपरीतज्ञानाद्यदारभ्यते तत्तन्निर्वाह्यते तत्तामसमुच्यते २५

रामकंठी टीका १४

अथ तामसं तत्तामसं तमोगुणहेतुकं कर्म किं तद्यन्मोहादारभ्यते कर्तुं प्रक्रम्यते कथमिदं क्रियमाणं किमर्थमनुबध्नाति प्रस्नाति किं वा क्षयमपचयमस्मिन् क्रियमाणे कस्य हिंसोपघातः सम्पत्स्यत इत्यनुबंधं क्षयं हिंसां चानवेक्ष्याविचार्यैव यत्तदपि मोहादज्ञानप्रमादकारणभूततमःसमुद्भवत्वात्त्रिकष्टतमं संसारविषयं सततं हेयमेव [illegible]

[illegible] २५ ॥

लासिकी [illegible] टीका

अथ त्रिविधः कर्तोच्यते तत्र सात्त्विकस्तावत् ॥

अनुबंधं पश्चाद्भाविशुभाशुभं क्षयं धनादिनाशं हिंसां प्राणिपीडां पौरुषं स्वसामर्थ्यमनवेक्ष्यापर्यालोच्य केवलान्मोहादविवेकादेव यत्कर्मारभ्यते तत्तामसमुदाहृतं [illegible]

[illegible] २५

पंचोलीटीका

तामसं कर्माह अनुबंधमिति यत्कर्म अनुबंधं पश्चाद्भाविशुभाशुभं वस्तुतः क्षयं यस्मिन् कर्मणि क्रियमाणे शक्तिक्षयोऽर्थक्षयो वा स्यात् तं हिंसां प्राणिपीडां च अनपेक्ष्य पौरुषं स्वकीयसा

गी॰ टी॰ ग्र

मर्थं एतच्चतुष्टयमनपेक्ष्य केवलं मोहादविवेकादारभ्यते
तत्तामसं २५

रणवीरसमित्रोदयिनी॥

तामसं कथयति अनुबंधमिति एतत्क्रियमाणं कर्म किं शुभा
शुभं फलमनुबध्नाति पुष्णाति किं वा दीपयति कस्य वा हिं
सायै उपघाताय भवतीत्येवं प्रकारेणानुबंधं क्षयं हिंसां त
था स्वस्य परस्य च पौरुषं सामर्थ्यं वा पर्यालोच्यैव केवलं मो
हादेव यत्कर्मारभ्यते कर्तुं प्रक्रम्यते तत्तामसमुदाहृतमिति
सर्वं एतदत्यनिष्टफलकत्वाद्धेयमेव २५॥

मधुभाष्य

२५॥

120

भाषा अनुवाद

अव तामसकर्म कहतेहैं कि पश्चात् बन्ध करैं ऐसे अनुव न्य कहे पश्चात् भावी शुभ अशुभ और धन व्यय और अपा नी सामर्थ्य न विचारि केवल मोह से जो कर्म आरम्भ किये जाये वेई तामस कर्म है २५ ॥

दोहा

हिंसा क्षय अनुबंधको पौरुषको विनजान कर्म प्रारंभ
मोहसें तामस सो हि वषान २५

121

मुक्तसंगोनहंवादी धृत्युत्साहसमन्वितः
सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्विक उच्यते
२६ ॥

शांकरभाष्य टीका १

मुक्तेति मुक्तसंगो मुक्तः परित्यक्तः संगो येन स मुक्तसंगो
ऽनहंवादी नाहं वदनशीलो धृत्युत्साहसमन्वितो धृतिर्धारणम्
उत्साह उद्यमस्ताभ्यां समन्वितः संयुक्तो धृत्युत्साहसमन्वितः
सिद्ध्यसिद्ध्योः क्रियमाणस्य कर्मणः फलसिद्धावसिद्धौ च सिद्ध्य
सिद्ध्योः निर्विकारः केवलं शास्त्रप्रमाणप्रयुक्तः फलरागादिनाप्र
युक्तो यः स निर्विकार उच्यते एवंभूतः कर्ता यः सात्विक उच्यते २६

आनंदगिरि टीका २

इदानीं कर्तृत्रैविध्ये प्रवक्तव्ये सात्विकं कर्तारं दर्शयति मु
क्तेति संगो नाम फलाभिसंधिर्वा कर्तृत्वाभिमानो वा नाहंवद
नशीलः कर्ताहमिति वदनशीलो न भवतीत्यर्थः धारणं धै
र्यं क्रियमाणस्य कर्मणो यदि फलसिद्धिस्तर्हि नास्य ज्ञान
विभ्रमः न भवेदित्याशंक्याह केवलमिति फलरागादिने
त्यादिशब्देन कर्मरागो गृह्यते प्रयुक्त इतिच्छेदः २६ ॥

स्वामिकृत टीका ३

कर्तारं त्रिविधमाह मुक्तसंग इति त्रिभिः मुक्तसंगस्त्यक्ताभि
निवेशः अनहंवादी गर्वोक्तिरहितः धृतिर्धैर्यम् उत्साह उद्य
मस्ताभ्यां समन्वितः संयुक्तः प्रारब्धस्य कर्मणः सिद्धावसि
द्धौ च निर्विकारो हर्षविषादशून्यः एवंभूतः कर्ता सात्विक उच्य
ते ॥

पिशाचभाष्य टीका ४

मुक्तसंगः मुक्तफलस्पृहः अनहंवादी आत्मानं संभावितेन वद

श्री॰ तिष्ठति ग्राम्यतः सेवारत्नप्रज्ञाहः अपत्कः ताभ्यामन्वितोऽथ नु
गी॰ टी॰ त्साहसमन्वितः सिद्ध्यसिद्ध्योःसिद्ध्यसिद्धीनयोर्निर्विकारः
अ॰ हर्षविषादरहितः कर्ता सात्विकः २६ ॥

रामानुजभाष्यटीका ५

122 मुक्तसंग इति मुक्तसंगः फलसंगरहितः अनहंवादी कर्तृत्वा
भिमानरहितः धृत्युत्साहसमन्वितः आरब्धकर्मणि यावत्समाप्त
वर्जनीयेदुःखपारंणं धृतिः उत्साहस्तूद्यमश्चेतस्ताभ्यां समन्वि
तः सिद्ध्यसिद्ध्योर्निर्विकारः युद्धादौ कर्मणि तदुपकरणाभूत
द्रव्यार्जनादिषु च सिद्ध्यसिद्ध्योरविकृतचित्तः कर्ता सात्विक उच्यते २६

+ अहं करोमीति न वदितुं शीलमस्य इत्थंभूतः साधुकारी वा यो भवति सो नाहंवादी त्वनेनाणि
निनावव्यवहारमात्रसंहतिवशेन योगिनोऽप्यहं करोमीति
वचो न निषिद्धम् हर्षशो
कान्वितः सिद्ध्यसिद्ध्योः ॥

अभिनवगुप्तकृतटीका ६ ॥

स्पष्टार्थः २६ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका ७

अथ त्रिविधं कर्तारमाह मुक्तसंगइत्यादित्रिभिः मुक्तसंगस्त्य
क्ताभिनिवेशः अनहंवादी गर्वरहिताचाररहितः धृतिर्धैर्यमुत्सा
हः धृत्युद्वेगताभ्यां समन्वितः सिद्धावसिद्धौ वा निर्विकारः ह
र्षविषादरहितः एवंभूतः कर्ता सात्विकः २६ ॥

वनमाली टीका ८ ॥

कर्तृभेदं विभजमाह मुक्तेति त्रिभिः मुक्तसंगः फलेच्छारहितः
अनहंवादी कर्ताहमिति वदनशीलो न भवति धृतिर्विघ्नोपाद्युप
स्थितावपि प्रारब्धपरित्यागहेतुश्चित्तवृत्तिर्धैर्यमुत्साहः इदं क
रिष्यामीति निश्चयात्मिका बुद्धिः ताभ्यां समन्वितः क्रियमाण
कर्मफलस्य सिद्धावसिद्धौ च हर्षशोकाभ्यां हेतुभ्यां विकारो वदन
विकासम्लानत्वादिस्तेन रहितः सिद्ध्यसिद्ध्योर्निर्विकारः एतादृ
शः कर्ता सात्विक उच्यते २६ ॥

ज्ञानमवैजयंती टीका ९

अथ कर्तृभेदं त्रिविधं त्रिभिर्विवक्षुरादौ सात्विकं कर्तारमाह मुक्तसंगइ
ति मुक्तसंगः स्वकर्तृत्वाभिनिवेशफलाकांक्षारहितः अनहंवा

(122

दीश्च सहायोऽहमेवेदं सर्वं कर्म करवं मया करोम्यतोऽपि करिष्या
मीति स्वगर्वोक्तिरहितः धृत्युत्साहसमन्वितः धृतिरारब्धकर्म
समाप्तिपर्यंतमावर्जनीयदुःखसहिष्णुता उत्साहः कर्मानुष्ठानोद्य
तचित्तता धृतिश्चोत्साहश्चैताभ्यां समन्वितो युक्तः सिद्ध्यसिद्ध्योः
पत्रदानग्रहादेः कर्मणामनुष्ठापनम् तदुपार्जनादेरानुषंगिक
स्य तत्फलस्य च सिद्धौ प्राप्तावसिद्धावप्राप्तौ च निर्विकारः विकृतचि
त्तः हर्षेण विषादेन च रहित इत्यर्थः ईदृशः कर्ता सात्त्विकः सत्त्व
गुणान्वित उच्यते कथ्यते २६ ॥

\+ इदानीं त्रिविधः कर्तोच्यते ॥

मधुसूदनी टीका ॥

\+ मुक्तसंगः मुक्तः फलाभिसंधिः अनहंवादी कर्ताहमिति न वद
नशीलो भवति स्वगुणश्लाघावादी नो वा धृतिः विघ्नाद्युपस्थिता
वपि प्रारब्धापरित्यागहेतुरंतःकरणवृत्तिविशेषो धैर्यं उत्साहः इ
दमहं करिष्याम्येवेति निश्चयात्मिका बुद्धिः धृतिहेतुभूताभ्यां
संयुक्तः धृत्युत्साहसमन्वितः कर्मणः क्रियमाणस्य फलस्य सि
द्धौ च सिद्धौ च हर्षशोकाभ्यां हेतुभ्यां यो विकारः वदनविकास
म्लानत्वादिः तेन रहितः सिद्ध्यसिद्ध्योर्निर्विकारः केवलं शा
स्त्रप्रामाण्यप्रयुक्तो न फलरागेण यः तः एवंभूतः कर्ता सात्त्विक उच्यते
२६ ॥

सदानंदी टीका ॥ ॥

इदानीं त्रिविधः कर्ता प्रोच्यते हरिणा त्रिभिः फलाभिसंधिशून्यो
योऽहं कर्तेति मतिवर्जितः १ तेन मुक्तश्च गुणश्लाघो नहंवादीति वेदि
तः विघ्नाद्युपस्थितौ समारब्धापरित्यागकरणं २ चित्तवृत्तिविशे
षो हि धृतिर्धैर्यमितीर्यते अवश्यं साधयिष्यामीत्येवं धीर्निश्चया
त्मिका ३ धृतिकारणमुत्साहस्ताभ्यां संयुक्त उत्तमः कर्मणः क्रि
यमाणस्य सिद्ध्यसिद्ध्योः फलस्य यः ४ विकारो हर्षशोकाभ्यां वि
कासम्लानको मुखे तेन मुक्तस्तु शास्त्रप्रामाण्यप्रयुक्तो न रागवान्
५ एवंभूतो महाभागः कर्ता सात्त्विक उच्यते ६ ॥ २६ ॥

श्री
गी टी
अ

123

नीलकंठी टीका १२

कर्तृत्रैविध्यमाह मुक्तेत्यादिना मुक्तसंगस्त्यक्ताभिनिवेशः अनहंवादी गर्वोक्त्या अहंकारोक्तिरहितः धृतिर्धैर्य उत्साह उद्यमस्ताभ्यामेव तदुत्साहनिश्चयः ताभ्यां समन्वितः सिद्ध्यसिद्ध्योः कर्मण आरब्धस्येति शेषः निर्विकारः हर्षविषादशून्यः कर्ता सात्विक उच्यते २६ ॥

आनंदी टीका १३

कर्ता कर्मानुष्ठाता मुक्तसंगः त्यक्तसंगो दृष्टे चादृष्टे च कर्मफले नासक्तः अनहंवादी यन्मया कृतं तत्कोऽन्यः कर्तुं शक्नुयादिति विकत्थनशून्यः धृतिः आरब्धस्य कर्मणः समाप्तिं यावत्स्थैर्यं उत्साह उद्योगः सिद्ध्यसिद्ध्योर्निर्विकारः हर्षशोकशून्यः २६

+अथ त्रिविधः कर्तोच्यते तत्र सात्विकस्तावत् ॥

रामकंठी टीका १४

+ईदृशः कर्ता कर्मणामनुष्ठाता सात्विक उच्यते सात्विकचित्तत्वात् कर्ता सात्विक इत्युपदिष्टः मुक्तः ईदृशो मुक्तसंगो मुक्तः परित्यक्तः संगः संसारतरुबीजभूतो व्याख्यातरूपो दोषो येन यतो नहंवादी देहरूपमनित्यमर्थमात्मत्वेन प्रतिपद्याहं यज्ञामीत्यादियो वदति सोऽहंवादी सर्वः संसारिजनस्तद्विपरीतो नहंवादी शरीरादिषु
हं॰
१५
नात्मभूतेष्वर्थेषु निरहंकारस्तथा धृत्या वक्ष्यमाणलक्षणया अनुष्ठेयवस्तुफलावष्टम्भशक्त्या तथोत्साहेनोद्योगेन समन्वितः अत एव सिद्धौ फलनिष्पत्तावसिद्धौ तदनिष्पत्तौ च हर्षशोकलक्षणविकाररहितः ईदृशः कर्ता सत्वज्ञानिहेतोः पूर्ववत् क्लिष्टसात्विकगुणस्य मंत्रत्वप्राप्तिहेतुत्वादुपादेयम् अथ राजसः २६

+अथ त्रिविधः कर्तोच्यते तत्र सात्विक
स्तावत् ॥

तामसकी टीका

+मुक्तस्त्यक्तः संग आसक्तिर्येन सः विरक्त इत्यर्थः देहाद्यभिमानाभावादनहंवादी अहमहमिति गर्वोक्तिरहितः धृत्यादार्ढ्ये नोत्साहेनोद्यमेन च समन्वितः तथारब्धकर्मणः फलस्यासि

द्भावसिद्धौवानिर्विकारोहर्षविषादशून्यः एवंभूतःकर्तासात्विक
उच्यते [illegible] २६

पंबोलीटीका

कर्तृत्रैविध्येसात्विकंकर्तारमाह मुक्तसंगइति मुक्तसंगःमुक्त
फलासंगःअनहंवादीनाहंवदनशीलःधृत्युत्साहसमन्वितःधैर्य
प्रयत्नाभ्यांसमन्वितःसिद्ध्यसिद्ध्योर्निर्विकारःफलसिद्धावसिद्धौचनि
र्विकारःप्रीतिद्वेषरहितःएवंविधःकर्तासात्विकउच्यते २६॥

रमावीरसमिद्धोधिनी

कर्तृत्रैविध्यंप्रतिपादयंस्तत्रसात्विकंकर्तारंलक्षयति मुक्तसंगइ
ति प्रायशोव्याख्यातार्थःश्लोकः किंतु नहंवादी परमेश्वरस्यैवसर्वत्र
स्वातंत्र्यमित्यभिमानान्निरहंकारः यद्वा नअहंवादी किंतुहंवादी
क्रोधपूर्वमेवप्रतिपन्नंसंबोधयन्निति प्रकृतार्थानपुरणोधः २६॥

मधुभाष्य

२६॥

124

125

भाषा अनुवाद

इस श्लोक से ले तीन श्लोक से कर्मकर्ता सब को त्रिविध करके कहते
हैं कि कर्म्म अनहंवादी पुरुष कर्तृत्व अभिनिवेश बुद्धि रहित औरग
र्ववचन रहित औ धैर्य उत्साह जो उद्यम इन दोनो के द्वारा युक्त
समस्त कर्म्म मे सिद्धि असिद्धि की अपेक्षा हर्ष विषाद शून्य होय
ऐसे कर्ता पुरुषो की सात्विकस्वरूपकहतेहै २६ ॥

दोहा

बिना संग अहंकार बिन धृति उत्साह समेत विकार बिना
सिद्धि असिद्धि मे सात्विककर्ता कहेत २६ ॥

125

(124)

रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः
हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः २७

शांकरभाष्य टीका १ ॥

रागीति रागी रागोऽस्यास्तीति रागी कर्मफलप्रेप्सुः कर्मफला
र्थी लुब्धः परद्रव्येषु संजाततृष्णः तीर्थादौ च स्वद्रव्यापरित्यागी
हिंसात्मकः परपीडकस्वभावः अशुचिर्बाह्याभ्यन्तः शौचवर्जितो ह
र्षशोकान्वितः इष्टप्राप्तौ हर्षोऽनिष्टप्राप्तौ विष्टवियोगे च शोक
स्ताभ्यां हर्षशोकाभ्यां समन्वितः संयुक्तः तस्यैव च कर्मणः सम्प
त्तिविपत्त्योर्हर्षशोकौ स्यातां ताभ्यां समन्वितः संयुक्तो यः क
र्ता स राजसः परिकीर्तितः २७ ॥

आनंदगिरि टीका २

राजसं कर्तारं कथयति रागीति कर्मविषयो रागः कर्मफलप्रे
प्सुरिति फलरागस्य पृथक्कथनात् स्वाभिप्रायप्रकटीकरण
मेवेके परपीडने परवृत्तिविच्छेदनेन स्वार्थपरश्चार्थः २७ ॥

स्वामिकृत टीका ३

राजसं कर्तारमाह ॥

रागीति रागी पुत्रादिप्रीतिमान् कर्मफलप्रेप्सुः कर्मफलकामी लु
ब्धः परस्वाभिलाषी हिंसात्मको मारकस्वभावः अशुचिः विहि
तशौचशून्यः लाभालाभयोर्हर्षशोकाभ्यामन्वितः कर्ता राजसः
परिकीर्तितः २७ ॥

पिशाचभाष्य टीका ४

रागी रागोऽस्यास्तीति रागी लुब्धः दातृत्वगुणवर्जितः हर्षशोकाभ्या
मन्वितः हर्षशोकान्वित एवंभूतः कर्ता राजसः २७ ॥

रामानुजभाष्य टीका ५

रागी कर्मैतिरागी यशःप्रीतिमान् कर्मफलप्रेप्सुः कर्मफलार्थी लुब्धः
कर्मापेक्षितद्रव्यव्ययस्वभावरहितः हिंसात्मकः परान्पीडयित्वा
नैःकुर्वाणः अशुचिः कर्मापेक्षितशुद्धिरहितः हर्षशोकान्वितः यु

श्री गी॰ टी॰ ग्र॰

126

द्यादेःकर्मणिविजयादिसिद्ध्यसिद्ध्योर्हर्षशोकान्वितःकर्ताराज
सःपरिकीर्तितः २७ ॥

अभिनवगुप्तकृत टीका ६

स्पष्टार्थः २७ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका ७

राजसमाह रागीति रागी पुत्रादिष्वीमान् कर्मफलप्रेप्सुः कर्म
फलकामी लुब्धः स्वगृहस्वलेपटः सर्वहिंसात्मकः हिंसायांमा
मांमनोयस्य सः अशुचिः शौचरहितः लाभालाभयोर्हर्षशोकाभ्या
मन्वितःकर्ताराजसः २७ ॥

वनमाली टीका ८ ॥

रागीकामाद्याकुलचित्तः अतएवकर्मफलप्रेप्सुःलुब्धःपर
द्रव्याभिलाषीयतीर्थेस्वद्रव्यत्यागासमर्थश्चपरहननिच्छेदनेहिं
सात्मकोऽशुचिःशास्त्रोक्तशौचहीनःसिद्ध्यसिद्ध्योःकर्मफल
स्यहर्षशोकान्वितःकर्ताराजसःपरिकीर्तितः २७ ॥

अस्मद्वैजयन्ती टीका ९

राजसंकर्तारमाहरागीतिरागीपुत्रधामदारपश्वादिष्वासक्त
चित्तःकर्मफलप्रेप्सुः इहामुत्रचैव स्वर्गेन्द्रादिभोगरूपकर्मफल
स्पृहयालुःलुब्धः कर्मापेक्षितद्रव्यपरिहितःहिंसात्मकःपराप्र
पीडकर्मकुर्वाणः अशुचिः कर्मापेक्षितशुद्धिशून्यःहर्षशोका
न्वितःकर्मणातत्फलस्यवाप्राप्तौहर्षःअप्राप्तौशोकस्ताभ्यामन्वि
तोयुक्तः ईदृशःकर्ताराजसोरजोगुणात्मकःपरिकीर्तितोभगव
तामयाशास्त्रकृद्भिश्चविशेषतः २७ ॥

मधुसूदनी टीका ९

रागीकामाद्याकुलचित्तःअतएवकर्मफलप्रेप्सुःकर्मफलार्थी
लुब्धःपरद्रव्याभिलाषीयतीर्थेस्वद्रव्यत्यागासमर्थश्चस्वाभिप्रा
यप्रकटनेनपरहननिच्छेदनेहिंसातदात्मकस्तत्स्वभावःस्वाभिप्रा
याप्रकटनेननैकृतिकरनिर्भरः अशुचिः शास्त्रोक्तशौचहीनः

सिद्ध्यसिद्ध्योः कर्मफलस्य हर्षशोकान्वितः एवंविधः कर्त्ता रा
जसः परिकीर्तितः २७ ॥

सदानंदी टीका ११ ॥

कामाद्याकुलचित्तोयः फलार्थी कर्मणः सदा परद्रव्याभि
लाषी स्वतीर्थेपि मत्कमदनमः १ स्वाशयोद्घाटनेनान्यहत्ति
केदनशीलवान् शास्त्रोक्तशौचरहितः सिद्ध्यसिद्ध्योः फल
स्य च हर्षशोकान्वितः कर्त्ता राजसः परिकीर्तितः १ २७ ॥

नीलकंठी टीका १२ ॥

रागी विषयलोलुपः अतएव कर्मणः फलंप्रेप्सुरितिकर्मफ
लप्रेप्सुः लुब्धः परद्रव्यादौ संजाततृष्णः स्वतीर्थादौ स्वद्रव्यापरि
त्यागी हिंसात्मकः परपीडाकरस्वभावः अशुचिर्बाह्याभ्यंतरशौ
चवर्जितः इष्टानिष्टप्राप्तौ हर्षशोकान्वितः एवंविधः कर्त्ता रा
जसः परिकीर्तितः २७ ॥

आनंदीटीका १३

रागी विषयेषु प्रीतिमान् लुब्धो द्रव्यभीरुः २७ ॥ प॰८

रामकंठीटीका १४

ईदृशः कर्त्ता राजसः सर्ववद्रजोगुणात्मकः कथ्यते कीदृशो
रागी विषयस्तेवेष्वभिलाषवांस्तथा कर्मफलप्रेप्सुः क्रियमाण
स्य कर्मणो यज्ञादेः फलमनित्यं स्वर्गभोगादिरूपं लिप्सुः तथा लु
ब्धो गर्ववान् तथा हिंसात्मकः प्राणिद्रोहपरायणः तथा अशुचिः
बाह्याभ्यन्तरशौचरहितः तथा फले कालम्बन चिंतत्वात् तल्लब्धिसं भवासं
भवाभ्यां परितोषविषादाभ्यां युक्तः एतादृशः कर्त्तात्वं लोभादिदोष
कारणभूतरजोगुणसमन्वितत्वात् संसारविषयेहेयं अयत्नात्मनः २७

लाक्षिकी[illegible]टीका

राजसं कर्तारमाह ॥

रागी विषयाभिलाषवान् कर्मफलंलिप्सुः लुब्धः परस्वाभिला

पा

गी॰ षी हिंसात्मकोमारस्वभावः अशुचिर्बाह्याभ्यंतरशौचरहि
टी॰ तः फलसिद्ध्यसिद्ध्योर्हर्षशोकाभ्यामन्वितः एवंविधः कर्ता रा
ग्रं॰ जसः परिकीर्तितः [illegible] २७

पैवोलीटीका

राजसं कर्तारमाह रागीति रागी कर्मण्यासक्तियुक्तः कर्म
फलप्रेप्सुः कर्मफलेषु लुब्धः परद्रव्यादिषु संजातनरसामीप्या।
ऐसद्रव्यापरिमागी हिंसात्मकः परपीडाकरस्वभावः अशुचिः
बाह्यांतरशौचवर्जितः हर्षशोकान्वितः इष्टप्राप्तौ हर्षः इष्टवि
योगे शोकः ताभ्यां युक्तः अथवा कर्मसंपत्तिविपत्त्योर्हर्षशो
कसंयुक्तः एवंविधः कर्ता राजसः परिकीर्तितः २७

रणावीरसमिश्रोधिनी

राजसं कर्तारमाह रागीति रागी विषयस्वर्वेष्वभिलाषवान्
पुत्रमित्रादिविषयकप्रेमणाक्रांतचित्तो वा तथा कर्मफलप्रेप्सुः
क्रियमाणस्य कर्मणो यज्ञादेः फलमनित्यं स्वर्गभोगादिकं
प्राप्तुमिच्छन् तथा लुब्धः परस्वाभिलाषी तथा हिंसात्मकः
विशुद्धस्य स्ववर्णोचितस्य धर्मस्य परित्यागेनोपजातो हिंसा
तत्रात्मा बुद्धिरंतःकरणं यस्य परधर्मस्वीकारेण स्वधर्मस्य
पीडनं हिंसा तन्निवर्तक आत्मा यत्नो यस्येति वा तथा अशुचिरप
वित्रांतःकरणादिकः यद्वा सर्वं पात्रम्युत्पन्नेन शरीरस्थौ णादि
केन च प्रत्ययेन चानुत्पन्नः अशुचिः शोकः ननु वक्तव्याणां नियः
शोको यस्येत्यशुचिर्वा तत्र चित्तशुद्ध्यादि शोकं जवीणहृत्यर्थः यद्वा
पावकेऽशुचिः मासमात्यवाप्युपयेष्वसिमेध्येति ते शिक्षितिनामा
नुष्ठानात् अशुचिर्निः सविवेकः सविवेको वा तथा जयपराज
ययोर्विषये हर्षशोकाभ्यां सहितः ईदृशः कर्ता राजस उच्यते २७॥

ਸਪੁਮਾਛ

੨੭॥

137/2

भाषा अनुवाद

औरपुत्र आदि मे स्नेह युक्त औ कर्मफल का कामी और पर धन का अभिलाषी औ निर्दयस्वभाव औ शौच रहित औ हानि लाभमे शोक हर्ष युक्त कर्मकारी मनुष्य राजस स्वरूप कहे रजोगुणी है २७ ॥

दोहा

अनुरागी फलकांक्षि जो लोभी पापी अशुद्ध हर्षशोकयुत
कर्ता तिह कहहु हे राजस बध २७

128

अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोलसः
विषादी दीर्घसूत्री च कर्त्ता तामस उच्यते २८

शांकरभाष्य टीका १॥

अयुक्त इति अयुक्तोः समाहितः प्राकृतोत्यन्तासंस्कृतबुद्धिः
प्रकृतिपरवशो बालिशः स्तब्धो दंडवत् न नमति कस्मैचित् शठः
मायावी शक्तिगूहनकारी मायाभावैः कृतिकः परवृत्तिच्छेदनप
रः अलसोऽप्रवृत्तिशीलः कर्तव्येष्वपि विषादी सर्वदा अवसन्न
स्वभावः दीर्घसूत्री च कर्तव्यानां दीर्घप्रसारणः सर्वदा मंदस्व
भावः यदद्य श्वो वा कर्तव्य तन्मासेनापि न करोति यश्चैवंभूतः
स कर्त्ता तामस उच्यते २८ ॥

आनंदगिरि टीका २

दीर्घं सूत्रयितुं शीलमस्येति व्युत्पत्तिं गृहीत्वा विवक्षितमर्थ
माह कर्तव्यानामिति एवं क्रियमाणे सति अनिष्टमिदं क
थंचिदापद्येत यदा पुनरेवं क्रियते तदा त्विष्टमेव संभावनो
पनीतमिति चिंतापरम्परया मन्थरवृत्तिरित्यर्थः तदेव स्पष्ट
यति यदद्येति २८ ॥

+ नामसंकर्तारमाह॥

स्वामिकृत टीका ३

+अयुक्तोऽनवहितः प्राकृतो विवेकशून्यः स्तब्धः अनम्रः शठः
शक्तिगूहनकारी नैष्कृतिकः परावमानी अलसोऽनुद्यमशी
लः विषादी शोकशीलः यदद्य श्वो वा कार्यं तन्मासेनापि न संपा
दयति यः स दीर्घसूत्री एवंभूतः कर्ता तामसः कर्तृत्रैविध्येने
वक्तव्यात्तत्रापि त्रैविध्यमुक्तं वेदितव्यं कर्मत्रैविध्येन वक्तव्ये यस्यापि
त्रैविध्यमुक्तं वेदितव्यं बुद्ध्यादेस्त्रैविध्येन करणस्यापि त्रैविध्यमुक्तं
भविष्यति २८ ॥

पैशाचभाष्य टीका ४

अयुक्तः असमाहितः प्राकृतः असंस्कृतबुद्धिः स्तब्धः अप्रणाम
शीलः शठः वञ्चकः निकृत्याचरतीति नैष्कृतिकः क्रूरः अल

सः अप्रवृत्तिशीलः विषादी दीर्घसूत्री च कार्येषु यामे कर्म
दीर्घेन कालेन निर्वर्तयति स तामसः २८ ॥

रामानुजभाष्य टीका ५

अयुक्त इति अयुक्तः शास्त्रीयकर्मायोग्यः विकर्मस्थः प्राकृ
तः अनधिगतविद्यः स्तब्धः आरंभशिथिलः शठः अभिचारा
दिकर्मरुचिः नैष्कृतिकः वंचनपरः अलसः आरब्धेष्वपि
कर्मस्वप्रवृत्तः विषादी अतिमात्रविषादशीलः दीर्घसूत्री अ
भिचारादिकर्म कुर्वन् परेषु दीर्घकालवर्त्यनर्थपर्यालोचन
शीलः एवंभूतो यः कर्ता स तामसः [illegible]

[illegible] ॥

अभिनवगुप्तकृत टीका ६

[illegible] २५
[illegible] २६
निकृतिर्नैष्कृत्यम् २८ ॥

परमार्थप्रपा टीका ७

तामसमाह अयुक्त इति अयुक्तः नियमरहितः प्राकृतः वि
वेकशून्यः स्तब्धः अविनीतः शठः मायावी नैष्कृतिकः परवंच
नपरः अलसः किंचित्कृत्वा किंचित्करोतीति विषादी क्लेश।
युक्तादीनापश्चात्तापी सूचनात्मत्वं दीर्घसूत्रं यस्मिन् देशकाला
द्येनकविधेयस्य चनाकृत्वा अद्य श्वः परश्वः करोमीति विलंबयति

स तामसः कर्ता ॥ २८ ॥

वनमाली टीका ८

अयुक्तः कर्तव्येष्वनवहितः प्राकृतः शास्त्रासंस्कृतचित्तः
स्तब्धः सज्जेष्वप्यनम्रः शठः परवंचनार्थं ममयाज्ञानव
प्यन्यथावादी नैः कृतिकः स्वस्मिन्नुपकारिन्युद्धिवमाप
परिहृत्यिछेदनेन स्वार्थपरः वंचक इति यावत् अलसोऽव
श्यकर्तव्येष्वप्यप्रवृत्तिशीलः विषादी सततमसंतुष्टस्वभा
वत्वेनानुशोचनशीलः दीर्घसूत्री चिरेणैकामल्पक पनि
लिकेनानेः कारणान्वेनानि मन्यस्थकृतिः यदपवनेवोततन्मा
सेनापि करोतीत्येवंशीलः कर्ता तामसउच्यतेः २८ ॥

उत्तमैवजयंती टीका ९ ॥

तामसं कर्तारमाह अयुक्त इति अयुक्तोशास्त्रीयकर्मस्वकृत्
प्राकृतः प्रकृतौ स्वभावे वर्तमानः शास्त्रविधिं विहाय स्वभा
वानुसारेणैव कर्मकृदित्यर्थः स्तब्धः कर्मारंभ गिरिवन्नान
म्रो वा शठः स्वशक्तिगोपनकृत् अभिचारादिकर्माभिरुचिवी
नैःकृतिकः परापमानकृत् परवंचको वा अलसः पारलौक
मेण्यप्रवृत्तः विषादी प्रतिमासं शोकाकुलः दीर्घसूत्री प्रहरे
णैव यत्कर्तव्यं तद्वर्षेणापि यो न करोति यद्वा अभिचारा
दिकर्मसु चिन्ताप्रवृत्तः तेषु प्रति दीर्घकालं वर्षं च पर्यालो
चनशीलः चशब्देन प्रमादो अज्ञो निद्रालुः खलः कपटीमा
दयः संगृह्यन्ते ईदृग्विधो यः कर्ता स तामसस्तमोगुणप्रकृ
त्वात्सर्वकर्तृणामधमः कथ्यते २८ ॥

मधुसूदनी टीका १०

अयुक्तः सर्वदाविषयापहृतचित्तत्वेनकर्तव्येष्वनवहितः प्रा
कृतः शास्त्रासंस्कृतबुद्धिर्बालसमः स्तब्धो गुरुदेवतादिष्व

श्री॰
गी॰ टी॰

130

यतमः शठः परवंचनार्थमसमर्थाज्ञानवन्तमर्थवादी नैः
ष्कृतिकः स्वस्मिन्नुपकारिणम्प्यसमर्थापरवृत्तिच्छेदने न स्वा
र्थपरः अलसः अवश्यकर्तव्येष्वप्यप्रवृत्तिशीलः विषादी सत
तमसंतप्तस्वभावेनानुशोचनशीलः दीर्घसूत्री निरंतरशो
कासक्तस्वकर्त्तव्यविलंबी तः कारणेन नातिसंचरप्रवृत्तिः यदद्यक
र्तव्यं तन्मासेनापि करोति न वेसवं शीलः कर्त्ता तामस उच्यते
[illegible]
[illegible]
[illegible] २८ ॥

सदानंदी टीका ११

विषयाकृष्टचित्ततयाकर्तव्येष्वसमाहितः प्राकृतः संस्कृतबु
द्धिशून्यः स्तब्धो विनम्रः १ अनम्रो गुरुदेवादिष्वपि वचननम
रः स्वस्मिन्नुत्कृष्टमन्यापरवृत्तिविच्छेदकः २ अवश्यमेव
कर्तव्येष्वप्रवृत्तिस्वभावकः सदासंतप्तशीलत्वादनुशोचनश
रः ३ सदाशोकासक्तचित्तत्वाल्लौकिकालसः अतिमंदप्र
वृत्तिस्तोकायकार्यं करोति न ४ मासेनापि यत्पर्वं समाप्नोति यो
कः स तामसः ५ २८ ॥

नीलकंठी टीका १२

अयुक्तोऽनवहितः प्राकृतोऽत्यंतमसंस्कृतबुद्धिर्बालसमः स्त
ब्धः दंडवदनमनशीलः शठः शक्तिगूहनकारी नैष्कृ
तिकोऽवंचकः परावमानी वा अलसः अप्रवृत्तिशीलः कर्तव्येष्व
पि विषादी सर्वदा अवसन्नस्वभावः दीर्घसूत्री चिरकारी यत्का
र्यं अद्य कार्यं मासेनापि न करोति सः एवंभूतः स कर्त्ता
तामस उच्यते २८ ॥

आनंदीटीका १३

अयुक्तो युक्तिमुपायज्ञानं विना प्रवृत्तः प्राकृतो नीचानामास्त

व्यः सगर्वः शठोमायावी नैष्कृतिकः परहिंसार्थप्रवृत्तः अलसः
सामर्थ्येपिनिरुत्साहः विषादीपश्चात्तापीदीर्घसूत्रः सद्यः संपाद्य
मपिकार्यंविलंब्यनिर्वाहयन् २८ ॥

रामकंवीटीका १३

एवंविधः कर्तातामसः सर्ववत् किंविधोऽयुक्तः समाधिरहितः य
तः प्राकृतः प्रकृतिमेवात्मत्वेनप्रतिपन्नः स्तब्धोमिथ्याभिमानाभि
निवेशान्नकंचित्प्रणमति शठोमायावीतथानैष्कृतिकः निकृतिः
परोपतापनंप्रयोजनंयस्य अलसोदाक्ष्यरहितः अतएवविषादी
अवसादवान्दीर्घसूत्रश्चाप्सुकार्येष्वपिवस्तुतश्चिरकारी एवंविधंक
र्तृत्वंप्रमादमोहादिदोषकारणभूततमोगुणसमुद्भूतत्वात्तस्मात्त
हेयमेवेतिकर्तृकर्मणोः पृथग्वैविध्यप्रतिपादनेविस्पष्टार्थं यतः
प्रायएकतरत्रैविध्यंभवत्युक्तं अथबुद्धिधृत्योरेवत्रैविध्यंवक्तुमुप
क्रमते २८ ॥

लाक्षिकी [illegible]टीका

तामसंकर्तारमाह

अयुक्तोऽसमाहितः प्राकृतः प्रकृतिंतद्विकारंवात्मत्वेनप्रतिपन्नः
स्तब्धोमिथ्याभिमानाभिनिवेशान्नकंचित्प्रणमति शठोमायावी
नैष्कृतिकोनिकृतिः परवंचनंप्रयोजनंयस्यसः अलसोऽनुद्यमः
विषादीशोककशीलः दीर्घसूत्रीचिरकारीईदृशः कर्तातामसउच्य
ते [illegible] २८

पंचोलीटीका

तामसंकर्तारमाह अयुक्तइति अयुक्तः असमाहितचित्तः प्राकृतः
असंस्कृताशक्तिमतिर्बालिशः स्तब्धः दंडवत्कस्मैचिन्नमतिनमतिव
ञ्चकापट्येनशठः शक्तिगूहनकारीमायावी नैष्कृतिकः परविक्षेपन
करः अलसः कर्तव्येष्वपिकार्येष्वप्रवृत्तिशीलः विषादीसर्वदाखिन्नस्व
भावः दीर्घसूत्रीअल्पकालेनकर्तव्यंबहुकालेनकरोतियःएवंवि
धः कर्तासतामसउच्यते २८

तामससमाह अयुक्तइति अयुक्तः करणीयेष्वनवहितः तथा प्राकृतः
कार्याकार्यविवेकशून्यः अप्रह्वमकृतदण्डंनिर्यंच कर्मयस्येति
वा तथा स्तब्धोदंडाकारवमर्षेनानम्रः तथा शठो मायावी तथा नै
ष्कृतिकः निकृतिः कुत्सितं निर्योमार्गस्तेनगंतुं शीलमस्येति तथा
लसोनुद्यमपरः पटुतारहितः अतएव विषादी विषादवान् अनु
शोचानइतियावत् अथच विषाणि पहूतादीनि अत्तुंशीलमस्येति
विषादी अमत्तीइतिभावः अतएव दीर्घसूत्री एकदिनेनापि निवर्त्यं
कर्ममासेनापि योनसाधयतीत्यर्थः एतादृशः कर्ता तामस उच्य
ते २८॥

मधुभाष्य

२८

भाषा अनुवाद

और अयुक्त कहे असावधान औ प्राकृत कहे विवेकरहित औ स्तब्ध अ
नम्र स्वभाव औ शठ कहे कर्म्मचोर औ नैष्कृतिक कहे परका अप
मान करनेवाला तथा आलसी औ विषाद या सदा शोगी औ दीर्घस्व
त्री कहे जो कर्म्म तुर्त करने का होय उसे महीनों टाले ऐसे मनुष्य
तामसकर्त्ता कहावते है ऐसेही कर्त्ता की त्रैविध्य से ज्ञाता भी तीनप्र
कार और कर्म्मको त्रैविध्य से ज्ञेय मात्रको त्रैविध्य कहा औ बुद्धि
त्रिविध कहने से कारण भी तीन प्रकार के है २८ ॥

दोहा

अयुक्त जो आलसी सठ निःकृत विषादी दीर्घसूत्री छिक
र्त्ता तामस कहित २८

132

बुद्धेर्भेदं धृतेश्चैव गुणतस्त्रिविधं शृणु
प्रोच्यमानमशेषेण पृथक्त्वेन धनंजय २९

शांकरभाष्य टीका १ ॥

बुद्धेर्भेदमिति बुद्धेर्भेदं धृतेश्चैव भेदं गुणतः सत्वादिगुणतः
त्रिविधं शृणुविति सूत्रोपन्यासः प्रोच्यमानं कथ्यमानमशेषेण
निरवशेषतोयथावत् पृथक्त्वेन विवेकतो धनंजय दिग्वि
जये मानुषं दैवंचप्रभूतं धनंजयतेनासौ धनंजयोऽर्जुनः २९

आनंदगिरि टीका २

ज्ञानादीनां प्रत्येकं त्रैविध्यमुक्त्वा इतिसमाप्ता बुद्धेर्धृतेश्च ध
त्याख्यायास्त्रैविध्यं सूचयति बुद्धेरिति सूत्रविवरणं प्रतिजा
नीते प्रोच्यमानमिति अर्जुनस्य धनंजयत्वं समादधाति दि
ग्विति २९ ॥

स्वामिकृत टीका ३

इदानींबुद्धेर्धृतेश्चापित्रैविध्यंप्रतिजानीते स्पष्टार्थः २९ ॥

पिशाचभाष्य टीका ४

बुद्धेर्ज्ञानस्य धृतेःधैर्यस्यचैवगुणतःगुणैःपृथक्त्वेनविवेकप्रस्क
रेण २९ ॥

रामानुजभाष्य टीका ५

+ बुद्धेरिति बुद्धिर्विवेकपूर्वकनिश्चयरूपंज्ञानंधृतिरारब्धाया
क्रियायाः विघ्नोपनिपातेविधारणसामर्थ्यं तयोः सत्वादिगुण
तस्त्रिविधंभेदंपृथक्त्वेनप्रोच्यमानंयथावच्छृणु २९ ॥

+ एवंकर्तव्यकर्मविषयज्ञानेक
र्तैर्वैचकर्मणिगुणतस्त्रिवश्री
त्रैविध्यमुक्तं इदानींसर्वतत्वपुरुषा
र्थनिश्चयरूपायाबुद्धेर्धृतेश्चगुणत
स्त्रैविध्यमाह ॥

अभिनवगुप्तकृत टीका ६ ॥

स्पष्टार्थं २९ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका ७ ॥

अथबुद्धेर्धृतेश्चत्रैविध्यमाह बुद्धेरितिस्पष्टार्थं २९ ॥

वनमाली टीका ८ ॥

श्री
गी टी
म

133

बुद्धिस्थमोसेविषयं प्रतिजानीते बुद्धेरिति बुद्धेरस्य च सायया
दिहतिममायतेषुतद्वेनेः सत्वादिगुणतस्त्रिविधमेदमया
मा परमात्मनोच्यमानमशेषेणनिरवशेषेणपकेनहेयोपादेयवि
वेकेनपृणु २९ ॥

ऊरामवेजयंती टीका ९

एवंज्ञानतेयपरिज्ञानद्गुणागुणनतेषु विषयेषु तिपाद्यवेदनीबु
द्धिष्वत्तोरपिगुणतत्त्वेषु विषयेषु वक्र्कभगवान्सनिजानीते बुद्धे
भेदमिति हेयनेजयबुद्धेर्विवेकनिश्चयज्ञानरूपायाश्रुतनः
ष्टतेः प्रारब्धकर्मणो विश्लोपतिरोति विचारणसामर्थ्यरूपापप
वनिश्चयेनगुणतत्त्वादिगुणेनविविधस्यैतभिन्नत्वेना
शेषेणसमग्रेणापोच्यमानेन दर्शनाच्यमानेमप्रापक
षेणोच्यमानेकथ्यमानेभेदस्मरणेनश्रवणाकुरुपनेजयेति
वोधनेनघसबुद्धिष्टतिसाक्तिसयववरेषांयनेजयतिनान्मोक्षः
स्वनामनिष्पन्नयेस्वयमीन्नसोरणसावधानेननयोहीरणकु
र्वितिसूचितम् २९ ॥

मधुसूदनीटीका १०

+ तदेवंज्ञानंकर्मचकर्त्ताचत्रिधैव गुणभेदतइतिव्याख्यातंसंप्र तिधृत्या हसमन्वितइत्यत्रसूचितयोर्बुद्धिधृत्योस्त्रैविध्यंप्रति जानीते॥

+ बुद्धेर्धृतेश्चैव सायपाहितिमसायतेषुतद्वेनेः सत्वादिगुणतस्त्रि
विधमेवभेदमयावोपरिसकालसेनपरमामेनशोच्यमानमशे
षेणनिरवशेषेणथकेनहेयादेयविवेकेनपृथक्त्वेनसावधानो
भवहेधनंजयेतिदिग्विजयेप्रसिद्धमहिमानेसूचयन्प्रोत्सा
हयति श्रवेदेविंस्मतेकिमतबुद्धिशब्देनबुद्धिमात्रमभिप्रेतंकिं
वाबुद्धिमदंतःकरणंप्रथमेज्ञानेपथककनवकव्याहितीयेकर्तरि
च बुद्धिनवक्तव्यःबुद्धिमदंतःकरणंत्रैविध्यकथनेनसर्वासामपितद्बु
त्तीनांत्रैविध्यस्यविवक्षितत्वादुच्यते अंतःकरणोपहितस्यैवाभा
सःकर्त्ताबुद्ध्युपहितात्रिकृत्यउपाधिमात्रंकरणत्वेनविवक्षितं स
वैत्रकरणोपहितस्यकर्तृत्वात् यद्यपिचकामःसंकल्पोविचि
कित्साश्रद्धाश्रद्धाधृतिरधृतिर्ह्रीर्धीर्भीरित्येतत् सर्वंमनएवेति

क्रमप्राप्तं दिज्ञानो सर्वेषामपि वृत्तीनां त्रैविध्यं विवक्षितेनथापि।
धीधृत्योस्त्रैविध्यं पृथगुक्तं ज्ञानशक्तिक्रियाशक्त्युपलक्षणार्थं
तत्पदिति व्याख्येयमिति रहस्यं [illegible] २९

सदानंदी टीका ११

ज्ञानं कर्म च कर्ता च तद्त्रयमीरितं इदानीं प्रतिजानीते त्रैविध्ये
बुद्धिधृत्योः १ बुद्धेरध्यवसायादिवृत्तिमत्याः धृतेस्तथा सत्वादि
गुणतो भेदं त्रिविधं त्वा प्रतिसृते २ प्रोच्यमानं मया मेन हेयादे
यविवेकतः सावधानो भव श्रोतं साकल्येन धनंजय ३ बु
द्धुपाधिश्चिदाभासः कर्ता प्रोक्तः उपाधत्त करणत्वेन निक्ष्
प्यापाधिमात्रं विवक्षिते ४॥ २९ ॥

नीलकंठी टीका १२

बुद्धिधृत्योस्त्रैविध्येन व्याख्यानमाह बुद्धेरिति तत्र बुद्धिविशि
ष्टश्चिदाभासः कर्ता ज्ञानं च प्रागुक्तं अत्र तु केवला बुद्धिर्वृत्तिम
ती तदीयवृत्त्यन्तरोपलक्षणार्थं तद् हि विशेषो धृतिस्त्रैवि
ध्येन कथ्यत इत्यर्थः २९ ॥

आनंदी टीका १३

एवं कर्मणः कर्तुश्च त्रैविध्यमुक्त्वान्तःकरणस्य बुद्धेर्धृतेश्च
त्रैविध्यमाह अशेषेणार्थेन पृथक्त्वेन भेदेन २९ ॥

रामकंठी टीका १४

बुद्धिर्वीध्यवस्तुसाधनं करणं धृतिरवष्टम्भः कार्यं ज्ञेयप्रवार्थे
सिद्धिपर्यन्तं स्थैर्यं तयोर्बुद्धिधृत्योः सत्वादिगुणापेक्षया त्रिविधं
भेदं साकल्येन विविक्ततया चाभिधीयमानं शृणु [illegible]
[illegible] २९ ॥

लासिकी [illegible] टीका

अथ बुद्धिधृत्योरेव त्रैविध्यं वक्तुमुपक्रमते ॥
वस्तुनिश्चायकमन्तःकरणं बुद्धिः धृतिर्धारणं कर्मणामि

द्धिपर्यंतंस्थैर्यंदार्ढ्यं तयोःसत्वादिगुणतस्त्रिविधंभेदंशृ॰
णुमयासाकल्येणविशेषेणचप्रोच्यमानंहेधनंजय
२९

134

पंचोलीटीका

इदानींबुद्धेर्धृतेश्चत्रैविध्यंप्रतिजानीते बुद्धेरितिहेधनंजय
बुद्धेर्ज्ञानस्य धृतेःधैर्यभेदंगुणतः सत्वादिगुणैःकृतंत्रिवि।
धमशेषेणसाकल्येनपृथक्त्वेनविवेकेनोच्यमानंशृणु २९

रणवीरसमिद्धोधिनी

अधुना बुद्धिधृत्योः सात्विकादिभेदेनत्रैविध्यं वक्तुमुपक्रमते
बुद्धेरिति बुद्धिर्बोध्यवस्तुसाधनमंतःकरणं धृतिश्चानुष्ठान
ध्येसमाप्तिपर्यंतंस्थैर्यं तयोर्गुणतः सत्वादिगुणापेक्षयात्रिवि
धंभेदंमयासाकल्येनपरस्परंपृथक्त्वेन भिन्नतयाचकथ्यमा
नंशृणुएववधारय २९॥

मधुभाष्य

२९॥

भाषा अनुवाद

अब बुद्धि औ धृति कहे धैर्य की त्रैविध्य कहने की प्रतिज्ञा करते हैं कि हे धनंजय अर्जुन बुद्धि के औ धैर्य के सत्व आदि गुण क्रमसे तीन भेद जो हैं उन को मैं भिन्न भिन्न कहता हूं तुम सावधान होय सुनो २९ ॥

दोहा

बुद्धिभेद धृतिभेद गुणत्रयसें विविध दिसोप कथ्यमान
भिनभावसें धनंजय सकल दिसोप २९

135

134

प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये
बंधं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्विकी
३०॥

शांकरभाष्य टीका १

प्रवृत्तिं चेति प्रवृत्तिं च प्रवृत्तिः प्रवर्तनं बन्धहेतुः कर्ममार्गः
निवृत्तिं च निवृत्तिर्मोक्षहेतुः संन्यासमार्गः बंधमोक्षसमान
वाक्यत्वात् प्रवृत्तिनिवृत्ती कर्मसंन्यासमार्गाविति अवगम्यते य
थवा कार्याकार्ये विहितप्रतिषिद्धे लौकिके वा शास्त्रवेदे वा क
र्तव्याकर्तव्ये करणाकरणे इत्येतत् कस्य देशकालाद्यपेक्षया वि
जानाति दृष्टादृष्टार्थानां कर्मणां भयाभये विभेत्यस्मादिति भ
यं तद्विपरीतमभयं भयं वाभयं च भयाभये दृष्टादृष्टयोर्भ
याभययोः कारणे इत्यर्थः बंधं सहेतुकं मोक्षं च सहेतुकं या
वेत्ति विजानाति बुद्धिः सा पार्थ सात्विकी तत्त्वज्ञानं बुद्धेर्वृत्तिर्बुद्धि
स्तु वृत्तिमती धृतिरपि वृत्तिविशेष एव बुद्धेः ३०॥

आनन्दगिरि टीका २

तत्रादौ सात्विकीं बुद्धिं निर्दिशति प्रवृत्तिं चेति प्रवृत्तिराचरण
मात्रं अनाचरणमात्रं च निवृत्तिरिति किं नेष्यते तत्राह बंधेति य
स्मिन् वाक्ये बंधमोक्षावुच्येते तस्मिन्नेव प्रवृत्तिनिवृत्त्योरुक्तत्वा
त् कर्ममार्गस्य बंधहेतुत्वान्मोक्षहेतुत्वाच्च संन्यासमार्गस्य तावे
वात्र ग्राह्याविर्थः करणाकरणयोर्निर्विषयत्वायोगाद्विषया
पेक्षामवतार्य योग्यं विषयं निर्दिशति कस्येति अनिष्टसाधने
भयमिष्टसाधनमभयमिति विभजते भयेति बंधादिज्ञानमा
त्रस्य बुद्धेनापि संभवाद्विशेषणं न बुद्धिशब्दितस्य ज्ञानस्या
नेव त्रैविध्यप्रतिपादनात् किमिति बुद्धेरिदानीं त्रैविध्यं प्रति
ज्ञाय प्रपाद्यते तत्राह ज्ञानमिति नहि ज्ञानेन गतत्वाच्च धृत
र्धृतिर्व्युत्पादनीयेत्याशंक्याह धृतिरपीति विशेषणाद्वैतज्ञाना
वृत्तिरिष्टा ३०॥

श्री
गी॰ टी॰
अ॰

136

स्वामिकृत टीका ३

तत्र बुद्धेस्त्रैविध्यमाह प्रवृत्तिं चेति त्रिभिः प्रवृत्तिं धर्मे निवृत्तिमधर्मे
यस्मिन्देशे काले च यत्कार्यमकार्यं च भयाभये च कार्याकार्ये नि
मित्ता व्यानर्थौ कथं बंधः कथं वा मोक्ष इति या बुद्धिर्वेत्तिः करणे वृत्ति
सा सात्विकी यया शुभान्वेषीति वक्तव्ये करणे कर्तृत्वोपचारः काष्ठा
नि पचंतीतिवत् [illegible] ॥

पिशाचभाष्य टीका ४

प्रवृत्तिः प्रवर्तनं मोक्षार्थं निवृत्तिः संन्यासः कार्याकार्ये कार्यकर्त
व्ये अकार्यं तदभावः भयाभये भयं संसारः अभयं तदभावः बंधो
मोक्षः वेद बंधनं मोक्षो मुक्तिः एतान्सर्वान्या बुद्धिर्वेत्ति सा सात्विकी ३॰ ता॰

रामानुजभाष्य टीका ५

प्रवृत्तिमिति प्रवृत्तिरभ्युदयसाधनभूतो धर्मः निवृत्तिर्मोक्षसाध
नभूतः धर्मः तावुभौ यथावस्थितौ या बुद्धिर्वेत्ति कार्याकार्ये सर्ववर्णा
नां प्रवृत्तिनिवृत्तिधर्मयोरनुतिष्ठतां देशकालावस्थाविशेषेषु
इदं कार्यमिदमकार्यमिति च या वेत्ति या शास्त्रीयप्रवृत्तिः भयस्थानं
तदप्रवृत्तिरभयस्थानं बंधं मोक्षं च संसार याथात्म्येन तद्विमोचनयाथात्म्ये
न च या वेत्ति सा सात्विकी बुद्धिः ३॰ ॥

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं ३० ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपाटी टीका ७

तत्र प्रथमं बुद्धेस्त्रैविध्यमाह प्रवृत्तिं चेति त्रिभिः शास्त्रविहितविष
यां देशकालोचितां च धर्मे प्रवृत्तिं निवृत्तिमधर्मे देशकालानुसारेण यो
वृत्तानुसारेण वा कार्यमकार्यमिति अकार्ये भयं कार्ये अभयं बंधं सं
सारं बंधं मोक्षं तन्महास्य कारणं च या वेत्ति सा बुद्धिः सात्विकी ३० ॥:

वनमाली टीका ८

तत्र बुद्धेस्त्रैविध्यमाह प्रवृत्तिमिति त्रिभिः प्रवृत्तिं कर्ममार्गं निवृत्तिं
संन्यासमार्गं कार्यं प्रवृत्तिमार्गे कर्मणां करणं अकार्यं निवृत्तिमार्गे
कर्मणामकरणं भयं प्रवृत्तिमार्गेन अभेवासादिरूपः एतमभयं निवृत्ति

135

मार्गौ तदभावेबंधंवृत्तिकरणेकर्तृत्वोपचारात् यथावेत्तिकर्तीबु
द्धिः साप्रमाणजनितनिश्चयवतीहेपार्थसात्त्विकीबंधमोक्षयोरे।
तिकीर्तिनात्तद्विषयमेवप्रवृत्त्यादिव्याख्यातम् ३० ॥

उत्तमवैजयंती टीका ४

तयोर्मध्येबुद्धेस्त्रिविधत्वेविधेयेक्रमादौसात्त्विकीबुद्धिमाहप्र
वृत्तिंचेतियाबुद्धिः प्रवृत्तिमभ्युदयसाधनरूपंधर्मंचपुनर्निवृ
त्तिंमोक्षसाधनरूपंधर्मंयद्वाशास्त्रविहितधर्मेप्रवृत्तिंनिषिद्धेनिवृत्तिं
चवेत्तिजानातीतिकरणरूपायाबुद्धेःयत्कर्तृत्वकरणत्वेवानतरूप
रितेऊर्ध्वारक्षिन्वतीतिवत् कार्याकार्येकार्यंशास्त्रीयंनिष्का
मकर्मप्रकार्यंसकामंतत्त्वशास्त्रसिद्धंनिषिद्धंसारासिद्धत्वेन।
निषिद्धवदेयवादकार्यमेवतेउभेयाबुद्धिर्वेत्तिभयाभयेप्रशास्त्री
येप्रथमंकर्मादिषुभयेशास्त्रीयेषुतेषुभयंतेउभेवयाबुद्धिर्वेत्ति
बंधंसंसारस्याश्रान्त्यमोक्षंतच्छेदनयायाबंधंचयोवेत्तिहेपार्थसा।
बुद्धिःसात्त्विकीसत्वगुणयुक्ताभवतीतिनचपावोध्यासेवोधनेन
सात्त्विकाःश्यापास्तवगोसस्तस्तवापिसात्त्विकोवबुद्धिर्नराज
सीतामसीचेतिसूचितम् ३० ॥

+ तत्रबुद्धेस्त्रैविध्यमाहत्रिभिः॥

मधुसूदनी टीका १०

+ प्रवृत्तिकर्ममार्गंनिवृत्तिंसंन्यासमार्गंकार्यंप्रवृत्तिमार्गेकर्मणांक
रणंप्रकार्यंनिवृत्तिमार्गेकर्मणामकरणंभयंप्रवृत्तिमार्गेगर्भ
वासादिदुःखंप्रभयंनिवृत्तिमार्गेतदभावंबंधंप्रवृत्तिमार्गेमिथ्या
ज्ञानकृतंकर्तृत्वाद्यभिमानंमोक्षंनिवृत्तिमार्गेतत्त्वज्ञानकृतमज्ञा
नतत्कार्याभावंचयावेत्तिकरणेकर्तृत्वोपचारात् यथावेत्तिका।
तोबुद्धिःसाप्रमाणजनितनिश्चयवतीहेपार्थसात्त्विकी बंधमोक्ष
योरेनेकीनेनानहिषयमेवप्रवृत्त्यादिव्याख्याते ३० ॥

सदानंदी टीका ११

नत्रादौभगवानाहबुद्धेस्त्रैविध्यमादरात् प्रवृत्तिकर्ममार्गंववं
चहेतनयामते १ निवृत्तिकर्मसंन्यासमार्गंमोक्षैकसाधनंप्रवृ

त्रिमार्गीकरणेकर्मणामधिकारिणः २ निवृत्तौकर्मणांत्यागः
प्रवृत्तौभयमास्रते निवृत्तावभयंचैवंप्रवृत्तौमांतिजंतुना ३ मो
क्षेनिवृत्तिमार्गेवैतत्ताज्ञानप्रसादजं वेत्तिबुद्धिर्यथावद्यासात्वि
कीसामतिःस्मृता ४ यावेत्तीमत्रकारणेकर्तृत्वमुपचारतः यथा
वेत्तिप्रमाणोत्पत्तज्ञाकर्त्तेतिवार्यतः ५ प्रवृत्तावस्तिकर्तव्ये
विधिःकिंकरत्वायतः नमास्तित्वयमप्रत्नेवयत्त्वत्रद्यमोभवेत् पत
६ निवृत्तौनास्तिकर्तव्यंविध्यादेरप्यभावतः प्रभयेतत्त्वत्त्स
मोक्षःस्यादात्मनिस्थितिः ७ ॥ ३० ॥

नीलकंठी टीका १२

प्रवृत्तिनिवृत्तीशास्त्रविहितप्रवृत्तिविषयेयजेतस्वर्गका
मः नहन्यांपिवेदित्यादिरूपे कार्याकार्यसाध्यस्वर्गादि प्रका
र्येतिरस्त्विंहं तेननिस्यानिमवस्त्वनीउक्ते भयाभयेकार्याका
र्यनिमित्ते वंधमोक्षेचयावेत्तियथावेत्तीतिस्ववत्करणेकर्तृ
त्वोपचारः बुद्धिःसापार्थसात्विकी ३० ॥

आनंदीटीका १३

स्पष्टार्थं ३० ॥ ॥

+तत्रोहिशक्रमेणबुद्धेस्त्रैविध्यप्रतिपाद्यसात्विकंभेदंतावदाह॥

रामकंठीटीका १४

+सात्विकीसत्वगुणसमुद्भूताबुद्धिर्मता कासा यया प्रवृत्तिंचनिवृ
त्तिंचवेदजानाति स्वर्गापवर्गफलेशास्त्रचोदितेकर्मणीप्रवृत्ति
निवृत्तिशब्देनोच्यते यदुक्तं प्रवृत्तिलक्षणोधर्मोगृहस्थस्यविधी
यते निवृत्तिलक्षणस्त्वन्योधर्मोमार्गकदेशिकः अन्यत्रापि प्र
वृत्तिंचनिवृत्तिंचद्विविधंकर्मवैदिकं इहचामुत्रचकाम्यंप्रवृ
त्तंकर्मकीर्त्यते निष्कामंज्ञानपूर्वंचनिवृत्तमुपदिश्यतइति न
ष्याकार्याकार्ये शास्त्रीयविधिनिषेधवशादनुष्ठेयपरिहार्यैव
स्तुनीयाजानाति सासात्विकीबुद्धिरिति ननुज्ञानंबुद्धिरित्यन
र्थान्तरं सर्वभूतेषुयेनैकमित्यादिनासात्विकज्ञानलक्षणेनैव
सात्विकबुद्धिलक्षणमुक्तं तत्पुनःकिमितिपुनरुच्यतइत्यत्रो

अनेन सत्वंज्ञानबुद्ध्योर्नास्तिकश्चिद्विशेषः किंतु पूर्वं ज्ञानज्ञेयज्ञातृ
लक्षणस्य त्रितयस्यैकप्रयोजनविषयत्वेन प्रतिपादनप्रसंगात्सं
क्षेपेण सात्विकज्ञानतो लक्षणमुक्तमधुना तु प्रतिसाहित्येन तस्यै
व बुद्धिशब्दप्रतिपादितस्य विस्तरेण लक्षणमुच्यते नहि पूर्वं धृत्यादि
वेदनं ज्ञानसंबंधित्वेन प्रतिपादितमधुना तु प्रतिपादितमिति न
पौनरुक्त्यदोषः चोदनीयः यदि वा पूर्वं मात्रूक्ता योगिसंबंधस्य ज्ञा
नस्य लक्षणमुक्तमधुना त्वारुरुक्षुसंबंधस्यैवमपि न पौनरुक्त्य
प्रथराजसी ३० ॥

लाक्षिकी[illegible]टीका

+सात्विकीबुद्धिमाह ॥

+धर्मं प्रवृत्तिमधर्मं निवृत्तिं यस्मिन्देशे काले च यत्कार्यमकार्यं च
भयाभये कार्याकार्यनिमित्तावर्थानर्थौ कथं बंधः कथं वा
मोक्ष इति या बुद्धिरंतःकरणं वेत्ति सा सात्विकी यया पुमान्वेत्तीति
वक्तव्ये क[illegible]का[illegible] काष्ठानि पचंतीतिवत् [illegible]
[illegible] ३०

पंचोलीटीका

तत्र बुद्धेस्त्रैविध्ये सात्विकीं बुद्धिमाह प्रवृत्तिमिति हे पार्थ या बुद्धिः प्र
वृत्तिं वेदविषयां निवृत्तिं शास्त्रनिषिद्धविषयां देशकालाद्यपेक्षया
दृष्टादृष्टार्थानां कर्मणां करणं कार्याकार्यं विभ्रमस्मादिति भयं
अभयं ते भयाभये दृष्टादृष्टयोः भयाभयोः कारणं दृष्टार्थः बंधमा ग४
त्मनो देहद्वयसंबंधं सकारणं वेत्ति मोक्षं तं च देहद्वयान्मुक्तिं सकारणं
वेत्ति सा बुद्धिः सात्विकी ३०

रमावीरसमिद्बोधिनी

तत्र सात्विकं भेदं कथयति प्रवृत्तिं चेति प्रवृत्तिनिवृत्ती तल्लक्ष
णौ धर्मौ तत्र प्रवृत्तिर्विहिते निवृत्तिर्निषिद्धे तथा कार्याकार्येऽनुष्ठे
यपरिहार्ये वस्तुनी स्वधर्मपरधर्मरूपे तथा भयाभये साध्वसतद्वि
रहौ कार्याकार्यनिमित्तावर्थानर्थौ तथा बंधमोक्षौ संसारापवर्गौ प्रातु

हृत्वा स्वदेहे प्रतिष्ठ एतेन कर्मणा बद्धो भवति एतेन वा मुक्तो भ
वतीत्येवंरूपो वा या बुद्धिर्वेत्ति करणोकर्षणोपचाराय यया बुद्ध्या
न्तःकरणेन वेत्ति कर्माधिकारी सा सात्विकी बुद्धिरित्यर्थः ३०॥

अथ भाषा

३०॥

भाषा अनुवाद ॥

अब इस श्लोक से ले तीन श्लोक से बुद्धि की त्रैविध्य कहते हैं कि ध
र्म्म मे प्रवृत्ति औ अधर्म्म से निवृत्ति औ देश काल के अनुसार जो
कर्तव्य औ अकर्तव्य औ काज अकाज जानि अर्थ अनर्थ ज्ञात तथा
बन्ध हीन कैसे औ मोक्ष ही वा कैसे होती इस विचार से भय अभ
य ये सब बुद्धि कहे अन्तःकरण जानि सकै है ऐसी बुद्धि सात्वि
की है इस जगह बुद्धि के द्वारा पुरुष सब जानता है यह कहने को
थे पर वह रीति छोड़ इसी तरह कहा करण को कर्ता करके कहा
है ३० ॥

दोहा

पार्थ प्रवृत्ति निवृत्ति को कार्य अकार्य भय अभय को य बं
ध मोक्ष को जानहि सो बुद्धि सात्विकी होय ३० ॥

139

यथाधर्ममधर्मंचकार्यंचाकार्यमेवच अ
यथावत्प्रजानातिबुद्धिःसापार्थराजसी ३१

शांकरभाष्य टीका १

ययेति यया धर्मं शास्त्रचोदितं अधर्मंच प्रतिषिद्धं कार्यंचाका
र्यमेवच पूर्वोक्ते एव कार्याकार्ये अयथावत् यथावत्सर्वतो नि
र्णयेन नप्रजानाति या बुद्धिः सापार्थराजसी ३१ ॥

आनंदगिरिकृत टीका २

कार्याकार्ययोर्धर्माधर्माभ्यां पौनरुक्त्यं परिहरति पूर्वोक्ते इति पू
र्वश्लोके कार्याकार्यशब्दाभ्यां दृष्टादृष्टार्थानां कर्मणां कारणक
रणे निर्दिष्टे तयोरेवात्रापि ग्रहात् धर्माधर्माभ्यां सर्वधर्मग्राह्या
त्कार्यं तेमर्थः या बुद्धिर्यया बुध्या बोद्धा निर्णयेन नजानातीम
र्थः ३१ ॥

स्वामिकृत टीका ३

+राजसीं बुद्धिमाह ॥ +ययेति अयथावत्संदेहास्पदत्वेनेत्यर्थः ३१ ॥ ॥ ॥ ॥

विशावभाष्य टीका ४

यया बुध्याधर्मंअधर्मंस्नायधर्मं अकार्यंअधर्मंकार्यंच अयथावत्प्र
ज्ञाना[illegible]तिसाराजसी ३१ ॥ ॥ ॥ ॥

रामानुजभाष्य टीका ५

ययेति यया पूर्वोक्तेहि विधेयधर्मं तद्विपरीतंच तन्निष्ठान्तो देशकाला
वस्थादिषु कार्यंच यथावत्र जानाति सा राजसी बुद्धिः ३१ ॥:

अभिनवगुप्तकृतटीका ६

स्पष्टार्थः ३१ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका ७

राजसीमाह ययेति अयथावत्सं देहास्पदत्वेनेत्यर्थः स्पष्टमन्यत्
३१ ॥

वनमाली टीका ८

धर्मंशास्त्रविहितं अधर्मंशास्त्रप्रतिषिद्धं अदृष्टार्थमभयंका
र्यं^च दृष्टार्थमभयं अयथावदेवप्रजानातियथावन्नजानाति

^मकार्यं

किंस्विदिदमिदमित्थमेव नेति वानध्यवसायेनाभजनेन यथाव
द्व्याप्ता राजसी बुद्धिः ३१ ॥

उत्तममवैजयंतीटीका ९

राजसीबुद्धिमाह यया धर्ममिति धर्मश्चौक्तमधर्मं तद्विपरीतं च
एवकार्यमहंति च कार्यमधर्मं हि नीयच कार्यं धर्मं मोहेन च
यावत्प्रजानाति राजसः उकबोधयया उज्ञायया वन्नवेत्तिहे पा
र्थ सा बुद्धिः राजसी रजोगुणानुकूलत्वपावोष्या पार्थेन नेन रय्या
उव्यानवेदसीबुद्धिर्नासीतिसूचितम् ३१ ॥

मधुसूदनी टीका १०

धर्मं शास्त्रविहितं अधर्मं शास्त्रप्रतिषिद्धं उदृष्टार्थं च भयं अ
कार्यं च दृष्टार्थं च भयं अयथावदेव प्रजानाति यथावत्ज्ञा
नाति किंस्विदिदमित्थमेव नेति वानध्यवसायेन संशयेन वाभजनेन य
याबुद्ध्या सा राजसी बुद्धिः अत्रनेयानिर्देशादमवाशिकरण
त्वेव्याख्येयम् ३१ ॥

सदानंदी टीका ११

शास्त्रेण विहितं धर्ममधर्मं शास्त्रनिषिद्धं दृष्टार्थं वादृष्टा
र्थं करणकारणे तथा १ यथावन्नविजानाति धर्मं वा न वेत्ति
च अनिश्चयेसंशयेवाययाबुद्ध्या भजनसौ बुद्धिः सा राजसीय
त्नाच्छोधनीया मुमुक्षुभिः ३ ॥ ३१ ॥

नीलकंठी टीका १२

अयथावत्संदेहास्पदत्वेन सम्यगन्यत् ३१ ॥ ॥

आनंदी टीका १३

अयथावत् यथावदावश्यकतया प्रवृत्तिनिवृत्तिविषयं न जा
नाति धर्मादपि निवर्तते अधर्मेपि प्रवर्तते ३१ ॥

रामकंठी टीका १३

राजसी रजोगुणसमुद्भवा बुद्धिर्यया हेतुभूतया ज्ञानादेव जन्तुः
दृष्टेधर्माधर्मादीन् उपादेयानादेयांश्च पदार्थान् अयथावन्निश्चयाभा

160

१८.

वादसम्यगेवनिर्णयधर्माधर्मावदृष्टविषयौसदाचारदुराचारौ कार्या
कार्येदृष्टविषयेइतिनयोनदृशंस अथवा धर्माधर्मौलक्षणया
फलविषयावुक्तौ कार्यकार्येतत्तन्निमित्तकर्मविवक्षया एवमपि
नयोनदृशंस एषामपियासंशयात्मकरजोगुणप्रभवत्वात्संसारि
विषया अयथातामसी ३१ ॥

लासिकी [illegible] टीका

^राजसीबुद्धिमाह॥

^ययाबुद्ध्याअदृष्टविषयौधर्माधर्मौसदाचारापचारौ दृष्टविषये
कार्याकार्येच अयथावन्निश्चयाभावादसम्यक्संशयास्पदत्वे
नवेत्ति साराजसीबुद्धि[illegible] ३१

पचोलीटीका

राजसीबुद्धिमाह ययेति हेपार्थययाबुद्ध्याधर्मंशास्त्रविहितं ।
वधनः अधर्मंशास्त्रनिषिद्धंकार्यंदेशकालाद्यपेक्षयादृष्टादृष्टार्था
नांकर्मणांकरणंवधनरकार्यंनतदकरणंअयथावत् निर्णीयतेयया
यथार्थेननप्रजानातिसाबुद्धिराजसीमता ३१

रसावीरसमिद्धोधिनी

राजसीमाह ययेति अयथावदिति निश्चयाभावात्सन्देहास्पदत्वे
नेत्यर्थः शेषंस्पष्टम् ३१॥

मधुभाष्य

३१॥

भाषा अनुवाद ॥

और हे पार्थ अर्जुन जिस बुद्धि से धर्म अधर्म औ काज अकाज अ
यथावत् कहे ठीक ठीक न जाना जाय सो बुद्धि राजसी है ३१

दोहा

यासें धर्म अधर्म कों कार्य अकार्य हि कोय न यार्थ यथा
वत जान हि सो मति राजसी होय ३१

142

(62)

अधर्मं धर्ममिति या मन्यते तमसावृता सर्वा
र्थान् विपरीतांश्च बुद्धिः सा पार्थ तामसी ३२

शांकरभाष्यटीका १

अधर्ममिति अधर्मं प्रतिषिद्धं धर्मं विहितमिति या मन्यते जाना
ति तमसावृता सती सर्वार्थान् सर्वानेव ज्ञेयपदार्थान्विपरीता
नेव जानाति बुद्धिः सा पार्थ तामसी ३२ ॥

आनंदगिरिटीका २

धर्मशब्दो नपुंसकलिंगोपीत्यभिप्रेत्य धर्ममित्युक्तं तमसावृताः
विवेकेन वर्जितेत्यर्थः कार्याकार्यादीन्ज्ञानानुष्ठानश्च संग्रहीतुं
तु॰ सर्वार्थानित्युक्तं तद्याचष्टे सर्वानेवेति विपरीतांश्चेति चकारम
वधारणार्थं गृहीत्वा विपरीतानेवेत्युक्तं ३२ ॥

स्वामिकृतटीका ३

तथाधर्ममिति विपरीतग्राहिणी बुद्धिस्तामसीत्यर्थः बुद्धि।
नः करणोर्वैकल्पानेनवतवृत्तिः वृत्तिरपि तद्वृत्तिरेव धर्मान्तःकरण
सधर्मिणो बुद्धिरध्यवसायलक्षणा बुद्धेरेव रजोविकारी नात
ह्तीनो वस्तुतोपि धर्मोधर्मा भूयते सायत्नत्वेनअथधान्यादेतासां चैविध्य भय॰
मुक्तमुपलक्षणे चैतदन्यासां [illegible] ३२ ॥

पिशाचभाष्यटीका ४

अधर्मश्रेयस्कार्यमेमिनिधर्मत्वरूपेण विपरीतं विपर्यस्तां सा ता सर्वार्था॰ श्च मन्यते+
मसी ३२ ॥

रामानुजभाष्यटीका ५

अधर्ममिति बुद्धिस्तमसावृता सती सर्वार्थान् विपरीतान्मन्यते
अधर्मं धर्मं धर्मं चाधर्मं सिद्धं नेवासंतं च संतं परं च नत्वमपरं चापरं च
ते॰ परं एवं सर्वं विपरीतं मन्यते इत्यर्थः ३२ ॥

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं ३२ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

श्री॰
गी॰ टी॰
अ॰

१४३

परमार्थप्रपा टीका ७

तामसीमाह अधर्ममिति या तमसा ज्ञानेनावृता सती अधर्ममे
व पश्यति यथा लत्तागोमहिकामारणेनैकोः सः कदाचिदिति
मन्यते यद्वा यौष्मसेन परमेव श्रेयो धर्म इति मन्यते सर्वार्थान् श्रुत्यादिमि
तादीन् विपरीतान् प्रतिकूलकर्तुं पश्यति सा तामसी अत्र बुद्धि
रध्यवसायात्मिका न स्मरणात्मिकेन निश्चयात्मिका यतः सेक
विधा न त्रिविधा नरके व्यवसायात्मिका बुद्धिरेकेहनेदनेति न हि
कथमन्येषाम्बिछादिषादीनामनुदेशश्चनिवेन्नामेधर्माधर्मप्रहृतेः।
बुद्धेर्नैवी प्राधान्यमिति ज्ञेयं ३२ ॥

वनमाली टीका ८

तमसा विशेषदर्शनविरोधिना दोषेणावृता या बुद्धिरधर्मं धर्म
मिति मन्यते अष्टार्थान् सर्वत्र विपर्यस्तानेव यास्वर्थान् सर्वानट
ष्टप्रयोजनानपि ज्ञेयपदार्थान् विपरीतानेव मन्यते सा विपर्ययवती
बुद्धिस्तामसी ३२ ॥ः

ऊसमवैजयन्ती टीका ९

तामसीं बुद्धिमाह अधर्ममिति या बुद्धिस्तमसा हेतुनाऽज्ञानेनावृता
सती सर्वार्थान् त्रिविधान् पदार्थान् विपरीतान् मन्यते ज्ञाता निहिपा
र्थेसा बुद्धिस्तामसी तमोगुणभूतान् यथाबोध्या मुख्यः विपरीतग्राहि
णीत्वं दर्शयति अधर्मं धर्मं चाधर्मं सन्तमसन्तं मन्यते च सत्त्वेनाशुभमसा
धु मसाधुं च साधुं परं तत्त्वपरमपरं चापरमिति मेव सर्वानर्थकारिणी
तामसी बुद्धिर्भवतीमन स्तनो परित्याज्जेति सेवायनाभिप्रायः ३२

मधुसूदनी टीका १०

तमसा विशेषदर्शनविरोधिना दोषेणावृता या बुद्धिरधर्मं धर्ममि
ति मन्यते अदृष्टार्थेसर्वत्रविपर्यस्तानेव यथा सर्वार्थान् दृष्टप्रयो
जनानपि ज्ञेयपदार्थान् विपरीतानेव मन्यते सा विपर्ययवती बुद्धि
स्तामसी ३२ ॥

सदानन्दी टीका ११

तमसा दोषरूपेणावृतत्वनिर्णयाद्विनामती अधर्मं धर्ममिति मेव मन्य

१४४

तेविपरीतया १ विपर्ययस्यातिसर्वत्रविशेषादर्शनाद्यथा दृष्टव्य। योजना सर्वानर्थानात्मनेनया २ विपर्ययवतीबुद्धिस्ताम सीसाप्यनर्थदा ३ ३२ ॥

नीलकंठी टीका १२

अधर्ममिति विपरीतग्राहिणीबुद्धिस्तामसीत्यर्थः ३२ ॥

आनंदीटीका १३

स्पष्टार्थः ३२ ॥

रामकंठीटीका १४

तामसीनमोगुणहेतुकाबुद्धिर्याधर्मोधर्मादीनदृष्टविषयान्स र्वार्थाश्चदृष्टविषयांस्तमसाहेतुनावृतासती विपर्ययेणजाना ति सैषामिथ्याज्ञानहेतुभूततमोगुणत्वात्रिकष्टासंसारवि षयेतिहेया ३२ ॥

लासिकी [illegible] टीका

^तामसींबुद्धिमाह॥

^सर्वार्थान्दृष्टपदार्थान् विपरीतग्राहिणीतामसीत्यर्थः [illegible] ३२ बुद्धिः॥

पंचोलीटीका

तामसींबुद्धिमाह अधर्ममिति हेपार्थयाबुद्धिस्तमसाआवृ तासती अधर्मंमपतिषिद्धेविहितंधर्ममितिमन्यतेजानाति च पुनःसर्वार्थान् सर्वानेवज्ञेयपदार्थान्विपरीतानेवजानाति साबुद्धिस्तामसी ३२

श्रीवीरसमिद्बोधिनी

अथतामसीमाह अधर्ममिति यथामोहाक्रांतयाबुद्ध्या अधर्मं परहतिस्वीकारलक्षणंधर्ममन्यते इतिप्राहु:प्रकारे तथाच धर्मं चस्ववर्णोचितंगृहचर्यादिकंहिंसाजनकत्वादधर्ममन्यते किम न्यत् सर्वार्थांश्चविपरीतान्यथावेत्तिसातामसीबुद्धिः ३२॥

मधुमाध

३२॥

144

भाषा अनुवाद ॥

और तमोगुणसे आवृत कहे वेरी जो बुद्धि अधर्मकोभी जानि धर्मके सकल विषयको विपरीत कहे उलटा जानै ऐसी विपरीत ग्रहण करने वाली बुद्धि तामसी है यहां भी करणता बुद्धि को उचित थी पर कर्त्ती रूपसे कहा है अथवा धर्म रूप अन्तःकरण की वृत्ति बुद्धिऔ निश्चय तथा इच्छा द्वेष आदिरूप अन्तःकरण की वृत्ति बहुतभी रहते धर्म्म अधर्म औभय अभय की साधन रूप बुद्धि को प्रधान कियाहै और सब उपलक्षण रूपसे त्रिविध कहे गये ३२ ॥

दोहा

अधर्महि धर्मजो जानहि तमसें आवृत होय पार्थ अर्थस
भविपरीत जोबुद्धि तामसी सोय ३२

145

184

धृत्या यया धारयते मनःप्राणेन्द्रियक्रियाः
योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्विकी
३३ ॥

शांकरभाष्य टीका १

धृत्येति धृत्या यया अव्यभिचारिण्येति व्यवहितेन सम्बन्धः धा
रयते किं मनःप्राणेन्द्रियक्रियाः मनश्च प्राणाश्चेन्द्रियाणि च तेषां
क्रियाश्चेष्टाः च्छास्त्रमार्गविषया भवंति योगेनेति योगेन स उच्छास्त्रमार्गप्रवृत्तेर्धारयति धृ हि धार्यमाणा नु १
माधानेनाव्यभिचारिण्येति समाधानानुगतयेत्यर्थः एतदु
क्तं भवत्यव्यभिचारिण्या धृत्या मनःप्राणेन्द्रियक्रियाः धार्यमा
णा योगेन धारयतीति या धृतिः सा पार्थ सात्विकी ३३

आनंदगिरिकृत टीका २

इदानीं धृतेस्त्रैविध्ये स्फुटप्रतिपादयिषुरादौ सात्विकीं धृतिं प्रस्ताव
यति धृत्येति निर्दिष्टानां चेष्टानां कथं धृत्या धारणं तत्राह ता इति
तदेवाव्यभिचारेण साधयति धृत्या हीति ध्रियतेनयेति धृतिर्यत्नवि
शेषः तया धृत्या धार्यमाणानां यथोपदिष्टाश्चेष्टाः शास्त्रमतिक्रम्य
नार्थान्तरगामिन्यो भवन्तीत्यर्थः धृतिमेव समाध्यविनाभूतत्वे
न विशिनष्टि योगेनेति तत्र धृतेर्नियमेन समाध्यनुगतत्वे
कथमुक्तक्रियाधारणोपयोगीत्याशंक्याह यतदिति उक्तक्रिया
धार्यमाणा योगेन ब्रह्मणि समाधानेनैकाग्र्याव्यभिचारिण्या
विनाभूतया धृत्या धारयमाणा तदविनाभावाभावे नियमेन तद्धा
+इदानीं धृतेस्त्रैविध्यमाह ॥ रणासिद्धेरित्यर्थः ३३ ॥

स्वामिकृत टीका ३

त्ये ४ +धृत्येति त्रिभिः योगेन चित्तैकाग्र्येण हेतुनाऽव्यभिचारिण्या विषयांत
रमनारोधयन्त्या यया धृत्या मनसः प्राणेन्द्रियाणां च क्रिया धारयते
नियच्छति सा धृतिः सात्विकी ३३ ॥

पिशाचभाष्य टीका ४

धृत्यैर्येण धारयति बिभर्ति प्राणांश्च सर्वः तेषां क्रियाः व्यापारान्
योगेन समाधिना यव्यभिचारिण्या निश्चयाद्धृत्या सा सात्विकी ३३ ॥

श्री॰
गी॰ टी॰
प॰

रामानुजभाष्य टीका ५

धृत्येति यया धृत्या योगेनाव्यभिचारिण्या मनःप्राणेन्द्रियाणां क्रियाः पुरुषो धारयते योगो मोक्षसाधनभूतं भगवदुपासनं तेन योगेन प्रयोजनभूतेनाव्यभिचारिण्या योगोद्देशेन प्रवृत्तास्तत्साधनभूता मनःप्राणेन्द्रियजाः क्रिया यया धृत्या धारयते सा सात्त्विकी धृतिरित्यर्थः ॥ ३३ ॥

अभिनवगुप्तकृतटीका ६

स्पष्टार्थम् ॥ ३३ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका ७

अथ धृतेस्त्रैविध्ये सात्त्विकीं धृतिमाह धृत्येति योगेन चित्तैकाग्र्येणाहेतुनाऽव्यभिचारिण्या विषयान्तरमनुधारयेत्या यया धृत्या मनःप्राणानामिन्द्रियाणां च क्रियाः धारयते नियच्छति सा धृतिः सात्त्विकी ॥ ३३ ॥

वनमाली टीका ८

धृतेस्त्रैविध्यमाह धृत्येति त्रिभिः योगेन समाधिनाऽव्यभिचारिण्या विनाभूतया समाधिव्याप्तया यया धृत्या प्रयत्नेन मनःप्राणेन्द्रियाणां च क्रियाश्चेष्टा धारयते यया वा धारयते यया वा धार्यमाणा मनआदिक्रियाः शास्त्रमतिक्रम्य नार्थान्तरमवगाहन्ते। धृतिः सा पार्थ सात्त्विकी ॥ ३३ ॥

कुसुमवैजयन्ती टीका ९

एवं बुद्धेस्त्रैविध्यमुक्त्वेदानीं धृतेस्त्रिविधत्वं विवक्षुरादौ सात्त्विकीं धृतिमाह धृत्या ययेति योगेन परमात्मचिन्तनरूपेणाव्यभिचारिण्या तदन्यविषयमगच्छन्त्या यया धृत्या मनःप्राणेन्द्रियक्रियाः मनसोऽन्तःकरणस्य च पञ्चप्राणानां दशा[illegible]नामिन्द्रियाणामेकादशबाह्यकरणानां च क्रियाः योगसाधनरूपा वृत्तीः पुरुषो धारयते हे पार्थ सा धृतिः सात्त्विकी सत्त्वगुणनिर्वृत्ता त्वया बोध्या पार्थेति मन्तुनयतस्तवापीदृशी धृतिरस्त्विति तत्त्वपार्थो जगति प्रख्यातकीर्तिर्भविष्यतीति सूचितम् ॥ ३३ ॥

मधुसूदनी टीका १०

+इदानीं धृतेस्त्रैविध्यमाह त्रिभिः॥

+योगेन समाधिना ऽव्यभिचारिण्या ऽविनाभूतया समाधिव्याप्त
तया यया धृत्या प्रयत्नेन मनसः प्राणस्येंद्रियाणां च क्रियाश्चेष्टा धा
रयते उच्छास्त्रप्रवृत्तेर्निरुणद्धि यस्यां सत्यामवश्यं समाधिर्भवति य
या धार्यमाणा मनःप्रादिक्रियाः शास्त्रमतिक्रम्य नार्थांतरमव
गाहंते धृतिः सा पार्थ सात्विकी ३३ ॥

मदानंदी टीका ११

धृतेरिदानीं त्रैविध्यमाहोदाहरति योगेति: समाधिना विनाभूतया
याऽचलितया १ यया धृत्या प्रयत्नेन धारणात्मनसः क्रियाः इंद्रि
याणां तथा चेष्टा निरुणद्धि कुमार्गतः २ यस्यां सत्यामवश्यं हि समा
धिर्जायते सतो धार्यमाणा यया धृत्या मनःप्राणेंद्रियक्रियाः ३ नैव
शास्त्रमतिक्रम्यावगाहंते विषयगोचरं सा धृतिः सात्विकी यार्थ महा
त्मपुण्यवतां भवेत् ४ ॥ ३३ ॥

नीलकंठी टीका १२

यया धृत्या ऽव्यभिचारिण्या समाध्यनुगतया मनःप्राणेंद्रिया
णां क्रियाश्चेष्टाः संकल्पश्वासप्रश्वासशब्दादिग्रहणं च योगेन चि
त्तवृत्तिनिरोधेन ऐकाग्र्येण वा संयतात्मा तथैव निरोधावस्थायामै
काग्र्यावस्थायां वा धारयते चिरमवस्थापयति सा धृतिः पार्थ सात्वि
की ३३ ॥

आनंदी टीका १३

योगेन ज्ञानकर्मसमुच्चयरूपेणाभ्यन्तरेण चित्तवृत्तिनिरोधेन तु वा
व्यभिचारिण्या सदैकरूपया यया धृत्या विनस्थैर्येण पुरुषः मनःप्राणे
न्द्रियक्रियाः धारयते वशयति सा सात्विकी धृतिः ३३ ॥

रामकंठीटीका १४

अथ धृतिस्त्रिविधा तत्र सात्विकीं तावत् सा सात्विकी धृतिर्वै विशु
द्धसत्वगुणात्मिका धृतिः का सा यया योगी मनः प्रभृतीन्धारय
ति कीदृश्या परमात्मविषयेण योगेन समाधिना सहाव्यभिचा
रिण्या नित्यमव्यभिचरितक्रिया योगी हि मनोऽन्तःकरणं प्राणमाभ्य
न्तरं मारुतं न तत्तत्क्रियाभेदाना नाम्नां संज्ञामिंद्रियाणि चक्षुर्वागादी

श्री॰
गी॰ टी॰
अ॰

नियोगार्थमेवधारयति तत्रात्मसमाधिविषयेवष्टम्भस्थैर्यमे
वकारणमित्यर्थः प्रधानत्वज्ञानहेतुविशुद्धसत्वगुणसमुद्ध
त्वादपवर्गफलत्वेसम्पादेया अथराजसी ३३ ॥

लासिकी [illegible]टीका

सात्विकींधृतिमाह — अव्यभिचारिण्यानिश्चलयाययाधृत्याद्यापर्यंतहेतुभूतया यो
गेनात्मसमाधानेनकरणेनमनसः क्रियासंकल्पात्मिकाः
प्राणानांक्रियाउच्छ्वासनिःश्वासात्मिकाः इंद्रियक्रियाद
र्शनादिरूपाधारयतेवष्टभ्नातिसाधृतिः स्थैर्यंसात्विकी [illegible]
[illegible] ३३

पंचोलीटीका

धृतेस्त्रैविध्येसात्विकींधृतिमाह धृत्येति हेपार्थययाअव्यभिचा
रिण्यानित्यसमाध्यनुगतयाधृत्यामनःप्राणेंद्रियाणांक्रियाःचे
ष्टाउच्छ्वासमार्गप्रवृत्तेःसकाशात् शास्त्रमार्गेणयोगेनचित्तसमा
घ धानेनधारतिएवंविधासात्विकीधृतिः ३३

रणवीरसमिद्धोधिनी॥

अधुनाधृतेस्त्रैविध्यंदर्शयंस्तावत्सात्विकंभेदंदर्शयति धृत्येति
योगेनकर्मकौशलसमंतोभयलक्षणेनहेतुनाव्यभिचारि
णाविषयांतरमधारयंत्यायया धृत्यास्थैर्यलक्षणयामनः
प्राणेंद्रियक्रियाधारयतेनियच्छतिसाधृतिःसात्विकीमता ३३

मधुभाष्य

३३ ॥

भाषा अनुवाद ॥

अब इस श्लोक को अवधि कर तीन श्लोक से धृति की त्रैविध्य क
हते है कि हे अर्जुन योग करि चित्त की एकाग्रता से और और
विषय का धारण न करके जो धैर्य से मन औ प्राण तथा सब इंद्रि
यों की सकल क्रिया को धरि जाये वही धृति सतो गुणी है ३३

दोहा

यासें धर्म अधर्म कों कार्य अकार्य हि कोय पार्थ यथार्थ न
जानहि राजसी कहिय सोय ३३

यया तु धर्मकामार्थान्धृत्या धारयतेऽर्जुन प्र
संगेन फलाकांक्षी धृतिः सा पार्थ राजसी ३४

शांकरभाष्यटीका १

ययेति यया तु धर्मकामान् धर्मश्च कामश्चार्थश्च ते धर्मका
मार्थाः तान् धर्मकामार्थान् धृत्या यया धारयते मनसि नि
त्यकर्तव्यरूपानेव धारयते हे अर्जुन प्रसंगेन यस्य धर्मादेर्धार
णप्रसंगस्तेन तेन प्रसंगेन फलाकांक्षी च भवति यः पुरुषः
तस्य धृतिर्या सा पार्थ राजसी ३४ ॥

आनंदगिरि टीका २

राजसीं धृतिं दर्शयति ययेति तेषां धारणप्रकारमभिनय
ति मनसीति फलाकांक्षीति कस्य विशेषणं तदाह यः पुरु
षइति ३४ ॥

स्वामिकृत टीका ३

राजसींधृतिमाह — ययेति यया धृत्या धर्मार्थकामान्प्राधान्येन धारयते न विमुंच
ति तत्प्रसंगेन फलाकांक्षी च भवति सा राजसी धृतिः तामसीं
धृतिमाह ययेति ३४ ॥

पिशाचभाष्य टीका ४

यया तु धर्मकामार्थान् धारयते बिभर्ति प्रसंगेन प्रसक्ता
निफलमित्यर्थः ३४

रामानुजभाष्यटीका ५

फलकांक्षी पुरुषः प्रकृष्टसंगेन धर्मकामार्थान् यया धृत्या धार
यति सा राजसी धर्मकामार्थशब्देन तत्साधनभूतं मनः प्राणेंद्रिय
क्रियालक्ष्यते फलाकांक्षी तत्रापि फलशब्देन राजसत्वात् धर्मका
मार्था एव विवक्षिताः अतो धर्मकामार्थापेक्षया मनः प्रभृतीनां क्रि
या यया धृत्या धारयते सा राजसी इत्युक्तं भवति ३४ ॥

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं ३४ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

श्री॰ गी॰ टी॰ ग्र॰

परमार्थप्रपाटी टीका ७

राजसीमाह ययेति यया धृत्या धर्मकामार्थान्प्राधान्येन धा
रयते न विमोचयति तत्प्रसंगेन फलाकांक्षी च भवति सा राज
सी धृतिः ३४ ॥

वनमाली टीका ८

'य प्रसंगेन च कर्तृत्वाभिनिवेशेन फलाकांक्षी सन् यया धृत्या धर्मं
काममर्थं धारयते नियमं कर्तव्यतयावधारयति न तु मोक्षं कदा।
चिदपि धृतिः सा पार्थ राजसी ३४ ॥

कुसुमवैजयंती टीका ९ 'का

राजसीं धृतिमाह ययात्विति हे अर्जुन प्रसंगेन संगविहत्वसंगे
न फलाकांक्षी पुरुषः यद्वा फलाकांक्षी नितः कामविहत्वसंगेन
यया धृत्या धर्मकामार्थान् तत्तच्छास्त्रानुसाधनभूतान् मनःप्राणेंद्रि
यक्रियाः धारयते हे पार्थ सा धृती राजसी रजोगुणजन्या त्वया वो
द्धव्या पार्थार्जुनेति संबोधयन् आभ्यां पतन्लक्षण्या शुद्धस्वरूपार्जुनशु
द्धो न तु वेदशीष्टतिर्नास्ति संदेहं माकुरुष्वेति सूचितं ३४ ॥

मधुसूदनी टीका १०

नः सात्विकाभिन्नत्वप्रसंगेन कर्तृत्वाद्यभिनिवेशेन फलाकां।
क्षी सन् यया धृत्या धर्मं काममर्थं च धारयते नित्यं कर्तव्यतया
वधारयति न तु मोक्षं कदाचिदपि धृतिः सा पार्थ राजसी ३४ ॥

सदानंदी टीका ११

कर्तृत्वाभिनिवेशेन फलाकांक्षी च सन् यया धर्ममर्थं तथा कामं
नित्यं कार्यतया जनः १ धृत्या वधारयन् मुक्तेर् न तु मोक्षं कदाचन
सा धृती राजसी पार्थ संसारैकफलप्रदा २ ३४ ॥

नीलकंठी टीका १२

यया धृत्या धर्मादीन् धारयते ऽनुरोध्यतया निश्चिनोति प्रसंगेन य
मादेः संबंधेन फलाकांक्षी च भवति पुरुषः धृतिः सा पार्थ राजसी ३४

149

आनंदीटीका १२

फलाकांक्षीधर्मस्यप्रसंगेयया धृत्याधर्ममेवधारयते नार्थकामौ काम्प्रसंगेनतत्तनधर्मार्थौ अर्थप्रसंगेनततधर्मकामौसाचंचलत्वाद्राजसी धृतिः ३४ ॥

रामकंटीटीका १४

रजोगुणजाधृतिर्ययासाधनभूतयासंसारिपुरुषः प्रसंगेनोत्कल त्वेनफलाकांक्षीस्वर्गादिसुखात्मककर्मफललिप्सुर्धर्मादीन्धारयतेरहहृतिच नत्वपवर्गं धर्मः शास्त्रचोदितसमाचारः तत्फले सुखेकामः अर्थोधनं त्रिवर्गमात्रनिवद्धधृतयोहिसंसारिणःपुरुषाः नदेषाधृतिर्हैयैव अथतामसी ३४ ॥

लासिकी [illegible]टीका

राजसीधृतिमाह ॥

यया धृत्यादाप्वेन धर्मकामार्थांस्त्रिवर्गंधारयतेनित्यंकर्तव्यत यावद्भाति प्रसंगेनतथाभिनिवेशेनफलाकांक्षीचभवति सा धृतीराजसी [illegible] ३४

पंचोलीटीका

राजसीधृतिमाह ययाइति हेअर्जुनतत्पुनःययाधृत्याधर्मकामार्थान्त्रीमदार्थान्नवश्यकर्तव्यान् धारयतिप्रसंगेनफलाकांक्षीधर्मादेरवश्यकर्तव्यत्वेनधारणाप्रसंगोयदानध्यानेनप्रसंगेनतस्य फलाकांक्षीभवतियःपुरुषःसाधृतीराजसी ३४

रत्नावीरसमिश्रोधिनी

राजसीधृतिमाह ययाचेति प्रसंगेन प्रकृष्टेन संगेनोत्कलत्वेन फलाकांक्षीफलमभिसंदधानः कर्मयोगीधर्मादीनेवप्राधान्ये नधारयते ननुमुक्तिमपिसाराजसीधृतिः ३४ ॥

मधुभाष्य

३४ ॥

150

14°

भाषा अनुवाद ॥

अब राजसी धृति कहते है कि हे अर्जुन जिससे भिन्न जो धृति कि जिससे धर्म अर्थ औ काम सब श्रेष्ठ रूप से धारण किये जाय परित्यक्त न होय और उन के संङ्गम से धर्मादि के फल की आकांक्षीभी होय ऐसी धृति का नाम राजसी है ३४ ॥

दोहा

यासैं धर्म अर्थ कामको नर धरहै धृति सोय संगहिसैं फल
कांक्षी जो पार्थ सो राजसी होय ३४।

151

यया स्वप्नं भयं शोकं विषादं मदमेव च न वि
मुंचति दुर्मेधा धृतिः सा तामसी मता ३५

शांकरभाष्य टीका १

येयेति यया स्वप्नं निद्रां भयं त्रासं शोकं सन्तापं विषादमव
सादं विषण्णवदनतां मदं विषयसेवां आत्मनो बहु मन्यमानो
मत्त इव मदमेव च मनसि नित्यमेव कर्तव्यरूपतया कुर्वन्न
विमुंचति पार्थ स एव दुर्मेधाः कुत्सितमेधाः पुरुषो यया स
धृतिर्या सा तामसी मता ३५ ॥

आनन्दगिरि टीका २

तामसी धृतिं व्याचष्टे येयेति शोकं प्रियवियोगनिमित्तं सन्तापं
विषण्णतामिन्द्रियाणां ग्लानिः विषयसेवा कुमारीप्रभृतेरुपल
क्षणमेके स्वमादिमदानं सर्वमेव कर्तव्यतयात्मनो बहु मन्य
मानो मनसि नित्यमेव कुर्वन् दुर्मेधाः न विमुंचति किन्तु धा
रयत्येवेति योजना ३५ ॥

स्वामिकृत टीका ३

दुष्टा अविवेकबहुला मेधा यस्य स दुर्मेधाः पुरुषो यया धृत्या स्व
प्नादीन्न विमुंचति पुनः पुनरावर्तयति स्वमोत्र निद्रा सा धृति
स्तामसी ३५ ॥

पिशाचभाष्य टीका ४

तमःप्रभवा ३५ ॥ ॥ ॥ ॥ ॥ ॥ ॥

रामानुजभाष्य टीका ५

ययेति यया धृत्या स्वप्नं निद्रां मदं विषयानुभवजनितमद
स्वभावेन उद्दिश्य प्रवृत्तामनःप्राणेन्द्रियक्रियाः दुर्मेधा न
विमुंचति भयशोकविषादशब्दाश्च भयशोकादिहेतुभूतवि
षयपरा न तत्साधनभूतांश्च मनःप्राणादि क्रिया यया धारयति
सा धृतिस्तामसी ३५ ॥

अभिनवगुप्त टीका ६

तस्यष्टार्थ ३५ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपादी ७

नामंसौमहत् यथास्वप्नमिति दुष्टाश्वविवेकवहुलामेधायस्यासौ
दुर्मेधाः पुरुषः यथा स्वप्नमिति स्वप्नप्रदाधिदशनेनभविष्य
वितयतिनत्याभयशोकविषादमदेचनविमुंचतिस्थिरीकरोति
सातामसीधृतिः ३५ ॥

वनमाली टीका ८

स्वप्नंनिद्रांभयंशोकंइष्टवियोगनिमित्तंतापंविषादंमिंद्रियावसा
देमदंमशास्त्रीयविषयसेवोन्मुखत्वंचयथानविमुंचत्येवकिंतस
दैवकर्तव्यतयामन्यतेदुर्मेधाविवेकासमर्थःधृतिंसातामसी ३५

कृष्णमैवजयंती टीका ९

नामंसीधृतिमाह यथास्वप्नमितिदुर्मेधाइष्टबुद्धिःपुरुषोयया
धृत्यास्वप्नंनिद्रांभयंशोकंविषादंचमदंमदंविषयभोगैर्वेच
शास्त्रातिक्रमणंयानविमुंचतिकिंतयाधृतिप
वहेपार्थसाधृतिस्तामसीतमोगुणाश्रयत्वात्यावोध्यापार्थमनेन
धृत्यास्वप्नानवदुर्मेधप्रत्याभावेनेदृष्णापृतेरप्यभावइतिसूचितं ३५

मधुसूदनी टीका १०

स्वप्नंनिद्रांभयंचत्रासंशोकंइष्टवियोगनिमित्तंसंतापंविषादंमिंद्रिया
वसादंमदंमशास्त्रीयविषयसेवोन्मुखत्वंचयथानविमुंचत्येवकिं
तस्यैवकर्तव्यतयामन्यतेदुर्मेधाःविवेकासमर्थःधृतिःसापार्थ।
तामसी [illegible]
[illegible] ३५ ॥

सदानंदी टीका ११

निद्रांत्रासंचसंतापंचकीयेष्टवियोगजं इंद्रियावसादंचभोगास
क्तिं१ मदं १ नविमुंचतिकिंतुकर्तव्यतेनमन्यते निर्विवेको
ययाधृत्यासाधृतिःपार्थतामसी २ ३५ ॥

यत्रि

नीलकंठी टीका १२

स्वप्नं निद्रां भयं त्रासं शोकमसिद्धं विषादं विषण्णतां मदं दृप्ततां। स्त्रीयविषयसेवया चित्तस्य विवशत्वं एतान्न विमुंचति धारयत्येव यया धृत्या सा धृतिः सा पार्थ तामसी ३५ ॥

आनंदीटीका १२

दुर्मेधाः धर्मादिष्वागानस्वप्नादिष्वेवासक्तेर्दुर्बुद्धिः विषादमनुत्साहम् ३५

रामकंठीटीका १४

सा तामसी तमोगुणजा धृतिर्यया हेतुभूतया दुर्मेधा विपर्यय प्रत्ययरूपत्वाद्दुष्टा मेधा प्रज्ञा यस्य स तादृशः सन् पुरुषः स्वप्नादीन्दोषान्न विमुंचति तन्मय एव नित्यमास्त इत्यर्थः स्वप्नो निद्रा तमःकार्यं भयमिष्टविषयविनाशशंकया त्रासः शोको नष्टानुशोचनम् विषादमनुत्साहं मदं विवेकं मूढः किलता नेव नित्यमहं हन्त्रासेन तन यथा निकृष्टैव धृतिस्तामसेव [illegible] ३५ ॥

^तामसी धृतिमाह ॥ लासिकी [illegible] टीका

^येन धैर्येण स्वप्नं निद्रां भयं त्रासं शोकं विनष्टानुशोचनं विषादं विषण्णतामनुत्साहं मदं वित्तोद्रेकं न विमुंचति पुनः पुनरावर्तयति यतो दुर्मेधाः दुष्टा देहाद्यभिमानाभिनिवेशेन विपर्यस्ता ^धृ
बुद्धिर्यस्य सा धृतिस्तामसी [illegible] ३ ५

पंचोलीटीका

तामसीं धृतिमाह ययेति हे पार्थ दुर्मेधा यया धृत्या स्वप्नं निद्रां भयं त्रासं शोकं संतापं विषण्णतां यथेष्टविषयप्राप्त्याशाम्नानो विषयसेवां च मदमन्यमान्यस्य धोमदस्तं चैतानि वस्तूनि मनसि नित्यकर्तव्यतया कर्तव्यत्वं न विमुंचति धारयत्येव सा धृतिस्तामसी ३५

रणावीरसमिद्धोयिनी

तामसीमाह यथेति दुर्मेधाउष्णाविपर्ययप्रत्ययरूपत्वाद्विवेकशून्यामेधायस्यसतादृशः पुरुषोयया धृत्यास्वप्नादीन्न विमुंचति सातामसीधृतिः ३५ ॥

मधुभाष्य

३५॥

भाषा अनुवाद

अब तामसीधृति कहते हे किहे अर्जुन जिस मनुष्य की दुर्मेधा
कहे अविवेकिनी नीच बुद्धि हे और वह दुर्बुद्धि मनुष्य जिस धृति
कहे धैर्य से निद्रा औभय शोक तथा विषाद कहे दुःख औ मद इ
न को नही छोडताहे वह धृति तामसीहे ३५ ॥

दोहा

यासें स्वप्न भय शोक को मद विषादहिकोय त्यागेमूढन
सो धृति पार्थतामसीहोय ३५

सुखं त्विदानीं त्रिविधं शृणु मे भरतर्षभ अ
भ्यासाद्रमते यत्र दुःखांतं च निगच्छति ३६

शांकरभाष्य टीका १

गुणभेदेन क्रियाणां कारकाणां च त्रिधा भेद उक्तोऽथेदानीं फलस्य
सुखस्य त्रिविधो भेद उच्यते सुखमिति सुखं तु इदानीं त्रिविधं शृणु
समाधानं कुर्वित्येतन्मे मम भरतर्षभ अभ्यासात् परिचयाद्यत्र रमते र
मते रतिं प्रतिपद्यते यत्र यस्मिन् सुखानुभवे दुःखांतं च दुःखा
वसानं दुःखोपशममेव निश्चयेन प्राप्नोति ३६ ॥

आनंदगिरिटीका २

वृत्तमनूद्यानंतरश्लोकतात्पर्यमाह गुणेत्यादिना क्रियमाणे
कारकाणां गुणतस्त्रैविध्योक्त्यनंतरं फलस्य सुखस्य त्रैविध्योप
वसरे सतीत्याह इदानीमिति हेयोपादेयभेदार्थं त्रैविध्यं समा
धानमेकाग्रमम वचनादिति शेषः यत्रेत्यस्य पदस्य संबध्यते न
तु त्रिविधं सुखमिति पूर्वेण संबंधः ३६ ॥

स्वामिकृतटीका ३

सुखस्य त्रैविध्यं प्रतिजानीते सार्धेन सुखमिति स्पष्टार्थं तत्र
सात्त्विकं सुखमाह अभ्यासादिति सार्धेन यस्मिन्सुखे अभ्यासा
दतिपरिचयाद्रमते न तु विषयसुखवत्सहसा रतिं प्राप्नोति
यस्मिं रममाणश्च दुःखस्यांतमवसानं नितरां गच्छति ३६ ॥

पैशाचभाष्यटीका ४

सुखे शमे ह्यभ्यासादावृत्त्या रमते निगच्छति दुःखांते दुःखांतं
दुःखावसानं गच्छति प्राप्नोति ३६ ॥

रामानुजभाष्यटीका ५

सुखमिति पूर्वोक्ता सर्वे ज्ञानकर्मकर्त्रादयो येभूतास्तैः सुखगु
णतस्त्रिविधं इदानीं शृणु यस्मिन्सुखे चिरकालाभ्यासक्रमेण नि
रतिशयां रतिं प्राप्नोति दुःखांतं च निगच्छति निखिलसांसारिक
स्य दुःखस्यांतं निगच्छति ३६ ॥

श्री·
गी·टी·
अ

अभिनवगुप्तकृतटीका ६

सुखार्थम् ३६ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपादी टीका ७

अथ त्रिविधं सुखमाह सुखमिति द्वाभ्यां इदानीं त्रिविधं सुखमिदं मे भ
तः शृणु अभ्यासादिति यत्र यस्मिन् सुखे अभ्यासान् रंततरां न तथा
नाद्यमनेन रममाणः दुःखांते दुःखावसाने निगच्छति नितरां प्राप्नो
ति [illegible]
[illegible]
[illegible] निवर्तते तस्मादेव सुखं ३६ ॥

वनमाली टीका ८

सुखस्यापि त्रैविध्यं प्रतिजानीते सुखमिति यत्र यस्मिन् सुखे चिरकाल
मभ्यासात् क्रमेण रमते निरतिशयां रतिं प्राप्नोति यस्मात् दुःखस्या
तं नाशं नितरां गच्छति ३६ ॥

ऊस्तमवैजयंती टीका ९

अथ सुखस्य गुणतस्त्रैविध्यं प्रतिजानीते सुखमिति हे भर
तर्षभ भक्तश्रेष्ठ इदानीं तु [illegible] मे मत्तः सकाशात् सर्वक्रियाणां
वेद्यानां करणादीनां च फलरूपं तत्सुखं गुणतस्त्रिविधं शृणु
भरतर्षभेण नेन भरतवंशोद्भवानां मध्ये तव श्रेष्ठत्वादेन कृष्णः
पि कारोः स्यात् इत्यवसामीति सूचितं तत्सुखं केषांचिदशामि यथे
त्यायामाटीसाविके सुखमाह सोऽहं न अभ्यासादिति यत्र यस्मि
न्सुखेऽभ्यासात् पुनः पुनः चिरकालपरिशीलनाद्रमते निरति
शयां प्रीतिं प्राप्नोति यत्र च रममाणः प्रकृष्टो दुःखांते मोक्षे निग
च्छति प्राप्नोति निखिलसांसारिकदुःखांतं तरतीमर्थः ३६ ॥

+ एवं क्रियाणां कारकानां च गुणतस्त्रैविध्यमुक्त्वा तत्फल
स्य त्रैविध्यं प्रतिजानीते श्लोकार्धेन ॥

मधुसूदनी टीका १०

+ मे मम वचनात् श्रृणु हेयादेयविवेकार्थं यां संगान्तरनिवारणो

नमनः स्थिरीकुरु हे भरतर्षभ मे तियोगपनाद्दर्शितानां सात्विकेसु।
खमाह सार्द्धेन यत्रसमाधिसुखेविषभ्यासाद्रतिपरिचयाद्रमते
परितनोभवति न तुविषयसुखे रवमयपव यस्मिन्न समाणपदुः
खस्य सर्वस्यान्तमवसानंनितरांगच्छति नतु विषयसुखे रवं
नेमहदुःख[illegible]ानि ३६ ॥

सदानंदी टीका ११

क्रियाणांकारकाणांचगुणतस्त्रैविध्यमीरितं त्रैविध्यंप्रतिज्ञा।
नीतेनफलेषुभनासुखे १ हेयादेयविवेकाय यवचनान्ते।
मुणुस्फुटं सुखंत्रिविधमसेतिसावधानेनचेतसा २ सार्द्धेनसा
त्विकंप्राहसुखमानंदवारिधिः समाधानसुखेयत्राभ्यासान्नारि
चयाद्रति ३ अथयतेतयायत्ररममाणोनुभूतिकः सर्वदुःखो
पशामनेनितरांगच्छतिसुखं ४ ३६ ॥

नीलकंठी टीका १२

गुणभेदेनक्रियाणांकारकाणांचत्रैविध्यमुक्तंतत्फलस्यसु
खस्यत्रैविध्यमाह सुखंत्विमादिना अभ्यासात्पौनःपुन्येन
सेवनात् यत्रसात्विकराजसेतामसेवासुखेरमतेरतिंप्रा
प्नोति यथा दुःखस्यपुत्रशोकादेरपिअंतेअवसानेनिग
च्छति निश्चयेनप्राप्नोति तत्सुखंत्रिविधंशृणु यदात्वयम
र्थः सात्विकसुखस्यैवलक्षणार्थः तदायत्रसमाधिसुखे
अभ्यासाद्रमतेनतुविषयसुखेरवरागात् दुःखांतमोक्ष
चनिगच्छतीत्यर्थः ३६ ॥

आनंदी टीका १३

अथेदानींकर्मफलस्यसुखस्यत्रैविध्यमाह ३६

+अथकर्मभूतफलस्यसुखस्यत्रैविध्यंप्रति
पादयितु मुपक्रमते

रामकंठीटीका १४

गतार्थमेतत्+ अथत्रैविध्येप्रतिपाद्येसात्विकत्वेनावत्सुखस्यप्रतिपादयि
तुमाह तत्सात्विकंविशुद्धसत्वहेतुकंसुखमानंदं विद्या
ज्जानीयात् कीदृशमात्मबुद्धिप्रसादजं आत्माब्रह्मस्वरूप

श्री॰
गी॰ टी॰
अ॰

156

परंतत्त्वंतदालम्बनाबुद्धिः परात्मज्ञानस्याः प्रसादो नैर्मल्यं।
यदपेतयाविषमिवमपिसत्वंमलिनत्वात्परिहार्यमेव ततस्त
याविद्याबुद्धिप्रसादाज्ज्ञानमद्भुतंकिंतत् यत्रयस्मिन्सुखे
भ्यासान्नित्यानुशीलनाद्योगीरमतेरतिंभावयति नतुहि
जते विषयभोगात्मकस्यहिसुखस्याभ्यासाद्विषयाकांक्षया
तेत्रोद्वेगंजनयति समाधिजंतसुखंरतिमेवावहति यत्रच ९
सुखेनुभूयमानेसुखेदुःखानामंतंसमाप्तिमभावंनियच्छ
ति नितरांप्राप्नोति अन्यस्मिन्हिसुखेनुभूयमानेक्षणान्
तरेतदेवदुःखंसंपद्यते ३६ ॥

लासिकी [illegible]टीका

+ सुखस्यत्रैविध्यंप्रतिजानीतेत्र्यर्धेन॥

+मेववचनाच्छृणु अन्यत्स्पष्टं तत्रसात्विकंसुखमाह अभ्यासा
दितिसार्धेन यत्रयस्मिन्सुखेभ्यासान्नित्यानुशीलाद्योगीरम
तेयथोत्तरंप्रीतिंभजतेनतुद्विजते यस्मिन्मानस्वदुःखस्या २
ध्यात्मिकादिनात्रिविधस्यान्तमवसानंनिगच्छतिनितरांप्रा
प्नोति ३६

पंचोलीटीका

इदानींफलस्यसुखस्यत्रैविध्यंप्रतिजानीते सुखमिति हेभरत
र्षभत्वंपुनःइदानींसत्वादिभेदेनत्रिविधंसुखंममतःशृणु।
यत्रयस्मिन्सुखानुभवेअभ्यासात्परिचयात् चिरंरमते।
रतिंप्रतिपद्यतेचयत्रदुःखांतंदुःखाभावंनिगच्छतिप्राप्नो।
ति ३६

रणवीरससिद्धबोधिनी॥

इदानींकर्मफलभूतस्यसुखस्यत्रैविध्यंप्रतिजानीतेसुखमि
त्यर्धेन गतार्थमेतत् अथतस्यसात्विकंभेदंदर्शयति अभ्यासा
दितिसार्धेन यत्रयस्मिन्सुखेभ्यासान्नित्यानुशीलनाद्रमतेरतिं
करोति नतुविषयभोगात्मकेसुखाभासेसहसोद्वेगंयाति यस्मि
न्नमनमानस्यदुःखांतंदुःखावसानंचनितरांगच्छति अन्यत्रहिसु
खेनुभूयमानेतत्क्षणमदुःखोत्पत्तिर्दृश्यते ३६॥

ਸਪੁਮਾਖ

੩੯॥

भाषा अनुवाद ॥

अब सुख भी तीन प्रकार काहै यह प्रतिज्ञा आधे श्लोक मे कहते हैं कि हे भरतवंशी अर्जुन अब त्रिविध सुख भी हम से सुनो कि जो पुरुष नित्य अभ्यास के हेत से सुख भोग करताहै और विषयी लोगोंके समान विषय वासनासे अति हठधर करके सुखभोग नंही करता प्रीतिको नंही प्राप्त होताहै ऐसा जो सुख भोगी पुरुषहै वह दुःख के अन्त को प्राप्त होता अर्थात् दुःख से छूटजाताहै ३६ ॥

दोहा

मोसे अब सुखकों सुनहु त्रिविध भरतवरसोय जामहि
रमहि योगसें दुःखनाशक सोहोय ३६॥

157

146

यत्तदग्रे विषमिव परिणामेऽमृतोपमे त
त्सुखं सात्विकं प्रोक्तमात्मबुद्धिप्रसादजं ३७

शांकरभाष्य टीका १

यदिति यत् सुखमग्रे पूर्वं प्रथमसन्निपाते ज्ञानवैराग्यध्यान
समाध्यारम्भेऽत्यन्तायासपूर्वकत्वाद्विषमिव दुःखात्मकं भवति
परिणामे ज्ञानवैराग्यादिपरिपाकजं सुखममृतोपमं तत् सु
खं सात्विकं प्रोक्तं विदुषां आत्मनो बुद्धिरात्मबुद्धिः प्रसादो नैर्मल्यं
सलिलवत् स्वच्छता ततो जातमात्मबुद्धिप्रसादजमात्मविषया
वात्मावलम्बना बुद्धिरात्मबुद्धिस्तत्प्रसादप्रकर्षाद्वा जातमिति
तत्तस्मात् सात्विकं स्मृतं ३७ ॥

आनन्दगिरिकृत टीका २

तत्र सात्विकं सुखमादेयत्वेन दर्शयति यत्तदिति प्रथमसन्निपाते।
विभजते ज्ञानेति कुतस्तस्य दुःखात्मकत्वं तत्राह अत्यन्तेति दुःखा
त्मकत्वे दृष्टान्तमाह विषमिवेति ज्ञानादिपरिपाकावस्था परिणा
मस्तस्मिन् सति ततो जातमिति योजना तत्रैव हेत्वन्तरमाह आत्म
न इति आत्मबुद्धिशब्दार्थान्तरमाह आत्मविषयेति अन्तःकरणनै
र्मल्याद्वा सम्यक्ज्ञानप्रकर्षाद्वा जातत्वादिति तच्छब्दार्थः ३७ ॥

स्वामिकृत टीका ३

कीदृशं तत् यत्तदिति यत्किमप्यग्रे प्रथमं विषमिव मनःसंयमाधी।
नत्वात् दुःखावहमिव भवति परिणामे त्वमृतसदृशं आत्मविषया
बुद्धिः तस्याः प्रसादो रजस्तमोमलत्यागेन स्वच्छतयावस्थानं ततो जा
तं यत्सुखं तत्सात्विकं प्रोक्तं योगिभिः [illegible] ॥

पिशाचभाष्य टीका ४

यत्तत्सुखमग्रे प्रथममन्तरकालममृतोपमं आत्मबुद्धिप्रसादजं बु
द्धिप्रसादादन्तःकरणप्रसादाज्जातं तत्सात्विकं ३७ ॥

+एतदेव विशिनष्टि ॥

रामानुजभाष्य टीका ५ ॥

+यदिति यत्तत्सुखमग्रे योगोपक्रमवेलायां वकायासमसाध्यत्वाद्धि।

विकरूपत्वात्तद्भवात् विषमिव दुःखमिव भवति परिणामे स्वतो
पमे ... परिणामे विपाके अभ्यासबलेन विविक्तस्वरूपाविर्भा
वेऽमृतोपमं भवति तदात्मबुद्धिप्रसादजं आत्मविषया बुद्धिरात्म
बुद्धिस्तया निवृत्तसकलेतरविषयत्वं प्रसादः निर्मलत्वं ...
... बुद्धेर्विविक्तस्वभावात्मानुभवजनितं तत्त्वावेऽमृतो
पमं तत्सुखं सात्विकं प्रोक्तं ३७ ॥

अभिनववरमकृत टीका ६

स्पष्टार्थं ३७ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका ७

तथा यदग्रे आरंभे मनःप्रत्याहृत्याकारणेन
विषमिव दुःखमिव गति परिणामे त्वमृतोपमं परमानंदसदृशं भवति यच्चा
आत्मबुद्धिप्रसादजमात्मविषया व्यवसायात्मिका बुद्धिस्तयायः प्रसादः
प्रसन्नता तत्र जातं तत्सात्विकं सुखम् ३७ ॥ ३७ ॥ ३७

वनमाली टीका ८

यदग्रे ज्ञानवैराग्यध्यानसमाध्यारंभे प्रयासनिर्वाहत्वाद्विषमि
व दुःखविशेषावहं भवति परिणामे ज्ञानवैराग्यादि ... परिपा
केत्वमृतोपमं श्रीमन्निःशेषासदेभवति आत्मनो विशेषः प्रसादा
त् उक्तः प्रसादो निद्रालस्यादिराहित्येन स्वच्छतयावस्थानं तेनोत्प
न्नमात्मबुद्धिप्रसादजं नतु राजसमिव विषयेन्द्रियसंयोगजं न वा ता
मसमिव निद्रालस्यादिजं ३७ ॥

उत्तमवैजयंती टीका ९

किंच यत्तदिति यत्सुखं तदग्रे स्वस्वप्रथमे योगारंभसमये प्रत्यर्थिः
विषमिव बाह्येन्द्रियदमनान्तःकरणसंयमादिरूपबहुक्लेशसाध्य
त्वाद्धि विकल्परूपानुभवाभावाच्च नित्यमहत्तावदतिशयदुःखाव
हमिव भवति परिणामे योगपरिपाकरूपसमाधिसमये त्वमृतम्
तोपमं योगाभ्यासबलेनाखिलेन्द्रियचांचल्याद्विविक्तात्माविर्भा
वपीयूषप्रवाहनिपानमिव भवति यच्चात्मबुद्धिप्रसादजं आत्मसंब
धिनी बुद्धिरात्मबुद्धिः तस्याः प्रसादः निर्मलता तेनाखिलविषयद्व
यकत्वस्याज्ञानेन तत्सुखं सात्विकसत्त्वगुणजं प्रोक्तं शास्त्रैरि
तिशेषः ३७ ॥ ॥

मयूखवती टीका १०

+तदेव विहृणोति ॥

+यदग्रे ज्ञानवैराग्यध्यानसमाध्यारंभे सेनायासनिर्वाहवाहिष मिव देहेषु विशेषावहं भवति परिणामे ज्ञानवैराग्यादिपरिपाके त्वसृतोपमं प्रीत्यतिशयास्पदं भवति आत्मविषयात्वहिरात्मबुद्धिलक्ष्याः प्रसादो निद्रालस्यादिराहित्येन स्वच्छतयावस्थानं ततो जातमात्मबुद्धिप्रसादजं ततराजसमिव विषयेंद्रियसंयोगजेनतया ममृतमिव निद्रालस्यादिजं ईदृशं यदनात्मबुद्धिनिष्ठस्यात्मबुद्धि प्रसादजं समाधिसुखं तत् सात्विकं प्रोक्तं योगिभिः अपरस्यात्मस्थस्या साहात्वेनैव यद्यरमते प्रीयतेयत्र चदुःखांतं निगच्छति तत्सुखं त्रिविधं गुणभेदेन श्रृणु इति तत् पदानामर्थः पूर्वश्लोकस्यान्वयः यत्तदग्रे इत्यादिश्लोकेन सात्विकसुखलक्षणमिति भाष्यकाराभिप्रायोप्येव ३० ॥

सदानंदी टीका ११

तदेव विहृणोतीशः सुखं बुद्धिप्रसादजं ज्ञानवैराग्यध्यानसमाध्यारंभप्रवयत् १ श्रमेनायासमाध्यन्ताहिषवहेहकृदेव तत् ज्ञानादिपरिपाके तुप्रीतेरतिशयास्पदं २ निद्रालस्यादिराहित्याद्बुद्धेर्यास्वच्छतागता तस्यात्मावलंबिन्याः प्रसादाज्जातमातरं ३ तत्समाधिसुखं प्रोक्तं सात्विकं योगवित्तमैः ४॥३०॥

नीलकंठी टीका १२

यत्तत्प्रसिद्धं सर्वशास्त्रप्रमाणसिद्धं अग्रे समारंभकाले मनःप्राणेंद्रियस्पंदनिरोधेन यत्नेन तत्त्वमानसप्रशोधियमाने विषमिवातितीव्रवेदनाकरं परिणामे सात्विकाभ्यासनिपुणत्वं शमदमादिक्रियासु अमृतोपमं अमृतमाल्हादकरं आत्मनः स्वस्यैव बुद्धेः प्रसादो नैर्मल्यं रजस्तमोमलराहित्यं तस्मादाविर्भूतं नेन तत्र विषयसंगजं निद्रालस्यादिजं वा तत्सुखं सात्विकं प्रोक्तं ३० ॥

आनंदी टीका १३

अभ्यासाद्यत्र रमते न तु विषयसुखवदभ्यासादृहितेजते दुःखस्यांतं मोक्षं च नियच्छति ददाति तदात्वे सात्वावस्थायां विषमिवेंद्रियाणां निरोधे क्लेशावहत्वात् आत्मबुद्धिः परमात्मविषयं ज्ञानं तत्प्रसादेन निर्मलेन जातम् ३० ॥

श्री॰
गी॰ टी॰
अ॰

159

रामकंठीटीका १८

ज्ञनः सर्वज्ञः खानामन्तो यत्तत्सुखं तदात्वे साध्यमानावस्था
यां चित्तसमाधानविशेषाधानलक्षणक्लेशायत्तत्वाद्विषत्
ल्यं परिणामे तु सिद्धावस्थायाममृतोपमं निरुपमास्वादमि
त्यर्थः वाह्यसुखस्यैतदेव विपरीतं वक्ष्यति एतत्तद्विशुद्ध
निरतिशयनिरुत्तरास्वादरूपं समाधिप्रज्ञाप्रभवं योगविष
यं सुखमुपादेयम् ॥ ३७ ॥

लाखिकी[illegible]टीका

यत्तदिति किमप्यनिर्वाच्यं अग्रेऽभ्यासकाले विषमिव दुःस
हं जन्मशताभ्यस्तदेहाहंभाववासनायाऽपरिहरत्वात्
परिणामे पर्यंते योगस्य संसिद्धावमृतोपमं निरुपमास्वादं
एवं सामान्येनोक्त्वा विशेषतो निर्दिशति आत्मबुद्धिप्रसाद
जमिति आत्मनः परतत्त्वस्य बुद्धेः सम्यग्बोधस्य वैशद्या न्नृ
ज्जातं एवंविधं यत्सुखमानंदस्तत्सात्त्विकमुपदिष्टं
३७

पंचोलीटीका

तत्र सात्त्विकसुखमाह यदिति त्रिविधसुखमध्ये यत्सुखम
ग्रे श्रवणाद्यभ्यासपरिपाके विषमिव दुःखसाध्यमपि परिणामे ज्ञा
नवैराग्यादिपरिपाकजं सुखममृतोपमं तत्सुखं सात्त्विकं आ
त्मैनाबुद्धिस्तस्याः प्रसादो नैर्मल्यं तस्माज्जातं तत् अथवा आत्म
विषया बुद्धिः आत्मबुद्धिस्तस्याः प्रकर्षः तस्माज्जातं ३७

रणवीर समिद्बोधिनी

यत्तु सुखं तत्किमप्यनिर्वाच्यं प्रारंभे विषयतुल्यं मनःकरणसंय
माधीनत्वात् परिणामे सिद्ध्यवस्थायाममृतसदृशं तत्सात्त्विकं
सुखं विद्याज्जानीयात् कीदृशं तत् आत्मबुद्धिप्रसादजं आत्मविष
यत्वत्तद्विषया या बुद्धिर्निश्चयस्तस्याः प्रसादो रागद्वेषादिकालुष्य
राहित्यं तस्माज्जातमित्यर्थः आत्मनो बुद्धिः प्रतीतिर्येषु तेषामा

स्वीयानां बांधवानामपि यः प्रकृष्टो धर्मानुसारी मार्गो हिंसातनो
जातमितिवार्थः ३०॥

मधुभाष्य

३०॥

भाषा अनुवाद ॥

और वह सुख कैसा है इस पर कहते हैं कि जो सुख अग्रे कहे अथ विष के तुल्य है औ अन्तको अमृत समान होता है वह सुख सात्विक है और आत्मा तथा बुद्धि की प्रसन्नतासे उत्पन्न है अर्थात् मल रूप रजोगुण तमोगुण तिन को सतोगुण दूर करै है तब वह सुख प्रगटै है ३७ ॥

दोहा

विषसदृश जो प्रथम है अंत सुधासमसोय तिहसुखसा
त्विक जानीय आत्ममति सें होय ३७ ॥

160

विषयेंद्रियसंयोगाद्यत्तदग्रेमृतोपमं परि
णामे विषमिव तत्सुखं राजसं स्मृतम् ३८

शांकरभाष्य टीका १

विषयेति विषयेंद्रियसंयोगाद्यत् सुखं जायते प्रथमं प्रथमक्षणे
ऽमृतोपमममृतसमं परिणामे विषमिव बलवीर्यरूपप्रज्ञामेधाध
नोत्साहहानिहेतुत्वाद्धर्मतज्जनितनरकादिहेतुत्वाच्च परिणा
मे तदुपभोगविपरिणामांते विषमिव तत्सुखं राजसं स्मृतं ३८ ॥

आनंदगिरिटीका २

राजसं सुखं हेयत्वाय कथयति विषयेति बलं सेनानुसामर्थ्यं वी
र्यं पराक्रमस्फूर्ति यशोरूपंशरीरसौंदर्यं प्रज्ञा स्फुतार्थग्रहणसाम
र्थ्यं मेधा गृहीतार्थस्याविस्मरणेन धारणशक्तिः धनं गोहिरण्या
दि उत्साहः कार्ये प्रव्रत्युपक्रमादिः एतेषां नाशकत्वाद्वैषम्यं के सु
खे विषसमत्वमित्यर्थः तत्रैव हेत्वंतरमाह धर्मेति ३८ ॥

स्वामिकृत टीका ३

राजसंसुख माह विषयेंद्रियेति विषयाणामिंद्रियैः सह संयोगाद्यत्तत्स्त्रीसंसे
गादिसुखममृतमुपमा यस्य तादृशं भवति अग्रे प्रथमं परिणामे
विषतुल्यमिहामुत्रचदुःखहेतुत्वात् तत्सुखं राजसं स्मृतं ३८ ॥

पिशाचभाष्य टीका ४

विषयेंद्रियसंयोगात् श्रोत्रादीनां शब्दादिभिः संयोगाद्यत्सुखं यदग्रे
अमृतोपमं परिणामे कालांतरे विषमिव तद्राजसं ३८ ॥

रामानुजभाष्य टीका ५

विषयेति अग्रेऽनुभववेलायां विषयेंद्रियसंयोगाद्यत्तदमृतमिव
भवति परिणामे विपाके विषयाणां सुखनाने मितंत्वेन दुःखत्वादौति
हेतेन सवमसुखस्य निरयादिनिमित्तत्वाद्विषमिव पीतं भवति तत्सुखं त्वा
राजसं स्मृतं ३८ ॥

अभिनवगुप्तकृत टीका ६

स्पष्टार्थम् ३८ ॥ ॥ ॥ ॥ ॥ ॥ ॥

श्री. गी. टी. अ

161

परमार्थप्रपा टीका ७

राजसमाह विषयेति यदग्र इति अग्रे प्रारंभे अमृतोपमं मत्स्य
गलवडिशामिषवत् तत्सुखं राजसम् ३८ ॥

वनमाली टीका ८

विषयाणामिंद्रियाणां च संयोगाज्जातं नत्वात्मबुद्धिप्रसादात् यत्त
दतिप्रसिद्धं स्रक्चंदनवनितासंगादिसुखं अग्रे प्रथमारंभे मनः
संयमादिक्लेशाभावादमृतोपमं परिणामे त्वैहिकपारत्रिकदुःखावह
त्वाद्विषमिव तत्सुखं राजसं स्मृतं ३८ ॥

ऊसमवैजयंती टीका ९

राजसंसुखमाह विषयेंद्रियेति यत्सुखमग्रे श्रामानुभवसमये वि
षयेंद्रियसंयोगात् विषयेस्तु रूपरूपस्पर्शादिभिः सहेंद्रियाणां च
त्वगादीनां संयोगात्संभवत्यामृतोपमममृतमिवाति स्वादुविष
याणां सुखनिमित्तत्वात्परिणामेऽन्ते तु विषमिव विषयसुखस्य नरक
हेतुत्वादतिदुःखावहं भवति ईदृशं सुखं राजसं रजोगुणप्रकृष्ट।
नैकथितं विहद्भिरितिशेषः ३८ ॥

मधुसूदनी टीका १०

विषयाणामिंद्रियाणां च संयोगाज्जातं नत्वात्मबुद्धिप्रसादात् यत्त
दतिप्रसिद्धं स्रक्चंदनवनितासंगादिसुखं अग्रे प्रथमारंभे मनः
संयमादिक्लेशाभावादमृतोपमं परिणामे त्वैहिकपारत्रिकदुःखा
वहत्वाद्विषमिव तत्सुखं राजसं स्मृतं ३८ ॥

सदानंदी टीका ११

विषयेंद्रियसंयोगाद्यत्तत्प्रसिद्धिमत् स्रक्चंदनस्त्रीसंगादिसुखं
स्वाग्रमग्रे तेनो १ धीसंयमादिसंक्लेशाभावादमृतवच्छं परिणा
मे तु दुःखानामाकरत्वाद्विषोपमं २ इहामुत्रापि तं संस्कारजननद्वा
रतः सदा संसरतिश्रमदं तत्सुखं राजसमीरितं ३ ३८ ॥

नीलकंठी टीका १२

राजसं सुखमाह विषयेति अग्रे भोगकाले परिणामे विष
मिव वियोगकाले इहामुत्र च दुःखप्रदत्वात् ३८ ॥

आनंदी टीका १२

परिणामे सिद्धावस्थायां विषमिव पुनः पुनः संस्मरणहेतुत्वेना
त्यंतदुःखदायित्वात् ३८ ॥

रामकंठीटीका १४

अथ राजसम् तद्राजसं रजोगुणसंभवं सुखं किं तद्यद्दिष्टेन वि
षयेण नित्येन शब्दादिनेंद्रियस्य श्रोत्रादेः संयोगात्संवद्धा
तदा ते साध्यमानावस्थायाममृतोपमं क्षणमात्रमास्वादवि
शेषहेतुत्वात्तथा रसतत्वं परिणामे सिद्धावस्थायां विषो
पमं तत्कालमेव हेयत्वात् यद्वानुभूयमानावस्थातदा तु
तदा विषयेंद्रियसंयोगजं सुखं सर्वं मधुरमेव परिणामे तु
तद्विपाकावस्था तस्मिन्सर्वमेव विषयसुखपरिणामं किंचि
न्नवितुमर्हति यतदुःखकारणं रजोगुणत्वाद्दुःखैकफलं
सुखं हेयमेव ३८ ॥

लाभिकी [illegible]टीका

+राजसंसुखमाह ॥

विषयाणां शब्दादीनामिंद्रियाणां श्रोत्रादीनां च संयोगात्सं
बंधाद्यत्तत्सुखमिदं स्त्रीसंगादिरूपं अग्रे उपभोगवेलायां त
थारसतत्वं परिणामे पर्यंते उपभोगाभावे विषमिव प॰
श्चात्तापाद्यनंतदुःखहेतुत्वात् तत्सुखं राजसं स्मृतं
३८

पंचोलीटीका

राजसं सुखमाह विषयेति यत्सुखं विषयेंद्रियसंयोगाज्जाय
मानं अग्रे प्रथमं तत्क्षणे अमृतोपमं अमृतसमानं परिणामे तदुप
भोगांते बलवीर्यरूपप्रज्ञामेधामनउत्साहहानिहेतुत्वात् अथवा
जन्मांतरे नरकादिहेतुत्वात् परिणामे विषमिव तत्सुखं राजसं ३८

राजसं सुखमाह विषयेति विषयाणां रूपादीनामिन्द्रियैश्च
क्षुरादिभिर्यः संयोगः सन्निकर्षस्तस्मादुत्पन्नं यत्स्त्रीसंगा
दिकं सुखं तद्राजसं कीदृशं तदात्वेनुभूयमानावस्थायाम
मृतोपमं क्षणमात्रमास्वादविषदेहत्वात्तथा रससुल्यं प
रिणामे विपाकावस्थायां विषयतुल्यं तत्कालमेव हेष्यत्वा
दिहामुत्रवबदुःखैकहेतुत्वाच्चेत्यर्थः ३८॥

मधुभाष्य

३८॥

भाषा अनुवाद ॥

अब राजस सुख कहते है कि विषय वासना सहित इंद्रियो के संयोग से जो प्रिय सङ्गम आदि सुख होता है और पहले तो अम्रत तुल्य लगता है औ अन्त को दुख दाई होनेसे विष समान होता सोइ सुख राजस है ३८ ॥

दोहा

विषय इंद्रिय संयोगसें आदसुधासम होय अंतहिमें विष
सदृश राजस कहिय सोय ३८ ॥

163

यदग्रेचानुबंधेचसुखंमोहनमात्मनः
निद्रालस्यप्रमादोत्थंतत्तामसमुदाहृतं ३९

शांकरभाष्यटीका १

यदग्रे चेति यदग्रे चानुबंधे चावसानोत्तरकाले च सुखं मोहकरमात्मनो निद्रालस्यप्रमादोत्थं निद्रा चालस्यं च प्रमादश्च तेभ्यः समुत्तिष्ठतीति निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतं ३९ ॥१॥

आनंदगिरिकृतटीका २

तामसं सुखं त्याज्यार्थमेवोदाहरति यदग्रे चेति अनुबंधशब्दार्थमाह अवसानेति मोहनं मोहकरं तत्र हेतुमाह निद्रेति ३९ ॥

स्वामिकृतटीका ३

तामसं सुखमाह यदग्र इति अग्रे प्रथमक्षणे अनुबंधे च पश्चादपि यत्सुखमात्मनो मोहकारणं तदेवाह निद्रा च आलस्यं च प्रमादश्च कर्तव्यार्थविधानरहितमनोराज्यमेतेभ्य उत्तिष्ठति यत्सुखं तत्तामसमुदाहृतं ३९ ॥

पिशाचभाष्यटीका ४

यदग्रे अवसाने च मोहनकरं निद्रालस्यप्रमादोत्थं तत्तामसं सुखं ३९

रामानुजभाष्यटीका ५

यदिति यत्सुखमग्रे चानुबंधे चानुभववेलायां विपाके चात्मनो मोहनं भवति मोहोऽत्र यथावस्थितवस्तुप्रकाशाभावः अत्र निद्रालस्यप्रमादोत्थं निद्रालस्यप्रमादजनितं निद्राद्यो ह्यनुभववेलायामपि मोहहेतवः निद्राया मोहहेतुत्वं स्पष्टं आलस्यमिंद्रियव्यापारमांद्यं ~~इंद्रियव्यापारमांद्ये हि~~ ज्ञानमांद्यं च भवत्येव प्रमादः कृत्यानवधारणरूप इति तत्र ज्ञानमांद्यं भवति ततश्च तयोरपि मोहहेतुत्वं तत्तामसमुदाहृतं अतो मुमुक्षुणा रजस्तमसी अभिभूय सत्त्वमेवोपादेयमित्युक्तं भवति ३९ ॥

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं ३९ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

+ तामसमाह यदग्रेइति अग्रेप्रथमक्षणेऽनुबंधेऽनेनेत्यनुबंधःपरिणामः तस्मिन्नात्म
+ नोंतःकरणस्यमोहनंव्यामोहकं तस्यावस्थानियममाह ॥

श्री॰
गी॰टी॰
प्र

164

परमार्थप्रपारी टीका ७

+ निद्रालस्यप्रमादोत्थं यदा निद्रायां स्वप्नभ्रमित्स्वविस्व प्र
+ विषयभोगस्वरूपस्य आलस्ये च विमर्दोऽज्ञे प्रमादे उन्मत्तावे
स्थानत्वेनतत्रैयत्कारेतत्तामसमुदाहृतंउदाहरणत्वेननिरूपितं ३९

वनमाली टीका ८

अग्रेप्रथमारंभेचानुबंधेपरिणामेचयत्सुखमात्मनोमोहक
रंनिद्रालस्यप्रसिद्धंप्रमादः कर्तव्यार्थावधानंविनामनोराज्य
मात्रंतेभ्यउद्भवोत्पद्यतेनतुसात्विकमिवबुद्धिप्रसादजंनचराज
समिवविषयेंद्रियसंयोगजंनिद्रालस्यप्रमादोत्थंतामसंसुख
मुदाहृतम् ३९ ॥

कुसमवेजयंती टीका ९

तामसंसुखमाह यदग्रेचेतियत्सुखमग्रेऽनुभवसमयेचपुनर
नुबंधेपश्चाद्विपाकसमयेचापिआत्मनोजीवस्यमोहनंवस्तुया
थात्म्यावरकंयच्चपुनर्निद्रालस्यप्रमादोत्थंनिद्राइंद्रियफल
रूपा आलस्यमिंद्रियव्यापारमांद्यंप्रमादः कार्याकार्यावधा
नाभावः निद्रादिभ्यउत्थितंजातंनिद्रादीनामपिअनुभवकालेमो
हहेतुत्वात् ईदृशंसुखंतामसंतमोगुणजन्यमुदाहृतंविद्वद्भिः ३९

मधुसूदनी टीका १०

अग्रेप्रथमारंभेचानुबंधेपरिणामेचयत् सुखमात्मनोमोह
करंनिद्रालस्यप्रसिद्धंप्रमादः कर्तव्यार्थावधानंमनोराज्यमनो
राज्यमात्रंतेभ्यउद्भवोत्पद्यतेनतुसात्विकमिवबुद्धिप्रसादजंनचरा
जसमिवविषयेंद्रियसंयोगजंतन्निद्रालस्यप्रमादोत्थंतामसं
सुखमुदाहृतं [illegible]
[illegible] ३९ ॥

सदानंदी टीका ११

आयत्नेतथापश्चात्परिणामेपियत्सुखंअविवेककरंस्वस्यनि
द्रादिभ्यःसमुत्थितं । अयंनानघहेतुत्वात्तत्सुखंतामसंस्मृतं ३१ ३९

नीलकंठी टीका १२

अग्रेआरंभे अनुबंधेपरिणामे मोहनंमोहकरं आत्मनोबुद्धेःयतो
निद्रादिजं ३९ ॥

आनंदीटीका १३

अग्रेसाध्यावस्थायां अनुबंधेपरिणामे आत्मनोमोहत्वंविपरीतत्वा
तज्जनकम् ३९ ॥

रामकंठीटीका १४

तथातामसं तत्तामसंतमोगुणनिमित्तकंसुखंकिंतयदग्रेऽनुभूय
मानावस्थायांचानुबंधेचपरिणामवेलायांसुखंबुध्यागृहीतं
मोहत्वेनैवचित्तकारि यतोनिद्रादिप्रभवंतमसोहिनिद्राप्रमादादि
कार्यं तत्रनिद्रासर्वेन्द्रियव्यापारोपरमोमोहावस्थाऽऽलस्यमुदा
स्यं प्रमादःकार्येष्वनवहितत्वमेतानिह्यनुभूयमानान्यपिमो
हात्मकानिपरिणामदशायामप्यपिमोहकान्येव तेषांज्ञाना
दिफलंभवत्यज्ञानहेतुकतमोगुणजत्वादेतदज्ञानफलंसुख
मत्यन्तहेयमेव एवंज्ञानादीनांसत्त्वान्तानांकेषांचिद्भावा
नांप्राधान्यविवक्षयात्रैविध्यमुक्त्वासर्वत्रसर्वप्रमात्रविषयाणांस
र्वभावानांसात्त्विकादिभेदेनत्रैविध्यंप्रवस्थितमितिसंग्रहेणाशंति पाद
यितमाह ३९ ॥

लासिकी[illegible]टीका

नामसंसुखं माह- निद्रायाइंद्रियव्यापारेपरमादालयस्यात्प्रमादादवधानाज्ञ्जा
तमग्रेआदावपि अनुबंधेपश्चादपिआत्मनोमोहनंविस्मृतिका
रणंयत्सुखंतत्तामसमुदाहृतं [illegible]
[illegible]
[illegible] ३९

पंचोलीटीका

तामसंसुखमाह यदिति यत्सुखमग्रेप्रथमतः अनुबंधेअवसा
नोत्तरकालेचआत्मनोमोहकरंनिद्रालस्यप्रमादोत्थंनिद्रालस्य
प्रमादेभ्यःसमुत्पन्नंतत्तामसमुदाहृतं ३९

तामसमाह यदेश्वति स्वप्नेन्द्रभूयमानावस्थायामनुबंधे परिणामाव
स्थायां च यत्तृष्णैव मानसनोतः करणस्य मोहनं वै चित्त्यकारित तामसमु
कं तत्स्वरूपमाह निद्रेति सर्वेन्द्रियव्यापारविरतिर्निद्रा आलस्यमप
टुत्वं प्रमादः कार्येष्वनवहितचित्तत्वं तेभ्यो जातमित्यर्थः ३९॥

मध्यमाख्य

३९॥

भाषा अनुवाद ॥

तामस सुख कहते है कि अग्रे कहे पहिले और अनुबन्ध कहे पीछे भी जो सुख मोहकारी विशेष से निद्रा औ आलस्य तथा प्रमाद कहे चितकी असावधानी औ मनकी जड़ता से जो सुख होय है सोई तामस सुखहै ३९ ॥

दोहा

आदिअंतमें जाहिसें आत्ममोहन होय निद्राआलस प्रमा
द जन तामस सुख है सोय ३९

न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः स
त्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः ४०

शांकरभाष्यटीका १

अथेदानीं प्रकरणोपसंहारार्थः श्लोक आरभ्यते नेति न तदस्ति न
त्वास्ति पृथिव्यां वा मनुष्यादिषु वा प्राणिजातमन्यद्वा प्राणिजातं
दिवि देवेषु वा पुनः सत्त्वं प्रकृतिजैः प्रकृतितो जातैरेभिस्त्रिभिर्गुणैः
सत्त्वादिभिर्मुक्तं परित्यक्तं यत् स्याद्भवेन्न तदस्तीति पूर्वेण संबंधः
सर्वः संसारः क्रियाकारकफललक्षणः सत्त्वरजस्तमोगुणात्मकोऽ
विद्यापरिकल्पितः समूलोऽनर्थ उक्तः वृक्षरूपकपरिकल्पनया
चोर्ध्वमूलमित्यादिना तं चासङ्गशस्त्रेण दृढेन छित्त्वा ततः पदं
तत्परिमार्गितव्यमिति चोक्तं तत्र च सर्वस्य त्रिगुणात्मकत्वात् संसार
कारणनिवृत्त्यनुपपत्तौ प्राप्तायां यथा तन्निवृत्तिः स्यात्तथा वक्तव्यं सर्व
श्च गीताशास्त्रार्थ उपसंहर्तव्य एतावानेव च सर्वो वेदस्मृत्यर्थश्च ४०

आनंदगिरिकृतटीका २

क्रियाकारकफलात्मनः संसारस्य प्रत्येकं सात्त्विकादिभेदेन त्रैविध्य
मुक्त्वा संसारान्तर्भूतमेव किंचित् गुणत्रयासंस्पृष्टमपि कश्चिद्भवि
ष्यतीत्याशंक्याह अथेति संसारस्य सर्वस्यैव गुणत्रयसंस्पृष्टत्वे प्रकरणोप
संहारः श्लोकस्य प्राणिग्रहणेन प्रसिद्धास्थावरादि गृह्यन्ते प्रकरणा
र्थमुपसंहर्तुमनुवदति सर्व इति तस्यानेकात्मकत्वेन हेयत्वं सूचयति
क्रियेति त्रिगुणात्मनो वैलक्षण्याच्च तस्य हेयतेत्याह सत्त्वेति अनर्थ
त्वाच्च तस्य त्याज्यत्वमनर्थत्वं चाविद्याकल्पितत्वेनावस्तुत्वादित्याह अ
विद्येति न केवलमष्टादशे संसारो दर्शितः किंतु पंचदशेपीत्याह वृक्षे
ति चकारात् सर्वः संसार इत्यनुकृष्यते संसारस्यास्ति साधनं सम्यक्
ज्ञानं च तच्चैवोक्तमित्याह असंगेति हत्वमनुष्ठानेन तत्संदर्भेणार्थमा
ह तत्र चेति उक्तोऽविनिवर्तयिषितः संसारः सति तस्मिन्प्रारम्भयते स
र्वो हि संसारो गुणत्रयात्मको न च गुणानां प्रकृत्यात्मकानां संसारका
रणीभूतानां निवृत्तिसिद्धिका प्रकृतेर्नित्यत्वादित्याशंकायां स्वधर्मान
ुष्ठानात्तत्त्वज्ञानोदयाद्गुणानामसत्त्वात्मकानां निवृत्तिर्यथा भवति त

श्री- गी टी ग्रं 167

या स्वधर्म्मजाते वक्तव्यमित्युत्तरग्रन्थसङ्गतिरित्यर्थः ननु हरिणा बु
त्त्यधर्म्मजातस्योपदेशे चोपसंहारप्रकरणप्रकोपः स्यादित्याह सर्व
स्येति उपसंहृते गीताशास्त्रार्थे यद्यपि तद्वीवेदार्थः सम्यग्ज्ञः सर्वउ
पसंहृतस्तथापि मन्दबुद्धिभिरन्वेष्टव्यमस्ति वक्तव्यमवशिष्टमित्याशं
क्याह यतावानिति मुमुक्षुपरिमाणनिर्द्धारणाय कृत्स्नशकाविवर्त्तिने
शास्त्रार्थोपसंहारश्चेत्येतदुभयं चकारार्थः ४० ॥

स्वामिकृत टीका ३

अनुक्तमपि संगृह्णन् प्रकरणार्थमुपसंहरति न तदस्तीति पृभिः प्र
कृतिसंभवैः सत्वादिभिस्त्रिभिर्गुणैर्मुक्तं हीनं सत्वं प्राणिजातमम
नुष्यामानुष्यं वा मनुष्यलोकादिषु दिवि देवेषु वा क्वापि नास्तीत्यर्थः
४० ॥

पिशाचभाष्य टीका ४

न तदस्ति पृथिव्यां वा दिवि देवेषु देवैरिंद्रियादिभिरुपहि
त° तेषु सर्वोर्वा मनुष्यादिभिः पृभिः प्रकृतिजैर्गुणैः सत्वरजस्तमोभिः विना य
त्स्यात्सर्वं सत्वं चराचरजातं सत्वरजस्तमोगुणमयमेवेत्यर्थः ४० ॥

रामानुजभाष्य टीका ५

दि° न तदस्तीति पृथिव्यां मनुष्यादिषु दिवि देवेषु वा प्रकृतिसंसृष्टेषु ब्रह्मादिस्था नि°
वरान्तेषु ~~प्रकृतिसंसृष्टेषु ब्रह्मादिस्थावरान्तेषु~~ प्रकृतिजैरेभिस्त्रिभिर्गु
णैर्मुक्तं यत्सत्वं प्राणिजातं तन्नास्ति त्यागेनैकैकममतत्वमात्रकरिमा
दिषु मोक्षसाधनतया निर्दिष्टस्त्यागः सन्यासशब्दार्थः ननु दमः स्वव
क्रियमाणेषु वकर्मसु कर्तृत्वत्यागमूलफलकर्मणां त्यागः कर्तव्य
त्यागश्च परमपुरुषकर्तृत्वानुसंधानेन उक्तः एतत्सर्वं सत्वगुणोद्र
द्रिकार्यमिति सत्वोपादेयता ज्ञापनाय रजस्तमसोः कार्यं भेदः प्र
पंचितः इदानीमेवं भूतस्य मोक्षसाधनतया क्रियमाणस्य कर्मणः
परमपुरुषाराधनोपदेशेन तथाराधितः स कर्मणस्तत्प्राप्तिलक्ष
णं फलं प्रतिपादयितुं ब्राह्मणाद्यधिकारिणां स्वभावानुबन्धिशमा
दिगुणभेदभिन्नः सर्वदैकर्तव्यकर्मस्वरूपमाह ४० ॥

अभिनवगुप्तकृतटीका ६

बुद्धिर्निश्चयः धृतिः संतोषः सर्वो हि सुकृते दुःकृते वा कृतं तनैवशेष
कृते करणीये किमन्येनेति धियं गच्छतीति श्रमयाक्रियाभ्यो व्युपरमे

156

कोहेतुः स्यात् अतः सर्वस्यैव प्रवृत्तिरक्तीतितात्पर्यार्थः पदार्थ २४
स्तु प्रसिद्धो व्याख्यायते एव अयथावदसम्यक् मनःप्राणेन्द्रियक्रि
यायोगेन धारयति यथा किंममोपभोगादिभिः सर्वथैवात्मा
मोभूयासमिति मन्वानः प्रसंगेन तितत्त्याभिनिवेशेन निद्रा
कलहादिषु वयथा संतोषं व भाति तमस्तनया सा तामसी धृतिः २५
तदात्वेभ्यासकाले विषमिव जन्मशताभ्यस्तविषयसंगस्य दुः
परिहार्यत्वात् उक्तं च स्मृतौ दुरस्यया गाविषमा डरम्येमादिया
त्मप्रसादाद् हि प्रसादो जायते श्रमस्यापेदयमाणस्याभावात् वि
षयेंद्रियाणां परस्परसंयोगजं स्वयं वदत्र प्रपवद्रूपसंवेद्यात् २६
निद्रालस्यालस्ये न शाठतया प्रमादेन सर्वव्याख्यातेन यन्मात्रवितमा
नसं एवं कर्तृकर्मकारणानां वैद्धिष्टमैः स्वरसवसत्वादिभे
दभिन्नानां परस्परांगांगिभाववाध्यबाधकत्वसमस्तद्रया हृतिक
मयौगपद्यादियोगादपरिसंख्येयभेदत्वाहि विधफलप्रसव
समर्थत्वमिम्नतेन कर्मणां शाकसंचितेराह्नत्वेवितम्सह
त्वकेर्नितिने सर्वैचैते देवतादिस्थावरान्ताः गुणत्रयसंवेद्यता
नित्र्कामेति उक्तं हि आब्रह्मणाक्षकीटान्तं न कश्चित्तत्त्वतः सुखी
ति तत्त्वतो हि सत्त्वाद्यगुणानिकॉतमनसोनेतरस्यमाशयः एव
मियताप्रत्यमप्रेकेचित्स्वरूपतेष्टमादीनांचप्रतिपादितेतन्मा
ध्यात्मविकीर्णशो वर्तमानो देवीसंपदं प्रामश्रद्दाने योगः ने
चतस्याविषय इमसङ्गेनः श्रोन्मादिनः अयुतात्विदमस्याते यदिना
वदनयाहातेन उद्याकर्मणोभवान्वनेते तदाखधर्मप्रवृत्त्या वि
ज्ञानस्तत्तयावतकर्मसंवेयस्त्व अथैतन्नांन्वमन्यसेतदपश्य
तवप्रवृत्तानावज्ञायेजानेरेवतस्याभावेस्थितत्वात् यतः सर्वः
स्वस्वभावनियतः कुतश्चिद्दोषात्तिरोहितस्तत्स्वभाव केवि
त्कालंभूत्वापितन्निरोधायकविगमेस्वभावेव्यक्तायत्रेलभत
एव [illegible]
[illegible] १८ ॥

परमार्थप्रपा टीका

अथान्तक्रमप्रतिसंगह्रन्प्रकारणार्थमुपसंहरति नतद्लीति

श्री-
गी-टी-
ग्र-

168

पदैर्भिः सत्त्वादिभिस्त्रिभिर्गुणैर्मुक्तं सत्त्वं प्राणिजातं न तदस्ति पृथि
व्यां मनुष्येषु नास्ति दिवि देवेषु पि नास्ति यावच्छरीरजातं तत् त्रि
गुणात्मकमेवास्तीत्यर्थः [illegible]
[illegible]
[illegible]
[illegible] ४० ॥

वनमाली टीका ८

इदानीमनुक्तमपि संगृह्णन् प्रकरणमुपसंहरति नेति सत्त्वा
दीनां साम्यावस्था प्रकृतिस्ततो जातैर्वैषम्यावस्थां प्राप्तैः प्रकृ
तिजैर्नतमात्रादिगुणैः प्रकृतिजत्वमस्ति तद्रूपत्वात् तस्मा
द्वैषम्यावस्थैव तद्रूपतया प्रत्यवात् पृथिव्यां मनुष्यादिषु दि
वि देवेषु वा नास्ति कापि गुणत्रयरहितमात्मवस्तु नास्तीत्यर्थः
४० ॥

कुसुमवैजयन्ती टीका ९

उक्तार्थमुपसंहरन्ननुक्तं चापि संगृह्णन्नाह न तदस्तीति पृ
थिव्यामिह पाताले तेषु भूर्भुवस्स्वर्महर्जनतपस्सत्येषु देवेषित्यु
पलक्षिते तेषु भूर्भुवस्स्वर्महर्जनसत्येषु देवेषित्युपलक्षिते तेषु राज्य
भ्रमनिवर्तकपर्यन्तेषु प्रकृतिसेव्येषु ब्रह्मादिस्तम्बपर्यन्तेषु वि
षयेषु न सत्त्वं प्राणिमात्रं गमजवस्तुमात्रं नास्ति यत्सत्त्वमेभिः प्र
कृतिजैः प्रकृतिजातैस्त्रिभिः सत्त्वादिभिर्गुणैर्मुक्तं विरहितं स्या
त् अयं भावः सर्वेषु त्रिगुणात्मकेषु वस्तुषु सात्विकेषु सात्विक
त्वमोक्तोपयोगित्वात्तदेवं मुक्तमिश्रीत्वममयोस्त्वेवं यकत्वा
ज्यमेवेति अथ च मार्गेनैकैमत्तत्वमानस्वरिमादिक्कतिश्वनिपा
घोयः कियमाणोऽकर्मस्वकर्तृत्वभोक्तृत्वममत्वादिमागद्रूपः
फलकर्मणास्त्यागस्तत्परमात्मकर्तृत्वानुसंधानरूपः एव सं
न्यासशब्दार्थो न तदन्यदिति ४० ॥

+ इदानीमनुक्तमपि संगृह्णन् प्रकरणार्थमुपसंहर
तिभगवान् ॥

मधुसूदनी टीका १०

+ सत्त्वरजस्तमसां साम्यावस्था प्रकृतिस्ततो जातैर्वैषम्यावस्थाप्रा
प्तैः प्रकृतिजैर्नतमात्रादिगुणैः प्रकृतिजत्वमस्ति तद्रूपत्वात्
तस्माद्वैषम्यावस्थैव तद्रूपतानिरूपत्वात् अथवा प्रकृतिमीमां

Margin notes:

प
ना
भू
+ तलातलवितलसुतलतला
तल रसातलपातालेषु लो
केषु मनुष्यादिरोषपर्यन्तेषु दिती
न्यपलक्षितेषु
न्या
ना
क

सत्त्वं रजस्तमः साम्यावस्था प्रकृतिस्ततो जातैर्वैषम्यावस्थापन्नैः
प्रकृतिजैर्न तु साक्षाद्ब्रह्मणो नाप्रकृतिजत्वमस्ति तद्रूपत्वात् तस्माद्वै
षम्यावस्थैव तदुत्पत्तिरुपचारात् अथवा प्रकृतिर्माया तन्मयैर्वल्
न्कल्पितैः प्रकृतिजैरेभिस्त्रिभिर्गुणैः बंधनहेतुभिः सत्त्वादिभिर्मु
क्तं हीनं सत्त्वं प्राणिजातमप्राणि वा यत्स्यात्तत्पुनः पृथिव्यां मनुष्या
दिषु दिवि देवेषु वा नास्ति क्वापि गुणत्रयरहितमनात्मवस्तु नास्ती
त्यर्थः तदेवं सत्त्वरजस्तमोगुणात्मकः क्रियाकारकफललक्षणः
सर्वः संसारो मिथ्याज्ञानकल्पितोऽनर्थश्चतुर्दशाध्यायोक्त उपसं
हृतः पंचदशे च वृक्षरूपकल्पनया तमश्वत्थमेनं सुविरूढ
मूलमसंगशस्त्रेण दृढेन छित्वा ततः पदं तत्परिमार्गितव्यमि
त्युक्तं न निवर्तनीयमुपायश्चासंगशस्त्रेण विषयवैराग्येण तस्य छेद
ने कृत्वा परमात्मान्वेष्टव्य इत्युक्तं तत्र सर्वस्य त्रिगुणात्मकत्वेपि त्रिगु
णानात्मेति त्रिगुणात्मकस्य संसारस्य त्वस्यैकदेशोच्छेदोऽसंगशस्त्रेणैवा
नुपपन्न इत्याशंकायां स्वस्वाधिकारविहितैर्वर्णाश्रमधर्मैः परितो
षमाणात् परमेश्वरादसंगशस्त्रलाभ इति वदितुमेतावानेव स
र्ववेदार्थः परमपुरुषार्थमिच्छद्भिरनुष्ठेय इति च गीताशास्त्रार्थ
उपसंहर्तव्य इत्येवमर्थमनन्तरप्रकरणमारभ्यते तत्रेदमुच्यते ४० ॥

सदानंदी टीका ॥

अनेकमपि संस्कृत्वार्थं प्रकृतमीश्वरः उपसंहरतीदानीं गुणा
तीतो जगत्पतिः १ प्रकृतिर्या श्रीमाया तयैव परिकल्पितैः सत्त्वा
दिभिर्गुणैरेभिस्त्रिभिर्बंधनहेतुभिः २ हीनं सत्त्वं प्राणिजातं स्याद
प्राणि वा इहयं मनुष्यादिषु भूमौ वा देवेषु त्रिदिवे यथवा ३ पाता
ले वा यक्षुरापि नास्तीत्येतद्विनिश्चितं गुणत्रयविहीनं हि नास्त्यनात्म
मयं जगत् ४ यतो मायाकृतं विश्वं त्रिगुणात्मकमेव हि ५ ॥ ४० ॥

नीलकंठी टीका ॥

प्रकरणार्थमुपसंहरन्नुक्तमपि संस्कृत्य तन्नदस्तीति सत्त्वं प्राणि
जातं द्रव्यमपलक्षणं जडमपि सर्वस्य त्रिगुणविकारत्वात् प्रकृतिजै
जैः कर्मानरोधधर्माधर्मसंस्कारजैः मायाप्रभवैर्वा गुणैः सह ४० ॥

आनंदीटीका १६

अत्र कर्मभक्तानां त्रैविध्यं संगृह्णाति ४० ॥

रामकंठीटीका १४

अस्यार्थः श्लोकः किं तद्दिवीति फलभूम्नुपलक्षणार्थं पृथिव्या
मितिकर्मभूम्नुपलक्षणार्थं वेदितव्यं इदानीं बाहुशाभिरध्याये
र्येयोः कर्मज्ञाननिष्ठयोः कर्मस्ववर्णानुष्ठेयत्वेनावगतेन तेषाम
पवर्गफलत्वकारणभूतयोस्त्यागसंन्यासयोः प्राग्रुक्तयोः स
म्यक्स्वरूपज्ञानेज्ञानसन्देहमर्जुनेप्रतितयोस्तत्त्वप्रतिपादन
प्रसंगेनत्यागिनां संन्यासिनां च विविक्तस्वरूपाभिव्यंजकज्ञाना
दीनां गुणभेदकृतं त्रैविध्यमभिधायाध्यायप्रक्रान्तप्रकृतमर्थ
मनुवभ्रात्येषां कर्मणां फलत्यागमात्रेण सामान्यतः श्लोका
नि विशेषतः पुनः कानीत्याकांक्षानिरासार्थं तत्स्वरूपप्रतिपा
दनं प्रस्तौति ४० ॥

+नन्वाभ्यासाद्दमतेयत्रेत्या
दावात्मसमाधिजस्तुखादी
नांसात्विकत्वेननिर्देशोत्र
वितथात्मनोनिर्गुणत्वादि
त्याशंक्याह॥

लासिकी [illegible] टीका

+यत्सत्त्वंप्राणिमात्रेयोगिलक्षणमज्ञानिलक्षणंवा प्रकृतिजे
र्भिरुक्तरूपैस्त्रिभिः सत्त्वादिभिर्गुणैर्मुक्तंमनुष्येष्वदिविस्वर्गे
लोके देवेषुवापुनः अस्मिंल्लोके वा नास्त्येव अतो देहधार
यतो हि योगिनोपिमुक्तत्वपि सत्त्वादिगुणानामनतिक्रमणा
दात्मसमाधिजं सुखं सात्विकतयैव निर्दिष्टं शंका अन्यथाप्र
त्यभिज्ञालक्षणज्ञानप्राप्त्यवसरेएव प्राकृतस्यदेहस्यपातप्र
सक्तिः नचैवं तस्मादेवमनुमीयते यथायथात्मसमाधानस्या
भ्यासेनोत्तरोत्तरमुत्कर्षः तथा तथा प्रकृतेः क्षीणत्वमुपजाय
तेयावन्मुक्तिरुपपद्यते [illegible]
[illegible] ४०

v त्यक्तमस्तीतिसंभा
^ वेनतत्सत्त्वं पृथिव्यां

v यवर्णाश्रमोचितेन
^ स्वकर्मणा ईश्वराराधन

पु

[illegible]

पंचोलीटीका

प्रकरणार्थमुपसंहरति नेति यस्मात्तं पृथिव्यां मनुष्यादिभूतेजा
ते अथवा दिवि स्वर्गे देवेषु मध्ये यत् सत्त्वं प्राणिजातं सत्त्वमेभिस्त्रि
भिर्गुणैर्मुक्तं गुणत्रयरहितं स्यात् तन्नास्ति ४०.

रणवीरसमिद्धोधिनी

अनुक्तमपि संगृह्य प्रकरणार्थमुपसंहरति न तदस्तीति स्पष्टा
र्थोयं एतदन्तेन च ग्रन्थेन कर्मणां फलत्यागेनानुष्ठितानां भगवद्ध
मह्रस्वामिमुख्यं फलं न तु फलसंन्यसनं सात्त्विकानामेव नान्ये
षामित्यनुक्तं उपादानार्थं सर्वस्य वस्तुजातस्य त्रैविध्यमुक्तमिति प्र
करणार्थसंग्रहः ४०॥

मध्वभाष्य

४०॥

170

भाषा अनुवाद ॥

अब जो सर्व अध्यायो मे कही नही कहा सो इस स्लोक से ले तीन स्लोक से कहते है कि इन सतो गुण आदि प्रकृतिके गु णों से रहित अर्थात् छूटा हुआ सत्व कहे प्राणीमात्र नही है अथ वा और कोई वस्तु क्या पृथिवी मे मनुष्य आदि क्या स्वर्ग मे दे वता आदिमे कोई भी नहीहै ४० ॥

दोहा

ब्राह्मण क्षत्रिय वैश्यके परंतप सूद्रहिकेहि कर्महुय
हू भिन्न भिन्न है स्वभावजन्यगुणसेहि ४१ ॥
नाहे पृथिवी माहिं यह स्वर्गनहे सुरमाहि वस्तुज माथि
कगुणनसें तिहूं इनसें भिन्न माहि ४०॥

ब्राह्मणक्षत्रियविशां शूद्राणां च परंतप क
र्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः ४१

शांकरभाष्यटीका १

पुरुषार्थसिद्धिरनेनेष्टेत्येवमर्थं ब्राह्मणक्षत्रियविशामि
त्यादिरारभ्यते ब्राह्मणेति ब्राह्मणाश्च क्षत्रियाश्च विशश्च ब्रा।
ह्मणक्षत्रियविशस्तेषां ब्राह्मणक्षत्रियविशां शूद्राणां च शूद्रा
णामसमासकरणमेकजातित्वे सति वेदेऽनधिकारात् हे पर
न्तप कर्माणि प्रविभक्तानीतरेतरविभागेन व्यवस्थापितानि के
व न स्वभाप्रभवैर्गुणैः स्वभाव ईश्वरस्य प्रकृतिः त्रिगुणात्मिका
माया सा प्रभवो येषां गुणानां ते स्वभावप्रभवास्तैः शमादीनि
कर्माणि प्रविभक्तानि ब्राह्मणादीनामथवा ब्राह्मणस्वभाव
स्य सत्वगुणप्रभवः कारणं तथा क्षत्रियस्वभावस्य सत्वोपस।
र्जनं रजः प्रभवः वैश्यस्वभावस्य तमउपसर्जनं रजः प्रभवः
शूद्रस्वभावस्य रजउपसर्जनं तमः प्रभवः प्रशान्त्यैश्वर्येहामू
ढस्वभावदर्शनाच्चतुर्णां अथवा जन्मान्तरकृतसंस्कारः प्रा।
णिनां वर्तमानजन्मनि स्वकार्याभिमुखत्वेनाभिव्यक्तः स्वभा
वः स प्रभवो येषां गुणानां ते स्वभावप्रभवा गुणाः गुणप्रादुर्भाव
स्य निःकारणत्वानुपपत्तेः स्वभावः कारणमिति कारणविशे
षोपादानं एवं स्वभावप्रभवैः प्रकृतिप्रभवैः सत्वरजस्तमो।
भिर्गुणैः स्वकार्यानुरूपेण शमादीनि कर्माणि प्रविभक्तानि
ननु शास्त्रप्रविभक्तानि शास्त्रेण विहितानि ब्राह्मणादीनां
शमादीनि कर्माणि कथमुच्यते सत्वादिगुणप्रविभक्तानीति।
नैष दोषः शास्त्रेणापि ब्राह्मणादीनां सत्वादिगुणविशेषापेक्षये
व शमादीनि कर्माणि प्रविभक्तानि न गुणानपेक्षयेति शा
स्त्रप्रविभक्तान्यपि कर्माणि गुणप्रविभक्तानीत्युच्यते ४१ ॥

आनंदगिरिकृतटीका २

सम्प्रति वर्णाश्रमधर्मस्य श्रवत्रेय धर्मजाते संकीर्णमिति स्वस्व

श्री
गी टी
म

पमस्यति अलौगणिति उपनयनसंस्कारवत्त्वेसति वेदाधिकारित्वे
समानमिति त्रयाणां समासकरणमितरेषामसमासे हेतुमाह शू
द्राणामिति एकजातित्वमुपनयनवर्जितत्वे कर्म्मणामसंकीर्णत्वे
न व्यवस्थापकं धर्म्मद्वयं प्रकटयति केनेत्यादिना स्वभावप्रभवै
र्गुणैरित्यस्यार्थान्तरमाह प्रथवेति उक्तव्यवस्थायां कार्य्यदर्शने
प्रमाणयति प्रशोतीति स्वभावशब्दस्यार्थान्तरमाह प्रथवेति
किमिति गुणाभिव्यक्तेरुक्तवासनाधीनत्वन्तत्राह गुणेति नत्वना
दिगुणप्रादुर्भावस्य निर्द्धारणत्वे प्रकृतिजैर्गुणैरिति प्रकृतेर्गुण
कारणत्वाभिधानादत आह स्वभावइति वासनाकारणमिति गु
णाभिव्यक्ते निमित्तकारणत्वे विवक्षिते प्रकृतिस्तु उपादानमितिभा
वः उक्तमुपसंहरति एवमिति स्वभावप्रभवैः सत्वादिगुणैः ब्राह्म
णादीनां कर्म्माणि प्रविभक्तानीत्युक्तमाक्षिपति ननिति शास्त्र
स्य धर्म्मविभागहेतोः सत्वादिविशेषापेक्षयैव विभागज्ञापक
त्वाद्धर्म्मयत्र विभागहेतुत्वोक्तिरविरुद्धेति परिहरति नैषदोषइति
४१ ॥

स्वामिकृत टीका २

नन्वेव यद्येवं सर्व्वमपि क्रियाकारकफलादिकं प्राणिजातं च त्रि।
गुणात्मकमेव कथं तर्हि मोक्षइत्यपेक्षायां स्वस्वाधिकारविहितैः
कर्म्मभिः परमेश्वराराधनात्तत्प्रसादलब्धज्ञानेन मोक्षइत्येवं सर्व्वगीता
र्थसारं संगृह्य दर्शयितुं प्रकरणान्तरमारभते ब्राह्मणेत्यादिनाध्यायस
माप्ति हे परंतप शूद्रनायन ब्राह्मणादीनां त्रयाणां विशां शूद्राणां
च कर्म्माणि प्रविभक्तानि प्रकर्षेण विभागतो विहितानि शूद्राणां स
मासानर्हत्वकरणं द्विजत्वाभावेन वेदानधिकारि विभागोपलक्षण
माह स्वभावः सात्विकादिः प्रभवति प्रादुर्भवति येभ्यस्तैर्गुणैरुपल
क्षणभूतैः यद्वा स्वभावः पूर्व्वजन्मसंस्कारस्तस्मात्प्रादुर्भूतैर्गुण
ैः तत्र सत्वप्रधाना ब्राह्मणाः सत्वोपसर्ज्जनरजःप्रधानाः क्षत्रियाः
तमउपसर्ज्जनरजःप्रधाना वैश्याः रजउपसर्ज्जनतमःप्रधानाः शूद्राः ४१

पिशाचभाष्य टीका ४

श्व. ब्राह्मण क्षत्रियस्य विद्वच ब्राह्मणक्षत्रियविशस्तेषां च शूद्राणां कर्मे

थानीतिप्रविभक्तानिस्वभावःप्रभवैःप्रकृतिस्तज्जैःसत्त्वरजस्त
मोभिर्गुणैः ४१ ॥

रामानुजभाष्यटीका ५

ब्राह्मणेति ब्राह्मणक्षत्रियविशांस्वकीयोभावःस्वभावःब्राह्म
णजन्महेतुभूतंप्राचीनंकर्मतत्प्रभवाःसत्वादयोगुणाः
ब्राह्मणस्यस्वभावस्तुरजस्तमोभिभवेनोद्रिक्तसत्वः क्षत्रियस्यस्व
भावप्रभवस्तुसत्वतमसोभिभवेनोद्रिक्तोरजोगुणः वैश्यस्य।
स्वभावप्रभवस्तुसत्वरजोभिभवेनाल्पोद्रिक्तस्तमोगुणः शूद्रस्यस्व
प्रभ भावप्रभवस्तुरजसत्वाभिभवेनात्युद्रिक्तस्तमोगुणः एभिःस्वभावप्रभ
वैर्गुणैःसहप्रविभक्तानिकर्माणिशास्त्रैःप्रतिपादितानिब्राह्मणा
दयएवंगुणकास्तेषांचैतानिकर्माणीत्यन्वयश्चेताइतितद्विभज्य
प्रतिपादयंतिशास्त्राणि ४१ ॥

अभिनवगुप्तकृतटीका ६

तथाह्येवंविधोवर्णानांस्वभावः एवमवश्यंभाविन्याप्रवृत्त्याततःफलविभागिता भवेत्तदाह स्पष्टार्थम् ४१ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका ७

+ ब्राह्मणेति हे परंतप शत्रुतापन ब्राह्मणादीनांचवर्णानांवर्णानांक
र्माणिप्रविभक्तानिप्रकर्षेणविभागतोविहितानि विभागोपलक्ष
णमाह स्वभावप्रभवैर्गुणैरिति स्वभावः सात्विकादिः प्रभवत्याविर्भ
वतियेभ्यस्तैर्गुणैरुपलक्षणम् तैः यद्वा स्वभावः पूर्वजन्मसंस्कार
स्तस्मात्प्रादुर्भूतैस्तैःसत्वप्रधानाब्राह्मणाः सत्वोपसर्जनरजःप्रधानाः
क्षत्रियाः तमउपसर्जनरजःप्रधानावैश्याः रजउपसर्जनतमःप्र
धानाःशूद्राः तदुक्तंचातुर्वर्ण्यंमयासृष्टंगुणकर्मविभागशइति ४१

+ यद्येवंप्राणिजातेत्रिगुणात्मकेतदास्य कथंमोक्षइत्यपेक्षायांस्वस्वाधिकारविहितैःकर्मभिः परमेश्वराराधनयावाज्ञानेनमोक्षइतिसकलगीतार्थसंग्रहंदर्शयितुंप्रकरणांतरमारभते ॥

वनमाली टीका ८

स्वस्ववर्णोचितकर्मणाराधितपरमेश्वरप्रसादेनानादिकालप्रवृ
त्तसंसारमोक्षोभवतीत्ययमेवसर्वगीतासारार्थइत्यभिप्रायेणवर्ण
धर्मान्संक्षेपनिरुक्तानीति ब्राह्मणेति येषांसमासकरणंहिद्विजत्वेनवे
दाध्ययनादितुल्यधर्मत्वकथनार्थं शूद्राणामितिपृथक्करणमे
कजातित्वेनवेदानधिकारित्वज्ञापनार्थं ब्राह्मणास्यस्वभावासेषा

श्री
गी टी
अ
173

हूराजन्यः कृतः ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायतेति स्यात्तद्वि
शेषोऽस्त्वनाद्यानविर्भुगायत्र्या ब्राह्मणमसृजत त्रिष्टुभा राजन्यं
जगत्या वैश्यं न केनचिच्छन्दसा शूद्रमसृजतेत्येकारो विज्ञायत इति शू ˇभाव
द्रस्य वेदानधिकारे शूद्रश्चतुर्थो वर्ण एकजातिरिति स्मृतिः हे
परंतप चतुर्णां वर्णानां कर्माणि प्रकर्षेण विभक्तानि कैः स्वप्रभवै
र्गुणैः ब्राह्मणादिस्वभावस्य प्रभवैर्हेतुभूतैः सत्त्वादिभिः ब्राह्मण
ˇभावस्य स्वभावस्य सत्त्वगुणप्रभवः प्रशान्तत्वात् क्षत्रियस्वभावस्य सत्त्वोपसर्ज
ˇरजः ईश्वरस्वभाव नं त्वात् वैश्यस्वभावस्य तमउपसर्जनं रजः ईहास्वभावत्वात् शू
ˇद्र स्वभावस्य रजउपसर्जनं तमः मूढस्वभावत्वात् आह च गौत।
मः द्विजातीनामध्ययनमिज्या दानं ब्राह्मणस्याधिकाः प्रवचनया
जनप्रतिग्रहाः पूर्वेषु नियमस्तु राज्ञोऽधिकं रक्षणं सर्वभूतानां न्या
य्यदण्डत्वं वैश्यस्याधिकं कृषिवणिक्पाशुपाल्यं कुसीदं च शूद्रश्चतु ˇक
र्थो वर्ण एकजातिस्तस्यापि सत्यमक्रोधः शौचमाचमनार्थे पाणिप्रक्षाल
नमेवैके श्राद्धकर्म भृत्यभरणं स्वदारवृत्तिः परिचर्या चोत्तरेषामिति श्र ˇन
वता या रणाश्च स्ता रणाश्च धर्मा उक्ताः पूर्वेषु अध्ययनेज्यादानेषु नि
यमो वैश्यकर्तव्यं ननु प्रवचनयाजनप्रतिग्रहेषु इत्यर्थस्त्वा।
दित्यर्थः वणिक् वाणिज्यं कुसीदं वृद्ध्या धनप्रयोगः उभयेषां ब्राह्म
णो द्विजातीनामित्यर्थः मनुरपि अध्यापनमध्ययनं यजनं याज
नं तथा दानं प्रतिग्रहं चैव ब्राह्मणानामकल्पयत् प्रजानां रक्षणं
ˇच दानमिज्याध्ययनमेव च विषयेष्वप्रसक्तिश्च क्षत्रियस्य समादिशत् प
शूनां रक्षणं दानमिज्याध्ययनमेव च वणिक्पथं कुसीदं च वैश्य
स्य कृषिमेव च वणिक्पथं कुसीदं च वैश्यस्य कृषिमेव च एकमेव तु शू
द्रस्य प्रभुः कर्म समादिशत् एतेषामेव वर्णानां शुश्रूषामनसूयये
ति एवं च तत्तद्वर्णानां गुणभेदेन कर्माणि प्रविभक्तानि ४१ ॥

उत्तमश्लोकजयपेती टीका ४

एवं सर्वेषां त्रिगुणात्मकानां वस्तूनां सात्त्विकस्य ज्ञानोऽस्मि हेतुत्वा
दुपादेयत्वमुक्तमिदानीं च वर्णाश्रमाणामादिवर्णानां मोक्षसाधनत्व
णानि ज्ञाननिष्ठाहेतुभूतानि भगवदाराधनभूतानि स्वरूपाणि भ

(63)

गवन्नाम फलानि स्वविहितानि संसारमोचकानि सन्तीत्युक्तं।
णभेदभिन्नानि कर्माणि ह्यासहकत्वानि भवन्तीति वक्तुं प्रक
रणमारभमाणस्तेषां कर्मणां स्वरूपाण्याह षड्भिः ब्राह्मणेति हे प
रंतप ब्राह्मणक्षत्रियविशो ब्राह्मणादीनां त्रयाणां च शूद्र
णां द्विजत्वात्समासात्पृथक्करणं न तु वर्णत्वाभावात् इति च त
र्णां वर्णानां स्वभावप्रभवैः स्वभावो ब्राह्मणादिजन्महेतुभू
तः प्राक्तनसंस्कारस्तस्मात्प्रभवैर्मयैते येनेत्यातैः यद्वा
स्वात्मनः सत्वादीनां भावः सात्विकादिः स प्रभवति प्रादुर्भवति ये
भ्यस्तैः तत्र रजस्तमोऽभिभवेनोद्रिक्तसत्वगुणो ब्राह्मणस्य
स्वभावप्रभवः शमदमादिप्रवर्तकत्वात् सत्वतमोऽभिभवेनोद्रि
क्तो रजोगुणः क्षत्रियस्य स्वभावप्रभवः शौर्यादिप्रवर्तकत्वात्
सत्वरजोऽभिभवेनोद्रिक्तस्तमोगुणः शूद्रस्य स्वभावप्रभवः एवे
विधैः स्वभावप्रभवैर्गुणैः सत्वादिभिः सहकर्माणि यत्तग्रहा
दीनि प्रविभक्तानि शास्त्रेणेतरेषां ब्राह्मणादीनां कर्माणि विभ
ज्योक्तानि पृथक्त्वेन कानि ब्राह्मणादयस्तेषामेतानि कर्माणीत्य
भिप्रायः ४१ ॥

मधुसूदनी टीका १

त्रयाणां समासकरणं द्विजत्वेन वेदाध्ययनादितुल्यधर्मत्वक
थनार्थं शूद्राणामिति पृथक्करणमेकजातित्वेन वेदानधि।
कारित्वज्ञापनार्थं तथा च वसिष्ठः चत्वारो वर्णा ब्राह्मणक्षत्रिय
वैश्यशूद्रास्तेषां त्रयो वर्णा द्विजातयो ब्राह्मणक्षत्रियवैश्यास्ते।
षां मातुरग्रेऽधिजननं द्वितीयं मौञ्जिबन्धने अत्रास्य माता सावित्री
पिता त्वाचार्य उच्यत इति तथा श्रुतिविशिष्टत्वाच्च वैश्यस्यानवि
शेषान्संस्कारविशेषाच्च ब्राह्मणस्य मुखमासीद्बाहू राजन्यः कृ
तः ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायतेत्यपि निगमो भवति
गायत्र्या ब्राह्मणमसृजत् त्रिष्टुभा राजन्यं जगत्या वैश्यं न केनचिच्छ
न्दसा शूद्रमित्यसंस्कारो विज्ञायत इति शूद्रश्चतुर्थो वर्ण एकजा
तिरिति च गौतमः हे परंतप शत्रुतापन तेषां चतुर्णामपि वर्णानां
कर्माणि प्रकर्षेण विभक्तानि इतरेतरविभागेन व्यवस्थितानि कैः

श्री
गी टी
प्र·

174

स्वभावप्रभवैर्गुणैर्ब्राह्मणादिस्वभावस्य प्रभवैर्हेतुभूतैर्गुणैः
सत्वादिभिः तथा हि ब्राह्मणस्य स्वभावस्य सत्वगुणप्रभवः प्र
शान्तत्वात् क्षत्रियस्वभावस्य सत्वोपसर्जनरजः ईश्वरस्वभावत्वात्
वैश्यस्य स्वभावस्य तमउपसर्जनरजः ईहास्वभावत्वात् शूद्रस्व
भावस्य रजउपसर्जनतमः मूढस्वभावत्वात् अथवा मायाख्या
प्रकृतिः स्वभावः तत उपादानात् प्रभवो येषां तैः प्राग्भवीयः
संस्कारो वर्तमाने भवे स्वफलाभिमुखत्वेनाभिव्यक्तः स्वभावः
तन्निमित्तत्वेन प्रभवो येषामिति वा शास्त्रस्यापि शुद्धस्वभाव
सापेक्षत्वाच्छास्त्रेण प्रविभक्तान्यपि गुणैः प्रविभक्तानीत्युक्ते
णां ह्यस्य शुद्धस्वभावसापेक्षत्वेनोक्तेः शास्त्राणामनामर्थ्यो
यपि तामसपिकारिशक्तिः सहकारिणीति न्यायात् तथा हि
गौतमः द्विजातीनामध्ययनमिज्या दानं ब्राह्मणस्याधिका
प्रवचनयाजनप्रतिग्रहाः पूर्वेषु नियमस्तु राज्ञोऽधिकं रक्ष
णं सर्वभूतानां न्यायदण्डत्वं वैश्यस्याधिकं कृषिवणिक्पाशु
पाल्यं कुसीदं च शूद्रश्चतुर्थो वर्ण एकजातिस्तस्यापि सत्य
मक्रोधः शौचमाचमनार्थे पाणिपादप्रक्षालनमेवैके श्राद्ध
कर्म भृत्यभरणं स्वदारवृत्तिः परिचर्योत्तरेषामिति शूद्रस्या
याः रणाश्रमाधारणाश्रयमीउक्ताः पूर्वेष्वध्ययनेज्या
दानेषु नियमः अवश्यकर्तव्यत्वं न तु प्रवचनयाजनप्र
तिग्रहेष्वर्थार्थत्वादित्यर्थः वणिक् वाणिज्यं कुसीदं वृ
द्ध्या धनप्रयोगः उत्तरेषामिति श्रेष्ठानां द्विजातीनामित्य
र्थः वसिष्ठोऽपि षट्कर्माणि ब्राह्मणस्याध्ययनमध्याप
नं यज्ञो याजनं दानं प्रतिग्रहश्चेति त्रीणि राजन्यस्याध्य
यनं यज्ञो दानं च शस्त्रेण च प्रजापालनं स्वधर्मस्तेन जीवेत् एतान्
येव त्रीणि वैश्यस्य कृषिवाणिक्पशुपाल्यं कुसीदं च तेषां परिचर्या
शूद्रस्येति आपस्तम्बोऽपि चत्वारो वर्णा ब्राह्मणक्षत्रियवैश्यशूद्रास्तेषां
पूर्वः पूर्वो जन्मतः श्रेयान् स्वकर्म ब्राह्मणस्याध्ययनमध्यापनं यज्ञो या
जनं दानप्रतिग्रहणं दायाद्यं शिलोञ्छः अन्यच्चापरिगृहीतमेतान्येव क्ष

त्रियस्याध्यापनयाजनप्रतिग्रहणानीति परिहाय यद्द्वंद्वंज्ञापि।
कानि क्षत्रियवैश्ययोः द्वंद्ववर्जं कृषिगोरक्षवाणिज्यादिके
परिवर्धां शूद्रस्य तेरेषां वृत्तिर्नास्तीति मनुः। अध्यापनमध्ययनं
यजनं याजनं तथा दानं प्रतिग्रहं चैव ब्राह्मणानामकल्पयत् प्र
जानां रक्षणं दानमिज्याध्ययनमेव च विषयेष्वप्रसक्तिं च क्षत्रियस्य
समादिशत् पशूनां रक्षणं दानमिज्याध्ययनमेव च वणिक्पथं कु।
सीदं वैश्यस्य कृषिमेव च एकमेव तु शूद्रस्य प्रभुः कर्म समादिशत्
एतेषामेव वर्णानां शुश्रूषामनसूययेति एवं चतुर्णामपि वर्णानां
गुणभेदेन कर्माणि प्रविभक्तानि
५१ ॥
सदानेदी टीका ॥
तदेवं सर्वं संसारो मिथ्याज्ञानप्रकल्पितः गुणत्रयात्मकोऽनर्थः कि
याकारकलक्षणः १ उक्तमर्थं दर्शयाध्यायेषु तत्त्वोपसंहृतः तथा
प्येवदेशे हृत्तद्रूपकेणापि वर्णितः २ शितेनासंगशस्त्रेणाभोग
वैराग्यरूपिणा तस्य संछेदने कृत्वा त्वेषं ब्रह्मपदमीयते ३ सर्वस्या
त्रिगुणात्मत्वे संसारस्य ततोः कथं छेदोऽसंगशस्त्रेण संभवेत्तद्गु
णात्मनः ४ असंगशस्त्रं वैराग्यं तत्साध्यं प्रपत्तिः एवं श्रीमहर्षिः
प्राह स्वायंभुवेन कृतिसंमतं ५ स्वस्वाधिकारविहितैर्धर्मैर्वर्णाश्रमो
दितैः परितोष्यमाणादीशाद्वैराग्यमाप्नुयाज्जनः ६ ततो वेदान्तवा
क्योत्थसम्यग्धीजन्ममात्रतः सकार्याज्ञाननाशाद्यकृतकृत्योऽभिजा
यते ७ एतावान्सर्ववेदार्थोपि श्रेयो मुमुक्षुभिः तदेव गीताशा
स्त्रार्थ उपसंहारमर्हति ८ इत्येवमर्थमारंभः संदर्भस्योत्तरस्य च।
त्रयाणां हि द्विजत्वेन स्वाध्यायाध्ययनादिना ९ तुल्यधर्मत्वबोधा
र्थं समासकरणं कृतं शूद्राणामेकजातित्वान्नाध्यायानधिकारि।
ता १० इत्यतीतिज्ञापनार्थाय तत्स्थककरणं कृतं तेषां च वर्णानां व
र्णानां परस्परविभागतः ११ व्यवस्थितानि कर्माणि स्वभावप्रभवैर्गु
णैः तत्र सत्त्वगुणो विप्रस्वभावस्यास्ति कारणं १२ प्रशान्तत्वात्मनया
भूयः स्वभावस्य रजोगुणः सत्त्वोपसर्जनो यस्मादीश्वरत्वेन रूपे भवेत्
१३ तमोगुणरजो वैश्यस्वभावस्यास्ति कारणं तस्यापीहास्वभावता

श्री
गी॰टी॰
प्र॰

175

इज्ञोसंख्येन सम्मतः १४ रजोगुणात्मकः सूक्ष्मस्वभावस्यात्मिकार।
णं न सम्यक्स्वभावत्वादिसेवेगुणनिर्णयः १५ मायाव्याप्रकृ
तिर्येहास्वभावः सर्वगः स्मृतः ततएवास्त्रयाराताये षांप्रभवश्च
पि १६ प्राग्भवीयोपि संस्कारो वर्तमानभवेयदा स्वफलाभिमुख
त्वेनाभिव्यक्तः प्रभवः स्मृत १७ स्वभावः कारणं येषां तेर्विभक्तानि
वा गुणैः प्राग्भेनैवकर्माणि प्रविभक्तानि यद्यपि १८ तथाप्य
स्यैवशास्त्रस्य तत्स्वभावापेक्षता १९ ॥ ४१ ॥

नीलकंठी टीका १७

एवंपंचदशे संसारस्वरूपमसंगशस्त्रेणच्छित्वापरंपदंमार्गितव्यमि
त्युक्तं तत्रात्मनोः संगत्वोपपादनाय क्रियाकारकफललक्षणस्य कृ
त्स्नस्य संसारस्य त्रिगुणात्मकत्वमुक्तं तत्रात्मनात्मनो गुणातीतत्व
गुणात्मकयोः संगः संभवति तत्त्वाकाशेन वर्तितैः स्थित्यादिगुणैर्न ग
धादिनाकाशः संसृज्यते तद्वदित्युक्तं संप्रतिशास्त्रार्थं प्रवदन्।
ती सर्वगीताशास्त्रार्थमुपसंहरन् असंगशस्त्रोपायं च षड्दशैविते
प्रकरणोत्तरमारभते ब्राह्मणादीनां स्वधर्माणां समासकरणे वे।
दानधिकारात् प्रविभक्तानि कर्माणि न च हेतुमाह स्वभावप्र
भवैर्गुणैः स्वभावः ईश्वरस्य प्रकृतिस्त्रिगुणात्मिका सैवप्रभवो हेतु
र्येषांगुणानां तैः स्वभावप्रभवास्तैः यद्वा ब्राह्मणस्वभावस्य सत्त्व
गुणएवप्रभवः शांतत्वात् क्षत्रियस्वभावस्य सत्त्वोपसर्जनेरजः ई
श्वरस्वभावत्वात् वैश्यस्वभावस्य तमउपसर्जनेरजः कृष्यादिस्वभा
वत्वात् शूद्रस्वभावस्य रजउपसर्जनेनतमः शुश्रूषास्वभावत्वात् अथ
वा स्वभावः प्राग्भवीयः संस्कारस्तस्य भवैर्नतु जातिमात्रप्रभवैः प
क्षिणामाकाशगमनवत् अतएव जात्येतरस्याह्नानार्थमाणां श
मादिरूपादेरनदृश्यते न हि म्लेच्छादौ वर्णिकानामध्ययना
दिकेवा ईतरेहयाद्याह्नते ब्राह्मणानामध्यापनादिकेवा ईरयते
किंतु सर्वसवेजातीयानां साधारणाधर्माः शमादयो दृश्यंते यथा
हिंसाणां दिग्वाललोणपिशोर्यादिकं भरतादिभ्यव्रियेयपिशामा
दिकेदृष्टे एवमितरत्र तस्माद्यस्मिन्कस्मिंश्चिद्वर्णे शमादयो दृश्यंते स
मूद्रोप्येतेलक्षणैर्ब्राह्मणएवज्ञातव्यः यत्रवर्णोलोपिसूद्रधर्माः

(64)

दृश्यंतेसम्प्रदायत्व तथाचारण्येकेसर्पभर्त्तेनजुहुंप्रतिग्रहीषिवा
के समेदानेत्त्वमाशीलमानश्रोत्स्पतपोहृणा दृश्यंतेयवनागेंद्र
सर्वाल्लणेश्वतिसम्नतः तथायवैतत्तदुःप्रतेसर्पहंतंसर्वाल्लणाः स्म
तःयवैतत्तत्रभवेत्सर्पतंसद्र्ममितिनिर्दिशेदिति जातिधर्मास्त्वमत
नादर्शिताः अध्यापनेवाध्ययनेयजनेयाजनेतथा दानेप्रतिग्रहे
चैवब्राह्मणानामकल्पयत् प्रजानांरक्षणंदानमिज्याध्ययनमे
वच विषयेष्वप्रसक्तिंचक्षत्रियस्यसमादिशत् पशूनांरक्षणंदा
नमिज्याध्ययनमेवच वणिक्पथंकुसीदंचवैश्यस्यकृषिमेवच
एकमेवतुशूद्रस्यप्रभुःकर्मसमादिशत् एतेषामेववर्णानांशुश्रू
षामनसूययेतितस्मात्शमादयोयद्ब्राह्मणोब्राह्मणोवादृश्यंते
स्यवब्राह्मणश्चाविवक्षितं स्वेस्वेकर्मण्यभिरतःसंसिद्धिंलभ
तेनरइतिअत्रतमनुक्ताध्यापनादीनेवस्वकर्माणिगृह्णाति
नतुशमदमादीनि नहिज्ञानविज्ञानवतोऽस्यासंसिद्धिर्ल
भ्यास्ति तस्माच्छमदमादयोब्राह्मणस्यैवब्राह्मणस्यलक्षणमि
तिदिक् ४१ ॥

आनंदीटीका १२

स्वधर्ममपिचावेक्ष्यनविकंपितुमर्हसीतिप्रागुद्दिष्टंतल्लक्षण
मविपरीतंयन्वर्णानांस्वभावभेदेनगुणविभागमाह स्वभा
वःपरैरसाधारणःस्वःभावःप्रकृतिप्रकारः तत्प्रभवैर्गुणैः
स्वनात्मके धर्मैःकर्माणिशास्त्रोक्ताःक्रियाः ४१ ॥

रामकंठीटीका १४

इहचतुर्णांवर्णानामक्ष्यवक्ष्यमाणार्थसमन्वयात्वित्तप्रकार
स्वभावसमुत्थैर्गुणैर्धर्मैःकर्माणिशास्त्रचोदिताःक्रिया
विशेषाःसमनंतरवक्ष्यमाणभेदेनप्रविभक्तानिप्रतिव
र्णंसाधारणासाधारणविभागेनकर्तृत्वपृथक्कृतानिपर
मेश्वरेणैवकेनेयनस्वेच्छामात्रोपकरणेनपरमार्थतोविशु
द्धस्वभावमात्राद्व्यतिरिक्तस्वरूपमपिनानाभावभेदाभासवे

श्री· वितं जगत्कौशलकनिर्माणमिदमारचयता विभागः परिकल्पितः
गी·टी· तथा च भगवतैव प्रागदर्शितं चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभा
अ· गशः तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम् तथा महर्षयः स
प्त पूर्वे चत्वारो मनवस्तथा मद्भावा मानसा जाता येषां लोक इमाः
प्रजा इत्यत्र पूर्वश्लोके परमेश्वरेच्छामात्रहेतुकत्वं वर्णविभागे प्र
तिपादितं अपरश्लोके चत्वारो मनवश्चातुर्वर्ण्यप्रवर्तकाः प्रजा
पतयो यदुक्तास्तेषामीश्वरसर्गविवर्तया महाकल्पारम्भे पर
मेश्वरेच्छामात्रेण तत्तद्भावाभिमतस्वरूपाणामेव च तदर्थाः सर्गे विभा
सिताः यतश्चतुर्वर्णरूपा प्रजेयमुत्पादितेति दशमे व्याख्यानमा
यम् इह तु वर्णविभागोपपत्तिप्रदर्शनप्रस्तावेनोदितं तद
यमवतरो विवर्तितो यदीश्वरेण स्वसर्गारम्भे चत्वारः पुरुषाः
सपत्नीकाः प्रविभक्तकर्माणो ब्राह्मणादिव्यपदेशभाजः सृ
ष्टाः तेषामेकेन पुरुषेण ब्राह्मणाः सर्गतस्त्वादितः अन्यैः क्ष
त्रियादिसर्गाः एवं क्रमेण ब्राह्मणादिवर्णविभागः स्थितः ये यो वि
च्छिन्नसंतानतया ब्राह्मणेन ब्राह्मण्यां जाताः स ब्राह्मण एवं क्षत्रिया
दयः तदितरैः प्रजापतिभिर्या सृष्टिः कृता साऽनुलोमप्राति
लोम्येन च संकीर्यमाणानन्त्यं भजते तत्र ब्राह्मणेन क्षत्रियायां वैश्या
यां शूद्रायां वा जाता अनुलोमजा व्याख्याता एवं क्षत्रियेण वैश्यायां
शूद्रायां चोत्पन्ना वैश्येन शूद्रायां सर्व एवानुलोमजा धर्म्याः ये
तु विपर्ययेण क्षत्रियेण ब्राह्मण्यां वैश्येन क्षत्रियाब्राह्मण्योः शूद्रे
ण वैश्यक्षत्रियब्राह्मणीषूत्पादितास्ते प्रतिलोमजा अधर्म्याः
एवमनुलोमप्रतिलोमजानामपि संकार्यसमानान्यप्रजायाः ये
तु विच्छिन्नसंतानतया ब्राह्मणेन ब्राह्मण्यां क्षत्रियेण क्षत्रियायां वै
श्येन वैश्यायां शूद्रेण शूद्रायामसंकीर्णतया जातास्ते विशुद्धाः
चत्वारो वर्णा इति वर्णविभागव्यवस्थितेः वर्णानां स्वभावजक
र्मप्रविभागं प्रदर्शयितुमाह ४१ ॥

लासिकी [illegible]टीका

एवं सात्विकानामुत्कृष्टतामुक्त्वा अधुना राजसानां संसारोत्तरणाय वर्णाश्रमोचि
तेन स्वकर्मणा ईश्वराराधनरूपं ज्ञानोत्पत्त्युपायं वर्णयितुं तावद्वर्णविभागेन क
र्मप्रस्तौति ॥

स्वभावात्स्वस्वरूपविस्मरणरूपाज्ञीवत्वहेतुभूतात्प्रधानाख्या
त्प्रभवउद्रेकेणाविर्भावोयेषांतैः सत्वादिभिरुपलक्षणभूतैर्ब्रा
ह्मणानांक्षत्रियाणांविशांशूद्राणांचकर्माणिप्रविभक्तानि स॰
याविभागेनकथितानि तत्रसत्वप्रधानाब्राह्मणाः सत्वोपसर्ज
नरजःप्रधानाःक्षत्रियाः तमउपसर्जनरजःप्रधानावैश्याः रज
उपसर्जनतमःप्रधानाःशूद्राः ४१ [illegible]
[illegible] ४१

पंचोलीटीका

तर्हिसर्वस्यक्रियाकारकफलादिकस्यप्राणिजातस्यत्रिगुणात्मक
२ त्वात्कथंतस्यमोक्षःइत्यपेक्षायांस्वस्वाधिकारविहितैः कर्मभिःपरमेश्व
रेसमाराधनैःतत्प्रसादाल्लब्धज्ञानेनमोक्षोभवतीतिसर्वगीतार्थसा
रसंग्रहंदर्शयितुंप्रकरणांतरमारभते ब्राह्मणेत्यादिनायावत्समाप्तिः
हेपरंतप ब्राह्मणक्षत्रियविशांचशूद्राणांवर्णानांकर्माणिस्व
भावप्रभवैःगुणैःप्रविभक्तानिविभागेनव्यवस्थापितानिस्वभावप्रभ
वैःगुणैःस्वभावईश्वरस्यत्रिगुणात्मिकामायासाप्रभवकारणंयेषांस
त्वादीनांगुणानांतेस्वभावप्रभवास्तैः अथवास्वभावस्यप्रभवाःकार
णानिगुणानिस्वभावप्रभवास्तैःब्राह्मणस्वभावस्यसत्वगुणप्रभवः
कारणंक्षत्रियस्वभावस्यसत्वोपसर्जनरजःप्रभवःवैश्यस्वभावस्यत
मउपसर्जनरजःप्रभवःशूद्रस्वभावस्यरजउपसर्जनंतमःप्रभवःप्रा
यवादयेषांतैः ४१ ॥

रणवीरसमिद्धोयिनी

ननुयदिसर्वस्यैवत्रिभिरेवगुणैराक्रांतत्वंतदुपादेयस्य परमपुरुष
निमित्तस्यसत्त्वस्य केवलस्यासंभवाद्भवतस्तापुत्र्यप्राप्तिः सर्वस्यस्व
पुण्यापुण्यमार्गेणैवमभवेदित्यर्जुनाभिप्रायमाशंक्यप्रायशः सत्वप्रधाने
येयास्वंवर्णाश्रमाणांप्रतिनियतैः कर्मभिःपरमेश्वरमभ्यर्च्य सा॰
स्वत्वमेवेति सर्वगीतार्थसारं संग्रहदर्शयितुंप्रकरणांतरमारभ्यते
ब्राह्मणेत्यारभ्ययावत्समाप्तिब्राह्मणक्षत्रियविशांवैश्यादिकानिरणां हि

जानां शूद्राणां च तदधिकारिणां कर्माणि वक्ष्यमाणानि शमादी
नि प्रविभक्तानि प्रकर्षेण प्रतिवर्णं साधारणासाधारणविभागतः
पृथक्कृत्य विहितानि मया परमेश्वरेण वेति शेषः स्वभावप्रभवैः
सात्विकादिस्वरूपोपलक्षणीभूतैः सर्वभवीयसंस्काररूपस्वभा
वात्समुत्थैर्वा उक्तवक्ष्यमाणार्थसमन्विततया हि प्रकारस्वभावा
त्प्रादुर्भूतैर्वा गुणैः सत्वादिभिर्धर्मैरिति विभागकरणं कथनं प
नच चातुर्वर्ण्यं मया सृष्टमित्यत्र प्रागेव व्याख्यातं न चैवं पुनरुक्तिः
तत्र परमेश्वरस्य वर्णविभागव्यवस्थापने स्वातंत्र्येण तदर्हकर्मान
धीनत्वं प्रतिपाद्य कर्मणां यथास्वमवस्थानेन तत्प्रीतिः प्रतिपादिता
अत्र तु वर्णविभागोपपत्तिप्रदर्शनप्रस्तावेन कर्मणां प्रतिवर्णं वि
भज्य प्रतिपादनार्थं कथनमिति ४१ ॥

मधुभाष्य

४१॥

भाषा अनुवाद ॥

जो समस्त क्रिया औ कारक कहे क्रियों के साधन तथा फल आदि औ प्राणीमात्र सब भी त्रिगुणात्मक कहे त्रिगुणमय भये हैं तो इन लोगों की मुक्ति कैसे घटै कहे होय सके है इस शंका निवारण के अर्थ अपने अपने अधिकार अनुसार कर्म अनुष्ठान के द्वारा भगवत आराधन से भई भगवत की कृपा प्राप्ति से प्रगट जो तत्वज्ञान तिसके द्वारा ही जो मुक्ति होयगी यह जो सब गीता का सारसंग्रह सो देखावने का मानस कर इस श्लोक से अध्याय समाप्ति पर्यन्त प्रकारान्तर कहे दूसरी रीत कहने का आरंभ करते हैं कि हे परन्तप शत्रुनाशक अर्जुन ब्राह्मण क्षत्रिय वैश्य औ शूद्र इनों के कर्म प्रविभक्त कहे प्रकृष्ट रूप से भिन्न भिन्न विहित हैं और द्विज पद से शास्त्र मे ब्राह्मण आदि तीन वर्ण कहे जाते हैं इससे शूद्र को अलग करके कहा है सोई लक्षण कहते हैं कि स्वभाव कहे सतोगुण आदि जिन से सब का प्रभव कहे उत्पत्ति है उन्हीं के अनुसार ब्राह्मण आदि के कर्म पृथक पृथक विहित हैं अथवा स्वभाव कहे पूर्व जन्म का संस्कार उसके अनुसार जो ब्राह्मण आदि की गुणक्रम से कर्मों मे प्रवृत्ति है विशेष यह कि ब्राह्मण सतोगुण प्रधान है औ क्षत्रिय कछुक सतोगुण सहित रजोगुण प्रधान है और वैश्य कछुक सतोगुण तमोगुण लेकर रजोगुण प्रधान है और शूद्र कछु रजोगुण युक्त तमोगुण प्रधान है यह जानौ ४१ ॥

दोहा

ब्राह्मणक्षत्रिय वैश्य के परंतप शूद्रहि केहि कर्महु यह
भिन्नभिन्न दे स्वभावजन्य गुण सेहि ४१ ॥

शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च ज्ञा
नं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजं ४२

शांकरभाष्यटीका १

कानि पुनस्तानि कर्माणीत्युच्यते शम इति शमो दमश्च यथा व्याख्यातार्थौ तपो यथोक्तं शारीरादि शौचं व्याख्यातं क्षान्तिः क्षमा आर्जवं ऋजुतैव च ज्ञानं विज्ञानं आस्तिक्यं आस्तिकभावः श्रद्दधानता परमार्थेषु आगमार्थेषु ब्रह्मणजातेः कर्म ब्रह्मकर्म स्वभावजं यदुक्तं स्वभावप्रभवैर्गुणैः प्रविभक्तानीति तदेवोक्तं स्वभावजमिति ४२ ॥

आनंदगिरिकृतटीका २

प्रविभक्तानि कर्माण्येव प्रश्नद्वारा विविच्य दर्शयति कानीत्यादिना अंतःकरणोपशमः शमो दमो बाह्यकरणोपरतिरित्युक्तं स्मारयति यथेति त्रिविधं तपः समदर्शि दर्शितमित्याह तप इति शौचमपि बाह्यान्तरभेदेन प्रागेवोक्तमित्याह शौचमिति क्षमा नामाक्रुष्टस्य ताडितस्य वा मनसि विकाराराहित्यं ज्ञानं शास्त्रीयं पदार्थज्ञानं विज्ञानं शास्त्रार्थस्य स्वानुभवपर्यन्ततापादनं विधा व्याख्याने स्वभावशब्दार्थमुपेत्याह यदुक्तमिति ४२ ॥

स्वामिकृतटीका ३

तत्र ब्राह्मणस्य स्वाभाविकानि कर्माण्याह शम इति शमश्चित्तोपरमो दमो बाह्येन्द्रियोपरमः तपः पूर्वोक्तं शारीरादि शौचं बाह्याभ्यन्तरं क्षान्तिः क्षमा आर्जवमवक्रता ज्ञानं शास्त्रीयं विज्ञानमनुभवः आस्तिक्यमस्ति परलोक इति निश्चयः एतच्छमदमादि ब्राह्मणस्य स्वभावाज्जातं कर्म ४२ ॥

पिशाचभाष्यटीका ४

तपस्स्वधर्मे धृतिः शौचं शुद्धिभावो क्षान्तिः क्षमा आर्जवं भ[illegible] भावः ज्ञानमात्मप्रबोधः विज्ञानं महदादिपदार्थेषु [illegible] क्तिः ब्राह्मणानां ब्राह्मणस्पर्धे स्वभावजं प्रकृतिभवं ४२ ॥

रामानुजभाष्यटीका ५

शमइति शमोबाह्येंद्रियनियमनं दमोंतःकरणनियमनं त
पोभोगनियमनरूपः शास्त्रसिद्धःकायक्लेशःशौचंशास्त्रीयक
˅र मेयोग्यताक्षांतिःपौरःनवर्तनेताऊमानस्यापिअविकृतचित्तताआ
˅३ र्जवंपरेषुमनोनुरूपंबाह्यचेष्टाप्रकाशनं ज्ञानंपरावरतत्वयाथात्म्य
ज्ञानंविज्ञानंपरतत्वगतासाधारणविषयंविज्ञानं आस्तिक्यं
वैदिकार्थस्य कृत्स्नसत्यतानिश्चयःप्रकर्षःकेनापिहेतुना ˅सत्य
श्रयनेत मशक्यइत्यर्थः भगवान्पुरुषोत्तमोवासुदेवः परं
ब्रह्मशब्दाभिधेयोनिरस्तनिखिलदोषगंधः स्वाभाविकानवधि
कातिशयज्ञानशक्त्याद्यसंख्येयकल्याणगुणनिखिलवेदवेद्यः ˅धा
सएवनिखिलजगदेककारणंनिखिलजगदाधारभूतोनिखिलस्य
सएवप्रवर्तयितातदाराधनभूतंचकृत्स्नंवैदिकंकर्मतेनैवाराधि
तोधर्मार्थकाममोक्षाख्यंफलंप्रयच्छतीत्यस्यार्थस्यसत्यतानिश्च
यः आस्तिक्यंवेदैश्चसर्वैरहमेववेद्यः अहंसर्वस्यप्रभवोमत्तः
सर्वमिदंप्रोतं मोकारेसर्वमुपत्ननपसोस्तमांशानिस्वक्षति मत्तः
˅तरं परंनान्यत्किंचिदस्तिधनंजययतः प्रवृत्तिर्भूतानांयेनसर्वमिदं
ततंस्वकर्मणातमभ्यर्च्यसिद्धिंविंदतिमानवः योमामजमनादिं
चवेत्तिलोकमहेश्वरमितिवक्ष्यते तदेतद्ब्राह्मणस्यस्वभावजंकर्म ४२

अभिनवगुप्तकृतटीका ६

स्पष्टार्थम् ४२ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपाटी टीका ७

तत्रब्राह्मणस्यस्वाभाविकानिकर्माण्याह शमोदमइति शमश्चि
त्तोपरमः दमश्चेंद्रियोपरमः तपः पूर्वोक्तंशारीरादि शौचंबाह्याभ्यं
तरंक्षांतिः क्षमाआर्जवमवक्रता ज्ञानंशास्त्रीयंविज्ञानमनुभवः
आस्तिक्यमस्तिपरलोकइतिनिश्चयः एतद्ब्राह्मणस्यस्वभावसिद्धंकर्म
४२॥

वनमालीटीका ८

तत्रब्राह्मणस्यस्वाभाविकगुणकृतकर्माण्याह शमइति शमोंतः
करणोपरमः दमोबाह्येंद्रियोपरमः तपःप्रागुक्तंशारीरादिकं शौ

वमपिप्रायकेणोक्तिः क्षमा आर्जवमकौटिल्यं ज्ञानं भागवद
र्थविषयकं विज्ञानं कर्मकाण्डे यज्ञादिकर्मकौशलं ब्रह्मकाण्डे
सदंनेनगुणाहृणोब्रह्मणोजीवस्यजडस्यचविविक्ततयाज्ञानं।
आस्तिक्यं शास्त्रे विश्वासः एतन्नवकं स्वभावजं सत्वगुण
स्वभावकृतं ब्रह्मकर्म ब्राह्मणजातेः कर्म यद्यपि चतुर्णामपि ६
त्रिकावस्थायामेते धर्माः संभवंति तथापि बाहुल्येन ब्राह्मण
भवंति सत्वस्वभावत्वात्तस्य सत्वोद्रेकवशेन तत्रापि कदाचिद्भवंतीति
तीर्थावमर्शरणोरुपेंतिद्रष्टेनताम्रायाराणयमेतयोक्ताः तथाचवि
ष्णुः क्षमा सत्यं दमः शौचं दानमिंद्रियसंयमः अहिंसा गुरुशुश्रू
षा तीर्थानुसरणं दया आर्जवं लोभशून्यत्वं देवब्राह्मणपूजनं अ
नभ्यसूया च तथा धर्मः सामान्य उच्यते इति ४२ ॥

ऊसमवेजयंतीमध्येः ९

ब्राह्मणस्य स्वभावजं कर्माह शमो दम इति शमोंतःकरणस्य नियम
नं दमो बहिःकरणस्य नियमनं तपो भोगनियमनरूपं शास्त्रीय।
कायक्लेशरूपः शौचं बाह्याभ्यन्तरभेदेन द्विविधं क्लेशासहीय
कर्मानुष्ठाने योग्यतारूपं क्षान्तिः परैरनवरतं ताड्यमानस्यापि
नत्तु हिंसत्वेनाविकृतचित्ततारूपा आर्जवं परेषु मनोवाक्कायक
र्मणामवक्रत्वं एवंकारेणाहिंसादयः सामान्यधर्मा अपि गृह्यन्ते
तथाहि क्षमा सत्यं दया शौचं दानमिंद्रियसंयमः अहिंसा गुरुशु
श्रूषा तीर्थानुसरणं दया आर्जवं लोभशून्यत्वं देवब्राह्मणपूजनं
अनभ्यसूया च तथा धर्मः सामान्य उच्यते इति च श्रुतः ज्ञानं शास्त्रा
र्थस्य तत्त्वयाथात्म्यं विज्ञानं शास्त्रादिवपरावरतत्त्वानुभवरूपं आ
स्तिक्यं सर्वेश्वरो वासुदेवः श्रीकृष्णो नमो भगवान् ब्रह्मभूतः स्वभाव
तो यास्तसमस्तदोषोऽनंताचिंत्यासंख्येयस्वाभाविककल्याणगुणवान्स्व
त्वज्ञानशक्त्यादिमंगलगुणमहोदधिः सर्ववेदवेद्यः अहं सर्वस्य प्रभ
वः मत्तः सर्वमिदं सर्वजगत्कारणं सर्वाधारः सर्वप्रवर्तकः स्वविहितैः
स्तदाराधनभूतैः कर्मभिः केवलया भक्त्या चाराधितः सच्चानंदपदी।
नेसर्ववर्णवर्णीफलेद्दानीनिशास्त्रादिगतेः ध्येसमस्तनिस्त्रयः वेदे

श्री० गीटी० अ०

अस्तैवैराग्यमेववेधः अहंसर्वस्यप्रभवःमयिसर्वमिदंप्रोतंभोक्तारंय
ज्ञतपसांज्ञात्वामांशांतिमृच्छतिमत्तःपरतरंनान्यत् यतःप्रवृत्ति
र्भूतानांयोमामजमनादिंचवेत्तिकेतनेनस्वभावजेनस्वाभाविकेन
लकर्मब्राह्मणस्यकर्मभवति ४२ ॥

एतद्ब्राह्मणस्यस्वाभाविकगुणकृतानिकर्माणिह ॥

180

मधुसूदनी टीका १

+शमोन्तःकरणोपरमः दमोबाह्यकरणोपरमः शारीरः तपःशा
रीरादिदेवद्विजगुरुप्राज्ञपूजनादाव्युक्तं शौचमपिबाह्यमाभ्यंतरंभेदे
नप्रागुक्तं क्षांतिःक्षमाआक्रुष्टस्यताडितस्यवामनसिविकाराहि
तंप्रागव्याख्याते आर्जवमकौटिल्यंप्रागुक्तं ज्ञानं सांगवेदतदर्थवि
षयं विज्ञानंकर्मकांडेयज्ञादिकर्मकौशलंब्रह्मकांडेब्रह्मात्मैक्या
नुभवः आस्तिक्यंसात्विकीश्रद्धाप्रागुक्ताएतन्नवमादिनवकंस्व
भावजेनसत्वगुणस्वभावकृतंब्रह्मकर्मब्राह्मणजातेःकर्मयद्यपि
चवर्णानामपिवर्णिनांसात्विकावस्थायामेतेधर्माःसंभवंति तथा
पिबाहुल्येनब्राह्मणेभवंतिसत्वस्वभाववत्वात्तस्यतदेकवशेन
तच्चापिकदाचिद्भवंतीतिशास्त्रांतरेसाधारणधर्मतयोक्ताः तथा
चविष्णुः क्षमासत्यंदमःशौचंदानमिंद्रियसंयमः अहिंसागुरुशु
श्रूषातीर्थानुसरणंदया आर्जवंलोभशून्यत्वंदेवब्राह्मणपूजनं अ
नभ्यसूयाचतथाधर्मःसामान्यउच्यते सामान्यश्चवर्णानामपिवर्णि
नांतथाप्रायेणचवर्णानामप्याश्रमाणामित्यर्थः तथाचबृहस्पतिः
दयाक्षमानसूयाचशौचानायासमंगले अकार्पण्यमस्पृहत्वंसर्व
साधारणानिच परेवात्मबंधुवर्गेवामित्रेद्वेष्टरिवासदा आपन्नेरक्षित
व्यंतद्दयैषापरिकीर्तिता बाह्येचाध्यात्मिकेचैवदुःखेचोत्पादिते
क्वचित् नकुप्यतिनवाहंतिसाक्षमापरिकीर्तिता २ नगुणानगु
णिनोहंतिस्तौतिमंदगुणानपि नान्यदोषेषुरमतेसानसूयाप्रकीर्ति
ता ३ अभक्ष्यपरिहारश्चसंसर्गश्चाप्यनिंदितैः स्वधर्मेचव्यवस्थानंशौ
चमेतत्प्रकीर्तितं ४ शरीरंपीड्यतेयेनसुशुभेनापिकर्मणा अत्यंतंत
न्नकर्तव्यमनायासःसउच्यते ५ प्रशस्ताचरणंनित्यमप्रशस्तविव
र्जनं एतद्धिमंगलंप्रोक्तंमुनिभिस्तत्वदर्शिभिः ६ स्तोकादपिप्रदात

१८०

व्यमदीनेनांतरात्मना अहन्यहनि यत्किंचिदकार्पण्यं हि तत्स्मृ
तं ८ यथोत्पन्नेन संतोषः कर्तव्यो ह्यल्पवस्तुना परस्याचिंतयित्वा
र्थं सास्पृहा परिकीर्तिता ९ एत एवाष्टावात्मगुणत्वेन गौतमेन प
ठिताः अष्टावात्मगुणाः दया सर्वभूतेषु क्षांतिरनसूया शौचम
र्म्मोनुष्ठातुं शक्यते भयावहत्वाच्च नहि कर्म्मणोऽशेषतः त्य
ष्ठानमेवास्त्वशेषकर्म्मत्यागयोगादत्र सहजं कर्म्म सदोषमा
पि नत्याज्यमितिवाक्यार्थमाह सहजमेवेति सहजं कर्म्म सदोषमपि
नत्यजेदित्यत्र विचारमवतारयति किमिति नहिकश्चिदिति यावा
दितिशेषः दोषाविहितनित्यत्यागे प्रत्यवायः संदिग्धस्य सम्प्रयोजन
स्य विचार्यः नाङ्क्तसंदेहे प्रयोजनेन्न एकति किंचातइति तत्राय
मत्रय फले दर्शयति यदीति अशक्यानुष्ठानस्य गुणत्वेन प्रसिद्ध
त्वात् प्रसिद्धे हि महोदधिमगस्त्यस्य चुलकीकरणं पिवतोगुणत्व
न्नादोह यत्वंतर्हीति अशेषकर्म्मत्यागस्य गुणत्वमपि प्राग्मन्यायेन
तद्योगात्तस्याशक्यानुष्ठानत्वेति शंकतेसत्यमिति चोद्यमेव विह
त्वाचष्टे विभजते किमिति सत्वादिगुणवदात्मनोनित्यप्रचलि।
तत्वेनाशेषतस्त्येन न कर्म्म त्यक्तं शक्यं नापि रूपविज्ञानवेदनासं
स्कारसंज्ञानां दशांघ्रसितो स्कैयानामिव क्रियाकारकभेदाभावात्
कारकस्येवात्मनः क्रियात्वमिति स्वकर्म्मशेषतस्त्यक्तुं शक्यमुभयथा
५य पि स्वभावसंगादित्याह उभयथेति पक्षद्वयानुरोधेनाशेषकर्म्मत्याग
योगे वैशेषिकश्चोदयति अथेति कदाचिदात्मा सक्रियायोनिः क्रिय
स्य कदाचिदिति स्थिते फलितमाह तदेति उक्तमेव पक्षं सर्व्वैकपद
द्वयाहिशेषदर्शनेन विशदयति अथेति आगमापायित्वे क्रि
यायास्तद्वतोद्रव्यस्य कथंस्यायितेत्याशंक्याह सुवर्णमितिक्रियायां

२०४

क्रिमत्वेपि क्रियावत्वाभावे कथं कारकत्वं क्रियां कुर्वन् हि कारण
कारकमित्यभ्युपगमादित्याशंक्याह तदेवेति क्रियाशक्तिमेदेव का
रकत्वं न क्रियाधिकरणं परस्पराश्रयादित्यर्थः वैशेषिकपक्षे दोषाभा
वादस्मिन्नर्थे स्वीकार्यत्वेनाप्यतं हरति इत्यस्मिन्निति भगवन्मतान्
सारित्वाभावादस्य पक्षस्याज्यत्वेनेति दूषयति अप्रमेयेति भगव
न्मतानुसारित्वमस्याप्रामाणिकमिति शंकते कथमिति भगवद्व
चनमुदाहरन् परमपक्षस्य तत्त्वगुणत्वाभावमाह यत इति परेषा
मपि तमेव तत्त्वगुणमेव किं नस्यादित्याशंक्याह कारणवादीनामी
ति भगवन्मतानुगुणत्वाभावेपि मायावगुणत्वेन दोषरहितत्वका
णादादीनां मतमुपादेयमेव नहि काणादमते विरोधमुपेक्षणीय
मिति शंकते अभागवतत्वेपीतित्याघवत्वमसिद्धमिति दूषयति उ
च्यत इति सर्वप्रमाणानुसारित्वाम्मतस्य तत्त्वविरोधित्वमसिद्धं यति
कथमिति वैशेषिकमतस्य सर्वप्रमाणविरोधं प्रकटयत्यादौ त
न्मतमनुवदति यदीति असतो जन्मसतश्च नाश इति स्थिते फलि
तमाह तथा चेति उक्तमेव वाक्यं व्याकरोति अभाव इति सदेवासत्त्वमा
पद्यमानत्वं व्यावृत्तं भावश्चेति इति मतमिति शेषः तत्रैवाभ्युपगमा
न्तरमाह तत्रेति प्रकृते मते समवायैः इत्यभ्युपगम्यत इति शेषः
परकीयमभ्युपगमं दूषयति नचेति एवमिति परपरिभाषानुसारे
णेत्यर्थः असतो नाशसमवायपेक्षाप्यस्तीति शेषः कथन्तर्हि तन्तुनेपि
घटादीनां कारणापेक्षाणामसमिति नहि भावानां कारणापेक्षा मतिवी
शुकेति तत्राह भावेति घटादीनामसत्स्वेनापि कारणत्वमना स
तामेवाव्यक्तनामरूपाणामभिव्यक्तिसामग्रीमपेक्ष्य इत्यभिव्यक्ति
वा संभवत्व किंचिदनवद्यमित्यर्थः असत्कार्यवादे दोषान्तरमाह किंचे
ति परमते मानमेयव्यवहारे क्वचिदपि विश्वासो न कस्यचिदित्यत्र
हेतुमाह सत्त्वदेवेति नहि सतयैवेति निश्चितं तथैव पुनरसत्त्वप्राप्ते
रिष्टत्वाच्च वा सत्तयैवेति निश्चयः तथैव सत्त्वप्राप्तेरुपगमादतो
यन्मानेन सदसद्वा निर्णीतं तत्तथैवेति विश्वासाभावात् मानवैफल्य
मित्यर्थः इतश्चासत्कार्यवादे न युक्तिमानित्याह किंचेति तदेव हे
तुत्वं स्फोरयति परमतमनुवदति उत्पद्यत इति परकीयं वचनमे

श्री॰
गी॰ टी॰
ग्र॰

105

व्याचष्टे यातीति तत्सम्बन्धसद्भावेन कारणसम्बन्धेनेति कार्यस्य
संबन्धो भवतीत्यर्थः तदेव स्फुटयति कारणेति परमतमेवमनुभा
ष्य दूषयति नैवेति कार्यस्यासतोऽपि कारणं सम्भवति तस्यैवका
र्येण संबन्धः सिध्यतीत्याशंक्याह नहीति असत्त्वादेवासतः संबन्धा
भावे कारणस्य सतोऽपि तेन संबन्धोऽनुमातुं शक्यते सदसतोः सं
बन्धासंभवादित्यर्थः कार्यस्यात्यन्तासत्त्वानभ्युपगमात् कारणसं
बन्धः स्यादिति शंकते नन्विति सतामेव घटादीनां कारणसं
बन्धं शंकिता दूषयति न सम्बन्धादिति अनभ्युपगममेव विश
दयति नहीति तदेव कारणं कार्याकारमापद्य कार्यव्यवहारं नि
र्वर्तयतीत्यभ्युपगमाद्वाक्ति सम्बन्धानुपपत्तिरित्याशंक्य घटाद्या
नां स्वरूपमित्याह नचेति कार्यस्य कारणसंबन्धात् पूर्वमभा
वे परिशेषसिद्धमर्थं दर्शयति नत्वेवेति नचवानुपपत्तिकमिति
शेषः सम्बन्धिनोः सदसतोः संयोगोऽपि समवायः सदसतोः स
वेदिति तस्य नित्यत्वादन्तरसम्बन्धाभावेऽपि स्थितेरावश्यकत्वा
दिति शंकते नन्विति सदसतोर्मिथः सम्बन्धस्यादृष्टत्वादित्यनि
राचष्टे नवेति घटादिप्रागभावस्यात्यन्ताभावत्वाभावादत्यन्ता
भावादिविलक्षणतया स्वकारणसंबन्धः सिध्यतीत्याशंक्याह घ
टादेरिति उभयत्राभावस्वभावाविशेषेऽपि कस्यचित् कारणसंब
न्धो नेतरस्येति विशेषे हेत्वभावाच्च प्रागभावस्य कारणसंबन्धः सं
भवतीत्यर्थः घटादिप्रागभावस्य सप्रतियोगिकत्वे वन्ध्यापुत्रा
देर्नैवमिति विशेषमाशंक्य दूषयति पक्षस्येति प्रागभावस्येव
प्रध्वंसाभावादेरपि सप्रतियोगिकत्वाविशेषे स्वकारणेन स
म्बन्धाविशेषः स्यादित्यर्थः प्रागभावप्रध्वंसाभावयोर्विशेषा।
भावे फलितमाह यतश्चेति कपालध्वंसो घटकारणीभूतस्य
दवयवविषयः सर्वो व्यवहारो घटाश्रितो जन्मनाशादिव्यवहा
रः प्रध्वंसाभावस्य घटस्याभावत्वे सत्यपि न घटत्वमापद्यते
नापि कारणेन सम्बध्यते नचोत्पत्त्यादि व्यवहारयोग्यो भवतीत्यत
दयुक्तं प्रागभावेनास्य विशेषाभावादित्याह नन्विति असमंजस
मित्येनेनेति शङ्कः सम्बध्यते असमंजसमात्रमाह प्रध्वंसादीति प्र

योस्याभावास्येताभावावादिपदार्थौ क्वचिदिति देशकालयोरि
ह्णे व्यवहारो जन्मादिरेव प्रागभावोनोऽस्मादिव्यवहारयोग्यो
भावत्वात् प्रध्वंसादिवदित्यर्थः प्रागभावस्य चेदभावानभ्युपगम
स्तन्माने सिद्धसाधनमिति शंकतेनन्विति प्रभावस्य भावाप।
त्त्यनभ्युपगमे भावस्येव भावापत्तिरस्त्वनिष्टस्यादिति हृदयमभा
वस्येवेति तस्य तदापत्तेरयोग्यत्वे दृष्टान्तमाह यथेति भावस्य।
भावापत्तिरनिष्टेति दार्ष्टान्तिके संघटयति एतदपीति आरंभवा
दोक्तदोषं परिणामवादेपि संचारयति सांख्यस्येति धर्मिः परि
णामः प्रसतोऽपूर्वपरिणामस्योत्पत्तेः सतश्च पूर्वपूर्वपरिणाम
स्य नाशादसदसदेव सञ्च सदेवेति व्यवस्थापि उच्छेदेत्यर्थः न
न कार्यं कारणात्मना प्रागपि सदेवाव्यक्तं कारकव्यापाराद्व्यज्य
ते तेन व्यक्ताव्यक्तयोर्जन्मनाशव्यवहारान्मवात् तद्विशेषसिद्धि
स्तत्राह अभिव्यक्तीति कारकव्यापारात् प्रागनभिव्यक्तिवदभिव्य
क्तेः सत्त्वमसत्त्वं वा सत्त्वे कारकव्यापारवैयर्थ्यात् तद्विषयप्रमाणवि
रोधः द्वितीये पक्षान्तरस्वदसत्त्वासतः नन्निर्वर्त्यत्वायोगे सएव
दोषः कारकव्यापारादूर्ध्वमभिव्यक्तिवदभिव्यक्तेरपि सत्त्वे सएव दोषः
असत्त्वेपि सतोऽसत्त्वांगीकारात् मानमेयव्यवहारे नक्वापि वि
श्वासः सत्त्वदेव असदसत्त्वेऽस्मानिर्द्धारणादित्यर्थः सांख्यपक्ष
प्रतिक्षेपमात्रेण पक्षान्तरमपि प्रतिक्षिप्तमित्याह एतेनेति
कारणस्यैव कार्यरूपापत्तिरूपमतिस्तस्यैव तद्रूपत्यागेन स्वरू
पापत्तिर्नाशश्चेत्तदपि नपूर्वरूपे स्थिते नष्टे चपरस्य पररूपाप
त्तेरभ्युपपत्तेर्नेच प्राग्भिरूपे स्थिते न नष्टेनवाप्यके शंक्यमित्यर्थः
आरंभवादे परिणामवादे च उभयथापि व्यवहारानुपपत्तौ परिशे
षायात दर्शयति पारिशेष्यादिति एकस्यानेकविधविकल्पानुप
पत्तिमाशंक्याह अविषयेति अस्यापि मतस्य भगवन्मतान्तरोपि
त्वाभावादविशिष्टात्वज्यतेमाशंक्याह इतीदमिति उक्तमेव भग
वन्मते विशदयति सत्त्वमयस्येति सदेकमेव वस्तु स्यादितिशे।
षः इतरेषां विकारसमयानां रजतादीनां वदर्थव्यभिचारादविष
य तेदेव सहत्वेनैकधा विकल्पानतरमाह व्यभिचारेत्वेति इति

श्री॰
गी॰टी॰
ग्र॰

906

मते श्लोके दर्शितमिति सेयंधः आत्मनश्चेदविक्रियत्वे भग
वतेष्टंतर्हि सर्वकर्मपरित्यागोपपत्तेः सहजस्यापि कर्मणस्त्या
गसिद्धिरिति शंकते कथमिति किं कार्यकारणात्मनां गुणानाम
कल्पितानां कल्पितानां वा कर्म धर्मत्वेनेष्टं द्वियापि निःशेषक
र्मत्यागो विद्वषः विद्वषो वा नाद्य इत्याह यदीत्यादिना अविद्यारोपि
तमेव गुणशक्तिकार्यकारणरोपहारा कर्मेति शेषः द्वितीये
प्रत्याह विद्वांस्त्विति आरोपशेषवशाद्विदुषोपि नाशेषकर्मत्याग
सिद्धिरित्याशंक्याह अविद्येति नामेवानुपपत्तिं दृष्टान्तेन स्पष्टय
ति नहीति विदुषोशेषकर्मत्यागे यांचमिकमपि वचोनकूलमि
त्याह यद्वेचेति अविद्वषः सर्वकर्मत्यागायोगेच प्रकृताध्यायस्य
मेव वाक्यमनुगुणमित्याह स्वेस्वे इति वाक्यान्तरमपि तेनैवार्थे प्र
कार्थमित्याह स्वकर्मणेति ४८ ॥

+यदि पुनः सांख्यहृष्यास्वध
र्मे हिंसालक्षणदोषं मत्वा परधर्मं श्रेयं मन्यसे तर्हि स
दोषत्वं परधर्मे पितुल्यमित्या
शयेनाह सहजमिति॥

सामिकान टीका ३

+सहजंस्वभावविहितं कर्म सदोषमपि न त्यजेत् हियस्मात् सर्वेप्यारं
भा दृष्टादृष्टार्थानि सर्वाण्यपि कर्माणि दोषेणकेनचिद्दोषेणावृता
व्याप्ता एव यथा सहजेन धूमेनाग्निरावृतस्तद्वत् अतो यथाग्नेर्धूम
रूपं दोषमपाकृत्य तापएव तमः शीतादि निवृत्तये सेव्यते तथा
कर्मणोपि दोषांशं विहाय गुणांश एव सत्वशुद्धये सेव्यतां इत्यर्थः
[illegible]
[illegible] ४८ ॥

पिशाचभाष्य टीका ४

वै॰ न[illegible]दोषाय न भवति विषज्ञानस्य कृमेः सहजं विषं न मरणाय भवा
ति किं चान्यत् आरभ्यन्त इत्यारंभाः सर्वारंभाः सर्वाणीन्द्रियस्याद्विगुणात्वा
द्दोषेणावृताः अग्निदोषेणाग्निरिवावृताः तस्मात्सदोषमपि स्वधर्मं
मत्का परमधर्मात्तु दृष्टानेपि तस्यात्वश्रीयमानत्वात्मसदोष ऋक्ता
न्वाद्दोषं न मन्यामहे ४८ ॥

रामानुजभाष्य टीका ५

अतः सहजमिति अतः सहजत्वेन सुकरत्वप्रमादेच कर्म सदोषं
सदुःखमपि न त्यजेत्तत्वानयोग्योपि कर्मयोगं कुर्वीतेत्यर्थः सर्वारम्भा हि

दोषेणाडुःखिनत्धूमेनाग्निरिवावृताः इयांस्तु विशेषः कर्मयोगः
स्वकः अप्रमादस्य ज्ञानयोगस्तु विपरीतस्य ४८ ॥

अभिनवगुप्तकृत टीका ६

स्पष्टार्थो ४८ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपाटी टीका ७

तदेवाह सहजमिति कौन्तेय सहजं स्वभावविहितं कर्म स-
दोषमपि न त्यजेत् हि यस्मात्कारणात् सर्वारम्भाः सर्वकर्माणि
दोषेण लौकिकेनावृताः व्याप्ताः सन्ति अत्र दृष्टान्तमाह धूमेने-
ति यथा प्रकाशके होमादिहेतावग्नौ धूमलक्षणो दोषोऽस्ति तथाप्य-
ग्निरग्निमीले इत्यादि श्रुतिभिः स्तूयमानः सेव्यत एव तथैव ब्रा-
ह्मणादिधर्मेष्वदृष्टनिष्कपतगोपीडनाधिकार्यस्तु दोषाः
सन्ति तथापि शास्त्रविहितत्वात् न एव त्याज्याः नात्यज्याः ४८

वनमाली टीका ८

यदि स्वधर्मे हिंसादिकं दोषं पश्यन् परधर्मे निर्दोषं मन्यसे तर्हि यस्य कस्य-
चिद्दोषस्य कर्ममात्रे संभवात्सोऽपि न हि दुष्टः स्यादाह सहजमिति स-
हजं स्वभावजं धर्मं सदोषमपि विहितहिंसादियुक्तमपि युद्धादि-
नात्यजेत् क्षत्रियस्त्वं ब्राह्मणो वा न मौनी वा समाधिस्थः तथापि क-
र्माणि कर्तास्याः त्वं न शक्नोषि न वा परधर्मानन्तरमिति चापि दोषा-
न्मुच्यसे सर्वारम्भाः स्वधर्माः परधर्माश्च हि यतो दोषेण त्रिगुणा-
त्मकत्वेन रागद्वेष[illegible]दिदोषेणावृताः व्याप्ताः अतोऽमुमुक्षुः क-
र्माधिकारी सहजं कर्म युद्धादि त्रिगुणात्मकत्वेन साम्येन हिंसा-
दि विशेषेण सदोषमपि न त्यजेत् सर्वकर्मत्यागासमर्थत्वात् ४८

उत्तमवैजयंती टीका ९

ज्ञाननिष्ठायाः सकाशात्कर्मनिष्ठायाः श्रेष्ठत्वं ज्ञायते यायोक्ते
स्मारयन्नुर्वैषाककर्मीचत्तामपि दोषयुक्तत्वमेवास्मिनोदोषत्वा
ह्यास्वधर्मस्य परधर्मेनाश्येन किं त्वं स्वधर्ममेव कुर्या इति सा-
ह सहजमिति हे कौन्तेय सहजं स्वभावमात्रविहितं यत्कर्म तत् स-

दोषमपिहिंसाद्यनेकदोषयुक्तमपिनत्यजेत् किंतुविहितत्व
बुद्ध्याकुर्यादेवनिर्दोषंत्वाज्ञात्वापरधर्मंसमाचरेच्चेत्तर्हिरुहात्म
वचस्तेवनप्राप्नोतीत्यर्थःकस्मादेवंहियस्मात्सर्वारंभःसर्वे
आरंभाज्ञानारंभाःकर्मारंभाश्चयद्वासर्वेषांवर्णानामाश्रमाणा
मारंभाःकर्माणित्रिगुणकार्यत्वाद्दुःखसाध्यत्वाच्चदोषेण
केनचिद्दुःखेनावृताःव्याप्ताएवभवंति नचदृष्टोमःएतेनस
ज्जेनाग्निरिवयथाग्निर्धूमेनसाधारणपाकस्पर्शिनादिनिहन्तयेनापः
सेव्यतेतथाकर्मणामगवदर्पणेनदोषं निर्धूयात्मदर्शनाय
ज्ञानजनकत्वेनाशःसेव्यःकर्मयोगःसुकरोऽप्रमादश्च ज्ञानयो
गस्तुप्रपरीतस्तथानेवविशेषःश्माशयःकौंतेयेत्यनेनयथाज्ञ
नीपतिव्रताकृष्णरहितासत्यवादित्वमपिकर्णोत्यनिरूपेकर्मो
शुपिक्षिप्रादिभ्योप्यगोपयत्किमेवंसौस्वभावज[illegible]कपटदो
षयुक्तमपिकर्मनात्यजत्तथात्वमपिस्वाभाविकंहिंसा
दिदोषयुक्तमपियुद्धादिकंकर्मनात्यजेतिसूचितं ४८ ॥

+ यस्मादेवंविहितहिंसादेर्नप्र
त्यवायःइत्तत्वंपरधर्मश्चभया
वहः सामान्यदोषेणचसर्व
कर्माणिदुष्टानितस्मादज्ञोवर्णाश्रमाभिमानी ॥

मधुसूदनी टीका १०

+ हेकौंतेयसहजंस्वभावजंकर्मदोषमपिविहितहिंसाद्युक्तम
पिज्योतिष्टोमयुद्धादिनत्यजेदतःकरणशुद्धेःप्राग्भवानसोवा
नत्यजन्नात्मज्ञः कश्चित्क्षणमपिकर्माण्यकृत्वास्थातुंशक्नोति
नचपरधर्मानत्वनिष्ठत्वापिदोषान्मुच्यतेसर्वारंभाःस्वधर्माःप
रधर्माश्चसर्वाण्यपिकर्माणिहि यस्माद्दोषेणत्रिगुणात्मकत्वे
नसामान्येनावृताव्याप्ताःसदोषाएवतथाचप्राप्याणांनपरिणा
मतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्चदुःखमेवसर्वंविवे
किनइतितस्मादनात्मज्ञःकर्माणिकुर्वन्स्वधर्मरूपविध
सहजंकर्मयुद्धादित्रिगुणात्मकत्वेनवधबन्धादिनिमित्तत्वेन।
सामान्येनबन्धवधादिनिमित्तत्वेनविशेषेणचसदोषमपिनत्य
जेत् सर्वकर्मत्यागासमर्थत्वात् सर्वकर्मत्यागसमर्थस्तुप्रौ
ढःकरणस्त्यजेदेवमभिप्रायः(कः) पुनः सर्वकर्मत्यागसमर्थः

योनित्यानित्यवस्तुविवेकजेनेहामुत्रार्थः भोगवैराग्येणशम
दमादिसंपन्नःकर्मजांसिद्धिमशुद्धिंपरित्यज्यदारागृहवस्त्रः मुह
ब्रह्मात्मैकजिज्ञासोशमः सुखेष्टमोदहेतुब्रह्मात्मैकत्वज्ञानसा
धनवेदान्तवाक्यश्रवणादिकंतत्सर्वंविहितंनिष्कामतद्वेषभूत
सर्वकर्मसंन्यासेनकरोतिस्वरतिविहितंजपादेवतस्मादेवविक्षा
नोदांतउपरतस्तितिक्षुःसमाहितोभूत्वात्मन्येवात्मानंपश्येदि
तिःश्रुतेः तस्मान्नैतावदुःखविद्वानिमंलोकममुंचपरित्यज्या
त्मानमन्विच्छेदितिस्मृतेश्चउपरतःसकलसर्वकर्माभूत्वात्मानंप
श्येदात्मदर्शनायवेदांतवाक्यानिविचारयेदितिनिष्कर्षार्थःप्रतिपाद
शएवब्रह्मसंस्थोमृतत्वमेतीतिश्रुत्यर्थसंकल्पत्रयविलक्षणावे
न्तत्रनिषादितःपरमहंसपरिव्राजकःपरमहंसपरिव्राजकेनत
त्कामेगुरुमुपसन्नवेदान्तवाक्यविचारसमर्थोपश्चादिष्यतायानो
ब्रह्मजिज्ञासेत्यादिचतुर्लक्षणामीमांसाभगवताबादरायणेनस
मारंभिकीदृशोसावित्याह ४८ ॥

सदानंदी टीका ९

यतोविहितहिंसादेःसमवायेनहेतुना भीतिदःपरधर्मश्रम
र्वकर्मकलेकवत् १ तस्माद्योधिकारीयोवर्णाश्रमस्तिःप्र
मान् स्वभावजंमजेत्तैवकर्मदोषाविततमपि २ ज्योतिष्टोमा
दिकंयहनग्न्याग्रहादिकर्मैव श्रूतःकरणशुद्धेःसाम्यवान्वाप्तो
ध्यावानः ३ नतुःकश्चित्क्षणंजातुविनाकर्मैहतिष्ठतिसम
स्त्रेयतः कर्मसर्वेषांजन्मनासह ४ नवान्यधर्मान्वष्टव्योदो
षात्कत्वतत्त्वाग्रहो स्वधर्मःपरधर्मोश्रमवारंभपदेशिनाप्रस्ता
द्वेशएवदोषेणसामात्येनावृताःकिल विकारनापसंस्कारेण
हतिविरोधनः ६ उःएवमेवजगत्सर्वंकर्मजन्मविवेकिनः
केवलंस्वफलहीनंसर्ववक्ष्यासतेजगत् ७ तस्मादुपास्यानां
त्मज्ञःकुर्वन्कर्माणिशास्त्रतः निष्कामागासमर्थत्वस्ययतोसौसर्व
कर्मणां ८ कर्मत्यागसमर्थस्तस्यशुद्धांतःकरणःप्रमान् सर्वे

दोतविचारार्थं सर्वं विक्षेपकं त्यजेत् ९ करोतु कर्माणि तथा
करोतु वा मुकुंदपादाब्जरसग्रहः सुधीः गृहे वने वा निवस
न्नमो जितो मुकुंदपादाब्जसेवको हित इति १० ॥ ४८ ॥

नीलकंठी टीका १२

किंच सहजं स्वाभाविकं स्वात्रैकर्म सदोषं हिंसामिश्रमपि न त्य
जेत् हि यस्मात्सर्वारंभाः सर्वाणि कर्माणि दोषेण हिंसादिना
आवृता एव यस्माच्च परधर्मो भयावहस्तस्मात्स्वकर्म न त्यजे
दित्यर्थः ४८ ॥

आनंदी टीका १३

एतदेव प्रतिपादयति सदोषमपि हिंसादिदूषितमपि गु
रुवचनाद्धि यस्मादवश्यकरणीयमित्यर्थः ४८ ॥ अत्र हेतु
माह यथाग्निरवश्यसेव्यो धूममात्रदोषान्न त्यज्यते तथा हिं
सामात्रदोषाद्गुरुवचनं न त्याज्यमित्यर्थः ४८ ॥

रामकंठी टीका १४

अतः सर्वोत्कोपपद्या परमेश्वरेच्छावशात्सहैव जातं वर्णात्मक
स्वभावजातं विगुणमपि कर्म न त्याज्यमेवात्र हेतुमाह यस्मा
त्सर्वारंभाः समस्तकर्माणि धूमेनाग्निरिवाव्यभिचारिणा दो
षेण मलेनावृताः ततश्च प्रवेधप्रवृत्तशास्त्रचोदितकर्ममार्ग
लक्षणोप्यारंभो दोषेणाज्ञानरूपेणावृत एव अज्ञानविविक्त
त्वतद्योगफलसाधनत्वात् यावत्तावत्तस्यांगयावाज्ञानं य
थात्मत्यजत्येव कर्मज्ञानफलभाग्भवति तथा प्रतिपादयित
माह ४८ ॥

लासिकी टीका

सदोषमपि सहजं कर्म विषक्रियान्यायेन कर्तुर्दोषकरं न भवतीत्याह ॥
सहजं जन्मना सहैव शास्त्रेण विहितं कर्म युद्धादि सदोष
मपि हिंसादिदोषयुक्तमपि न त्यजेत् नैव त्याज्यं न तु हिंसादि
दोषयुक्तात्स्वधर्मादपि युद्धादेः सकाशाज्जित्वादिवधैव दोष

रहिताश्रेयसीत्याशंक्याह सर्वारंभा इति सर्वारंभा वर्णानामा
श्रमाणां वा विभागेनोक्तानि सर्वाणि कर्माणि केनचिद्दोषेणाव्य
भिचारिणावृता व्याप्ताः सहजेन धूमेनाग्निरिव [illegible]
[illegible] ४८

पंचोलीटीका

परस्वधर्मे हिंसालक्षणं दोषमनापरधर्मे श्रेष्ठं मन्यसे तर्हि परध
र्मेपि सदोषत्वमित्याशंक्याह सहजमिति हे कौंतेय सहजं कर्मेति
हे कौंतेय सहजं कर्म सदोषं युक्तमपि न त्यजेत् हि यस्मात्सर्वाणि।
कर्माणि वर्णानां त्राणामपि कर्माणि त्रिगुणात्मकत्वात् दोषेणावृता
नि यथाग्निः सहजेन धूमेनावृतः ४८

रणवीरसमिद्बोधिनी

ननु न हिंस्यात्सर्वभूतानि अहिंसा परमो धर्म इत्यादिश्रौतस्मार्तव
चनानुरोधेन हिंसालक्षणदोषवतः स्वधर्मो युद्धादेस्तादृशः पर
धर्म एव कृतो ग्राह्य इत्याशंक्य तत्रापि केनचिदंशेन सदोषत्वं तस्य
मित्याशयेन समाधत्ते सहजमिति सहैव जातं वर्णात्मकस्वभावं
विहितं विगुणमपि कर्म न त्यजेत् तत्र हेतुः हि यस्मात् सर्वारंभाः स
र्वाण्यपि स्वोचितानि परोचितानि वा कर्माणि दृष्टादृष्टार्थानि दोषेण
मलेन केनचिदावृता व्याप्ता एव तत्र दृष्टांतः धूमेनाग्निरिव यथा
व्यभिचारिणा धूमेनाग्निर्व्याप्तस्तद्वत् अतः सर्वस्य मलव्याप्तत्वेन स्व
वर्णविहितमेव सगुणं मंतव्यम् परमेश्वरेणानुशिष्टत्वादिति भावः
किंच यथाग्नेर्धूमात्मकं दोषमपाकृत्य प्रतापप्रवर्तनः शीतादिनिवृ
त्तये सेव्यते तथा स्ववर्णोचितकर्मणोपि दोषांशं विहाय गुणांश एव
निष्ठाकार्येति दृष्टान्ततात्पर्यं ४८॥

मधुभाष्य

४८॥

209

भाषा अनुवाद ॥

परन्तु स्वधर्म्ममे जो सांख्यमत के अनुसार हिंसा को दोष रूप जानि के औ अहिंसा हेतु से परधर्म्म श्रेष्ठ जो विचार करो तो परधर्म्मके आचरण मे भी दोष है इस अभिप्राय पर कहते है कि हे कौंतेय अर्जुन मनुष्यो को सहज कहे स्वभावसिद्ध औ शास्त्रविहित जो स्वधर्म्म सो दोषयुक्त होने से भी त्याग करने योग्य नही है क्योंकि समस्त आरम्भ अर्थात दृष्ट अदृष्ट कर्म्म मात्र सब दोषयुक्त है तो जैसे स्वाभाविक धूम से आवृत अग्नि को दोषयुक्त रहते भी लोग धूम रूप दोष परित्याग करके केवल अन्धकार शीतनिवारणके अर्थ सेवन करते है तैसे ही स्वकर्म्म भी दोष अंश छोड़के गुण अंश मात्र सत्वशुद्धिके अर्थ सेवन करने योग्य है सोई कहा कि हे अर्जुन सहज कहे स्वाभाविक दोषयुक्त भी अपना कर्म्म छोड़ना न चाहिये क्यों कि सब आरम्भ कहे कर्म्म सदोष है जैसे धूम दोषसे अग्नियुक्त को कौन छोड़े है ४८ ॥

दोहा

सहजकर्मकों कौंतिसुत तजें न दोषहि सोंहिं सबआरंभ
हूं दोषयुत अग्निधूमजिम होहि ४८ ॥

असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः
नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति ४९

शांकरभाष्य टीका १

या च कर्मजा सिद्धिरुक्ता ज्ञाननिष्ठा योग्यतालक्षणा तस्याः
फलभूता नैष्कर्म्यसिद्धिर्ज्ञाननिष्ठालक्षणा च वक्तव्येति श्लोक
आरभ्यते असक्तबुद्धिरसक्ता संगरहिता बुद्धिरन्तःकरणं यस्य
सोऽसक्तबुद्धिः सर्वत्र पुत्रदारादिषु आसक्तिनिमित्तेषु जितात्मा
जितो वशीकृत आत्मा अन्तःकरणं यस्य स जितात्मा विगतस्पृहः
तृष्णा देहजीवितभोगेषु यस्मात् स विगतस्पृहो य एवंभूत आत्म
ज्ञः स नैष्कर्म्यसिद्धिं निर्गतानि कर्माणि यस्मान्निःक्रियब्रह्मात्मसंबो
धात् स निःकर्मा तस्य भावो नैष्कर्म्यं नैष्कर्म्यं च तत्सिद्धिश्च वा नैष्क
र्म्यसिद्धिः नैष्कर्म्यस्य वा सिद्धिः निःक्रियात्मस्वरूपावस्थानलक्ष
णस्य सिद्धिर्निष्पत्तिस्तां नैष्कर्म्यसिद्धिं परमां प्रकृष्टां कर्मजां सि
द्धिविलक्षणां सद्योमुक्त्यवस्थानरूपां संन्यासेन सम्यग्दर्शनेन
तत्पूर्वकेन वा सर्वकर्मसंन्यासेनाधिगच्छति प्राप्नोति ४९ ॥

आनंदगिरिकृत टीका २

विदुषः सर्वकर्मत्यागो नाविदुषस्तथेत्युक्ते इदानीमुक्तमनूद्या
नन्तरश्लोकतात्पर्यमाह या च कर्मजेति चोऽवधारणार्थो
भिन्नक्रमो वक्तव्य इत्यत्र सम्बध्यते साद्यन्तपदिशं नैष्कर्म्यसिद्धिं
व्यपदिशति असक्तेति पुत्रादिविषये चेतसः संगाभावेऽपि तस्या
स्वाधीनत्वमाशंक्याह जितात्मेति असक्तिमुक्ता स्पृहाभाववदन्त
अन्तःकरणनिग्रहेऽप्याशंक्याह देहेति उक्तमनूद्य तत्फलं लभ्यमित्य
एवमिति कर्मणां निर्गतौ हेतुमाह निःक्रियेति सम्यग्ज्ञानार्थेन
न नैष्कर्म्यसिद्धिशब्दं व्याख्यायार्थान्तरमाह नैष्कर्म्यस्येति प्रकर्ष
मेव प्रकटयति कर्मजेति संन्यासस्य कृतिसाध्योः सम्यग्दर्शनसाधन
त्वप्रसिद्धेरुक्तनादात्म्यमित्याशंक्य पक्षान्तरमाह तत्पूर्वकेनेति ४९

+नन्वकथंकर्मणिक्रियमाणेदोषांशप्रहाणेनगुणांशपर्यवसंपद्यतइत्यपेक्षायामाह॥

श्री॰ गीटी॰ ३

स्वामिकृतटीका ३

+असक्तेति असक्ता संगशून्या बुद्धिर्यस्य जितात्मा निरहंकारः वि
गतास्पृहा फलविषया इच्छा यस्मात् एवंभूतः सन्मार्गः सात्विको
मतः स एव हि सर्वोत्कर्मणि सक्तिन फलयोस्त्यागलक्षणेन संन्यासे
नैव नैष्कर्म्यसिद्धिं सर्वकर्मनिवृत्तिलक्षणां सिद्धिं सत्त्वशुद्धिमधिग
च्छति यद्यपि संगफलयोस्त्यागेन कर्मानुष्ठानमपि नैष्कर्म्यमेव
कर्तृत्वाभिनिवेशाभावात् तदुक्तं नैव किंचित्करोमीति युक्तो म
टि न्येत तत्त्ववि[illegible]दिश्लोकपंचकेन तथाप्यनेनोक्तलक्षणेन सं।
न्यासेन परमां नैष्कर्म्यसिद्धिं सर्वकर्माणि मनसा संन्यस्यास्ते सुखं व
शी इत्येवलक्षणां परमहंसा[illegible]वस्थामपि प्राप्नोतीति ४९ ॥

पिशाचभाष्य टीका ४ त्रै

इदं न इदं चेत्त्वेहमिति सक्तानि यस्या बुद्धिर्यस्य नास्ति सोऽसक्तबुद्धिः स
र्वत्र कर्मसु तत्फलेषु पुत्रमित्रकलत्रादिषु चासक्तबुद्धिः निर्जितानि
करणानि यस्मात् मायामरीच्युदकं यथैवं मायारहितं चेद[illegible] दिस्पृहादि
भवतु तद्धि युक्तः स्वभावपरमात्मस्वरूपलाभं स निष्कर्मा तस्य गुहः
भावो नैष्कर्म्यं तस्य निष्क्रियात्मस्वरूपावस्थानलक्षणस्य सि
द्धिर्निष्ठेति परमां प्रकृष्टां पुत्रमित्रकलत्रादिवासनाभ्यः तथा च श्रु
तिः आत्मानं चेद्विजानीयादयमस्मीति पूरुषः किमिच्छन्कस्य
कामाय शरीरमनुसंज्वरेत् आत्मलाभान्न परं विद्यत इति स्मृतिः
अतस्तां सिद्धिं संन्यासेनाधिगच्छति ४९ ॥

रामानुजभाष्य टीका ५

सर्वत्र फलादिषु असक्तबुद्धिः जितात्मा जितमनाः परमपुरुषे क।
र्तृत्वानुसंधानेनात्मकर्तृत्वे विगतस्पृहः एवं त्यागान्[illegible]त्यनेन
[illegible]निर्णीतेन संन्यासेन युक्तः कर्म कुर्वन्परमां नैष्कर्म्यसि
द्धिमधिगच्छतीति परमां ध्याननिष्ठामधिगच्छति ज्ञानयोगस्या।
पि फलभूतामधिगच्छतीत्यर्थः वक्ष्यमाणां ध्यानयोगावाप्तिं सर्वे
न्द्रियकर्मोपरतिरूपामधिगच्छति ४९ ॥

211

अभिनवगुप्तकृत टीका ६

स्पष्टार्थम् ४९ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपाटी टीका ७

अथ स्वधर्माचरणेपि शमादेः षड्विवेकमाह असक्तबुद्धिरिति
असक्ता सर्वत्र गृहादिष्वसंगस्वभाव बुद्धिर्यस्य जितात्मा निरहं
कारः विगतस्पृहः कर्मफलानपेक्षः अतएव एवंविधेन कर्मसंन्या
सेन विकल्पागलत्वेन संन्यासेन नैष्कर्म्यसिद्धिं सर्वकर्मनि
वृत्तिलक्षणां सत्त्वशुद्धिमधिगच्छति ४९ ॥

वनमाली टीका ८

असक्तचित्तः सम्यग्विदितभगवत्तत्त्वो मनसा वाणामपि
देहगेहमनसावाणामपि भगवच्चरणारविंदे न्यस्तमशक्तः
सर्वकर्माणि विद्वेषकराणि मत्वा नः शमदमादिसंपन्नः वि
नासर्गे षयाभवन्तीत्याशयेनाह असक्तेति अत्र दारादिष्वसक्त
बुद्धिः अहमेषामिमे मदीया इत्यभिषंगपरलोकनवेमस्यापू ग^
र्वकाल्मावलोकन एव जातस्वाभाविकाभिरुचिः अतः सर्व
कर्मणां गार्हस्थ्ये न्यासः सर्वकनिरतरहरिपदारविंदध्यानेनैवमो
क्षावाप्तिर्भवतीत्याशयेनाह असक्तेति अत्र दारादिषु सक्त
बुद्धिः अहमेषामिमे मदीया इत्यभिषंगरहिता बुद्धिर्यस्य स
जितात्मा विषयेभ्यः प्रत्याहृतचित्तः विषयरागे सति कथमा
हारलाभाद्विगतस्पृहः देहजीवितभोगेष्वपि वाञ्छारहितः
प्राकृतविषयेषु दोषदर्शनेन परमानंदावाप्तिरूपमोक्षगुण
दर्शनेन च सर्वतो विरक्त इत्यर्थः एतादृशीनैष्कर्म्यसिद्धिं नैष्क
र्म्यस्य कर्मनहि विषयकापरोक्षज्ञानरूपां नैष्कर्म्यसिद्धिं सम्यग्व
स्थितस्वधर्मफलभूतां परमां संन्यासेनाधिगच्छति प्राप्नोति ४९

ऊसमवेजयंती टीका ९

ननु यदि सर्वथा कर्मणां दोषवत्त्वं तर्हि तेषु क्रियमाणेषु

[illegible] दोषांशे त्यागभावात्कस्यापि ज्ञाननिष्ठात्वमेव दिदर्शयि-
त्वा यामाह असक्तबुद्धिरिति सर्वत्र कर्मफलादिषु आत्मनो देहपुत्रादि-
षु वा असक्तबुद्धिः असक्ता संगस्नेहादिरहिता बुद्धिरात्मनि स्वीया धी-
र्यस्य सः यतो जितात्मा स्वस्वरूपानुभवानंदेन प्राकृतविषयेभ्यो वशी-
कृतमनाः अत एव विगतस्पृहः नानाविधैर्ऐहिकामुष्मिकेषु प्राकृ-
तभोगेषु स्वस्वकर्मवादिषु वा वांछारहितः एवंभूतो जनः संन्यासेन
परशुद्धेर्भगवति सर्वेषां कर्मणां तत्फलानां चार्पणरूपेण त्यागेन शु-
द्धः सन् कर्मजरूपत्वेऽपि परमां ज्ञानयोगस्यापि फलरूपां ध्याननि-
ष्ठां नैष्कर्म्यसिद्धिं सर्वेंद्रियकर्मोपरतिलक्षणां ज्ञानयोगाभिरूपां सि-
द्धिमधिगच्छति प्राप्नोति ४९ ॥

मधुसूदनी टीका ॥

सर्वत्र पुत्रदारादिषु सक्तिनिमित्तेष्वपि असक्तबुद्धिः अहमेषां म-
मैत इत्यभिष्वंगरहिता बुद्धिर्यस्य सः यतो जितात्मा विषयेभ्यः प्रत्या-
हृत्य वशीकृतोंतःकरणः विषयरागे सति कथं प्रत्याहरणं अत आह
विगतस्पृहः देहजीवितभोगेष्वपि वांछारहितः सर्वदृश्येषु दोष-
दर्शनेन नित्यबोधपरमानंदरूपमोक्षगुणदर्शनेन च सर्वतो विरक्त इ-
त्यर्थः य एवं शुद्धांतःकरणः स्वकर्मणा तमभ्यर्च्य सिद्धिं विंदति मान-
व इति वचनेन प्रतिपादितां कर्मजामपरमां सिद्धिं ज्ञानसाधनवेदांत-
वाक्यविचाराधिकारलक्षणां ज्ञाननिष्ठायोग्यतां प्राप्तः संन्यासेनाधि-
गत्योपवीतादिसहितसर्वकर्मत्यागेन हेतुना तत्त्वविवेकेन विचारे-
णेत्यर्थः नैष्कर्म्यसिद्धिं निष्कर्मब्रह्म तद्विषयविचारपरिनिष्पन्न-
ज्ञाने नैष्कर्म्यं तद्रूपां सिद्धिं परमां कर्मजायाश्चापरमसिद्धेः फलभू-
तामधिगच्छति साधनपरिपाकेन प्राप्नोति अथवा संन्यासेनेति
इत्थंभूतलक्षणे तृतीया सर्वकर्मसंन्यासरूपां नैष्कर्म्यसिद्धिं ब्रह्मसा-
क्षात्कारयोग्यतां नैर्गुण्यलक्षणां सिद्धिं परमां पूर्वस्याः सिद्धेः सात्त्वि-
कायाः फलभूतामधिगच्छतीत्यर्थः [illegible] ४९ ॥

सदानंदी टीका ॥

यो विवेकादिसामग्र्यासंपन्नः सन्विशुद्धधीः सन्नाशुद्धितयदारामन
न्तः संयतेंद्रियः १ शुद्धब्रह्मैकजिज्ञासंध्यामो वेदांतसद्गिरां श्रवणा
द्यदात्मकृतिर्निर्विक्षेपतयासदा २ तद्भोषभृतेसंन्यासक्रमादिविहितं
चरेत् तर्कोहशोषिजिज्ञास्वीर्यग्राहजगद्गुरुः ३ सर्वत्रशत्रवानादो
ममेत्यासंगकारणं अहमेषाममैतेषेष्वभिषंगविवर्जिता ४ बुद्धिर्यस्य
यतस्तेन स्ववशेस्थापितेमनः विषयेभ्योपिसर्वेभ्यः प्रत्याहृत्यविवे
कतः ५ सन्निरोगकर्णचेतः प्रत्याहरणमाचरेत् तत्राहसर्वदृश्येषु
भोगजालेषु सर्वतः ६ दोषदृष्ट्याविरक्तः संजातोयोविगतः स्पृहः
निमवोधपरानंदरूपेमोक्षेचतत्परः ७ सएवंभूतः श्रेष्ठोविचारे
कपरायणः निष्कर्मत्वलतज्ज्ञानेनैष्कर्म्यंतत्स्वरूपिणी ८ सिद्धिस
यतत्संपन्यायत्कृष्टफललक्षणां संन्यासेनैवतत्पूर्वविचारेणाधिग
च्छति ९ यद्वासंन्यासरूपांतां सिद्धिंनैष्कर्म्यलक्षणां उत्कृष्टांपूर्वसा
धिकाः सिद्धेः फलस्वरूपिणीं १० ब्रह्मात्मैक्यापरोक्षसालाक्षात्कृतिया
प्यते प्राप्नोतीत्यर्थएवास्त्वेवंस्यभावेनश्लोकयथा ११ ४९ ॥

नीलकंठी टीका १२

स्वकर्मणामीश्वरेसमर्पणं कर्तव्यमित्युक्तं तत्रश्लोकद्वयेन स्वकर्मणा
मावश्यकत्वमुक्त्वा तेषां परमेश्वरेर्पणेन किंफलंस्यादित्यतआह असं
क्तेति संन्यासेन कार्यमित्येवयत्कर्मनियतंक्रियते संगंत्यक्त्वाफ
लंचैवसत्यागः सात्विकोमतः इतिपूर्वोक्तेनात्मत्यागसात्विकत्यागेन असं
क्तबुद्धिः पुत्रदारादिषुसक्तिपदेष्वासक्तिवर्जिताबुद्धिर्यस्यसोऽस
क्तबुद्धिः विरक्तइत्यर्थः अतएवजितात्मावशीकृतचित्तः विगतस्पृहः
विशेषेणगतास्पृहादृष्टलाभस्पृहादृष्टस्तोभूत्वानैष्कर्म्यसिद्धिंकार्यत्या
नस्वरूपतः कर्मत्यागलक्षणां पारिव्राज्यसिद्धिं परमां सर्वोत्कृष्टां
सात्विकत्यागापेक्षयातिश्रेष्ठां नहेश्वराकस्मलेकर्मेतिश्लोकेव्याख्या
तां सुषिगच्छति प्राप्नोति ४९ ॥

आनंदीटीका १२

अत्रहेतुमाह सिद्धिंविंदतीतियदुक्तं तल्लक्षणं परीक्षयति

श्री।
गी।टी।
अ।

असक्तबुद्धिःरागद्वेषहीनःजितात्माजितेंद्रियःविगतस्पृहाफ
लाभिलाषोयस्यसंन्यासेन समनन्तरमेवकाम्यानांकर्मणांत्या
गमित्यादिसिद्धांतितेनपरमांनैष्कर्म्यसंपाद्यसिद्धिंब्रह्मभावमि
मधिगच्छति ४९ ॥

213

रामकंठीटीका ।४

सर्वत्रसर्वस्मिन्विहितेवर्णस्वभावजेकर्मणिएवमनुष्ठीयमानेपवाः
सक्तबुद्धिः सर्वव्याख्यानसंगदोषरहितमतिस्तथानिषिद्धात्क
र्मणोजितात्मानिगृहीतान्तःकरणः तथाविगतस्पृहः सर्व
त्रसततस्संपूर्णस्वात्ममयत्वदर्शित्वादनित्यात्स्वर्गसुखादे
विगताव्याहतास्पृहायस्यसतादृशः परमांप्रकृष्टांदोषरहितां
नैष्कर्म्यसिद्धिंसमधिगच्छति सम्यग्लभते सर्वकर्मत्यागत्वफ
लपरमात्मसमापत्तिलक्षणांप्राप्नोतिकेनसंन्यासेनव्याख्या
तस्वरूपेणफलाभिसंधित्यागात्मनानतुकर्मत्यागात्मना
[illegible]
[illegible] ४९ ॥

+ अथसर्वगीतार्थसंग्रहंचिकीर्षया प्रस्तौति ॥

लासिकी [illegible]टीका

+जितःप्रत्यवमर्शेनवशीकृतआत्मास्वस्वभावोयेन सजिता
त्मापुरुषःनैष्कर्म्यस्यज्ञानकाष्ठाधिरोहेणसर्वकर्मोपरमस्य
सिद्धिंनिष्पत्तिंपरमामुत्कृष्टांसंन्यासेनसर्वैकलक्षणेनानु
ष्ठानेसति कर्मफलयोःसंकल्पत्यागेनाधिगच्छतिप्राप्नोति
किंविधःसःजितात्माइतिविशेषणद्वारासंन्यासमेवविवृणो
ति असक्तबुद्धिरिति सर्वत्रविहितेस्वाभाविकेवाकर्मण्यस
क्ताअनिमग्नाबुद्धिरन्तःकरणंयस्यतथाविगतापारलौका
लविषयास्पृहाभिलाषोयस्यसः [illegible]
[illegible] ४९

पंचोलीटीका

स्वकर्मणा तमभ्यर्च्येति कर्मजा ज्ञाननिष्ठायोग्यतालक्षणा सिद्धिरु
क्ता तस्य फलं ज्ञाननिष्ठामाह असक्तबुद्धिरिति हे कौंतेय सर्वत्र दारा
दिषु आत्मव्यतिरिक्तेषु प्रीतिरहितांतःकरणं जितात्मा जितेंद्रियः वि
गतस्पृहः एवंविध आत्मतः परमां कर्मजां सिद्धिं विलक्षणां जीवन्मु
क्तिलक्षणां नैष्कर्म्यस्य निःक्रियात्मस्वरूपावस्थानलक्षणस्य सिद्धिः
निष्पत्तिः तां संन्यासेन प्राप्नोति ४९

रणावीरसमिद्धोधिनी

तादृशसेवने युक्तिमाह असक्तेति सर्वत्रानुष्ठीयमाने विहिते वर्णा
श्रमोचिते कर्मणि प्रोक्तलक्षणसंगरहिता बुद्धिर्यस्य स तथा जितो नि
यिहात्कर्मणः सकाशान्निगृहीत आत्मान्तःकरणं येन स तथा विगता
स्पृहा स्वर्गादिफलाभिलाषो यस्य स तथाविधः कर्मयोगी संन्यासेन
काम्यकर्मपरिहारलक्षणेन फलकामनापरिहारवैशिष्ट्येन यथा
विहितानां सर्वकर्मणामनुष्ठानलक्षणेन चेति द्विविधेन परमां प्रकृ
ष्टां नैष्कर्म्यसिद्धिं नैष्कर्म्यस्य कर्मत्यागित्वस्य सिद्धिं महाम प्राप्तिलक्षणा
मपि गच्छति प्राप्नोति ४९॥

मधुभाष्य

४९

214

भाषा अनुवाद ॥

जो कहो कि दोष ऐसा छोडिके गुण मात्र ही ग्रहण कर्म्मके
कर्म्म किसप्रकार किये जाय सकै ऐसी अपेक्षापर कहते हैं
कि जिन की बुद्धि असंङ्ग कहे आशक्ति रहित है और जिता
त्मा अर्थात् जो निरहंकार है और जिनकी इच्छा कर्म्मके फल
से दूर हो गई है ऐसे पुरुष सङ्ग जो आशक्ति औ फल इन दोनो
कोभी छोड कर इस अध्याय के नवम श्लोक मे कहे अनुसार
आशक्ति औ फल त्यागरूप सन्यासके द्वारा परम नैष्कर्म्यसिद्धिक
है सर्वकर्म निवृत्तिरूप जो सत्वशुद्धि सो पावते है ४९ ॥

दोहा

असक्तबुद्धिजो सर्वमे आत्मजित बिनकांक्ष ज्ञानसिद्धिको
श्रेष्ठको याहि संन्याससें वांछ ४९ ॥

सिद्धिं प्राप्तो यथा ब्रह्म तथाप्नोति निबोध मे स
मासेनैव कौन्तेय निष्ठा ज्ञानस्य या परा ५० ॥

शंकरभाष्य टीका १

तथा चोक्तं सर्वकर्माणि मनसा संन्यस्य नैव कुर्वन्न कारयन्नास्ते इति
यथोक्तेन स्वकर्मानुष्ठानेन ईश्वराभ्यर्चनरूपेण जनितां प्रागुक्तलक्ष
णां सिद्धिं प्राप्तस्यात्मानात्मविवेकज्ञानस्य केवलात्मज्ञाननिष्ठारूपा
नैष्कर्म्यलक्षणा सिद्धिर्येन क्रमेण भवति तद्वक्तव्यमित्याह सिद्धिमि
ति सिद्धिं प्राप्तः स्वकर्मणेश्वरं समभ्यर्च्य तत्प्रसादजां कायेन्द्रियाणां
ज्ञाननिष्ठायोग्यतालक्षणां सिद्धिं प्राप्त इति तदनुवाद उत्तरार्थः किं त
दुत्तरं यत्प्रतिपत्तव्यमित्याह यथा येन प्रकारेण ज्ञाननिष्ठारूपेण ब्र
ह्म परमात्मानमाप्नोति तथा तं प्रकारं ज्ञाननिष्ठाप्राप्तिक्रमं मे मम वच
नान्निबोध त्वं निश्चयेनावधारयेत्येतत् किं विस्तरेण नेत्याह समासे
नैव संक्षेपेणैव हे कौन्तेय यथा ब्रह्म प्राप्नोति तथा निबोधेति येने
न प्रकारेण या प्रतिज्ञाता ब्रह्मप्राप्तिस्तामिदन्तया दर्शयितुमाह नि
ष्ठा ज्ञानस्य या परेति निष्ठा पर्यवसानं परिसमाप्तिरित्येतत् कस्य ब्र
ह्मज्ञानस्य या परा परिसमाप्तिः कीदृशी सा यादृशमात्मज्ञानं की
दृक् तत् यादृश आत्मा कीदृशोऽसौ यादृशो भगवतोक्त उपनिषद्वा
क्यैश्च न्यायतश्च ननु विषयाकारं ज्ञानं न विषयो नाप्याकारवानात्मे
ष्यते क्वचित् नन्वादित्यवर्णं भारूपः स्वयंज्योतिरित्याकारवत्त्वमात्म
नः श्रूयते न तमोरूपत्वप्रतिषेधार्थत्वात्तेषां वाक्यानां द्रव्यगुणाद्या
कारप्रतिषेधे आत्मनस्तमोरूपत्वे प्राप्ते तत्प्रतिषेधार्थान्यादित्यव
र्णमित्यादि वाक्यानि अरूपमिति च विशेषतो रूपप्रतिषेधाद्विष
यत्वाच्च न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनं अश
ब्दमस्पर्शमित्यादेस्तस्मादात्माकारं ज्ञानमित्यनुपपन्नं कथं तर्ह्या
त्मनो ज्ञानं सर्वं हि यद्विषयं ज्ञानं तत्तदाकारं भवति निराकारश्चा
त्मेत्युक्तं ज्ञानात्मनोरुभयोर्निराकारत्वे कथं तद्भावनानिष्ठेति ना
त्यन्तनिर्मलत्वस्वच्छत्वसूक्ष्मत्वोपपत्तेरात्मनो बुद्धेश्चात्मसमनैर्म

श्री
गी टी
भा

त्याद्युपपत्तेस्तस्मैवैतन्याकारभासत्वोपपत्तिः बुद्ध्याभासे मनस्त
दाभासानींद्रियाणि इंद्रियाभासश्च देहो ऽतो लौकिकैर्देहमात्रएवात्म
दृष्टिः क्रियते देहचैतन्यवादिनश्च लोकायतिकाश्चैतन्यविशिष्टः का
यः पुरुष इत्याहुः तथान्ये इंद्रियचैतन्यवादिनो ऽन्ये मनश्चैतन्यवादिनो
ऽन्ये बुद्धिचैतन्यवादिनस्ततो ऽप्यन्तरमव्यक्तमव्याकृताख्यमविद्यावस्था
मात्मत्वेन प्रतिपन्नाः केचित् प्रकृतिचैतन्यवादिनः सर्वत्र बुद्ध्या
दिदेहान्ते आत्मचैतन्याभासतात्मभ्रान्तिः कारणमित्यतश्चात्मवि
षये ज्ञाने न विधातव्यं किं तर्हि नामरूपाद्यनात्माध्यारोपणनिवृत्ति
रेव कर्त्तव्या नात्मचैतन्यविज्ञाने सर्वैरभ्युपगम्यते अविद्याध्यारोपितस
र्वपदार्थाकारैरेव विशिष्टतया गृह्यमाणत्वात् अत एव विज्ञानवादि
नो बौद्धाः विज्ञानव्यतिरेकेण वस्त्वेव नास्तीति प्रतिपन्नाः प्रमाणान्त
रनिरपेक्षतां च स्वसंविदितत्वाभ्युपगमेन तस्मादविद्याध्यारोपणनि
राकरणमात्रं ब्रह्मणि कर्त्तव्यं न तु ब्रह्मविज्ञाने यत्नो ऽत्यन्तप्रसिद्ध
त्वात् अविद्याकल्पितनामरूपविशेषाकारापहृतबुद्धित्वादत्यन्तसिद्धं सु
विज्ञेयमासन्नतरमात्मतत्त्वमप्यप्रसिद्धं दुर्विज्ञेयमतिदूरं अन्यदिव
च प्रतिभाति अविवेकिनां बाह्याकारनिवृत्तबुद्धीनां तु लब्धगुर्वा
त्मप्रसादानां नातःपरं सुखं सुप्रसिद्धं सुविज्ञेयमासन्नमस्ति तथा
चोक्तं प्रत्यक्षावगमं धर्म्यमित्यादि केचित्तु पण्डितंमन्या निराकारत्वा
दात्मवस्तु नोपैति बुद्धिरितो ऽतः साध्या सम्यक्ज्ञाननिष्ठेत्याहुः सत्य
मेवं गुरुसम्प्रदायरहितानामश्रुतवेदान्तानामत्यन्तबहिर्विषयास
क्तबुद्धीनां सम्यक्प्रमाणेष्वकृतश्रमाणां न हि परीतानामन्त लौकि
कग्राह्यग्राहकद्वैतवस्तुनि सद्बुद्धिर्नितरां ऽतः सम्यग्या आत्मचैत
न्यव्यतिरेकेण वस्त्वन्तरस्यानुपलब्धेः यथा चैतदेवमेव नान्यथेत्यवो
चाम उक्तं च भगवता यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेरिति
तस्माद्बाह्याकारभेदबुद्धिनिवृत्तिरेवात्मस्वरूपालम्बने कारणं न ह्यात्मा
नाम कस्यचित् कदाचिदप्रसिद्धः प्राप्यो हेय उपादेयो वा अप्रसिद्धे हि त
स्मिन्नात्मनि स्वार्थाः सर्वाः प्रवृत्तयः व्यर्थाः प्रसज्जेरन् न च देहाद्यचे
तनार्थत्वं शक्यं कल्पयितुं न च सुखार्थं सुखं दुःखार्थं वा दुःखमा

त्मावगमावसानार्थत्वाच्च सर्वव्यवहारस्य तस्माद्यथा स्वदेहस्यप
रिच्छेदाय न प्रमाणान्तरापेक्षा ततोऽप्यात्मनोऽन्तरतमत्वात्तदवग
तिं प्रति न प्रमाणान्तरापेक्षेत्यात्मज्ञाननिष्ठा विवेकिनां सुप्रसि
द्धेति सिद्धं येषामपि निराकारं ज्ञानमप्रत्यक्षं तेषामपि ज्ञानवशे
नैव ज्ञेयावगतिरिति ज्ञानमत्यन्तं प्रसिद्धं सुखादिवदेवेत्यभ्युप
गन्तव्यं जिज्ञासानुपपत्तेश्चाप्रसिद्धं चेत् ज्ञानं ज्ञेयवज्जिज्ञास्येत
यथा ज्ञेयं घटादिलक्षणं ज्ञानेन ज्ञाता व्याप्तुमिच्छति तथा ज्ञान
मपि ज्ञानान्तरेण ज्ञाता व्याप्तुमिच्छेन्न चैतदस्ति अतोऽत्यन्तप्रसि
द्धं ज्ञानं ज्ञाताप्यत एव प्रसिद्ध इति तस्मात् ज्ञाने यत्नो न कर्तव्यः
किं त्वनात्मबुद्धिनिवृत्तावेव तस्मात् ज्ञाननिष्ठा सुसंपाद्या ५०॥

आनंदगिरिकृतटीका

संन्यासान्नैष्कर्म्यप्राप्तिरित्यत्र वाक्योपक्रमानुकूल्यमाह तथाचे
ति ज्ञानस्य प्राप्तियोग्यतावतो जातसम्यग्धियस्तत्फलप्राप्तौ
मुक्त्यात्मकायां वक्तव्यशेषो नास्तीत्याशंक्याह सर्वात्मकेनेति क्रमाद्व
वक्तव्यतदिष्यते सिद्धिं प्राप्त इत्युक्तमेव कस्मादनूद्यते तत्राह तद
नुवाद इति उत्तरमेव प्रश्नपूर्वकं स्फोरयति किं तदित्यादिना।
ज्ञाननिष्ठाप्राप्तिक्रमस्य विस्तरेणोक्तौ दुर्बोधत्वमाशंक्य परिहरति।
किमिति चतुर्थपादस्य पूर्वेणासंगतिमाशंक्याह यथेति निष्ठा
याः सापेक्षत्वात् प्रतिसंबंधि निर्देष्टव्यमित्याह कस्येति या ब्रह्म
ज्ञानस्य परा निष्ठा सा प्रकृतस्य ज्ञानस्य निष्ठेत्याह ब्रह्मेति तस्य
परा निष्ठा न प्रसिद्धेति कृत्वा साधनान्तराधीनतया साध्येति
मत्वा पृच्छति कीदृशीति प्रसिद्धमात्मज्ञानमनूद्य ब्रह्मज्ञान
निष्ठा स्वज्ञानेत्याह यादृशमिति तत्रापि प्रसिद्धिरसिद्धेति शंक
ते कीदृगिति अर्थेनैव विशेषो हीति न्यायेनोत्तरमाह यादृगा इ
ति तस्मिन्नपि विप्रतिपत्तेरप्रसिद्धिमभिसंधाय पृच्छति कीदृश
इति भगवद्वाक्यान्युपनिषद्वाक्यानि चाश्रित्य परिहरति यादृश
इति न जायते म्रियते वेत्यादीनि वाक्यानि कूटस्थत्वमसंगमि
त्यादिमायः ज्ञानस्य विषयाकारत्वादात्मनस्त्वविषयत्वादनाका
रत्वाच्च तदाकारकज्ञानायोगात्तदात्मप्रसिद्धावपि नात्मज्ञानप्रसि

द्धिरिति शंकते नन्विति आकारवत्त्वमात्मनः स्फुरति सिद्धमि
ति सिद्धान्ती शंकते नन्वाकारित्वेति उक्तवाक्यानामस्मात्पूर्वद
र्शनेन द्वैविध्ये परिहरति नित्यादिना सूत्रद्वयवाक्ये प्रपंचय
ति इत्येति । स्वत्वाकारवत्त्वमात्मनो नास्तीत्याह शुद्धरूपमिति
यदात्मनो विषयत्वाभावात् द्विविधं ज्ञानेन संभवतीत्यके तदु
पपादयति स्वविषयत्वाद्वेति आत्मनो विषयत्वे स्फुरति स्वदृ
ष्टान्ति नेत्यादिना संदृशे समग्रदर्शनविषयत्वाय यस्मादात्मनो रू
पं न तिष्ठतीत्यर्थः तदेव करणागोचरत्वेनोपपादयति नेति शब्दा
दिषु स्वबाह्यात्मा विषयो न भवतीत्याह अशब्द इति आत्मनो वि
षयत्वाकारवत्त्वयोरभावे फलितमाह तस्मादिति ज्ञानस्यात्माका
रत्वाभावे स्वमात्मज्ञानमिति व्यपदेशासिद्धिरित्येकदेशी शंक
ते कथं तर्हि इति कारणत्वप्रमितिरित्याशंक्याह सर्वहीति आत्म
नोपि तर्हि विषयत्वेनज्ञानस्य तदाकारत्वस्यादित्याशंक्याह निरा
कारश्चेति आत्मनो विषयराहित्येचकारार्थः आत्मवत्तज्ज्ञान
स्यापि तर्हि निराकारत्वमभिव्यक्तिमत्याह ज्ञानेति तच्च द्वे नात्मा
ज्ञाने गलते तस्य भावनापाटवः उभयेनानुसंधाने तस्य नित्यसमा
नात्मनि सदाकारत्वाद्भित्ततत् सर्वमात्मनो ज्ञानस्यवा निरा
कारत्वे सिध्यतीत्यर्थः ज्ञानात्मनोः साम्योपन्यासेन सिद्धान्तीसमा
धत्ते नेत्यादिना यथोक्तसाम्यानुसारादात्मचैतन्याभासव्याप्ता ज्ञा
नपरिणामवती बुद्धिः साभासबुद्धिव्याप्तं मनः साभासमनोव्या
प्तानीन्द्रियाणि साभासेन्द्रियव्याप्तः स्थूलदेहस्तत्र लौकिकं ध्याति
प्रमाणयति श्रुत इति आत्मदृष्टेदेहमात्रदृष्टत्वात्तत्र चैतन्याभान
व्याप्तिरिन्द्रियद्वाराकल्पेत इन्द्रियेषु चैतन्यदृष्टिदर्शनाच्च मनस्याभासव
त्वे मनोद्वारा सिध्यति मनसि चात्मदृष्टेश्चैतन्याभासवत्वे बुद्धि
द्वारा लभ्यते बुद्धौ चात्मदृष्टेर्ज्ञानद्वारा चैतन्याभाससिद्धिरित्यर्थः
देहे लौकिकमात्मत्वदर्शनमध्यासाभावादुपपन्नमित्याशंक्याह
देहेति तथापि कथमिन्द्रियाणामात्मत्वहीनमात्मत्वमित्याशंक्या
ह तथेति तथापि मनसोपदात्मत्वं तत्राह यस्यामित्याशंक्याह
प्रथमेति बुद्धेरात्मत्वमिति मायोपेतमिति सूचयति अस्मे बुद्धौ।

ति देहादौ बुध्यते परमात्मत्वबुद्धिर्नोत्पद्यत इति नियमेवारयति नतो
पीति तत्र हिंसाभावे तत्कर्मासिद्धिः करणोपासकानामात्मधीरस्त्वेम
थेः बुद्ध्यादौ देहान्ते लौकिकपरीक्षकाणामात्मत्वभ्रान्तौ साधारणं
कारणमाह सर्वत्रेति आत्मज्ञानस्य लौकिकपरीक्षकप्रसिद्धत्वादेव
विधिविषयत्वमविधेरेव पराक्रममित्याह इयतां इति ज्ञानस्याविधेयत्वा
भावे किं कर्तव्यमिष्टं इत्यादिवाक्यैरित्याशंक्याह किन्तर्हीति आत्मज्ञाना
स्याविधेयत्वे प्राप्ते सर्वतः शास्त्रं इति हेत्वे विशेषेण इत्यविधेयेति देहेन्द्रिय
मनोबुद्ध्यव्यक्तैरुपलभ्यमानैः सहोपलभ्यमाने चेतने नान्यथा तेषामु
पलभ्यो जडत्वादित्यत्र विज्ञानवादिभ्रान्तिं प्रमाणयति श्रुतयश्चेति सर्वं
ह्येष ज्ञानमात्रमेव ज्ञायते तेन ज्ञानातिरिक्तं नास्त्येव वस्तु सम्मतं हि
समस्तं वस्तु ज्ञानातिरिक्तं नास्तीति तेषामभिमतोऽर्थः ज्ञानस्यापि
ज्ञेयत्वात् ज्ञानस्वत्वान्तरमेष्टव्यमित्याशङ्क्याह प्रमाणान्तरेति ज्ञानस्य
स्वेनैव ज्ञेयत्वोपगमेनेनातिरिक्तप्रमाणनिरपेक्षतावत्प्रतिपत्त्याः शत
सैवपः ज्ञानात्मविज्ञानस्य सिद्धत्वेनाविधेयत्वे फलितमाह तस्मादि
वि ति यत्नात्मभावे नाबलम्बनत् ज्ञानस्य चात्मत्वप्रसिद्धत्वे कथं प्र
माणमथवा प्रथा लौकिकानामित्यत्राह ग्रविवेकेति यथा प्रतिमासु
विज्ञेयत्वादिरूपमेव ब्रह्म किं न स्यादित्यत आह वाह्येति गुरुप्रसादे सुप्र
यत्नोपाधित ब्रह्मवाद्यस्य करुणातिरेकात्तस्य बुध्यतामिति निरवग्रहो
वग्रहः आत्मप्रसादलब्धिगतपदशक्तिनामर्थवाक्यस्य श्रोतश्रवणं
यानादात्मनो मनसो विषयत्वात्तस्य प्रयोगकाग्रतया ततश्रावणमि
ति विवेकः आत्मज्ञानस्यात्मद्वारा प्रसिद्धत्वे वाक्योपक्रमे प्रमाणय
ति तथाचेति आत्मनो निराकारत्वात्तस्मिन् बुद्धेरप्रवृत्तेः सम्यक्ज्ञा
ननिष्ठा न सम्भाव्येति मतमभ्यापयति केचित्विति वहिर्मुखत्वोनात्मत
त्वोन्मुखत्वेनो वावलम्बनं सम्यग्ज्ञाननिष्ठा दुःसाध्येति विकल्पाग्रयोगी
कारोति सत्यमिति सर्वविशेषणस्यतत्त्वेनतद्विशेषणे हेतुत्वेन योज
नीयं द्वितीयं रूपयति तद्विपरीतानामिति प्रतिनिष्ठानां हेतुविषये
सम्यग्ज्ञाननिष्ठायेन दुःसम्पाद्यत्वे हेतुमाह आत्मेति तस्यनिरेकेण
वस्त्वन्तरस्याभावे कथमित्याशंक्याह यथाचेति प्रद्वैतमेव वस्तु द्वै
ते त्वाविषयके नान्यथा नास्तिकमिथ्यात्वं यथा स्मानशोकं तत्ववे

तत्र तत्त्वाध्यायेष्विति योजना ज्ञाननिष्ठामद्वैतदर्शिनो द्वैतवा
दिन सद्बुद्धिरित्यत्र भगवतोऽपि सम्मतिमाह उक्तेत्यादि परमते
निराकृत्य प्रकृतमुपसंहरत्यात्मनो निराकारत्वे ज्ञानस्य तदा
त्मवत्त्वे किं कारणमित्याशङ्क्याह तस्मादिति मत्वात्मा कथंचि
त् ज्ञानक्रियासाध्यश्चेत्तस्य हेयोपादेयान्यतरकोटिनिवेशात्तथा
त्मे स्वर्गादिवत् क्रियासाध्यत्वे नासिद्धत्वं नेत्याह नहीति आत्म
त्वादेव प्रसिद्धत्वेन मन्वाद्यनात्मवत्तस्य हेयोपादेयत्वयोरयोगा
न्न क्रियासाध्यत्वमित्यर्थः आत्मनश्चेद्दते क्रियासिद्धत्वात्तदा सर्वप्रवृ
त्तीनामभ्युदयनिःश्रेयसार्थानां आत्मार्थत्वायोगादर्थिनोऽभावे
ऽर्थित्वमप्रामाणिकं स्यादित्याह अप्रसिद्धे हीति न प्रवृत्तीनां स्वा
र्थत्वं देहादीनां अचेतनस्वार्थत्वेन तावद्घटादिमाशङ्क्य चक्षुरादि
वदचेतनस्यार्थित्वायोगादत्रैवमित्याह नचेति न च प्रवृत्तीनां फ
लावसायितया सुखदुःखयोरन्यतरार्थत्वात् स्वार्थत्वं तत्राह न
चेति प्रवृत्तीनां सुखदुःखयोरर्थत्वेऽपि तयोः स्वार्थत्वासिद्धेरर्थित्वेना
त्मा सिद्ध्यतीत्यर्थः किंच सर्वोऽपि ज्ञानाद्यात्मावगमपुरःसरः सर्वो व्य
वहारः न चात्मनः प्रसिद्धेः यत्तादृग्व्यवहारस्य न तज्ज्ञानार्थत्वेनात्मप्र
सिद्धिरिष्टेत्याह आत्मेति न चात्मा प्रसिद्धोऽपि प्रमाणद्वारा प्रसिध्य
ति न तत् प्रमाणादेवेति न्यायान्तराह तस्मादिति मानमेयादि सर्वव्यव
हारस्यात्मावगमनत्वोपगमात् प्रागेव प्रमाणप्रवृत्तेरात्मप्रसिद्धेरेष्ट
व्यत्वादित्यर्थः आत्माकारतैव स्वाभाविकत्वे विवेकवतामारोपनि
हृत्या ज्ञाननिष्ठा सुप्रसिद्धेत्युपसंहरति इत्यात्मेति न तत्राकारमे
वानुमिमीमहे उद्दिष्टमिति वदतात्मनाकारमप्रसक्तमिवाना
गवर्णीवगतेरप्रसिद्धमेव ज्ञानेनेत्याह येषामिति स्वाभाविकवत्त्रि।
त्मानुभवगम्यं ज्ञाने नानुमेये विषयावगत्या तदनुमितावितरेत
राश्रयादिति भावः इतश्च ज्ञाने प्रसिद्धमन्यथा तत्र जिज्ञासाप्रस
ङ्गाच्च ज्ञाने जिज्ञासाप्रसिद्धा प्रसिद्धे च तद्योगादित्याह जिज्ञासेति
तदेव प्रपञ्चयति अप्रसिद्धेवेदितिदृष्टान्तमेव व्याचष्टे यथेति दा
र्ष्टान्तिके विवृणोति तथेति इत्यादिति निराचष्टे नचेति ज्ञानस्या
ज्ञानान्तरेण हेयत्वमेतत्तत्त्वे हार्थः एवमव्याप्येमित्यर्थः ज्ञाने जि

ज्ञासान्तुपपत्तौ फलितमाह अत इति प्रसिद्धे पि ज्ञाने ज्ञातुर्यात्म
नि क्रियायां नेतराह ज्ञातापीति ज्ञानस्य विना ज्ञातारमपर्यवसा
नादित्यर्थः ज्ञानस्य प्रसिद्धत्वे तत्र भावनापर्यायो विधिर्नास्तीत्याह
तस्मादिति कुत्र तर्हि प्रयत्नाख्यो भावनेत्याशंक्याह किंविति
अविषये निराकारे चात्मनि ज्ञाननिष्ठायाः दुःसम्पाद्यत्वभा
वे फलितम् निगमयति तस्मादिति ५० ॥

स्वामिकृतटीका ३

एवंभूतस्य परमहंसस्य ज्ञाननिष्ठया ब्रह्मभावप्रकारमाह सिद्धिं
प्राप्त इति षड्भिः नैष्कर्म्यसिद्धिं प्राप्तः सन् यथा येन प्रकारेण ब्रह्म प्राप्नो
ऽमेव ति तथा तेन प्रकारेण मे पदेशेन वचनात् निबोध [illegible] ॥

पिशाचभाष्यटीका ४

यथा सिद्धिं प्राप्तः ब्रह्म नैष्कर्म्यमाप्नोति तथा निबोध यश्च वगच्छ मे मम
ईश्वरस्य मत्तः समासेनैव संक्षेपेणैव तथा स्थितिः ज्ञानस्य या परा
प्रकृष्टा तां निबोधेत्यर्थः ५० ॥

रामानुजभाष्यटीका ५ ग

सिद्धिमिति सिद्धिं प्राप्तः प्रायणादहरहर्वृद्धीयमानकर्मयोगनिष्ठा
यां प्राप्तः सिद्धिं प्राप्तो यथा येन प्रकारेण वर्तमानो ब्रह्म प्राप्नोति यथा
समासेन निबोध तदेव ब्रह्म विशेष्यते निष्ठा ज्ञानस्य या परेति ज्ञानस्य
ध्यानात्मकस्य या परा निष्ठा पर्यायमित्यर्थः ५० ॥

अभिनवगुप्तकृतटीका ६

स्पष्टार्थम् ५० ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपापी टीका ७

एवंभूतस्य परमहंसस्य ज्ञाननिष्ठया ब्रह्मभावनाप्रकारमाह सिद्धि
मिति षड्भिः नैष्कर्म्यसिद्धिं प्राप्तः यथा येन प्रकारेण ब्रह्म प्राप्नोति
तथा मे मत्तः निबोध संक्षेपेण जानीहि यावत्समाप्ता ज्ञानस्य परा
सर्वोत्कृष्टा निष्ठा मर्यादा ५० ॥

वनमाली टीका ८

उक्तसाधनसंपन्नस्य संन्यासिनो भगवज्ज्ञाननिष्ठासाधनक्रममाह
सिद्धि मिति स्वकर्मणेश्वरमाराध्य तत्प्रसादजां सर्वकर्मत्यागपर्य

श्री
गी टी
श्र

२१९

तोज्ञानोत्पत्तियोग्यतारूपां सिद्धिं प्राप्तो यथा येन प्रकारेण ब्रह्माप्नो
ति परं ब्रह्म साक्षात्करोति समासेन तथा मे वचनान्निबोध या ज्ञानस्य
परा निष्ठा पर्यवसानं तु अत्र कृष्ण मम ज्ञानेनास्तीत्यर्थः यद्वा सिद्धिं
भगवदर्पणोद्देशं प्राप्तो यथा ब्रह्माप्नोति प्राकृतदेहादि विहाय ब्रह्म
लिंगदेहः सन् लोकविशेषं प्राप्य विग्रहविशिष्टं भगवन्तं परमेश्वरं प्रा
प्नोति तथा निबोधेत्यर्थः या ज्ञानस्य परा निष्ठा परा काष्ठा तदधिको
ज्ञानस्य विषयो नास्ति ज्ञेयावधिरित्यर्थः ५० ॥

क्रसमवैजयंतीटीका ४

प्राप्तसिद्धेर्जनस्य पुनः किं फलं स्यादित्यपेक्षायामाह सिद्धिमिति
स्ववर्णोचितेन कर्मणा प्रयाणादहरहः परमपुरुषमाराध्य त
त्प्रसादनात्मध्यानपरां सर्वकर्मत्यागरूपां सिद्धिं प्राप्तो जनो यथा
येन प्रकारेण ब्रह्मात्मस्वरूपमाप्नोत्यनुभवति तथा तत्प्रकारं समा
सेन संक्षेपेण गदतो मे मत्तः सकाशान्निबोध त्वं जानीहि तदेव ब्र
ह्म विशिष्यते हे कौन्तेय यच्च तज्ज्ञानस्य ध्यानरूपस्य या परा प्रमा आत्म
विषया निष्ठा नेमथि वक्ष्यमाणां परमसाध्यरूपां त्वं शृणु कौन्तेय म
नेनार्जुनस्यैतच्छ्रवणाधिकारित्वं सूचितं ५० ॥

+प्रागुक्तसाधनसंपन्नस्य सर्वकर्मसंन्यासिनो ब्रह्मज्ञानोत्पत्तौ साधनक्रममाह ॥

मधुसूदनी टीका ९

+स्वकर्मणेश्वरमाराध्य तत्प्रसादजां सर्वकर्मत्यागपर्यन्तां ज्ञानोत्पत्ति
योग्यतारूपां सिद्धिमन्तःकरणशुद्धिं प्राप्तो यथा ब्रह्माप्नोति येन प्र
कारेण शुद्धमात्मानं साक्षात्करोति तथा तं प्रकारं निबोध मे मद्वचना
दवधारयानुष्ठातुं किमिति विस्तरेणाह समासेन संक्षेपेणैव
न तु विस्तरेण हे कौन्तेय एतदवधारणे किं स्यादित्यत आह निष्ठा ज्ञा
नस्य या परा ज्ञानस्य विचारणीयं निष्ठा तस्य निष्ठा परिसमाप्तिः यदने
नरं साधनान्तरं नापेक्ष्यमाणं परोक्षेप्साः सर्वसाधनसाध्यमोक्षः
न्नवान्तनो सिद्धिं प्राप्तस्य ब्रह्मप्राप्तिरूपां ज्ञाननिष्ठां परां संक्षेपेण निबो
धेत्यर्थः ५० ॥

सदानंदी टीका ॥

सर्वोक्तसाधनैः सर्वैः संपन्नस्य विवेकिनः । मुमुक्षोर्ब्रह्मविज्ञान।
साधनक्रम उच्यते १ स्वकर्मणेश्वरमाराध्य सिद्धिं तत्प्रसादजां चि

तत्सिद्धिं परिप्राप्तो विद्वानेवात्मनियोगयतो २ ब्रह्म येन प्रकारेण प्र
त्यगात्मतया विद्वान् साक्षात्करोति सर्वज्ञमात्मानं परमेश्वरं ३ मम
वाक्यात्प्रकारं तत्कर्तृत्वमवधारय संक्षेपेणैव कौंतेय न तु विस्तरशः
पुनः ४ तस्यावधारणीयस्यात्तत्कृत्स्नं समाहितः निष्ठा ज्ञानस्य
विचारेण ज्ञानस्यात्मज्ञानत्वात् निःसा ५ निष्ठा परिसमाप्तिर्या प्राप्यका
र्यं न किंचन साक्षात्मोक्षैकहेतुत्वात् सर्वामायापरास्तता ६ ताव
संक्षेपतः शृणु तात त्वमो भवसर्ववेदा ७॥ ५०॥

नीलकंठी टीका १२

स्वकर्मनिरतः सिद्धिं यथा विंदतीति तत्सर्वं निज्ञानमपपादिनेदा
नीं नैष्कर्म्यसिद्धिं शांतोपि परिग्राह्यवशीकारसंज्ञकवैराग्यवान् य
था ब्रह्म प्राप्नोति तथा वक्ष्यति ज्ञानीति सिद्धिमिति सिद्धिं नैष्कर्म्य
सिद्धिं निबोधतद्यत्स्वमेमद्वचनात्समासेन संक्षेपेणैव हे कौंतेय
यायत्प्राप्य ब्रह्मविधेयापेंत्वसीत ज्ञानस्य परानिष्ठायदपेक्षयाऽ
न्यत् ध्येयं ज्ञानतरं नास्तीत्यर्थः ५०॥

आनंदी टीका १३

एवं कर्मयुक्तिजां सिद्धिं संदर्श्य संयमयोगजामपि दर्शयति॥
यथा सिद्धिं योगसिद्धिं प्राप्तः तद्ब्रह्माप्नोति यां ब्रह्मप्राप्तिरेव
ज्ञानस्य परा निष्ठा निर्वाहस्थानं ततः परमपरस्य ज्ञेयस्याभा
वात् तदेतत्संक्षेपेण मम योच्यमानं निबोध ५०॥

+इत्थं येन ज्ञानेन संपन्नं क्रियमाणमेव
+कर्म भवति तस्य क्रमेण परं प्रकर्षं प्रति
पादयितुमुपक्रमते॥

रामकंठी टीका १४

++उपायभूतस्य ज्ञानस्य परा निरुत्तरा निष्ठा प्राप्तत्वभूमिः यतः प
रं ज्ञेयं न संभवतीत्यर्थः तदुपायमपि कथ्यमानमवधारय ए
वं विधो ब्रह्म प्राप्नोति [illegible] ५०

लासिकी [illegible] टीका

+अधुना तल्लाभक्रममेव विव
व्रताह॥

+सिद्धिं ज्ञानस्य परमुत्कर्षं यथा येन प्रकारेण प्राप्तो योगी
ब्रह्मानिरुत्तरं तत्त्वमाप्नोति आप्नोति तथा तेन प्रकारेण व

ह्यमाणेन मेव वचनान्निबोधावधारय किं तत्समासेनैव संक्षेपेणैव पूर्वं विस्तारेणोक्तत्वात् कां सिद्धिमिति सिद्धेर्लक्षणमाह निष्ठेति या सिद्धिर्ज्ञाननिष्ठैतल्लक्षणा सा परा निष्ठा पर्यन्तकाष्ठा [illegible] ५०

पंचोलीटीका

नैष्कर्म्यलक्षणा केवलज्ञाननिष्ठा येन क्रमेण भवति तं क्रममाह सिद्धिमिति कौन्तेय सिद्धिं प्राप्तः सत्त्वशुद्ध्या येन प्रकारेण ज्ञाननिष्ठारूपेण ब्रह्म परमात्मानं प्राप्नोति तथा तं ज्ञाननिष्ठाप्राप्तिक्रमं मम वचनान्निबोध जानीहि या ब्रह्मप्राप्तिर्ब्रह्मज्ञानस्य निष्ठा परिसमाप्तिः समासेन संक्षेपेण तां निबोध ५०

भणावीरसमिद्धोधिनी

अथ येन ज्ञानेन संस्कृतं क्रियमाणं सत्कृतफलदं भवति तस्य क्रमेण परं प्रकर्षं प्रतिपादयितुमुपक्रमते सिद्धिमिति सिद्धिं नैष्कर्म्यसिद्धिं प्राप्तः कर्मयोगीय यथा येन प्रकारेण ब्रह्म पूर्वमेश्वरतत्त्वसायुज्यमाप्नोति तथा तेन प्रकारेण समासेनैव संक्षेपेणैव मे मद्वचनानि बोधावधत्स्व तमेव प्रकारमाह निष्ठेति या ज्ञानस्य स्वधर्मविषयकस्य निश्चयस्य या परा निरुत्तरा निष्ठा प्रान्तभूमिरिति ५०॥

मधुभाष्य

५०॥

भाषा अनुवाद टीका

पूर्वोक्त ऐसे परमहंस पुरुष को ज्ञाननिष्ठा क्रमसे ब्रह्मभाव की प्राप्ति का प्रकार इस श्लोक से लेसाठिके श्लोक तक कहते हैं कि हे कौंतेय अर्जुन नैष्कर्म्यसिद्धि को पाय करके ज्ञान विषयक प्रकृष्ट निष्ठा से जैसे पुरुष ब्रह्म को प्राप्त होते हैं सो प्रकार संक्षेप रूप हमसे श्रवण करो अर्थात् ज्ञान की जो श्रेष्ठ निष्ठा है सो सुनो ५० ॥

दोहा

सिद्धिपायज्यौ ब्रह्महि पावहि सुन मो सोहि कौंतिसुनसंछे
पसें नेष्ठाज्ञानहिकोहि ५० ॥

बुद्ध्याविशुद्धयायुक्तोधृत्यात्मानंनियम्यच श
ब्दादीन्विषयांस्त्यक्त्वारागद्वेषौव्युदस्यच ५१

शांकरभाष्यटीका १

सेयं ज्ञानस्य परा निष्ठोच्यते कथं कार्येति बुध्याध्यवसायात्मिक
या मायारहितया युक्तः सम्पन्नो धृत्या धैर्येण आत्मानं कार्यकर
णसंघातं नियम्य च नियमनं कृत्वा वशीकृत्य शब्दादीन् शब्द आदि
र्येषां ते शब्दादयस्तान् विषयांस्त्यक्त्वा सामर्थ्यात् शरीरस्थितिमा
त्रान् केवलान् मुक्त्वा ततोऽधिकान् सुखार्थान् त्यक्त्वेत्यर्थः शरीर
स्थित्यर्थत्वेन प्राप्तेषु च रागद्वेषौ व्युदस्य च परित्यज्य ५१ ॥

आनंदगिरिकृत टीका २

ब्रह्मज्ञानस्य परां निष्ठां प्रतिज्ञापितामनेन श्लोकान्तरमवतार
यति बुद्ध्येति सेयमिति सेयं ब्रह्मज्ञानस्य परा निष्ठा समारोपिता
न तस्मिंन्निष्ठा ब्रह्मणि परिसमाप्तिर्ज्ञानसन्तानस्योच्यते
सा कार्या स्वसम्पाद्येति यदुक्तं तत्कथं केनोपायेनेति प्रश्नार्थः इष्ट
मुपायभेदमुदाहरति बुद्ध्येति अध्यवसायोऽत्रात्मनिश्चयः माया
रहितत्वं संशयविपर्ययशून्यत्वं शब्दादिसमस्तविषयत्यागे देह
स्थितिरपि दुःस्था स्यादित्याशंक्याह सामर्थ्यादिति विषयमात्रत्या
गे देहस्थित्यनुपपत्तेर्ज्ञाननिष्ठासिद्ध्यसंगादित्यर्थः देहस्थित्य
र्थत्वेनाप्रज्ञातेष्वर्थेषु प्राप्तारागादिर्ज्ञाननिष्ठाप्रतिबन्धके व्यु
दस्येति शरीरेति परित्यज्य विविक्तसेवी स्यादिति संबंधः ५१ ॥

स्वामिकृतटीका ३

+तदेवाह बुद्ध्येति ॥

+उक्तेन प्रकारेण विशुद्धया सर्वात्मिकया सात्विकया बुद्ध्या युक्तो धृत्या सात्वि
क्या आत्मानं नामेव बुद्धिं नियम्य निश्चलीकृत्य शब्दादीन्विषयांस्त्य
क्त्वा तद्विषयौ च रागद्वेषौ च व्युदस्य बुद्ध्या विशुद्धया युक्त इत्यादीनां ब्र
ह्मभूयाय कल्पत इति तृतीयेनान्वयः ५१ ॥

पैशाचभाष्यटीका ४

बुद्ध्या अध्यवसायात्मिकया विशुद्धया सात्विकया युक्तो धृत्या धैर्येण

श्री
गी टी
प्र
२२२

नयावविशुद्धयाप्रात्मानेकार्यकारणसंघातनियम्यस्यापयित्वाश
ब्दादिविषयांस्त्यक्त्वारागद्वेषौव्युदस्यचप्रपनीय ५१ ॥

रामानुजभाष्य टीका ५

बुद्ध्येतिविविक्तेति प्रहमिति बुद्ध्याविशुद्धयायथावस्थितात्मतत्त्ववि
षययायुक्तः धृत्यात्मानंनियम्यचविषयवैमुख्यीकरणेनयोगयोग
मनःकृत्वाशब्दादीन्विषयांस्त्यक्त्वाअसन्निहितान्कृत्वातन्निमित्तौ
रागद्वेषौव्युदस्यच ५१ ॥

अभिनवगुप्तकृत टीका ६

स्पष्टार्थम् ५१ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपाटी टीका ७

तामेवाह बुद्ध्येति एवंभूतःपुरुषोब्रह्मभूयायकल्पतइतिदृती
येनान्वयः किंभूतः विशुद्धयाव्यवसायात्मिकयाबुद्ध्यायुक्तः
धृत्यासात्विकयात्मानंबुद्धिंनियम्यनिश्चलांकृत्वाशब्दादीन्विषया
न्परपरोपिश्रदर्शनादीनत्यक्त्वानहितयोरागद्वेषौव्यस्तानिदाय
प्रक्षेपोव्युदस्यसम्यक्त्वा ५१ ॥

वनमाली टीका ८

ज्ञाननिष्ठाप्रकारोयोच्यते बुद्ध्येतिविशुद्धयासंशयविपर्ययशून्य
यासात्विक्याधृत्या सात्विक्यात्मानंदेहेंद्रियसंघातं
नियम्योन्मार्गप्रवृत्तेर्निवार्यस्वस्वप्रवणंतोचकृत्वाशब्दादीन्विषयां
स्त्यक्त्वाभोगेनवंधहेतुत्वसामर्थ्यात्ज्ञाननिष्ठार्थदेहस्थितिमात्र
प्रयोजनानुपयुक्तानतिषिद्धानपित्यक्त्वादेहस्थितिमात्रेचरागद्वे
षौव्युदस्यपरित्यज्यचकारादन्यदपिविक्षेपकंपरित्यज्य विविक्तसे
वीसन्नथाहतेनेनब्रह्मभूयायकल्पतइत्यनेनान्वयः ५१ ॥

ऊसमवेजयनी टीका ९

कोऽसौप्रकारोयेनजनोब्रह्मप्राप्नोतीत्यपेक्षायांतंप्रकारमाहत्रि
भिःबुद्ध्येति विशुद्धयासात्विक्याबुद्ध्याआत्मयाथात्म्यनिश्चयात्मि
कयायुक्तः चपुनःधृत्याप्ररूपिकयासात्विक्या आरम्भकमेविक्षो
पयानसमापनसमर्थरूपिकयाआत्मानंमनःशब्दादिविषयेभ्यो

नियम्य योग्ययोगेप्यकृत्वा शब्दादीन् विषयांस्त्यक्त्वा तानसन्निहिता
न् विधाय च पुनः रागद्वेषौ विषयहेतुकौ व्युदस्य हृदःप
रित्यज्य प्रकृष्टो ब्रह्मभूयाय कल्पते इति त्रिभिरन्वयः ५१ ॥

मधुसूदनी टीका १०

^ सेयं ज्ञाननिष्ठा सप्रका
रोच्यते ॥

^विशुद्धया सर्वसंशयविपर्ययशून्यया बुद्ध्याहं ब्रह्मास्मीति वेदान्तवा
क्यजन्यया वृत्त्या युक्तः सदा तदन्वितः धृत्या धैर्येणात्मानं शरी
रेंद्रियसंघातं नियम्य उन्मार्गप्रवृत्तेर्निवार्यात्मप्रवणं कृत्वा च शब्देन
योगशास्त्रोक्तसाधनान्तरं समुच्चीयते शब्दादीन् शब्दस्पर्शरूपर
सगन्धान् विषयान्भोगेन व्यर्थबहून् त्यक्त्वा मध्यान्न ज्ञाननिष्ठार्थं शरीर
स्थितिमात्रप्रयोजनानप्युत्क्रान्तनिषिद्धान्नापि त्यक्त्वा शरीरस्थि
तिमात्रार्थेषु च तेषु रागद्वेषौ व्युदस्य परित्यज्य चकारात्स्वप्नदर्शित्वा
न विक्षेपकं परित्यज्य विविक्तसेवीत्यत्रस्यादिनाध्याहृतेन ब्रह्म
भूयाय कल्पते इत्यनेनान्वयः ५१ ॥

सदानंदी टीका ११

सप्रकारोच्यते सेयं ज्ञाननिष्ठा महाफला ब्रह्मैवास्मीति वेदान्तवा
क्यनिष्पन्नया धिया १ सर्वसंदेहविध्वंसिन्या निश्चयात्मिकया शुद्धया
युक्तो धैर्येणात्मदृढ्या नास्मत्संघातं विनियम्य च २ निवार्योन्मार्गतो ब
लवत्तान्नियम्य विहृते ज्ञाननिष्ठाविरुद्धान्स्वप्रकाश शब्दादींश्च ता
न् ३ शरीरस्थितिमात्रार्थे रागद्वेषौ विहाय च ज्ञानविक्षेपके सर्वे
संत्यज्येति चकारतः ४ ॥ ५१ ॥

नीलकंठी टीका १२

तमेव ब्रह्मप्राप्तिप्रकारमाह त्रिभिः बुद्ध्येति बुद्ध्या वेदान्तश्रवण
मननपरिपाकोत्थया शुद्धया ब्रह्मास्मीति परोक्षानिश्चयरूपया वि
शुद्धया सर्वभूतेषु मैत्र्यादिभावनया सम्यग्विशोधितया धृत्या
धैर्येण योगशास्त्रोक्तयमादिनियमनैर्यद्वाहित्येन आत्मानं देहेंद्रियसंघा
तं नियम्य इत्यासनाभ्यासयुक्तः चकारात्प्राणं च नियम्य शब्दा
दीन्विषयांस्त्यक्त्वा ननु इंद्रियाणीत्याह प्रमाथीनि प्रमाथ इतकराणि

श्री-
गी-टी-
प्र-

223

पिशुनतमे न सेव विषयान्स्मरति तमभिप्रायमाह रागद्वेषौ व्युदस्य
चेति संकल्पात्मको मनसः स हि विषयं परिकल्पयतत्र रागं जनयती
ति प्रसिद्धं यथा चानंदपादाचार्यैरुक्तं दोषनिमित्तं रूपादयो विषयाः
संकल्पकृता इति दोषो रागादिः चकारादयमहमस्मीत्येतमपि अभि
वेशमुदस्येति ज्ञेयं ततो ब्रह्मभूयाय ब्रह्मभावाय तं प्राप्तुं कल्पते यो
ग्यो भवतीति तृतीयेन संबंधः ५१ ॥

आनंदी टीका ५

योगसिद्धिप्रक्रियामेवाह विशुद्धया योगांगानुष्ठानादशुद्धि
क्षये ज्ञानदीप्तिराविवेकख्यातेरिति पातंजलि द्वितीयपादसू
त्रार्थानुगमेन योगांगानां बाह्यानां यमादीनां पंचानां आभ्यं
तराणां ध्यानादीनां त्रयाणां तेषामनुष्ठानादशुद्धिरूपस्याविद्या
दिपंचपर्वणो विपर्ययज्ञानस्य क्षयात् क्रमेण सम्यग्ज्ञाना
धिगमादावरणविगमे प्रकाशमानया बुद्ध्या युक्तो योगोध्य
र्यात्तत्र तत्र भूमौ चित्तबंधसंज्ञया धारणयात्मानं विनि
यम्य निरुध्य च शब्दादीन्विषयांस्त्यक्त्वा स्थूलस्वरूपसूक्ष्मान्व
यार्थवत्वसंयमात्तज्जय इति द्वितीयपादसूत्रार्थानुसारम्
पूर्वापूर्वाजितां भूमिं संयमद्वारेण त्यक्त्वा उत्तरामुत्तरां भूमि
मारूढः रागद्वेषौ रजःकार्यौ व्युदस्य ५१ संतैकनिष्ठां प्राप्य

रामकंठी टीका ४ ॥

पूर्वं तावत्प्रकारमाह एवंविधभावो योगी ब्रह्मभूयाय ब्रह्मभावाय परमात्मसमापत्त
ये कल्पते समर्थो भवतीति कीदृशः प्रथमं तावद्दैवसर्गयोगि
त्वात्सहजया विशुद्धया प्रलीनरजस्तमस्कत्वाद्विशुद्धसत्वैकम
य्या निर्मलया बुद्ध्या प्रज्ञया युक्तः स हि परमसिद्धिसाधनभू
तधर्मप्रामाण्यः सहजो गुणो योगिनस्तत एव तस्मिन्स्थिति
धृत्या श्वेतकमललक्षणया सात्विका दृष्टावष्टम्भलक्षणयोत्सा
हरूपयात्मानमन्तःकरणं नियम्य वशी व्यवस्थाप्य तद्वशाच्छ
ब्दादीनिष्टान्विषयांशास्त्रनिषिद्धांस्त्यक्त्वा सर्वात्मना परिहृत्य

शास्त्रविहितेष्वविषयेष्वनात्मजेषु संगमूलौ रागद्वेषौ तदुपादानाहा
नहेतू महाक्लेशौ व्युदस्य फलाभिसंधाभावाद्दित्विष्यानिरस्य केसे
वेश्वर्वमुखत्वंपरिकरवंधंकृत्वा ५१ ॥ नी॰

लासिकी[illegible]टीका

+ अथ प्रतिज्ञातं ज्ञाननिष्ठाप्राप्तिक्रममाह त्रिभिः ॥
+ विशुद्धयादेहाद्यभिमानेनाकलंकितया बुद्ध्यात्मबोधेन युक्त
संवन्धो योगी शब्दादीन्विषयांस्त्यक्त्वा विहाय तत्यागप्रकारमा
ह रागद्वेषौ व्युदस्येति रागद्वेषौ निरसनेनेत्यर्थः नत्विंद्रिय
द्वेषपरमेण धृत्याधारणया दार्ढ्येनात्मानं स्वस्वभावे निय॰
म्य प्रत्यवमर्शेन वशीकृत्य कृत्वा नैषवंविधः सन्ब्रह्मभूयाय
कल्पते इति तृतीयेनान्वयः ५१

पंचोली टीका

॰या

तदेव दर्शयति बुद्ध्येति बुद्ध्या निश्चयात्मिकया मायाशुद्धः संपन्नः॰
माधेधैर्येण आत्मानं देहेंद्रियसंघातं वशीकृत्य सामर्थ्याद्विषयांसका
शरीरस्थितिमात्रान् रागद्वेषौ परित्यज्य ब्रह्मभूयाय कल्पते समर्थो
भवति ५१

रणावीरमसिद्धोधिनी ॥

तामेव ज्ञाननिष्ठामाह बुद्ध्येति विशुद्धया सात्विक्या बुद्ध्या युक्तः ध
त्या धैर्येण सात्विकेनैवात्मानमंतःकरणं नियम्य प्रारभ्यमाण॰
कार्यैकनिष्ठं विधाय शब्दादीन्विषयान्प्रपंचं एवं नित्यं च प्रति
पादितलक्षणांस्त्यक्त्वा तद्वर्षोमूर्वेतियावत् प्रोक्तलक्षणो रागद्वे
षौ व्युदस्य ब्रह्मभूयाय कल्पते इति तृतीयेनान्वयः ५१ ॥

मधुभाष्य

५१ ॥

224

भाषा अनुवाद टीका

सोई कहतेहैं कि उक्त प्रकार क्रम से सर्वोत्तम विशुद्धस्वरूप सा॥
त्विक बुद्धियुक्त पुरुष सात्विकी धृतिसे आत्माकहै इस बुद्धिको
नियम्य कहे निश्चल करके शब्द आदि सर्व विषयत्यागकरनेके
अनन्तर और विषयप्रयुक्तरागद्वेष को भी दूर करके ब्रह्मभावको
प्राप्त होताहै इससे ले तीन श्लोकका अर्थ एकसाथ होताहै ५१

दोहा

सह बुद्धिसें युक्तहै जितमनकोधृतिसोंहि शब्दादिविष
यत्यागके रागद्वेष तजओहि ५१॥

225

विविक्तसेवी लघ्वाशी यतवाक्कायमानसः
ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः ५२

शांकरभाष्य टीका १

ततः विविक्तसेवी अरण्यनदीपुलिनगिरिगुहादीन् देशान् सेवि
तुं शीलमस्येति विविक्तसेवी लघ्वाशी लघ्वशनशीलो विविक्त
सेवालघ्वशनयोर्निद्रादिदोषनिवर्तकत्वेन चित्तप्रसादहेतुत्वात्
ग्रहणं यतवाक्कायमानसो वाक् च कायश्च मानसं च यतानि
नियतानि संयतानि यस्य ज्ञाननिष्ठस्य स ज्ञाननिष्ठो यतिर्यतवाक्
कायमानसः स्यादेवमुपरतकरणः सन् ध्यानयोगपरो ध्यानमा
त्मस्वरूपचिन्तनं योगश्चात्मस्वरूपविषयैकाग्रीकरणं तौ ध्या
नयोगौ परत्वेन कर्तव्यौ यस्य स ध्यानयोगपरो नित्यं नित्यग्रहणं
मन्त्रजपाद्यन्यकर्तव्याभावदर्शनार्थं वैराग्यं विरागभावो दृष्टादृष्टेषु वि गप्र
षयेषु वैतृष्ण्यं समुपाश्रितो नित्यमेवेत्यर्थः ५२ ॥

आनन्दगिरिकृत टीका २

बुद्धेर्वैशारद्ये यत्नेन कार्ये करणनियमनं देहस्थितिहेतोर्व्यतिरिक्तवि तिप
षयत्यागः देहस्थित्यर्थेष्वपि तेषु रागद्वेषवर्जनमित्युपायभेदेषु सि
द्धे सत्युपायान्तराण्यपि यत्नसाध्यानीत्याह तत इति विवेकाद्युप
सार्थं विविक्तसेवित्वं व्याकरोति अरण्येति निद्रादिदोषनिरासार्थं
लघ्वाशित्वं विशदयति लघ्वीति लघुपरिमितं हितं मेध्यं वा
शितुं शीलमस्येति तयोरुक्ते विशेषणयोस्तात्पर्यं विवृणोति
विविक्तेत्यादि निद्रादीत्यादिशब्दादालस्यप्रमादादयो बहिर्विक्षेपका
विवक्षिताः वक्ष्यमाणध्यानयोगयोरुपायत्वेन विशेषणान्तरं
विभजते वाक्चेति वागादिसंयमस्यावश्यकत्वद्योतनार्थं स्यादित्ये
कं संयतवागादिकरणग्रामस्यानायासेन कर्तव्यमुपदिशति एव
मिति मन्त्रजपादीत्यादिपदेन प्रदक्षिणप्रणामादयो ध्यानयोगप्रति
बन्धका गृहीताः उक्तयोरेव ध्यानयोगयोरुपायत्वेनोक्तं विराग
भावं विभजते दृष्टेति सम्यक्त्वमेव व्यनक्ति नित्यमिति ५२ ॥

स्वामिकृत टीका ३

श्री-
गी टी-
प्र-
226

किंच विविक्तेति विविक्तसेवी शुद्धदेशावस्थायी लघ्वाशी मि
तभोजी एतैरुपायैर्यतवाक्कायमानसः संयतवाग्देहचित्तो
भूत्वा नित्यं सर्वदा ध्यानेन योगो ब्रह्मसंस्पर्शस्तत्परः ध्यानायविच्छे
दायैव पुनः पुनः दृढं वैराग्यं सम्यगुपाश्रितो भूत्वा [illegible] ५२ ॥

पिशाचभाष्यटीका ४

विविक्तयोगविरोधिवस्तुवर्जितं तस्मिन्नेकान्ते विविक्तशीलं यस्य
सः विविक्तसेवी लघु हितं मितं पथ्यमशितुं शीलं यस्य सः लघ्वा
शी ध्यानयोगपरो नित्यं ध्यानं चित्तस्यैकाग्रता योगस्त्वात्मनिष्ठा।
एतेन ध्यानं च योगं च ध्यानयोगौ परं निष्ठा यस्य स ध्यानयोगपरः नित्यं
सार्वकालं वैराग्यं विगतो रागो यस्मात् सो विरागः तस्य भावो वैरा
ग्यं समुपाश्रितः रागद्वेषविमुक्त इत्यर्थः ५२ ॥

रामानुजभाष्यटीका ५

विविक्तसेवी सर्वैर्ध्यानविरोधिभिर्विविक्ते देशे वर्तमानो लघ्वामा
नो लघ्वाशी अत्यशनानशनरहितः यतवाक्कायमानसः ध्याना
भिमुखीकृतकायवाङ्मनोवृत्तिर्ध्यानयोगपरो नित्यमेवं भूतः सन्
आप्रयाणाद् अहरहः ध्यानयोगपरः वैराग्यमुपाश्रितः ५२ ॥

अभिनवगुप्तकृतटीका ६

स्पष्टार्थम् ५२ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपाटीका ७

किंच विविक्तेति विविक्तं विवेकहेतुभूतं एकान्तं वनं सेवते सतत
या लघ्वाशीः सात्विकमितान्नभोजी एतैरुपायैर्यतवाक्काय
मानसः संयतवाग्देहचित्तो भूत्वा ध्यानेन चिन्तैकाग्र्येणानादात्मा
नयोर्जीवब्रह्मयोगस्तत्परो भूत्वा वैराग्यं पुनर्विषयविद्वेषपराहितं
सम्यक्नैष्ठिकत्वेनोपाश्रितः ५२ ॥

वनमालीटीका ८

विविक्तं जनसंमर्दरहितं पवित्रं च वनं सेवितुं शीलमस्य सः लघु
शील लघु हितं परिमितं मेध्यं चाशितुं शीलमस्य सः यतानि संयतानि
कृ वाक्कायमानसानि येन सः ध्यानपरो नित्यं ध्यानं भगवदाकारस्मृ
तौ तैलवन्नयप्रवाहस्तदभ्यासपरः वैराग्यं दृष्टादृष्टविषयेष्व

१२६

हाविरोधिवितृष्णस्तिसम्यगाश्रितःब्रह्मभूयायकल्पतइत्यन्वयः ५२

कुसुमवैजयंती [illegible] ९

किंचयुतः सकोहृशो विविक्तसेवीविविक्तेनिरवलेध्याने विरोधि
भिर्जनैर्वर्जितस्थानेसेवितुंशीलंयस्यसतथालघ्वाशीलघुमितमा
शितुंभोक्तुंशीलंयस्यसतथाप्रत्यशनादन्नरहितः यतवाक्काय
मानसः यतानिनियम्यभिमुखीकृतानिवाक्कायमानसानियेनस
तथानित्यंसर्वकालेध्यानयोगपरः सर्वेश्वरस्वकेदचिंतनारतः वैराग्य
स्वस्वरूपेतरविषयमात्ररूपे [illegible] समुपाश्रितः सम्यग
क्तः [illegible] ५२ ॥

मधुसूदनी टीका १०

विविक्तंजनसंमर्दरहितंपवित्रंचयद्गंगापुलिनगिरिगुहादिनत्सेवितुं
शीलंयस्यसः चित्तैकाग्र्यसंपत्त्यर्थंतद्विघ्नकारिरहितइत्यर्थः लघ्वा
शीलघुपरिमितंमेध्यंवाशितुंशीलंयस्यसः निद्रालस्यादिविलय
कारिरहितइत्यर्थः यतानिसंयतानिवाक्कायमानसानियेनसः
यमनियमासनादिसाधनसंपन्नइत्यर्थः ध्यानयोगपरोनित्यंवि
तदात्माकारप्रत्ययप्रवाहोनिध्यानंश्रात्माकारसमयेननिर्हीमिकताधा
द्वियोगः नित्यमेवतत्परत्वेयोस्मेध्यानपरोनतुमंत्रजपतीर्थयात्रा
दिपरः कदाचिदित्यर्थः वैराग्यंदृष्टादृष्टविषयेषुस्पृहाविरोधिचि
त्तपरिणामंसम्यगाश्रितः सम्यग्दृढत्वेननित्यमाश्रितः ५२ ॥

सदानंदी टीका ११

विविक्तंजनसंदोहशून्यंगिरिगुहादिकं पवित्रंसेवितुंशीलंयस्य
लघुशितुंतथा १ यतानियतवाक्कायमानसानियेनसः वि
शेषयत्नपरायणमर्गीकृत्यइत्यर्थःयमादिभिः २ ब्रह्मात्मप्रत्ययप्रवाहोनि
ध्यानेयोगस्तयात्मनि एकाग्रीकरणंताभ्यांतत्परः सदा ३ न
तुमंत्रजपादौयत्नपरःसत्कदाचन दृष्टादृष्टभोगेषुवैराग्यंनि
त्यमाश्रितः ४ ॥ ५२ ॥

नीलकंठी टीका १२

केनसाधनजातेनेवंभूतोभवतीत्यतआह विविक्तेति यताबद्ध
ध्याहारोरागद्वेषौ नियम्यातिसर्वत्रअवयनीयं योनित्यंविविक्तसेवी।

श्री·
गी·टी·
अ

१३७

एकांतशीलो लघ्वाशीमिताशनशीलश्च तथा नित्यं वैराग्यं रागाभा
वं समुपाश्रितश्च तथा नित्यं ध्यानयोगः षष्ठाध्यायोक्तस्तत्परश्च यो
नित्यं भवति स यतवाक्कायमानसो भवति यतकायः आसनदा
र्ढ्येन यतवाक् विषयेभ्य इंद्रियाणां प्रत्याहारेण यतमानसः सर्व
संकल्पत्यागेन एवं चतुर्भिः साधनैर्यतवाक्कायमानसस्त्वेवंसाध
नित्यो विविक्तसेवादिशीलः सन् यतवाक्कायमानसो भूत्वा ब्रह्म
भूयाय कल्पत इत्यन्तरेणान्वयः ५२ ॥

आनंदटीका ॥

ततैवनितंसंगात् विविक्तसेवी लघ्वाशी युक्ताहारविहारः य
मनियमानुष्ठायी यतवाक्कायमानसः दृढासनः प्राणाया
माभ्यासी प्रत्याहृतेंद्रियश्च सभ्यस्तयोगवान् त्यागपंचकः ध्यान
योगपरः योगांगत्रये आभ्यंतरे ध्यानधारणासमाधिनाम्नि संय
मे तत्परः अत एव नित्यं वैराग्यं समुपाश्रितः नित्यमविनश्वरं
वैराग्यं दृष्टानुश्रविकविषयवैतृष्ण्यम् स्थान्युपनिमंत्रणे संगस्म
याकरणं पुनरनिष्टप्रसंगादिति योगशास्त्रे तृतीये पादे सूत्रा
र्थानुगमेन समुपाश्रितः अस्यार्थः चत्वारः खल्वमी योगिनः
प्रथमकल्पिकः साधुभूमिकः प्रज्ञाज्योतिः अतिक्रांतभाव
नीयश्च एतेषां लक्षणानि योगशास्त्रादधिगंतव्यानि विस्तरभ
यान्न लिखितानि तत्र मधुमतीभूमिं साक्षात्कुर्वतो योगिनः
स्थानिनो देवास्तत्स्थानाधिकारिणः सत्वशुद्धिमनुपश्यंतः
स्थानैरुपनिमंत्रयंते रस्यतामिहास्यतामिह रसः रसायनमिदं जरा
मृत्युहरं रमणीयमभिलाषदायिनो देवद्रुमाः धर्म इव रथं
गासिद्धा इमे महर्षयः दिव्यं श्रोत्रं चक्षुषी वज्रोपमः कायः त्वये
दं सर्वं स्वगुणैरुपार्जितं प्रतिपद्यतामिदमक्षयमजरामरं
स्थानमिति प्रार्थ्यंते तत्र योगी संगं न कुर्यात् जननमरणान्ध
कारे पि विपरिवर्तमानेन मया कथंचिदासादितः क्लेशतिमिरवि
नाशी योगप्रदीपः तस्य चैते तृष्णायोनयो विषयवायवः प्रतिपक्षाः

कथमनयैवविषयसंगतस्याभावंचितोहम् पुनस्तस्यैवप्रदी
नस्यसंसाराग्रेरात्मानमिंधनीकुर्यात्स्वस्तिस्वभावमेभ्योविषये
भ्यइतिसमाधिंभावयेत् संगमकृत्वास्वयमपिनकुर्यात् एवम
हंदेवानामपिप्रार्थनीयइतिस्मयादयंस्वस्थितेममतयात्मस्तुना
शकेशगृहीतमात्मानंनभावयिष्यति तथाचास्यछिद्रान्वेषी
प्रमादोलब्धविवरःक्लेशपंचकमन्नमयिष्यति ततस्तस्यपुनरनि
ष्टप्रसंगः एवमस्यसंगस्मयावकुर्वतःभावितोर्थोदृढीभवति
भावनीयस्याभिमतत्वोभविष्यतीतिसिद्धम् ५२

रामकेलीटीका ४

विविक्तसेवीसमाधिप्रमानहेतवेततावेतनेभावगतोदेशो
विविक्तःतंसेवितुंशीलंयस्यसतथाविधः तथालघ्वाशी
लघुप्राणमनोहृतिसमावस्थाकारणभूतमात्रकालरहित
त्वादिगुणपरिशुद्धमल्पमशितुंशीलंयस्यसतथायतानिनि
गृहीतान्यात्यविषयात्प्रत्याहृतानिवाक्कायमानसानिव
चनशरीरान्तःकरणानियेनसतथाविध इत्थंभूतस्यसततं
नित्यंध्यानयोगपरःध्यानेनपरतत्वात्मकोपेयवस्तुचिंतनेन
योयोगःसंबंधस्तन्निष्ठःएवंविधगुणसामर्थ्याद्वैराग्यंदृष्टानु
श्रविकविषयवितृष्णत्वंसततगुणविषयंवितृष्णत्वंचसमुपा
श्रितःसम्यगास्थितः ५२ ॥

लासिकी[illegible]टीका

किंच नित्यंप्रतिदिनंध्यानयोगपरोध्यानयोगेष्वष्टाध्यायेप्रपंचिते॰
तत्परःध्यानयोगस्योपलक्षणंशमाह विविक्तसेवीत्यादि विवि
क्तस्वभावतःसंस्कारतोवाशुद्धेविजनेवदेशंसेवितुंशीलमः॰
स्य तथालघ्वाशीमितभोजी तथायतानिसंहृतेरूपरमिता॰
निवाक्कायमानसानियेनसः तथाध्यानादिकेदार्थ्यवैराग्यम

गी॰ टी॰ ग्र॰ 228

म्युपाश्रितः [illegible] ५२

पंचोलीटीका

किंच विविक्तेति विविक्तसेवी लघ्वाशी मितभोजनः यतवाक्काय
मानसः ध्यानयोगपरः ध्यानमात्मनः स्वरूपचिंतनं योगश्चात्मस्व
रूपविषयैकाग्रीकरणं तयोः कर्तव्यतापरः नित्यमनवरतमेवब्रजा।
परिग्रहं कुर्वन् परंवैराग्यमुपाश्रितो मुनिः ब्रह्मभूयाय कल्पते ५२

रणवीरसमिद्धोधिनी

विविक्तं निर्जनोत्वनतादिरहितं देशं सेवते इति विविक्तसेवी शुद्धोवि
तविशुद्धदेशमावस्थायी तथा लघ्वाशी यद्यो वितभोजी तथा य
तानिकायवाक्मानसानि येन तादृशो भूत्वा नित्यं ध्यानेकपमेव
धर्मः स्वनुष्ठितो भवतीति तदुपायान्वेषणे मत्स्वरूपचिंतनलक्ष
णो वा योगे कर्मकौशलसमतो भयलक्षणे च तत्परः तथा कृ
मे भगवद्धामप्राप्तिनिमित्तं स्वधर्ममनुष्ठानं मम पिबादयः प्रतिबं
धकाः इतीयं दृढं वैराग्यं समुपाश्रितो भूत्वा ५२॥

मधुभाष्य

५२

भाषा अनुवाद टीका

विविक्तसेवी कहे पवित्रदेशवासी और लघ्वाशी कहे परिमित
अहारकारी हो और इन उपायोंसे यत वाक काय मानस अर्था
त् वचन देह और मनको वश करके सदा ध्यान जन्मसे जो यो
ग करे अविद्या अज्ञान निवृत्तिरूप ब्रह्म साक्षात्कार तिसमे
तत्पर होय अपने ध्यानके अविच्छेदके लिये सम्यग्रूपसे वा
रंवार दृढ वैराग्यका आश्रय लेकर ५२ ॥

दोहा

रहैं एकांत लघुभोजन वशाकर मानस देह ध्यानयोग
तत्पर सदा वैरागहि आश्रितपद ५२ ॥

229

अहंकारं बलं दर्पं कामं क्रोधं परिग्रहं विमुच्य
निर्ममः शान्तो ब्रह्मभूयाय कल्पते ५३ ॥

शांकरभाष्य टीका १

किंच अहंकारमहंकरणमहंकारो देहेंद्रियादिषु तं बलं सामर्थ्यं कामरा
गादियुक्तं नेतरच्छरीरादिसामर्थ्यं स्वाभाविकत्वेन तत्त्यागस्याशक्य
त्वात् दर्पं नाम हर्षानंतरभावी धर्मातिक्रमहेतुः हृष्टो दृप्यति
दृप्तो धर्ममतिक्रामतीति स्मरणात् तं च काममिच्छां क्रोधं द्वेषं च
परिग्रहमिंद्रियमनोगतदोषपरित्यागे शरीरधारणप्रसंगेन धर्मा
नुष्ठाननिमित्तेन वा बाह्यः परिग्रहः प्राप्तस्तं च विमुच्य परित्यज्य
परमहंसपरिव्राजको भूत्वा देहजीवनमात्रेऽपि निर्गतममभावो
निर्ममोऽत एव शांत उपरतः यः संहृतायासो यतिर्ज्ञाननिष्ठो ब्र
ह्मभूयाय ब्रह्मभवनाय कल्पते समर्थो भवति ५३ ॥

आनंदगिरि टीका २

ज्ञाननिष्ठस्य यतेर्विशेषणान्तरं समुच्चिनोति किंचेति निदिध्यासन
योगपरत्वे समुच्चितं कारणान्तरं विहायेति अहंकारमिति साम
र्थ्यमात्रे बलशब्दादुपलभ्यमाने किमिति विशेषवचनमित्याशंक्या
ह स्वाभाविकत्वेनेति उक्ते दर्पे मानमाह हृष्ट इति वैराग्यशब्देन ल
ब्धस्यापि कामत्यागस्य पुनर्वचनं प्रकृष्टत्वख्यापनार्थमहंकारा
दित्यागे परिग्रहप्राप्त्यभावात्तत्त्यागोक्तिरयुक्तेत्याशंक्याह इंद्रियेति प
रिग्रहाभावे ममत्वविषयाभावान्निर्ममत्वं कथमित्याशंक्याह देहे
ति अहंकारममकारयोरभावेन शान्तमन्तःकरणमुपरतिमत्त्वं भ
वति अत एवेति उक्तमनुष्यजीवन्नेवासौ ब्रह्म भवतीति फलित
माह यः संहृतेति ज्ञाननिष्ठपदाद्दृष्टे तस्याहो दृष्टत्वः ब्रह्मणो भव
नमनुसंधानपरिपाकपर्यन्ते साक्षात्कारेण तद्भूयमिति यावत् ५३

स्वामिकृत टीका ३

अहंकारमिति विरक्तोऽहमित्याद्यहंकारं बलं दुराग्रहं दर्पं योगबलादु
न्मार्गप्रवृत्तिलक्षणमाश्रयवशात्प्राप्यमाणमपि विषयेषु कामं क्रोधं
परिग्रहं च विमुच्य विशेषेण त्यक्त्वा बलादापतितेष्वपि निर्ममः सन् शान्तः

श्री
गी॰टी॰
यु॰

230

परमामुपशांतिंप्राप्तोब्रह्मभूयायब्रह्माहमितितैनेस्थल्येनावस्था
नायकल्पतेयोग्योभवति ५३ ॥

पिशाचभाष्यटीका ४

देहादिष्वात्मबुद्धिरहंकारः बलंकामरागसंयुक्तंनेनरदेहादिसाम
र्थ्यंतस्यस्वाभाविकत्वेनमक्तमशक्यत्वात् अतःकेवलशब्दयुक्तना
पनादिबलशब्देनोच्यते दर्पोहर्षः कामोरागः क्रोधः द्वेषःपरिग्र
होममेदमितिस्पर्धिनोवशीकरणंएतदहंकारादिविमुच्यनिर्ममः
नशरीरस्थितिसाधनेष्विप्वस्तुनिममबुद्धिरहितः अतएवशांतउ ब
परतांतःकरणः ब्रह्मभूयायकल्पतेसमर्थः ५३ ॥

रामानुजभाष्यटीका

ध्येयततत्वव्यतिरिक्तविषयदोषावमर्शेणतत्रविरागतांवर्द्धयन्नहं
मा कारमनात्मन्यात्माभिमानंबलंतद्विवृद्धिहेतुभूतंवासनाबलंतन्निमि
त्तंदर्पंकामंक्रोधंपरिग्रहंविमुच्यनिर्ममः सर्वेष्वनात्मीयेष्वात्मीय
बुद्धिरहितः शांतः आत्मानुभवैकसुखः एवंभूतोध्यानयोगंकु
र्वन्ब्रह्मभूयायकल्पतेब्रह्मभावायकल्पतेसर्वबंधविनिर्मुक्तोय
थावस्थितमात्मानमनुभवतीत्यर्थः ५३ ॥

अभिनवगुप्तकृतटीका ६

स्पष्टार्थम् ५३ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपाटी टीका ७

अथविहितप्रकारणोत्मूलनप्रकारमाह अहंकारमिति अहमेनाद
ग्निरक्तोस्मीतिअहंकारंबलंउग्रहंदर्पंयोगबलादुन्मार्गमहं निल
त्वाण आरंभेकामंक्रोधंपरिग्रहंचविमुच्यविशेषेणमुक्ता यामे योग
क्षनिर्ममोममनास्पृहः शांतः परामुपशांतिंप्राप्तः एवंभूतोयोगीब्र
ह्मभूयायब्रह्माहमस्मीतितैनेस्थल्येनावस्थानायकल्पतेयोग्योभवति ५३

वनमाली टीका ८

अहंकारंमहाकुलीनोहंविद्यादिनामत्तत्योस्मिनास्तीत्यभिमानं ब
म लंसदाग्रहेनशरीरंतस्यस्वाभाविकत्वेनमनःक्रमशक्यत्वात् दर्पंहर्ष
जन्यंमदंधर्मातिक्रमहेतुं कामंविषयाभिलाषंबैराग्यमित्युक्तं।
सोपिकामस्यागस्यपुनःकर्तिपन्नापिकार्यंक्रोधंद्वेषं परिग्रहंदे

ह्यात्रार्थमस्य देहस्य विपरीतोपनीतेवाह्योपकरणं विमुच्य त्य।
क्त्वा शांतश्चित्तः विदेहपरिहितः शनैः क्रमेण ब्रह्मभूयाय ब्रह्म
साक्षात्काराय तन्न्यायमेवादकल्पते योग्यो भवति ५३ ॥

हनुमद्वैजयंती टीका ५

किंच अहंकारमिति अहंकारं देहेंद्रियाद्यभिमानरूपं बलं नमालपो
षणवृद्धिनाशिवासनारूपं दर्पं बलस्य हेतुरूपं कामं विषयाभिला
षरूपं क्रोधममिलषितविषयाप्राप्तौ नैकामपरिणामरूपं परिग्र
हमहंकारादीनां कर्मरूपं पुनर्यात्राद्युपकरणादिसंग्रहं एवं दारा
दिपरिजनसंग्रहं वा एतानहंकारादीन् विमुच्य विशेषेण त्य।
क्त्वा निर्ममः सर्वेषु नाम्नीयभावरहितो ततएव शांतः निरंतरस्व
५त्त स्वरूपानुभवैकरूपत्वेन निरंगसिंधुरिव निश्चलः ईदृशो ध्यानयो
गनिष्ठो जनो ब्रह्मभूयाय ब्रह्मभावाय कल्पते शुद्धस्वात्मस्वरूप।
मात्रभवति ५३ ॥

मधुसूदनी टीका ९

अहंकारं महाकुलप्रसूतोहं महतां शिष्योति विरक्तोस्मि नास्ति
हितीयो मत्सम इत्यभिमानं तु बलं मनसदाग्रहं न तु शारीरं तस्य स्वा
भाविकत्वेन त्यक्तुमशक्यत्वात् दर्पं हर्षजन्यमदं धर्मातिक्रमका
रणं हृष्टो दृप्यति दृप्तो धर्ममतिक्रामतीति स्मृतेः कामं विषयाभि
लाषं वैराग्यं समुपाश्रितत्रयमनेनोक्तस्यापि कामस्य त्यागस्य पुनर्व
चनं यत्नापि कार्यकोऽयं देहे परिग्रहं शरीरयात्रार्थमस्य देहस्य
विपरीतोपनीतेवाह्योपकरणं विमुच्य सत्काशिक्यपात्रोपवीतादि
कमपि दंडमेकं कमंडलुं कौपीनाच्छादनवशाद्याभ्यां नत्यातेः स्व
शरीरयात्रार्थमादाय परमहंसपरिव्राजको भूत्वा निर्ममो देहजी
वनमात्रेपि ममकाररहितः अतएवाहंकारममकाराभावादप
गतहर्षविषादत्वात् शांतश्चित्तविक्षेपरहितो यतिर्ज्ञाननिष्ठावन
परिपाकक्रमेण ब्रह्मभूयाय ब्रह्मसाक्षात्काराय कल्पते समर्थो भ
वति ५३ ॥

सदानंदी टीका ११

महाकुलप्रसूतोहं विरक्तो मौनमग्नमः इत्येवमभिमानं च बल

मग्नासदाग्रहं १ नशारीरंयतस्तत्स्वाभाविकतयाजैनःस्यात्ः
कर्तुंमयाकोस्तिदर्पंहर्षजनमदं २ धर्मातिक्रमरागोद्वेगतत्कृतंच
स्तनोस्कटे हृष्टेदर्पणितिदर्पः सत्त्रातिकामनियमेनतः ३ कामं।
भोगाभिलाषंचक्रोधंद्वेषंपरिग्रहं बाह्योपकरणंसर्वंयदिदेहोप
कारणं ४ परित्यज्याविलानेनोदेहधारणमात्रके ममत्वरहितः
शान्तश्चित्तविक्षेपवर्जितः ५ ज्ञानसाधनसामग्रीपरिपाकक्रमे
णाव ब्रह्मभावायपतिरदसमर्थोभवतिसुधे ६ अहंकारादिष
ट्कंचसम्यग्वैराग्यवैभवात् तथाविवेकसामर्थ्यवैशिष्ट्यात्विचा
रणात् ७ नैरन्तर्येणासत्संगदाराभ्यासादिवैभवात् त्यक्त्वाक्लेशकंभ
वेयस्मात्तस्माद्यथातोविवेकवान् ८ भगवत्पदमालेयमत्तांसेगेव
सर्वदा ब्रह्मसेवकस्यवैराग्यकृतश्रीहरेर्यमाश्रयः ९ ५३ ॥

नीलकंठी टीका १२

एवंयतवाक्कायमानसस्ययोगिनोयोगजाःसिद्धयउपतिष्ठन्ति
ताश्चाकृतार्थदर्शिनाः इष्ट्यमैजोनिलखेसम्यग्स्थितेपंचात्मके
योगगुणेप्रवृत्ते नतस्यरोगोनजरानमृत्युः प्राप्तस्ययोगाग्निम
यंशरीरमिति तथा यंयंलोकंमनसासंविभातिविशुद्धसत्त्वःका
मयतेयांश्चकामान् तंतंलोकंजयतेतांश्चकामांस्तस्मादात्मज्ञं
ह्यर्चयेद्भूतिकामः इतिकामइतिच संविभातिसंकल्पयतिलोके
लोचनीयमतीतानागतमर्थंजातंकामान्काम्यमानान्विषयान्
जयतेउपलभतेइतिश्रुतिप्रदानामर्थः तथानाविरतोदुश्चरिता
न्नाशान्तोनासमाहितः नाशान्तमानसोवापिप्रज्ञानेनैनमाप्नुया
दिति प्रज्ञानेनशास्त्राचार्योपदेशजेनज्ञानेनदुश्चरितादिभ्य न
नाविरतः शान्तोजितेन्द्रियः समाहितः निरुद्धचित्तवृत्तिरपिप्रशा
न्तमानसोयोगेऽप्यसक्तचित्तः एतमात्मानेनमाप्नुयादितिश्रु
त्यर्थः तदिदमाह ब्रह्मेत्याहंकारमिति यदाहियोगीयतमानसोऽस्मि
तामात्रप्रपन्नोभवतितदैवास्मितावस्थितिविषयाभिमानादहं
कारःस्त्यज्यतेविषयाविमुखत्वात्सितेनतत्समहंकारात्तरात्स्तो
यात् तदानिग्रहेयोगीवलंसत्सेकल्पनादिसामर्थ्यमात्मनःपेष्य
न्दर्पंकरोतितिनमतत्त्वोमोऽस्मीतिमन्यते ततश्चदम्भोपममतिका

मतीत्यापस्तंबवचनात् दिव्यान् कामान् रक्षति न च केन चि
त्रिमित्तेन कामप्रतिबंधे सति क्रोधवान्भवति ततः परोत्पादना
य भूयांसं शिष्यादिपरिग्रहं संपादयति ततो न शमनीति तस्मात्स
र्वानर्थमूलभूतमहंकारमेव विमुच्य तत इतरान्सर्वान् विमुंचति
अहंकारविमोके पि निर्ममत्वेन तत्त्वदर्शी तेषु विषयेषु ममतास्पद
त्वे सत्यहंकारः शिथिलीभूतो विषयैर्मलंप्राप्य स्वकारणे ऽ
स्मितायां विलीयते ततः शांतोऽस्मितायामपि प्रलयात्रिरिंध
नाग्निवदुपरतो योगी ब्रह्मभूयाय कल्पते ५३ ॥

आनंदीटीका १२

स्पष्टार्थं ५३

रामकंठीटीका १४

तथा समेतान् दोषान्विमुच्य अहंकारं तावत् अनात्मनि शरी
रादावात्मप्रत्ययं सर्वदोषाधिराजं तथा बलं शक्ताशक्त
विवेकपरिहारेण कार्येष्वाग्रहम् तथा दर्पं स्वल्पस्यापि सिद्धि
लेशस्योपलब्धौ चित्तोद्रेकं तथा कामं रागनिमित्तकमिष्ट
विषयेषु संकल्पम् तथा क्रोधं द्वेषनिमित्तकं चित्तेंद्रियक्षो
भकं तथा परिग्रहं देहदारदारकद्रविणादिषु सर्वस्वबुद्ध्या
स्वीकारं अतएव परिग्रहत्यागान्निर्ममः ममकारलक्ष
णात्तथा निष्क्रान्तः ततश्च निर्विकारपरमोपादेयस्वरूपमा
त्रपरायणत्वाच्छान्तः विगतसकलविकल्पक्षोभः इत्थं
भूतो ब्रह्मभूयाय कल्पते नत्वेवंविधः ५३ ॥

लासिकी [illegible]टीका

तथा अहंकारमहं सर्वोत्कृष्ट इत्येवमभिमानं बलं दुराग्रहं दर्पं
मदं कामं अभिलाषं क्रोधं प्रसिद्धं परिग्रहं पुत्रदारादीनां म
मतया स्वीकारमित्येतत्सर्वमात्मविज्ञाते: प्रतिबंधकं त्य
क्त्वा इत्येवं सर्वत्र ममताशून्यः तथा शान्तः एवं नित्यात्र

232

शीलनेन सर्वविकल्पोपशमरूपां शांतिं प्राप्तो ब्रह्मभूया-
य देहपातानंतरं ब्रह्मभावाय कल्पते योग्यो भवति
[illegible] ५२

पंचोलीटीका

किंच अहंकारमिति देहादिष्वहंकरणमहंकारस्तं कामसं-
युक्तं सामर्थ्यं बलं हर्षानंतरभावी धर्मातिक्रमहेतुः दर्पस्तं का-
मं क्रोधं द्वेषं बाह्यवस्त्रपरिग्रहं विमुच्य परिमत्यपरमहं-
सपरिव्राजको भूत्वा देहजीवनमात्रेपि निर्गतममभावो निर्म-
मशांतः उपरतः यः सो ज्ञाननिष्ठो ब्रह्मभावाय कल्पते ५२

गणावीरसमिद्बोधिनी॥

तथाहंकारादीन्विमुच्य निर्ममः ममतारहितः अत एव शां-
तः अन्तोह्यवसिते पुंसि स्वरूपे निश्चये निकेति कोशात्
पं कल्याणस्वरूपोंतो निश्चयोस्येति शांतः अयंभूतः कर्म-
योगी ब्रह्मभूयाय ब्रह्मभूयं ब्रह्मत्वं ब्रह्मसायुज्यमित्यपी-
ति कोशात् परमेश्वरसायुज्याय कल्पते योग्यो भवति ५३॥

मधुभाष्य

५३॥

भाषा अनुवाद टीका

और अहंकार औ बल कहे निंद्य वस्तु की इच्छा औ दर्प कहे यो
ग वस्तु से अकास्मात् गमनरूप आदि माया मे प्रवृत्ति और प्रारब्धवशा
ते अप्राप्य वस्तु मे जो काम क्रोध का रोकना और अदृष्टवशा ते हुआ
न् प्राप्त वस्तु मे भी ममता रहित होके शान्ति को प्राप्त पुरुष ब्रह्म के
साथ समझा अर्थात् यह ब्रह्म ऐसा अचल रूप अवस्थान करने के यो
ग्य है ५३ ॥

दोहा

अहंकार बल दर्प को क्रोध परिग्रह काम तजके निर्मम शां
त हो ब्रह्म भक्ति ह्वै यात ५३॥

233

ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्ष
ति समः सर्वेषु भूतेषु मद्भक्तिं लभते परां ५४

शांकरभाष्यटीका १

अनेन क्रमेण ब्रह्मभूतो ब्रह्मप्राप्तः प्रसन्नात्मा लब्धाध्यात्मप्रसाद त
स्वभावो न शोचति किंचिदर्थवैकल्यमात्मनो वा वैगुण्यं चोद्दिश्य
न शोचति न संतप्यते न कांक्षति नह्यप्राप्तविषयाकांक्षा ब्रह्मवि
द उपपद्यते अतो ब्रह्मभूतस्यायं स्वभावोऽनूद्यते न शोचति न कांक्ष
तीति न हृष्यतीति वा पाठः समः सर्वेषु आत्मौपम्येन सर्वेषु भूतेषु
सुखं दुःखं वा सममेव पश्यतीत्यर्थो नात्मसमदर्शनमिह तस्य व
क्ष्यमाणत्वात् भक्त्या मामभिजानातीति च एवंभूतो ज्ञाननिष्ठो मद्भक्तिं
मयि परमेश्वरे भक्तिं भजनं परामुत्तमां ज्ञानलक्षणां चतुर्थीं लभते
चतुर्विधा भजंते मामित्युक्तं ५४ ॥

आनंदगिरिकृतटीका २

योगिवित्ते रुपयन्ननंतरश्लोकमवतारयति अनेनेति बुद्ध्याविशुद्ध
येत्यादिरत्र क्रमः ब्रह्मप्राप्तो जीवन्नेव निवृत्ताशेषानर्थो निरतिशया
नंदब्रह्मात्मत्वेन भवतीत्यर्थः अध्यात्मं प्रत्यगात्मा तस्मिन् प्रसादः
सर्वानर्थनिवृत्त्या परमानंदाविर्भावः स लब्धो येन जीवन्मुक्तेन स
तथा न शोचतीत्यादेस्तात्पर्यमाह न हीति प्राप्तस्य परिहार्यस्याभाव
निश्चयादित्यर्थः स्वभावानुवादमुपपादयति ब्रह्मभूतस्येति तस्याप्राप्त
स्य विषयाभावाच्चापि परिहार्यापरिहारप्रयुक्तः शोकपरिहार्यपे
ग वाभादित्यर्थः पाठान्तरे न रमणीयं प्राप्य प्रमोदते तदभावादित्यर्थः
विवक्षिते समदर्शने विशदयति आत्मेति न तु सर्वेषु भूतेष्वात्मनः
समस्य निर्विशेषस्य दर्शनमत्राभिप्रेतं किं नेष्यते तत्राह तस्येति
उक्तविशेषणवतो जीवन्मुक्तस्य ज्ञाननिष्ठा प्रागुक्तक्रमेण प्राप्ता स्व
प्रतिष्ठिता भवतीत्याह एवंभूत इति श्रवणमनननिदिध्यासनाभ्या
सवतः प्रागादिष्टक्रमाभ्यस्ते श्रवणादिभिः ब्रह्मात्मपरोक्षं मोक्ष
फले ज्ञाने सिध्यतीत्यर्थः आर्तादिभक्तित्रयापेक्षया ज्ञानलक्षणां
भक्तिं चतुर्थीमित्युक्तं तत्र सप्तमस्थवाक्यमनुकूलयति चतुर्वि
धा इति ५४ ॥

श्री॰
गी॰टी॰
म

234

स्वामिकृत टीका ३

ब्रह्माहमिति नैश्चल्येनावस्थानस्य फलमाह ब्रह्मभूत इति ब्र
ह्मण्येवावस्थितः प्रसन्नचित्तो नष्टं न शोचति नचाप्राप्तं कांक्षति
देहाद्यभिमानाभावात् अत एव सर्वेष्वपि भूतेषु समः सन् राग
द्वेषादिकृतविक्षेपाभावात् सर्वभूतेषु मद्भावनालक्षणां पराम
द्भक्तिं लभते ५४ ॥

पैशाचभाष्यटीका ४

इदानीं ब्रह्मभूतस्य लक्षणमभिधत्ते ब्रह्मैव भूतो ब्रह्मभूतः प्रसन्ना
त्मा स्वच्छ आत्मा यस्य सः प्रसन्नात्मा रागद्वेषाभ्यामनाकृष्यमाण
हृदय इत्यर्थः न शोचति न कांक्षति समः सर्वेषु भूतेषु एकरूप एव
परमात्मात्मत्वेनावस्थितेषु पश्यन् स एवंभूतो मद्भक्तिं नीश्वरभ
क्तिं भजनं तादात्म्यं परामुत्कृष्टां लभत इत्यर्थः ५४ ॥

रामानुजभाष्यटीका ५ ॥

ब्रह्मभूत इति ब्रह्मभूतः आविर्भूतापरिच्छिन्नज्ञानैकाकारम
[illegible]दैकरसस्वभावात्मस्वरूपः इत्युक्तं संप्रहाणेति विहितेन परामि
त्युपशेषेणोक्ता प्रसन्नात्मा क्लेशकर्मादिभिरकलुषस्वरूपो मद्व्यति
रिक्तं किंचन भूतविशेषं न शोचति न किंचन कांक्षति मद्व्यतिरिक्ते भू
तजाते अनादरणीयतायां समो निखिलं वस्तुजातं तृणवन्मन्यमानो म
द्[illegible]क्तिं लभते परां मयि सर्वेश्वरे निखिलजगदुद्भवस्थितिप्रल ल
यलीले निरस्तसमस्तहेयगंधे अन[illegible]धिकातिशयासंख्येयकल्या
णैकताने लावण्यामृतसागरे श्रीमत्पुंडरीकनयने स्वस्वामिन्यत्य
र्थप्रियानुभवरूपां परां भक्तिं लभते ५४ ॥

अभिनवगुप्तकृत टीका ६

स्पष्टार्थम् ५४ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपाटी टीका ७

तथाविधत्वस्य फलमाह ब्रह्मभूत इति ब्रह्मण्येवावस्थितः प्रस
न्नचित्तः सन् न शोचति न चाप्राप्तं कांक्षति देहाद्यभिमानाभावा
त् अत एव सर्वेषु समः न केवलं तारतम्यवर्जितः किंतु परामुत्कृष्टाम भु
द्भक्तिं लभते सर्वभूतेषु मद्भावनया भजते ५४ ॥

वनमाली टीका ८

श्रपरोक्षीकृतेब्रह्मणिवपरमात्मनिभूतः स्थितः प्रसन्नः श्रात्मा
परमात्माविर्भावात्प्रसन्नः नष्टंनशोचतिप्राप्तमनकांक्षतिसर्वेषुभू
तेषुसमः सर्वभूतयामिनोहरेर्दर्शनाद्रागद्वेषशून्यः एतादृशोम
द्भक्तिंसर्वोत्तमापरोक्षरूपांविविक्तांनैष्ठिकींसततपरामनपायि
नींलभते ५४ ॥

कुसुमवैजयंती टीका ९

ननुब्रह्मभावादनंतरंसकिंफलंप्राप्नोतीतिचेत्तत्राह ब्रह्मभूत
इतिब्रह्मभूतः प्रकृतिसंबंधरहितत्वेनाविर्भूतज्ञानादिधर्मकात्मा
त्मस्वरूपकः अतएवप्रसन्नात्मावर्षापायेशारदाम्बुवत् क्लेश
कर्मविपाकादिविरहादतिनिर्मलस्वरूपः सर्वेषुभूतेषुज्ञानैकाकार
त्वेनदेवतिर्यगादिशरीरेषुभूतेषुलोष्टकांचनादिवद्भेदबुद्धिविरहा
त्समत्वंप्राप्तः अतएवनशोचतिययाकंचिदभीष्टंदैवाद्गतंतन्न
शोचतिनैवचकिंचिदप्राप्तंकांक्षतिविशेषाभावात् नतिशोकं
नकरोतिनकांक्षतीति श्रपरमेश्वरातिरिक्तंसर्वंतृणवत्तस्य
ज्ञानस्यापरोक्षरूपायत्किमपिस्वभावतोपास्तसमस्तदो
षनिरवधिकातिशयाचिंत्यानंतस्वरूपेस्वाभाविकानवधिका
तिशयासंख्येयकल्याणगुणाविकेजगज्जन्मादिकारणेवेदैकवेद्ये
दिव्यदिव्यात्मकजगन्निर्वाभिन्नस्वरूपेमत्सुपणामेपीनकोऽपि
५२ वैपरेश्रणानिप्रियेवसुदेवात्मजेनंदनंदनेसर्वेश्वरेजगन्नाथमि
निश्रीपतौभक्तिंनिरतिशयमत्स्वरूपानुभवरूपांलभतेश्रामिति
५४

मधुसूदनी टीका १० + केनक्रमेणब्रह्मभूयायकल्पतइति
तदाह ॥

+ ब्रह्मभूतः प्रदृढंब्रह्मास्मीतिदृढनिश्चयवान् श्रवणमननाभ्यासा
त् प्रसन्नात्माशुद्धचित्तः शमदमाद्यभ्यासात् अतएवनशोच
तिनष्टंनकांक्षत्यप्राप्तंअतएवनिग्रहानुग्रहयोरनारंभात् समःस
र्वेषुभूतेषुआत्मौपम्येनसर्वत्रसुखंदुःखंवाप्रपश्यतीत्यर्थः एवंभूतो
ऽहंनिदिध्यासनंकुर्वन्मद्भक्तिंमय्यभगवतिशुद्धेपरमात्मनिभक्तिमुपा
सनांमदाकारचित्तवृत्त्यावृत्तिरूपांपरिपक्वनिदिध्यासनाख्यांश्रव
णमननाभ्यासफलभूतांलभतेपरांश्रेष्ठांमद्ध्यवधानेनसाक्षात्

श्री॰
गी॰टी॰
अ॰

235

कारफलोचनविधाभजंतेमामित्युक्तस्यभक्तिचतुष्टयस्योत्तमो
ज्ञानलक्षणामितिवा [illegible] ५४ ॥

सदानंदी टीका ॥

येनक्रमेणब्रह्मात्मभावयोग्योभवेन्मुनिः तदाहब्रह्मभूतश्च
साक्षीतिवहनिश्चितः १ श्रवणादेः सदाभ्यासात्प्रसन्नात्माविशुद्ध
धीः रागाद्यभ्यासतोनष्टमिष्टवस्तुनशोचति २ नाप्राप्तंकांक्षा
तिस्वस्थः सर्वभूतेभ्यः समः आत्मौपम्येनसर्वत्रसुखंदुःखंचपश्य
श्यति ३ ज्ञाननिष्ठः उभावेवमपि श्रेष्ठपरात्मनि उपासनोमदाका
रधीरूप्याहुर्निरूपिणी ४ श्रवणादेः सदाभ्यासफलभूतामनुत्तमां
मां निदिध्यासनसंसिद्धांसाक्षात्कारफलांपरां ५ मद्भक्तिंलभते
धीरश्चरमांज्ञानलक्षणां ६ ५४ ॥

नीलकंठी टीका १८

अस्यैवंवशीकृतस्यकेवलस्ययोगिनोमुख्यामवस्थामाह ब्रह्मभूत
इति योहिलयमौलयेवानिपतितोयोगीमुख्यानेनजडेदेहस्थमेव
स्थितःश्चेतनद्रव्यकृतिरिति ब्रह्मभूतस्तस्यप्रसन्नात्माप्रसन्नचेताः
लघुशरीरः अस्तएवसमाधिसुखेनानन्दितःसन्नदेकप्रवणोनशोच
तिनष्टं नाप्राप्तंकांक्षतिदारादिकं सर्वेषुभूतेषुचनविधेषुस
मःब्रह्मैवेदंसर्वमितिबुद्ध्यावैषम्यवर्जितःसन्परांमद्भक्तिंहेत
दृष्टिविवर्जितांभावनांलभते पातंजलयोगीवनमुख्यानेपरां
दृष्टिंलभतेभेददर्शित्वात् अयंचभक्तः श्रीभागवतेदर्शितः
सर्वभूतेषुयःपश्येद्भगवद्भावमात्मनः भूतानिभगवत्यात्मन्येष
भागवतोत्तमइति सोयंचतुर्थोभक्तोज्ञानीत्वात्मैवमेमतमिति
भगवतापिदर्शितः ५४ ॥

आनंदीटीका १८

ब्रह्मभावंप्राप्तस्यपरीक्षामाह ब्रह्मभूतः ऐक्यविषयायोगसि
द्ध्याब्रह्मभावंप्राप्तः प्रसन्नात्मामैत्रीकरुणामुदितोपेक्षाणांसु
खदुःखपुण्यापुण्यविषयाणांभावनातश्चित्तप्रसादमिति
सूत्रोक्तात्सबीजसमाधिकृताच्चित्तप्रसादादुत्तरकालेनिर्बीज
समाधौनिर्विचारवैशारद्येऽध्यात्मप्रसाद इतिसूत्रार्थप्रतिष्ठा
प्र

२३४

निर्विचारेमैत्र्यादिभावनोत्तीर्णेसमाधौवैशारद्याद्बुद्धिसत्वस्यावरणा
ग पमेप्रकाशात्मनोरजस्तमोभ्यामनभिभवनीयात्स्वच्छस्थितिप्र
वाहात्प्रसन्नः स्फुटीभूतप्रज्ञालोकः आत्मान्तःकरणंयस्यसतथा
नशोचतिदुःखितेषुकरुणांनभावयति नहृष्यतिसुखितेषुमै
त्रींनभावयति सर्वेषुभूतेषुसमः पुण्यापुण्येषुप्राणिषुनि ष्ठ
पेक्षः परांमद्भक्तिं आर्तोजिज्ञासुरर्थार्थीज्ञानीचेतिलक्षितांचतु
र्थीकाष्ठांप्राप्तांज्ञानात्मिकांमत्स्वरूपापत्तिंलभते ५४ ॥

रामकंठीटीका ५४

एवमनेनक्रमेणब्रह्मभूतोब्रह्मैकपरायणत्वात्तद्भावमापन्नोनिर्वि
शेषतयैवप्रसन्नात्माविगतद्वैतप्रत्ययसंकल्पत्वात्प्रसन्नःस्वाभावि
कशुद्धियुक्आत्मास्वभावोयस्यसतथाविधःसन्नशोचति नित्या
विनश्वरस्यात्ममयविस्मृतात्कस्यचिदपिभावस्यसत्त्वेनाःपरिग्रहा
नद्भावेनपरिदेव्यते नाप्यनेनैवमायेनकस्मिंश्चित्कामेस्पृष्यति हर्ष
मनुभवति एतेहिसर्वेभावामायोपहतदृशांभावाभावधर्मानिमुक्ता
वयंतोहर्षशोकात्मकविकारहेतुतामापद्यंते नतुसर्वसाम्यदर्शिनो
योगिनइत्यर्थः तथाज्ञानस्यपरांनिष्ठांनिरतिशयांचतुर्थीकाष्ठां
मत्स्वरूपोपासांलभतेप्राप्नोति किमुक्तंभवति परमात्माद्वैतप्रति
पत्तिलक्षणायाज्ञानस्यपरानिष्ठासैवपरामद्भक्तिरिति तथाचैतो
क्तंवांतिभक्तिमंतः मुक्तावकुविधावुदाहरिष्यामसत्तमतत्त्ववित् य
स्तज्ज्ञैःपराकाष्ठामद्भक्तिरिमननिष्ठेयरति तथाच ५४

+एवंविधस्यमहिमान माह॥ लासिकी [illegible]टीका

+एवंविधःप्रसन्नात्माप्रसन्नोदेहाद्यभिमानकलंकशून्यआ
त्मास्वस्वभावोयस्यसब्रह्मभूतेभावोपिब्रह्मत्वप्राप्तएव विनष्टे
नशोचति अप्राप्तंचनकांक्षति नन्वेवंविधेनयोगिनाजीवद्दशा
यामेवकिमितिब्रह्मत्वंनप्राप्तमित्याशंक्याह समइति सर्वेषु
ब्रह्मादिस्थावरान्तेषुभूतेषुयएवयोगीसमाश्रित्याभिरूपस्ता
त्पयात्मः सएवपरांश्रेष्ठांमद्भक्तिंममसर्वस्यभक्तिंसर्वात्मकोह
मितिजडवर्गव्याप्तिरूपांभजनांलभते नतुमितयोगी

पंचोलेटीका

ब्रह्माहमित्येवं नैश्चल्येनावस्थानं सफलमाह ब्रह्मभूतेति अने
न क्रमेण ब्रह्मभूतः ब्रह्मत्वं प्राप्तः प्रसन्नात्मा लब्धात्मप्रसादस्वभा
वः न शोचति किंचिद्वैकल्यं आत्मनो वैगुण्यं वा ध्यायन् न शोचति
संतप्यते न चाप्राप्तविषयं न कांक्षति आत्मौपम्येन सर्वेषु भूतेषु
सुखं दुःखं वा सममेव पश्यति य एवंभूतो ज्ञाननिष्ठः समः स मयि पर
मेश्वरे भक्तिं परां ज्ञानलक्षणां चतुर्थीं लभते ५४

रणवीरसमिद्धोधिनी

पुनरपि ब्रह्मसायुज्यप्राप्तये कल्पते योग्यो भवति प्राप्तेर्निमि
त्तं संदर्शयन्नाह ब्रह्मभूत इत्यर्थेन यः प्रसन्नात्मा प्रसन्नो रागद्वेषा
दिकालुष्यरहित आत्मांतःकरणं यस्य तादृशः सन् न शोचति
नष्टं बान्धवादिकं नानुतप्यति न चैवाप्राप्तं नाकांक्षति स ब्रह्म
भूत एव ब्रह्मसायुज्यं प्राप्य एवेति यत्तदोरध्याहारेणान्वयः
भाविन्या अपि तादृशावस्थाया भूततया कथनं निःसंदेहप्रतीत्य
र्थं अथ प्राधान्येन परमसिद्धिसाधनतया प्राक्प्रतिपादिताया भा
व द्भक्तेरेव परस्परया कारणत्वं पुनरपि स्मारयंस्तावन्मात्रलब्ध्यु
पायमेवाह समः इत्यादिना सर्वेषु भूतेषु समः समदर्शी एवं
प्रकृष्टोपायभूतां मद्भक्तिं लभते ५४॥

मधुभाष्य

५४॥

भाषा अनुवाद टीका

अहे ब्रह्म ऐसी निश्चय रूप अवस्थि का फल कहते हैं कि ब्रह्मभू
त कहे ब्रह्मभाव को प्राप्त प्रसन्नचित अरुष देह आदिमे अभि
मान के अभाव से नष्ट जो संसारी विषय तिनका शोच नही क
रते हैं और अप्राप्त विषय को भी आकांक्षा नही करते इसी सेराग
द्वेषादिकृत विक्षेप के अभाव से भूत मात्र मे समभावयुक्त होने
के अनन्तर सकल प्राणीयों मे मद्भावरूप जो मेरी उत्तम भक्ति ति
सको प्राप्त होते है ५४ ॥

दोहा

ब्रह्मभए आनंदमन सोचनकांक्षनसोए सर्वभूतमेंसम
रहें मोरिभक्तिलभहोए ५४ ॥

237

230

भक्त्यामामभिजानातियावान्यश्चास्मितत्व
तः ततोमांतत्वतोज्ञात्वाविशतेतदनंतरं ५५

शांकरभाष्य टीका १

ततोज्ञानलक्षणया भक्त्या मामभिजानाति यावानहमुपाधिकृ
तविस्तरभेदः यश्चाहं विध्वस्तसर्वोपाधिभेदोऽस्मि उत्तमपुरु
ष आकाशकल्पस्तं मामद्वैतं चैतन्यमात्रैकरसमजममरमभ म०
यमनिधनं तत्वतोऽभिजानाति ततोमामेवं तत्वतोज्ञात्वाविशते
तदनंतरं मामेव नात्र ज्ञानानंतरप्रवेशक्रिये भिन्ने विवक्षिते ज्ञा
त्वाविशते तदनंतरमिति किं तर्हि फलान्तराभावात् ज्ञानमात्रमे
व क्षेत्रज्ञं चापि मां विद्धीत्युक्तत्वात् ननु विरुद्धमिदमुक्तं ज्ञानस्य
या परा निष्ठा तया मामभिजानातीति कथं विरुद्धमिति चेदुच्य
ते यदैव यस्मिन् विषये ज्ञानमुत्पद्यते ज्ञातुस्तदैव तं विषयम
भिजानाति ज्ञातेति नज्ञाननिष्ठां ज्ञानावृत्तिलक्षणामपेक्षत इति
अतश्च ज्ञानेन नाभिजानाति ज्ञानावृत्त्या तु ज्ञाननिष्ठयाभिजाना
तीति नैषदोषो ज्ञानस्य स्वात्मोत्पत्तिपरिपाकहेतुयुक्तस्य प्रतिप
क्षविहीनस्य यदात्मानुभवनिश्चयावसानत्वं तस्य निष्ठाशब्दा
भिलापात् शास्त्राचार्योपदेशेन ज्ञानोत्पत्तिपरिपाकहेतुं सह
कारिकारणं बुद्धिविशुद्धत्वममानित्वादिगुणं चापेक्ष्य जनितस्य
क्षेत्रज्ञपरमात्मैकत्वज्ञानस्य कर्त्रादिकारकभेदबुद्धिनिबन्धनसर्व
कर्मसंन्याससहितस्य स्वात्मानुभवनिश्चयरूपेण यदवस्थानं
सा परा ज्ञाननिष्ठेत्युच्यते सेयं ज्ञाननिष्ठा आर्तादिभक्तित्रयापेक्ष
या परा चतुर्थी भक्तिरित्युक्ता तया परया भक्त्या भगवन्तं तत्वतो
भिजानाति यदनन्तरमेवेश्वरक्षेत्रज्ञभेदबुद्धिरशेषतो निवर्तते
अतो ज्ञाननिष्ठालक्षणया भक्त्या मामभिजानातीति वचनं न
विरुध्यते अत्र च सर्वं निवृत्तिविधायि शास्त्रं वेदान्तेतिहासपुरा
णस्मृतिलक्षणं प्रसिद्धमर्थवद्भवति विदित्वा व्युत्थायाथ भि
क्षाचर्यं चरंति तस्मात् न्यासमेषान्तपसामतिरिक्तमाहुर्न्यास ए

श्री॰
गी॰टी॰
म॰

238

वाक्ये च यदिति सन्न्यासः कर्मणां न्यासो वेदानिमं च लोकमम
ञ्च परित्यज्य त्यज धर्ममधर्मं चेत्यादि इह च दर्शितानि वाक्यानि
न च तेषां वाक्यानां आनर्थक्यं युक्तं नार्थवादत्वं स्वप्रकरणस्थत्वा
त् प्रत्यगात्माविक्रियस्वरूपनिष्ठत्वाच्च मोक्षस्य नहि पूर्वसमुद्र
जिगमिषोः प्रातिलोम्येन प्रत्यक् समुद्रजिगमिषुणा समान
मार्गत्वं सम्भवति प्रत्यगात्मविषयप्रत्ययसन्तानकरणाभिनि म॰
वेशश्च ज्ञाननिष्ठा सा च प्रत्यक् समुद्रगमनवत् कर्मणा सहभा
वित्वेन विरुध्यते पर्वतसर्षपयोरिवान्तरवान्विरोधः प्रमाण
विदां निश्चितस्तस्मात् सर्वकर्मसंन्यासेनैव ज्ञाननिष्ठा कार्येति
सिद्धं ५५ ॥

आनंदगिरि टीका २

ननु समाधिसाध्येन परमभक्त्यात्मकेन ज्ञानेन किं प्राप्तव्यमवा
प्यते तत्राह ततइति भक्त्या समाधिजन्यया मां यस्ताभिन्नत्वे
न प्रमुक्तया जानाति व्याप्नोतीत्यर्थः तदेव ज्ञानं भक्तिपरायणं
विवृणोति यावानिति आकाशकल्पत्वमनवच्छिन्नत्वमसंग
त्वं च चैतन्यस्य विषयसाधितत्वं प्रतिविपति यश्चेतमिति येन
द्वयबोधात्मत्वमात्मनोऽभ्यंते तान् प्रमुक्तं चैतन्यमात्रेति आ
त्मनि तन्मात्रेपि धर्मान्तरमपेक्ष्य धर्मधर्मित्वं प्रत्याह तत्त्वत इ
ति सर्वविक्रियाराहित्येनेत्या कौटस्थ्यमात्मनो व्यवस्थापयति
प्रज्ञरमिति उक्तविक्रियाभावे तदेव ज्ञानात्संबंधं हेतुमाहक्रम
पमिति तत्त्वज्ञानमनुपततत्फलं विदेहकैवल्यं लभत इति तत
इति तत्त्वज्ञानस्य तस्मादनन्तरप्रवेशक्रियायाश्च भिन्नत्वं प्रासे
प्रत्याह तावेति भिन्नत्वाभावे का गतिर्भेदोऽकेत्यत्राशंक्यौपचा
रिकत्वमाह किंतर्हीति प्रवेश इति शेषः ब्रह्मप्राप्तिरेव फलांत
रमित्याशंक्य ब्रह्मात्मनोर्भेदाभावान्न ज्ञानातिरिक्ता तत्प्राप्ति
रित्याह तेनेति ज्ञाननिष्ठया परया भक्त्या मामभिजानाती
त्युक्तमाक्षिपति नन्विति विरुद्धत्वं स्फोरयितुं शंकते कथमिति
विरोधस्फुटीकरणं प्रतिजानीते उच्यत इति तत्र ज्ञानस्योत्पत्ति

235

रेव विषयाभिव्यक्तिरित्याह यदेति एवकारनिरस्यं दर्शयति
नज्ञानेनेति इमावयोः सिद्धमिति शेषः ज्ञानस्योत्पन्नस्यैव विषया
भिव्यक्तत्वेपि कथं प्रकृते विरोधीत्याशंक्याह तत्त्वेति विरुद्ध
मिति शेषः शंकितं विरोधं निरस्यति नैषदोष इति उक्तमेव हे
तुं प्रपंचयति शास्त्रेति योहि शास्त्रानुसार्याचार्योपदेशस्तेन
ज्ञानोत्पत्तिः आचार्यवान् पुरुषो वेदेति श्रुतेः तस्याश्च परिपा
कः संन्यासादिप्रतिबंधध्वंसस्तत्र हेतुभूतस्तदुपदेशस्यैव स
हकारिकारणं यत्तु हित्वाद्यादि तदपेक्ष्य तस्मादेवोपदेशाज्ज्ञा
निते यदैक्यज्ञानं तस्य कारकभेदबुद्धिनिबंधनानि यानि सर्वा
णि कर्माणि तेषां संन्यासेन सहितस्य फलरूपेण स्वात्मन्येव
सर्वप्रकल्पनारहिते यदवस्थानं सा ज्ञानस्य परा निष्ठेति एव
क्रियते प्रामाणिकैरित्यर्थः यदि यथोक्ता पराज्ञाननिष्ठा क
र्थे तर्हि सा चतुर्थी भक्तिरित्युक्तेत्याह सेयमिति यथो
क्तया भक्त्या भगवत्तत्त्वज्ञाने सिध्यतीत्याह तयेति तत्त्वज्ञा
नस्य फलमाह तदनंतरमिति ज्ञाननिष्ठारूपया भगवद्भक्त्या।
तत्त्वज्ञानातिरेकात् तत्फलस्य वा ज्ञाननिष्ठतेस्तन्मात्रत्वात् वेदांते
ष्वौपचारिकत्वात् प्रकृते वाक्यमविरुद्धमपसिद्धमिति सुत इतिश्रो
पदेशीकेऽत्र ज्ञानस्य सर्वकर्मसंन्याससहितस्य स्वरूपावस्थाना
त्मकस्य परमपुरुषार्थोपयिकत्वमित्यस्मिन्नर्थे मानमाह सर्वे
ति तदेव शास्त्रमुदाहरति विविदिषन्त्यादिना दर्शितानि वाक्यानि स
र्वकर्माणि मनसेत्यादीनि तेषां वाक्यानामविवक्षितार्थत्वादाशि
स्तार्थे प्रामाण्यमित्याशंक्याध्ययनविध्युपात्तत्वात् वेदवाक्यानामन्त
रंगतोपि तात्स्वर्थ्ये तेषां नैवमित्याह नचेति तथापि स्तोत्रादिस्थादिव
त्स्वार्थे मानतेत्याशंक्याह न चार्थवादत्वमिति इतश्च संन्यासोऽपेक्षि
क्र. तमोक्षोपयिज्ञाननिष्ठस्य संन्यासेऽधिकारेण कर्मनिष्ठायामित्याह
प्रत्यगिति ज्ञाननिष्ठस्य कर्मनिष्ठाविरुद्धेत्यत्र दृष्टान्तमाह न हीति
ज्ञाननिष्ठास्वरूपत्वादस्यैवं कर्मनिष्ठया तस्याः सहभावित्वं विरु
द्धमिति दार्ष्टान्तिकमाह प्रत्यगात्मेति कथं ज्ञानकर्मणोर्विरोधधी
रित्याशंक्य कर्मणां ज्ञाननिवर्त्यत्वस्य श्रुतिस्मृतिसिद्धत्वादित्याह

श्री॰
गी॰टी॰
प्र॰

२३१

एवंतेनेति भेदरवान्भयोरेकधर्म्मिनिष्टत्वेन सोपाधीभावस्यादक
भेदवानित्यर्थः ज्ञानकर्मणोः समुच्चये फलितमुपसंहरति तस्मादिति
५५ ॥

स्वामिकृतटीका ३

ततश्च भक्त्या मामिति तया च परया भक्त्या तत्त्वतो माम् अभिजानाति
कथंभूतं मायावान्सर्वव्यापी यश्चास्मि सच्चिदानंदघनं तत्त्वाभूतं ततश्च
मामेवं तत्त्वतो ज्ञात्वा तदनंतरं तस्य ज्ञानस्योपरमे सति मां विशते परमा
नंदरूपो भवतीत्यर्थः [illegible]
[illegible] ॥

पिशाचभाष्यटीका ४

इदानीं ब्रह्मस्वरूपावगतौ श्रमासत्वं कारणमाह भक्त्याभजनेन मां सर्वे
श्वरम् अभिजानाति सर्वगश्चेतिया वानहमस्म्युपाधिकृतो भिन्नप्रपंचस्वरू
पेण यश्चास्मीति सर्वात्मसमस्तोपाधिस्वरूपेणेति च तत्त्वतः परमार्थः
एवं तत्त्वतो ज्ञात्वा तदनंतरं विशते अविशति ब्रह्मैव संवृत्ततेत्यय
त इत्यर्थः चतुर्थाध्याये उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतमिति
कृत्वात् ५५ ॥

रामानुजभाष्यटीका ५

भक्त्येति स्वरूपतः स्वभावतश्च योऽहं गुणतो विभूतितो यावांश्चाहं तं
मामेवंरूपया भक्त्या तत्त्वतो विजानाति मां तत्त्वतो ज्ञात्वा तदनंतरं ततो भ
क्तितो मां विशते प्रविशति तत्त्वतः स्वरूपस्वभावगुणविभूतिदर्शनो
त्तरकालभाविन्या अनवधिकातिशयभक्त्या मां प्राप्नोतीत्यर्थः अत्र तत इ
ति प्राप्तिहेतुतया निर्दिष्टा भक्तिरेव भक्त्या त्वनन्यया शक्य इति तत्प्राप्
वतत्वतः प्रवेशहेतुत्वाभिधानात् [illegible]
[illegible]
[illegible]
[illegible] ५५ ॥

अभिनवगुप्तकृतटीका ६

स्पष्टार्थम् ५५ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका ७

ततश्च भक्त्येति तया सर्वात्मकत्वभावनारूपया भक्त्या अहं यावान् वि
श्वव्यापी यश्च परमानंदस्वरूपः एवंभूतं माम् अभिनः स्थावरजंगमेषु

प्रवर्तमानं जानाति ततस्तत्त्वमेतत्त्वतश्चिस्से विलक्षणत्वेन ज्ञात्वा तदने
नंतरं तत्त्वज्ञानोपरमे मां विशते महाकारो भवति ५५ ॥

वनमाली टीका ८

यथा भक्त्या सर्वेतेन गुणमाकाशवदसंगोदासीनमपि विभोर्दैहिकतो या
रेसर्वंभनमममपि स्वाश्रितवत्सलेत्युष्टनिग्रहतत्परं मां यत्प्रसादलब्धज्ञा
नेन तत्त्वतो जानाति यावाननन्तैश्वर्यदर्शनापत्नीयोर्नेतशक्तिमान्यश्चास्मि
नेदंचनस्वरूपकं मां तत्त्वतो जानाति नैवेंद्रजालिकमिवाविद्यमानश्च
दर्शकमनाटकमायाविनेदंमरवज्ञानाति यथादैमाश्चचक्षुर्दर्शनापत्नी
यः सामर्थ्यमिथ्यायोग्यतारकत्ववज्ञानेति स्वबाज्ञानिवादयेतथानजाना
ति किंतु याद्दशमवाप्तितेमदर्चिस्यसामर्थ्यता दृशं स्वयोग्यतानवसारात्स्म
गज्ञानातीत्यर्थः ततो भक्ति सर्वकर्मपरीतो तत्त्वं मां तत्त्वतः प्रसन्नं ज्ञात्वा
मां विशते मत्स्वरूपं सायुज्यं प्राप्नोतीति तदनंतरं मत्प्रसादप्रकाशे परेण
ज्ञानात्यव्यवहितोत्तरक्षणमेव न तु किंचिद्विलंबेनेत्यर्थः यद्वा ततो भ
क्तिः सर्वकर्मदर्पणेतानंतरं तत्त्वतः प्रारब्धकर्मक्षयपूर्वकं ज्ञात्वा तदनंत
रं मां प्रारब्धकर्मक्षयसहितभगवद्दर्पणो ज्ञात्व्यवहितोत्तरक्षणे विशति इत्यर्थः
५५॥

कुसुमवैजयंती टीका ९

ननु किं प्राप्य ज्ञानस्य किं फलं स्यादित्यपेक्षायामाह भक्त्येति स्वरूप
तःस्वभावतश्चाहं यावान्यश्चास्मि तत्सर्वं यथाभूतं मां भक्त्यैकरूपिकया पर
यामनन्यया तत्त्वतः स्वरूपस्वभावगुणशक्तिविभूतीनां याथात्म्ये
नाभिजानात्यनुभवति ततो मत्प्राप्तिहेतुभूतया समस्तया आश्रयाभि
चारिण्या मद्भक्त्या हेतोर्भक्त्यात्मनन्ययाशाक्यश्चेकं ज्ञात्वात्मायतः
प्रवृत्तिर्भूतानां येन सर्वमिदं ततं उत्तमः पुरुषस्त्वन्यः परमात्मेत्यु
दाहृतः इत्यादिनोक्तलक्षणमुपक्षोत्तमं तत्त्वतः स्वरूपादियाथात्म्ये
न ज्ञात्वाः नभूयतदनंतरं न साभक्ते र नंतरं प्रख्यां मां विशते देवदत्तो। ५त
ग्रामं प्रविशतीत्यादिवन्मगामहमुपैति न तु मत्स्वरूपं भवतीत्यर्थः
यद्वा तत इति ल्यब्लोपे कर्मणि पंचमी परया भक्त्या मां तत्त्वतो ज्ञात्वा
तदनंतरं भक्तिमादायैव मां विशते नो मोक्षेपि भक्तिरस्तीत्येवं लक्षका
रोप्याह श्रवणकीर्तनयापि हि हृष्यामीति ग्राम्ययाणादामोहात्ते न

पति

श्री
गी·टी·
प्र·

त्रापिमोक्षेचभक्तिरनुवर्ततेइत्युक्तंतोहष्टमितिसूत्रार्थः भक्त्याविनष्टा
विद्यानांभक्त्याख्यादोषविवर्द्धनेसितयानष्टपिनानोशितात्वादोषयथाभवे
दितिवचनात् ५५ ॥

मधुसूदनी टीका ९·

240

तथा भक्त्यानिदिध्यासनात्मिकयाज्ञाननिष्ठयामामद्वितीयमात्मानमभिजा
नातिसाक्षात्करोतियावान्विभुर्नित्यअपरिच्छिन्नःसज्ज्ञानानंदघनः
सदाविध्वस्तसर्वोपाधिःशुद्धैकरसएकत्वावेनेचाभिजानातिततोमामेवम
त्वेनोक्ताज्ञात्वाअहमस्मिविज्ञानेनाद्वितीयब्रह्मेतिसाक्षात्कृत्यविशतेज्ञानानन्त
कार्यनिवृत्तौसर्वोपाधिनिवृत्त्यामद्रूपएवभवतितदनंतरंवलवत्प्रारब्धभोगे क
नदेहपातानंतरंननुज्ञानानंतरमेवकस्मात्प्रयात्येवतल्लाभेनतदनंतरमित्य
स्यैवयथोपपन्नत्वात् तस्यतावदेवचिरंयावच्चविमोक्ष्येऽथसंपत्स्यइति
श्रुत्यर्थस्यैवात्रदर्शितोभगवता यद्यपिज्ञानेनाज्ञानेनिवर्तितेतमेवदीपने
वतमस्तस्यतद्विरोधिस्वभावत्वात् तथापितदुपादेयमहंकारदेहादिनिरु
पादानमेवयावत्प्रारब्धकर्मभोगमनुवर्ततेदृष्टत्वादेवनहिदृष्टेनुप
पन्नंनामतार्किकैरपिसमवायिकारणनाशात्द्रव्यनाशमंगीकुर्वद्भि
र्निरुपादानेदृष्टगुणमात्रेतिष्ठतीत्यंगीकृतेतिपरमाणुसमवेतद्व्यणुक ५प
नाशेतत्समवायिकारणनाशात्द्व्यणुकनाशःसमवायिनिरूपितकारणना
शात्समभूयोरनुगतमितिनाननुगमः येवसमवायिकारणनाशमेवस
र्वत्रकार्यद्रव्यनाशकमिच्छंति तेषामाश्रयनाशस्यलेशात्द्रयमनुपादाने
कार्येतिष्ठति एवंचतत्त्वेवगतेऽपिनिवर्तसंनिपातेवहुकालावस्थितिः केनवा
र्यते प्रारब्धकर्मणाप्रतिबंधकत्वेनोक्तमितिसिद्धंप्रतःकारणदेहाद्यवस्थि
तत्त्वानुपपत्तिसिद्धेचएवंशिष्टमेवकार्यदृष्टमपितत्त्वतिबंधकेतर
भावमपेक्ष्यचरस्वंसिद्धवाज्ञाननाशत्कार्यमंतःकरणादिकंनाशय
तीतितत्त्वज्ञानापेक्षानद्धंकेतीर्थेश्वपचगृहेवानष्टस्मृतिरपिपरित्य
जन्देहं ज्ञानसमकालमुक्तः कैवल्यंयातिहतशोकइति नजानामी
त्यादिप्रपपत्ततत्त्वानिवृत्तमात्तानस्यापिज्ञाननाशजनितादनुपादाना
त् सार्वात्म्याद्यादेवाज्ञानसंस्कारात्तत्त्वज्ञानसंस्कारनिवर्त्यादंतःकर
णस्थितिमवधेहीतिविवरणकृतः अद्वैतसत्यमीतिचरमसाक्षात्कारानं।
तरमहंवलनभवामिनजानामीत्यादिभ्रमोनास्तिसर्वथापिचेदे न
जानामीत्यादिभ्रमयः स्यात्तदुपपादनायैवयमस्कारकल्पनेतिनानुप

२७

यत्रे अज्ञानलेशापदेनाप्ययमेव संस्कारो विवक्षितः तद्धिसावय
वमज्ञानं येन किं यत्र रूपतिकियन्निश्चनीतिवाच्यं अनिर्वचनीयत्वा
देकदेशाभ्युपगमेन तन्निवृत्तिसमर्थे शुभ्रं संस्कारमपेक्षितमेव तच्च
स्तितिकाले इत्थं दर्शितमिति तत्त्वज्ञानं संस्कारनाशपर्यन्तं सामर्थ्येणानन।
अस्य संस्कारपतात्रकोऽपि विशेषः इति श्रौतैकैव कल्पनाश्रेयसी इत्थं
जीवन्मुक्तापेक्षया चरमाभवतोक्तत्वपदेशोऽतिनेज्ञानेज्ञानिन स्तत्त्वद
र्शिनः स्थितप्रज्ञलक्षणानि व्याख्यातानि तस्मात्साधूक्तं विशतेतदन
न्तरमिति तत्त्वयोगात्मनोः सद्भावतः करणः सोऽन्तःकरणशुद्धिपर्यन्तं।
तेसहजं कर्म न त्यजेत् यस्त्वशुद्धान्तःकरणः स तेन कर्मसिद्धिं संन्या
सेनापि गच्छतीत्युक्तं संन्याससाधनाल्लाभेनेव कर्तव्योऽनन्तविधवैष्णा
व्यामिति निषाद्युक्तं भगवता कर्मणैव हि संसिद्धिमास्थिता जनकाद
यश्च तच्छुद्धान्तःकरणेन तु विषयादिना किं कर्माण्यनुष्ठेयानि।
किं वा सर्वकर्मसंन्यासः कर्तव्यः नाद्यः आरुरुक्षोर्मुनेर्योगं कर्म।
कारणमुच्यते योगारूढस्य तस्यैव शमः कारणमुच्यते इत्यादिना
योगमन्तःकरणशुद्धिमारूढस्य कर्मानुष्ठानानिषेधात् न द्वितीयः
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः इत्यादिनाब्राह्मणधर्मस्य स
र्वकर्मसंन्यासस्य विद्यादिके प्रतिनिषेधात् न च कर्मानुष्ठानक
र्मत्यागयोरन्यतरस्याशास्त्रीयः प्रकारोऽस्ति न स्यादुभयोरपि प्र
तिषिद्धत्वेनायोग्यत्वेन अभावेन चावश्यं कर्तव्यप्रतिषेधासिद्धेः कर्मत्या
ग एव श्रेयान् सर्वत्र हेतुपरित्यागेन मोक्षसाधनपौष्कल्यात् न तु क
र्माण्येव श्रेयानिति विनाविद्या परेहत्वेन मोक्षसाधनज्ञानप्रतिबन्धक
त्वादित्यभिप्रायमर्जुनस्यालक्ष्याह भगवान् ॥ ५५ ॥

सदानेरी टीका ॥

निदिध्यासनरूपिण्या भक्त्यात्मज्ञाननिष्ठया मामद्वितीयमात्मा
नं सम्यक् साक्षात्करोति सः १ यावान् विभुः सर्वनिरपेक्षः पूर्णेऽद्वयनोऽ
द्वयः सच्चिदानन्दरूपः सर्वोपाधिविवर्जितः सदामलः २ यश्चैकरसः
स्वरूपात्वेन मां च तत्त्वतः अभिजानाति सर्वज्ञस्तत्त्वो मां सर्वथाधितः
३ ततो मां सम्यग् विदित्वाऽनन्तरं द्वैतलीनं सद्विपा साक्षात्कृत्य निवृत्यात्मा।
ज्ञानसम्पत् कल्पस्य च ४ सर्वोपाधि विनिर्मुक्तो मद्रूपः केवलो भवेत्

आरब्धकर्मभोगेनदेहपातादनंतरं ५ कैवल्याख्यंपरंधाममामेव
विशतेमतिः यद्यपिज्ञानसंप्राप्तिसमयेभगवद्वपुः ६ ज्ञानीतथा
पिआरब्धकर्माभासेननदृश्यः नराकारतयाभातिव्यवहारेऽज्ञदेह
वत् ७ आरब्धकर्मणामीचीणामज्ञामायामयंवपुः चिदानंदपरेस्वा
त्मन्यैनरूपएववत् ८ तिष्ठतीतिहरेरेवनान्यथामिहगम्यते य
द्यपिब्रह्मबोधेनाज्ञानेसर्वनिवर्तते ९ दीपेनेवतमस्तस्यनहिदोषि
स्वभावतः तथापितदुपादेयंदेहादिब्रह्मवेदिनः १० निरुपादान
मेवानुवर्ततेनिजकर्मणा दृष्टत्वादेवदृष्टेनानोपपन्नेमनागपि ११
तार्किकैरपिहेतोश्चविनाशात्समवायिनः निरुपादानकंद्रव्यंक्षणं
मात्रंहितिष्ठति १२ इत्येवंस्वीकृतेनतदस्माकमपिसंभवेत् तत्रा
पिकल्पनादितयायोग्यःस्यात्किल १३ शरीरादिस्थितेरेवमिथ्या
तेनोप्यदोषता येरप्यज्ञानलेशोत्रस्वीकृतस्तैरपिस्फुटं १४ देहादि
स्थितिसिद्ध्यर्थंनिर्वाह्यंनत्वथंचन आभासमात्रदेहादावहंकारोपि
तादृशः १५ नहितेनविनातत्रदेहादिस्थितिसंभवः नचानेना
प्यहंकाराभासेनात्मविदःक्षतिः १६ तदुक्तंज्ञानकीनाथैराचार्यैर्वृप
तिमद्वचः वसिष्ठेनापिनिर्वाणप्रकरणाख्यायिकास्थले १७ अहं
भावंविनादेहस्थितिस्त्वज्ञात्तयोरिह आधेयमानिराधारानसंस्थेहो
पपद्यते १८ अहंभावपिशाचोयमज्ञानशिशुनामना अविद्यमान
एवांतःकल्पितस्तेनसंस्थितः १९ अज्ञानमपिनास्त्येवप्रतिनेय
ज्ञलभ्यते विचारिणादीपवतास्वरूपेणमसोयथा २० किलसत्यामा
विद्यायामज्ञानोदेतिशाखिनी बुद्धिर्मोहात्मिकाप्रज्ञानिर्दृष्टवपुष्यति
शि २१ एवंस्थितेऽज्ञतःसर्गःकृतोऽविद्याकचात्मता ब्रह्मशांतेच
नेमंसर्वेकाहंकारादयःस्थिताः २२ अहंभावसमंशान्तिरेषासौकथि
तानव अहंभावःपरिज्ञातःपिशाचवद्वशाम्यति २३ चिदाग्निदा
होविज्ञानोयथादाहोत्रनिष्फलः तथाहंभावसर्गोदिज्ञातेनिष्फल
ताभियात् २४ एवंतत्त्वविदोदृष्यानात्मनोहंकारएवच अजातिमवि
मलःसन्नचात्मसन्निवर्तते २५ इत्येवंश्रीहरेर्भावोगम्यतेवेदवाक्यतः
२६ ॥५५॥

अस्याथ्यैनात्मनत्वज्ञानलक्षणायाभक्तेःफलमाह भक्त्येति मांतु

क्त विधया भक्त्या ज्ञानी श्रमितः साकल्येन जानाति साकल्यमेवा
ह यावानिति किमहमणुपरिमाणो वा देहसंमितो वा तार्किका
णामिवाकाशवत्सकलमूर्त्तद्रव्यसंयोगित्वलक्षणविभुत्वाश्रयो
वा सप्रपंचो वाद्वैतवादिनामिव स्वगतभेदवान्वाऽविदेकरसो वेति यावि।
माणं तत्त्वतो मां तत्पदार्थं जानाति तथा यश्चास्मीति देहेंद्रियप्रा।
ण मनस्तामसं तमः कियत्कालस्थायी वा क्षणिकविज्ञानरूपो वा पूःस।
वाकर्ता भोक्ता वा जडो वा जडाजडरूपो वा चिद्रूपो भोक्ता वाकर्तृत्वभोक्तृ
त्ववर्जितस्तथानेकत्वेनो वेति तत्त्वतः सर्वसंशयराहित्येन मामज्ञानमसम
भवमभ्योके जानाति तथा च श्रुतिः भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसं
शयाः क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावरे इत्यात्मदर्शनेन स
ति सर्वसंशयच्छेदं दर्शयति एवं तत्त्वतो वापि मां विदित्वा सर्वदेवेश्व
भारतेनात्मके: सर्वदेवेश्वरं केमां विश्वं साक्षिदानंदघनं तत्त्वतो ज्ञात्वा सर्वो
पाधिविनिर्मुक्तं यायात्म्यं तत्त्वं साक्षात्कृत्य मननोऽध्यामोक्षस्वभावे
गतो भवतीत्यर्थः ब्रह्मवेद ब्रह्मैव भवतीति श्रुतेः यद्वा तदनंतरं कारण
ब्रह्मभावापत्तिः सर्वात्मरूपा प्रथममुक्ता यएवंवेदाहं ब्रह्मास्मीति स
इदं सर्वं भवति सएतमेव पुरुषं ब्रह्म ततममपश्यदित्यादिश्रुतिभ्यो
मुक्तानां सार्वात्म्यावगमात् ततमंतनंतमेकस्तत्कारणं द्वादसोत्र
क्रियायोल्लमोदश्च्यवन् निष्क्रिन्तिभाष्यं अनंतरं कारणाभावापत्तेर
नुपदमेव तत्र ब्रह्मतत्त्वज्ञानाभिधेयं तदिति वा पतस्य महतो भूतस्य ना
मभवतीति श्रुतेः शुद्धब्रह्मविशनेरूपेणाप्याये प्रति विवो विवमिव
प्रविशति कार्योपाधीनां जीवानां कारणोपाधीश्वरप्रामित्यैव नि
ष्कलब्रह्मप्राप्तिरित्याविदितं प्रागेव यद्वा मां ज्ञात्वानंतरं विशते इत्येताव
तैव ज्ञानप्रवेशयोः पौर्वापर्ये सिद्धे तदनंतरमिति पदेन सकर्वेनव
श्रिस्यदेहपरमस्त एव तत्स्मानानं तरमिति व्याखेयं यतो ज्ञानेपिवज्ञा
नेयावद्देहपातं प्रारब्धकर्मणाम निवर्त्याहि देहकैवल्यं न प्राप्यते प्रब
णज्ञानसमकालमेव देहपातापत्तिः स्यात् विद्वत्कर्मस्वविरुद्धत्वेन भूय।
स्तेनैवच्छमायानिवर्त्तिरिति श्रुतकसारुक्तिं निहितायाश्च मायायाः पु
नर्निवृत्ति वद्जीवन्मुक्तिशास्त्रवाधिनेस्यात् यत्तार्किकाणां न
ष्टेपि सम्वाधिकारणोपदादिकं नाममात्र मवतिष्टते एवमस्माक।

श्री
गी टी
अ॰

२४२

मपिश्रुतादिकालायाः देहाद्युपादानभूताया अविद्याया विनाशेऽपि
किंचित्कालं देहादिप्रतिभानं युज्यते ईदृशमेव जीवन्मुक्तमपेक्ष्य
भगवतोक्तं उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिन इति स्थितप्र
ज्ञलक्षणं स्मृतिरपि तल्लक्षणाभिधित्सयैव प्रवृत्तेति दिक् ५५

आनंदटीका १६

भक्तिफलमाह योऽहं परमात्मरूपः सर्वज्ञः सर्वकर्ता सर्वेश्वरः
अशरीरः सशरीरो वास्मि तमीदृशं मां भक्त्या योगसिद्धया पर
मात्मज्ञानलक्षणया हि पुरुषः मामीश्वरं परमात्मानमभिजा
नाति ^ तदनंतरं तदुत्तरकाले मां तत्त्वतः परमार्थतो ज्ञात्वा विशते
कैवल्यमापद्यते ५५ ॥

^ साक्षात्करोति प्रकृति
पुरुषकालेश्वरसं
ख्यानेन चातुरात्म्यप्र
तिपत्त्या वासुदेवः सर्वमि
ति प्रत्यभिजानाति ॥ ^

रामकंठीटीका १४

एवंविधया निरंतरया ज्ञानरूपया भक्त्या मां परमात्मानमेकं त
त्त्वमभिजानाति आत्मत्वेनाभिमुख्येन वेत्ति कस्मात् जानाति तत्त्व
तः परमार्थतो हि यच्चित्प्रकाशात्मैकोऽहमतत्त्वरूपः यश्चास्मि योऽभ
वामि नो परोऽसंतो भजंस्तादृक्स्वभावस्तत्त्वमपरिच्छेद्यरूपया स्वशक्त्या
नित्यमविमुक्तस्तिष्ठामि अतत्त्वविदो हि नैवंविधमात्मत्वेन मां प्र
त्यभिजानंते किं तु तेऽव्यतिरिक्तं परं वेद्यं च मायावशाद्विपर्ययेन ज्ञा
नत्वाज्ञानंति यथोक्तभक्तियुक्तस्त्वेवंविधं मां सत्येन रूपेण ज्ञानेन च
त्वा मां प्रत्यभिज्ञाय ततः परं मय्येव विशते अहमेव संपद्यते एवंविधे
हि मय्युपास्योपासकोपासाविकल्पज्ञानाद्वैतेनैव परं भूत्वा सिद्धार्थी
भवतीत्यर्थः एषा च परा सिद्धिः काष्ठाक्रमप्राप्या तत एवंविध
ज्ञाननिष्ठोऽपि योऽनियतशरीरसंबंधो यावदनिक्रांतो भवति योगी
तस्य प्रहाणिं प्रतिपादयितुमाह ५५ ॥

लासिकी टीका

यतः यावान् सर्वव्यापी अनंत इत्यर्थः यश्चास्मि सच्चिदानंदघनस्तत्त्वतः
परमार्थतोऽस्मि तादृशमेव मामीश्वरं भक्त्या सर्वात्मकत्वलक्ष
णेनोपासनेनाभिजानात्यात्मत्वेन प्रत्यभिजानाति ततः प्रत्य
भिज्ञानंतरं मामीश्वरं तत्त्वतः समष्टिव्यष्टिरूपविशेषतया ज्ञात्वा प्र
तिपद्य जीवन्नेव मुक्तिमनुभूय तदनन्तरं समष्टिव्यष्टिरूपविशेष

तयाप्रतिपत्त्यनंतरंमामीश्वरमभेदेनसमाविशते अहमेवस
र्वात्मकईश्वरःसंपद्यतेइत्यर्थः५५ [illegible]
[illegible] ५५

पंचोलीटीका

ततश्चभक्त्येति ततोज्ञानलक्षणयाभक्त्याहंयावद्रूपाधिकृतविस्ता
रभेदःयश्चाहंविधस्तसर्वोपाधिभेदःउत्तमःपुरुषःआकाशकल्पः
तेमांअद्वैतंचैतन्यमात्रैकरसंअजमभयमप्रतिबंधनंतत्त्वतोऽभिजा
नातितदनंतरंमांतत्त्वतोज्ञात्वामामेवविशते ५५

अगवीरसमिद्धोधिनी

तयाचभक्त्यामांपरमेश्वरमभिजानाति कथंयावान् यद्विभूतिका
इत्यर्थः तत्त्वतः परमार्थतोयश्चसर्वात्मकोऽस्मि ततश्चमांतत्त्व
तः परमेश्वरस्यैवेयंविभूतिर्यदिदमुपलभ्यते सएवचास्यसर्ग
स्थितिप्रलयेषुस्वतंत्रःकर्ता निमित्तमात्रंतस्मात्प्राणत्प्रेरितोवर्ण
इत्येवंविज्ञाय तदनंतरं तद्दित्यनभिसंधायफलंयज्ञतपःक्रियाः
दानक्रियाश्चविविधाःक्रियतेमोक्षकांक्षिभिरितिप्राग्युक्तदिशा तदि
तिपरमेश्वरनामोच्चारणानंतरंविधीयमानं यथावर्णादितत्त्वज्ञानादिक
र्मविशतेऽनुतिष्ठति ५५

मधुभाष्य

५५॥

243

भाषा अनुवाद टीका

तिसके अनंतर वही उत्तम भक्तिके द्वारा हमको यथार्थरू
पसे जानताहै और मै कैसाहूं इस अपेक्षापर कहते हैकि
जिसरूपहम सर्वव्यापी और सच्चिदानंदस्वरूपहै तैसा हम
कोजानतेहै और तिसके अनन्तर हम को ऐसे यथार्थरूप
से जानिके फेर उसज्ञान के उपर करहे शान्तहोने वर हमा
रे ही मे प्रवेश करते अर्थात् परमानंदस्वरूप होते है ५४

दोहा

मोकों जानहि भक्तिसें यावत हों तत्वजोहि तवसें मो
हि जानके प्रविशोहि फिर मोहि ५५॥

244

सर्वकर्माण्यपिसदाकुर्वाणोमद्व्यपाश्रयः
मत्प्रसादादवाप्नोतिशाश्वतेपदमव्ययं ५६

शांकरभाष्य टीका १

स्वकर्म्मणा भगवतोऽभ्यर्चनभक्तियोगस्य सिद्धिप्राप्तिः फलं ज्ञा
ननिष्ठायोग्यता यन्निमित्ता ज्ञाननिष्ठा मोक्षफलावसाना स भगव।
द्भक्तियोगोऽधुना स्तूयते शास्त्रार्थोपसंहारप्रकरणे शास्त्रार्थनि
श्चयदार्ढ्याय सर्वकर्माण्यपि प्रतिषिद्धान्यपि सदा कुर्वाणोऽनुतिष्ठ
न् मद्व्यपाश्रयोऽहं वासुदेव ईश्वरो व्यपाश्रयो यस्य स मद्व्यपाश्रयो मय्य
र्पितसर्वात्मभाव इत्यर्थः सोऽपि मत्प्रसादान्ममेश्वरस्य प्रसादा।
दवाप्नोति शाश्वतं नित्यं वैष्णवं पदमव्ययं ५६ ॥

आनंदगिरिकृतटीका २

तर्हि ज्ञाननिष्ठयैव मोक्षसंभवात्र कर्मानुष्ठानसिद्धिरित्याशंक्या
ह स्वकर्मणेति तामेव सिद्धिप्राप्तिं विशिनष्टि ज्ञानेति ज्ञान
निष्ठायोग्यतायै स्वकर्मानुष्ठानं भगवदर्चनरूपं कर्तव्यमित्यर्थः
ज्ञाननिष्ठायोग्यतापि किमर्थेत्याशंक्य ज्ञाननिष्ठासिद्ध्यर्थेत्याह य
न्निमित्तेति ज्ञाननिष्ठापि कुत्रोपयुक्तेत्याह मोक्षेति स्वकर्मणा
भगवदर्चनात्मनो भक्तियोगस्य परम्परया मोक्षफलस्य कार्यत्वे
न विधेयत्वे विप्रतिपत्तिं निवारयति स भगवदिति ज्ञा
ननिष्ठा कर्मनिष्ठेत्युभयं प्रतिज्ञाय तत्र तत्र विभागेन प्रतिपा।
दिते किमितीदानीं कर्मनिष्ठा पुनस्तूयते कर्तव्यतयोच्यते त
त्राह शास्त्रार्थेति तत्तत्रोक्तस्यैव कर्मानुष्ठानस्य प्रकरणवशा
दिहोपसंहारः सर्वशास्त्रार्थनिश्चयस्य दृढत्वं द्योतयतीत्यर्थः
यद्यपि कस्यचित् कर्मानुष्ठायिनो बुद्धिशुद्धिद्वारा कैवल्यं सिध्य
ति तथापि पापबाहुल्यादकर्मानुष्ठायिनोऽपि कस्यचिद्बुद्धिशुद्ध्यभा
वे कैवल्यासिद्धिरित्याह सर्वकर्माणीति सर्वशब्दानुगुण्यादीश्वरा
राधनस्तुतिपरत्वेन श्लोकं व्याचष्टे प्रतिषिद्धान्यपीति विशेषणमिति
कदाचिदित्यपेरर्थः निषिद्धाचरणस्य प्रामाणिकत्वं व्यावर्तयति सदे

श्री- गी टी- पु-

ति मन्निष्ठैवैसर्वं पदमाप्नोतीति सम्बन्धः पापकर्मकारिणो
यथोक्तपदप्राप्तौ पापस्यापि मोक्षफलत्वमापद्येतेत्यादितत्राह म
द्व्यपाश्रय इति न सैव तात्पर्यमाह मयीति नहि ज्ञानस्य मोक्षहे
तुत्वमपैतीत्यादित्यत्राह सोपीति ५६ ॥

245

+स्वकर्मभिः श्रीपरमेश्वराराधनात्प्रोक्तं मोक्षप्रकारमुपसंहरति सर्वकर्माणीति +

स्वामिकृत टीका ३

सर्वकर्माणि नित्यानि नैमित्तिकानि इष्टापूर्तानि च कर्माणि काम्यानि
क्रमेण मद्व्यपाश्रयः सन्कुर्वाणः अहमेव व्यपाश्रय आश्रयणीयः
न तु स्वर्गादिफलं यस्य सः मत्प्रसादाच्छाश्वतमनादि अव्ययं नित्यं स
र्वोत्कृष्टं वैष्णवं पदमाप्नोति ५६ ॥

पिशाचभाष्यटीका ४

सर्वकर्माणि सर्वाणि कर्माणि अनिषिद्धान्यपि सदा कुर्वाणो मद्व्या
त्मद्व्यपाश्रयो यस्य समद्व्यपाश्रयः ईश्वरमेवाहं शरणं प्रपन्नः
स एव मम योगक्षेमनिर्वाहक इत्यभिनिवेशवानित्यर्थः मत्प्रसादा
द्वाप्नोति शाश्वतं पदमनादि अव्ययमनन्तं विष्णोः प्राप्नोतीत्यर्थः ५६

+एवं वर्णाश्रमोचितनित्यनैमित्तिककर्मणां परित्यक्तफलादिकानां परमपुरुषाराधनरूपेणानुष्ठितानां विपाक उक्तः इदानीं काम्यानामपि कर्मणामुक्तेनैव प्रकारेणानुष्ठीयमानानां स एव विपाक इत्याह ॥

रामानुजभाष्य टीका ५

+सर्वेति न केवलं नित्यनैमित्तिकानि कर्माण्यपि तु काम्यान्यपि स
र्वाणि मयि संन्यस्य कर्तृत्वादिकं कुर्वाणः मत्प्रसादाच्छाश्वत
पदमव्ययं अविकलं प्राप्नोति पद्यते इति पदं मां प्राप्नोतीत्यर्थः यस्मा
देवं तस्मात् ५६ ॥

अभिनवगुप्तकृत टीका ६

स्पष्टार्थम् ५६ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपादी टीका ७

अथ तद्धा विशुद्धयेत्याद्युक्तमोक्षप्रकारस्यातिप्रयाससाध्यत्वा
त्सुगमं प्रकारमाह सर्वकर्मेति सदा निरन्तरं मद्व्यपाश्रयः अह
मेवाश्रयः आश्रयणीयो न तु स्वर्गादिफलं यस्य सः सर्वकर्माणि नि
त्यनैमित्तिकादीनि कुर्वाणोपि मत्प्रसादान्नित्यं सर्वोत्कृष्टं च पदं स्था ने
नं प्राप्नोति श्रुतिरपि ऋक्संहितायां अहमेव स्वयमिदं वदा
मि जुष्टं देवेभिरुत मानुषेभिः यं कामये तं तमुग्रं कृणो
मि तं ब्रह्माणं तमृषिं तं सुमेधामिति भाष्ये अहमेव स्वयमिदं

२०४

ब्रलाभ्येव स्लवदामि इदं अलस्यमेवास्तीति वदामीत्यर्थः देवे
ष्मिदेवैर्हरिहरादिभिर्ज्ञे ह्येसेविते उत्तापिमानुषेभिर्मनुष्यैः सेविते श्र
येतदेवशकटपन्याह ईहवत्साम्भिकाहेशोमायाम यिशाय एतमा
नुष्ठवेषामतीयंकामेकामये येष्ठरुभिरवितनुमहंवोत्झामितेष्ठरुषं
तुष्येक्रणोमिसर्वैर्भोग्यपधिकेनदैकरोमिनद्दपदेवीणपयामितमेवत्र
ल्लाणांसष्टांकरोमि नमेवऋषिमंनीहियदष्टांकरोमि तमेवस्न
मेधांशोभनमत्रसंज्ञानेकरोमि ६६ ॥

वनमाली टीका ८

ननुशुद्धांतःकरणेन तत्रियादिना किंकर्माण्यनुष्ठेयानि किंवा सर्व
कर्मसंन्यासः कर्तव्यः नाद्यः शुद्धांतःकरणस्य कर्मानधिकारात् योगा
रूढस्य तस्यैव शमः कारणमुच्यत इत्यादिना योगारूढस्य कर्मनिषेधा
त् न द्वितीयः स्वधर्मे निधनं श्रेयः परधर्मो भयावह इत्यादिना ब्राह्मण
धर्मस्य सर्वकर्मसंन्यासस्य क्षत्रियादिकं प्रति निषेधात् न च कर्मानुष्ठा
नकर्मसंन्यासयोरन्यतरमेतरेणात्तृतीयः प्रकारोऽस्ति तस्मादुभयोरपि
प्रतिषिद्धत्वे गत्यंतराभावेन वा व्यापकतेत्यतिषेधातिक्रमे कर्मत्या
गपक्षेऽपां बंधहेतुपरित्यागेन मोक्षसाधनपोषकत्वादनंतकर्माण्येव
षेयानि चित्तविक्षेपहेतुत्वेन मोक्षसाधनज्ञानप्रतिबंधकत्वादित्यभि
प्रायमर्जुनस्यालक्ष्याह सर्वेति यः पूर्वोक्तैः कर्मविशुद्धांतःकरणः सोव
श्यं भगवदेकशरणतापर्यंतस्वांतःकरणशुद्धेः एतादृशश्चेद्ब्राह्मणः
संन्यासप्रतिषेधरहितः सर्वकर्माणि संन्यस्यतु नाम संसारविमोक्षस्त
तस्य भगवदेकशरणस्य भगवत्प्रसादादेव एतादृशश्चेत्क्षत्रियादिः सं
न्यासानधिकारी स करोतु नाम कर्माणि किंतु मद्व्यपाश्रयः शुद्धेवासदेवः
सर्वेश्वरो व्यपाश्रयः शरणं यस्य स मदेकशरणो मय्यर्पितसर्वात्मभावः
संन्यासानधिकारात्सर्वाण्यपि स्वधर्मरूपाणि लौकिकानि च सदा कुर्वा
णो मत्प्रसादान्मम सर्वेश्वरस्यानुग्रहादवाप्नोति शाश्वतं नित्यं वैष्णवम
व्ययमपरिणामि मदेकशरणो निषिद्धकर्माणि न करोत्येव यदि कुर्यात्त
थापि मत्प्रसादात्सर्वायानुत्सयामहिमाज्ञानेनैव मोक्षभागेव न तु भ्रष्टो भवे
तीति भावः ६६ ॥

उत्तमवैजयंतीमस्थः ९

एवं यदि यो मनुष्यः स्ववर्णाश्रमोचितानि मदाराधनलक्षणानि कर्माणि
करोति तर्हि स मत्प्रसादाच्छाश्वतं पदमेव प्राप्नोतीत्याह सर्व[illegible]कर्माणीति

श्री॰
गी॰टी॰
भु॰

246

यद्वा यथाश्रयो मदव्यपाश्रयः सर्वकर्माणि स्ववर्णाश्रमयोग्यानि नित्यनै
मित्तिकानि महायज्ञादीनि सर्वशब्दात्काम्यानि विहितानामपि प्रायेण सर्वपि म
शब्देन तानि निराकृत्य निन्द्यान्येव संगृह्यन्ते सदा सर्वस्मिन्काले देशे
वस्थायां वा कुर्वाणः सन्मत्प्रसादान्मदनुग्रहात् शाश्वतं नित्यमव्ययम्प
रिणामशून्यं पदं लोके वैकुंठाख्यं यद्वा पद्यते गम्यते इति सुखसापदं
प्राप्यरूपं मामवाप्नोति ५६ ॥

मधुसूदनी टीका ९

यः पूर्वोक्तैः कर्मभिः शुद्धान्तःकरणः स एव स्वयं भगवदेकशरणः भगव
देकशरणतापर्यन्तत्वात् अन्तःकरणशुद्धेः एतादृशशुद्धान्तःकरणः स एव
स्वयं भगवदेकशरणः भगवदेकशरणतापर्यन्तत्वात् अन्तःकरणशुद्धेः
एतादृशशुद्धान्तःकरणः संन्यासनियमरहितः सर्वकर्माणि संन्यासलक्षणा
मसंसारविमोक्षस्तु तस्य भगवदेकशरणस्य भगवत्प्रसादादेव एतादृश
श्रवणादिः संन्यासानधिकारी सन् कुर्वन्नाम कर्माणि किन्तु मद्व्य
पाश्रयः अहं भगवान् वासुदेव एव व्यपाश्रयः शरणं यस्य स मदेकश
रणो मय्यर्पितसर्वात्मभावः संन्यासानधिकारात् सर्वकर्माणि सर्वा
णि कर्माणि वर्णाश्रमधर्मरूपाणि लौकिकानि प्रतिषिद्धानि वा सदा
कुर्वाणो मत्प्रसादान्ममेश्वरस्यानुग्रहात् अवाप्नोति हिरण्यगर्भव
न्महिज्ञानोत्पत्त्या शाश्वतं नित्यं पदं वैष्णवमव्ययमपरिणामि एता
दृशो भगवदेकशरणः करोत्येव न प्रतिषिद्धकर्माणि यदि कुर्यात्तथापि
मत्प्रसादात्प्रत्यवायानुत्पत्त्या महिज्ञानेन मोक्षभाग्भवतीति भगवदे
कशरणतास्तत्र्यं सर्वकर्माणि सदा कुर्वाणोपीत्यनूद्यते [illegible]
[illegible]
[illegible] ५६ ॥

सदानंदी टीका ११

अन्तो धीशुद्धिपर्यन्तं सहजं कर्म न त्यजेत् शुद्धान्तःकरणो यत्नान्नैष्क
र्म्यसो धिगच्छति संन्यासेनेति पूर्वोक्तं संन्यासो ब्राह्मणेनैव कर्तव्यो ना
न्यवर्णेनेत्युक्तं भागवतापरा २ कर्मणो वहिरङ्गसिद्धिमार्गस्थिता ज्ञानका कार्यीवाकर्म
ट्यः चित्तशुद्धिमतस्तत्र किं कर्मकरणं वरे ३ [illegible] संन्यासरह
स्यवाह जगत्पतिः पूर्वोक्तैः कर्मभिर्यस्तु शुद्धान्तःकरणः पुमान् ४
सोवश्यं भगवत्कमलपादैकशरणो भवेत् श्रीमद्भगवतः पादसरोजभ
क्तिरतस्तमा ५ चित्तशुद्धेः फलं श्रेष्ठं न तो ज्ञानादिभुक्तता इति श्रोत्रास

श्चेत्स्मान्नवैराग्यसंभृतः ६ ससर्वकर्मसंन्यस्य भगवच्छरणं व
जेत् तस्य संसारतो मोक्षः स्याद्भगवत्प्रसादतः ७ ईश्वरः सर्वभूतादि
श्चेत्संन्यासेपि कृतो न सः स्वधर्मे नियतं श्रेयः पारमेश्यावहः ८
इति ब्राह्मणाय धर्मस्य संन्यासस्य च कर्मणां त्वविद्यादिं प्रतिश्रीमद्धिस्तु
नैव निषेधतः ९ संन्यासानधिकारात्स्यात्क्षत्रियाणः स्वस्य देव च सर्व
कर्माणि वर्णादिधर्मरूपाणि मत्परः १० भगवान्वासुदेवो हं केवल
एव व्यपाश्रयः शरणं यस्य तेनैतस्मादेकः शरणो महान् ११ मद्धर्मपि।
न सर्वात्मभावो सौ मदनुग्रहात् हिरण्यगर्भवस्मद्भ्यास्थितं ज्ञानजं नेत
तः १२ नित्यकूटस्थस्वज्योतिः पदं प्राप्नोति वै स्वयं १३ ॥ ५६ ॥

नीलकंठी टीका १२

नचनचप्रेषीकानलमग्नौ प्राप्तं हूयते तैवेहास्य सर्वपाप्मानः प्रदूय
न्त इति एवं कर्मणां ज्ञानेन प्रायश्चित्तेनेव समपि नाशश्रवणेन ज्ञानो
त्तरकालीनानां कर्मणां नाशाभावात्तत्ज्ञानोत्तरमपि देहधारणे स्वाभा
विकानां कर्मणां वर्जनस्यासंभवाद्व्यपेक्षा नितोपि वंधः स्यादित्या
शंक्याह सर्वकर्माणीति मद्व्यपाश्रयो हमेव प्रज्ञानघनः प्रत्यगात्मा
व्यपाश्रयः प्राश्रयो यस्य तमद्व्यपाश्रयो ज्ञानी सर्वकर्माणि विहितानि।
निषिद्धानि वा सदा सकृतन्कुर्वाणोपि मत्प्रसादात् मदनुग्रहात् शा।
यं ४ श्वतं नित्यं श्रेष्ठं परमं सर्वोत्कृष्टं पदं तीयं मोक्षमवाप्नोति ननु ज्ञानोत्त
रमपि क्रियमाणैः कर्मभिर्बध्यते तस्य पुत्रा दायमुपयन्ति सुहृदः सा
धुकृत्यां द्विषन्तः पापकृत्यामिति नह वा एवंविदि किंचन रजआध्व
सनेनं विदित्वा न लिप्यते कर्मणा पापकेनेत्यादिश्रुतिशतेभ्यो ज्ञा।
निनः कर्मलेपश्रवणात् ५६ ॥

स्वानंदी टीका १३

तदेवं संयमयोगो हलितस्य सर्वसाधारण्येन कर्मयोगस्य ज्ञानेन तस
मुच्चितस्य सर्वतः परीतापिताश्रयः साधनत्वात्पांचाप्रतिप
स्वतं कर्मयोगमेव सिद्धांतयति मद्व्यपाश्रयः ब्रह्मार्पणप्र
कारेणाहमेक एव व्यपाश्रयः समत्कर्मफलप्रापणाधारो य ध्या॰
स्य ५६ ॥

श्री॰
गी॰ टी॰
अ॰

247

रामकंठी टीका १४

सर्वाणि यज्ञदानादीनि सदा नित्यं कुर्वन्ननुतिष्ठन्नपि मद्व्यपा
श्रयः अहं सर्वकर्तृत्वेन प्रतिपन्न आश्रयो वलम्बनं यस्य ता
दृशः सन्मत्प्रसादान्मम परमात्मनः स्वाभाविकप्रसादादा
नुकूल्यात्मन्यभिव्यक्तेयतामापन्नात्सर्वेश्वराद्धेतोः शाश्वतं नित्य
मत एवाव्ययमक्षयं पदं परं ब्रह्मस्वरूपं स्थानं प्राप्नोत्यधिग
च्छति यत्प्राप्यैव वैष्णवरूपमात्मानमपि गच्छन्नियतदेहसं
बंधलक्षणं बंधानंतविनाशरूपां परां सिद्धिं प्राप्नोतीत्यर्थः
एवं यथोक्तमुपदेशं सर्वस्य समग्रमवधार्य तं मय्येवं समाचरे
त्यर्जुनायोपदेष्टुमाह ५६ ॥

लासिकी [illegible]टीका

+एवमात्मबोधयुक्तस्य निष्कारोपायमुक्त्वा बोधरहितस्यापि तमाह ॥

+मद्व्यपाश्रये मामीश्वरमुक्तप्रकृत्या परमेण प्रेम्णाश्रितवान्
सर्वाणि विहितानि नित्यनैमित्तिककाम्यरूपाण्यप्रतिषिद्धा
नि स्वाभाविकानि च कर्माणि कुर्वन्नपि मम ईश्वरस्य प्रसादाद
नुग्रहाच्छाश्वतं नित्यमव्ययमविनाशि पदं मोक्षाख्यं धाम
ज्ञानप्राप्तिद्वारा प्राप्नोति [illegible]
[illegible] ५६

पंचोलेटीका

सर्वकर्मभिः परमेश्वराराधनोक्तं मोक्षप्रकारमुपसंहरति ।
ति सर्वकर्माणीति सर्वकर्माण्यपि प्रतिषिद्धान्यपि सदा कुर्वाणः
अनुतिष्ठन्मद्व्यपाश्रयो मय्यर्पित सर्वात्मस्वभावः सोपि मत्प्रसा
दाच्छाश्वतं वैष्णवं पदं प्राप्नोति ५६

रणवीरसमिद्बोधिनी

ततश्च मद्व्यपाश्रयः अहमेव व्यपाश्रय आश्रयणीयो वलंबनं यस्य
स तादृशः सर्वाण्यपि हिंसाप्रायाणि तदितराणि च कर्माणि स्ववर्णाश्र
मोचितानि सदानुतिष्ठन्नपि मदनुग्रहाच्छाश्वतं नित्यमत एवाव्यय
मक्षयं पदं वैष्णवं धाम प्राप्नोति ५६॥

मधुभाष्य

सर्वकर्माणीत्यादिना परोक्तवचनं तज्ज्ञोक्तं प्रतिभी
मवच्चनवत् धर्मत्यागः फलत्यागः कथमन्यथा
बुद्धिविधि यस्तु कर्मफलत्यागी सत्यागीत्यभिधी
यते इति चोक्तम् दुर्गादोषमहाविस्तोगीतामा।
श्रित्य लेशतः निरूपणं कृतं तेन प्रीयतां मे सदावि
भुः ५८॥

भाषा अनुवाद टीका

अपनेअधिकार अनुसार कर्म के क्रमसे भगवनकी आराधना
हेतु से कहा जो भक्ति काम कारसोकहतेहै कि निस औ नैमिति
क सर्वकहेहुये सर्व कर्मका निरन्तर अनुष्ठावकारी और मद्व
पाश्रय करे जिस केमैही आश्रयणीय हौ और स्वर्ग आदि फल
आँयणीय नहीहै ऐसा पुरुष मेरी अनुग्रह से शाश्वत अर्थात्
अनादि औ अव्यय करे निस जो सर्व श्रेष्ठ ब्रह्मपद तिसको प्राप्त
होतेहै ५६ ॥

दोहा

सर्वकर्म निस कर्त भी मोरे आश्रयहोय मोरेहुपासें प्रा
पहि नित्य अव्यय पदहूंकोय ५६॥

248

चेतसा सर्वकर्माणि मयि संन्यस्य मत्परः
बुद्धियोगमुपाश्रित्य मच्चित्तः सततं भव ५७

शांकरभाष्य टीका १

यस्मादेवं तस्मात् चेतसा विवेकबुद्ध्या सर्वकर्माणि दृष्टादृष्टार्थानि
मयीश्वरे संन्यस्य यत् करोषि यदश्नासीत्युक्तन्यायेन मत्परो ऽहं वा
सुदेवः परो यस्य तव स त्वं मत्परः सन् मय्यर्पितसर्वात्मभावः बु
द्धियोगमपि समाहितबुद्धित्वं बुद्धियोगस्तं बुद्धियोगमुपाश्रित्य आ
श्रयो ऽनन्यशरणत्वं मच्चित्तः मय्येव चित्तं यस्य स मच्चित्तः सततं
सर्वदा भव ५७ ॥

आनंदगिरिकृत टीका २

प्रसादोत्थग्रहः सम्यक् ज्ञानोत्थं पदे पदनीये उपनिषन्मात्रपर्य
गम्यमव्ययमपक्षयरहितं परमेश्वरप्रसादस्यैव माहात्म्यं यतः सि
द्धं तस्मात्तत्प्रसादार्थं भवता प्रयतितव्यमित्याह यस्मादिति भग
वत्प्रसादात्सम्यक्ज्ञानादेव मुक्तिर्न कर्ममात्रादिति ज्ञानं वि
वेकबुद्धिः आश्रयशब्दार्थमाह अनन्येति किमतो भवति तदाह मच्चित्त
इति ५७ ॥

स्वामिकृत टीका ३

यस्मादेवं तस्मात्त्वं चेतसेति सर्वाणि कर्माणि चेतसा मयि संन्यस्य मत्परः
अहमेव परः प्राप्यः पुरुषार्थो यस्य स मत्परः व्यवसायात्मिकया बुद्ध्या
योगमुपाश्रित्य सततं कर्मानुष्ठानकाले ब्रह्मार्पणं ब्रह्म हविरित्यादि
न्यायेन मय्येव चित्तं यस्य तथाभूतो भव [illegible] ५७

पिशाचभाष्य टीका ४

सर्वलोकाध्यक्षस्य सकलकर्मफलभोक्तुर्वासुदेवस्य मे शरणमित्यनेन
सर्वकर्माणि मम ईश्वरस्य नारायणस्येति मयि संन्यस्य समर्प्य मत्परः अहं
वासुदेवः प्राप्यत्वेन यस्यासौ मत्परः बुद्धियोगमुपाश्रित्य उक्तया बुद्ध्या
योगमाश्रित्य [illegible] प्राप्य मय्येव चित्तं यस्य सः
मच्चित्तः सततं सर्वकालं भव जायस्व ५७ ॥

रामानुजभाष्य टीका ५

श्री
गी॰टी॰
अ॰

चेतसेति चेतसात्मनो मदायत्तेनानन्यसर्वस्वभावेन कर्माणि मयि
सर्वाणि संन्यस्याथ चेतसेति सर्वकर्माणि सकर्तृकाणि साराध्या
नि मयि संन्यस्य मत्परः अहमेव फलतया प्राप्य इत्यनन्यः सन् दयातः कर्मा
णि कुर्वन्नत्रमेव बुद्धियोगमुपाश्रित्य सततं मय्यर्पितचित्तो भव ५७ ॥

अभिनवगुप्तकृत टीका ६

स्पष्टार्थम् ५७ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपाती टीका ७ ॥

यस्मादेवं तस्मात्त्वमपि तथा भवेत्यर्थ चेतसेति चेतसा सह सर्वकर्माणि ^माह
मयि संन्यस्य समर्प्य मत्परः अहमेव परः परमो यस्य तथाविधः सन् त
भवतन्तव्यवसायात्मिकबुद्धियोगं उपाश्रित्य मच्चित्तं मदाकारं चित्तं य
स्य तथाविधो भवेत्यनेन विशानेतदन्तरमिमेव पर्यायेणोक्तमित्यर्थः ५७

वनमाली टीका ८

यस्मान्मदेकशरणता मात्रे मोक्षहेतुर्न कर्मानुष्ठानं कर्मसंन्यासो वा
तस्मात्त्वमपि मदेकशरणो भवेत्याशयेनाह चेतसेति चेतसा विवेकया। त^
वि^ यासर्वाणि दृष्टादृष्टार्थानि वा सर्वकर्माणि मयीश्वरे संन्यस्य यत्करोषीत्युक्त
रीत्या समर्पयन् मत्परः अहं वासुदेवः परमप्रियः सर्वोत्तमः प्राप्यो यस्य सः
मयि सर्वोत्तमत्वबुद्धियोगं प्रागुक्तलाभालाभसमत्वरूपबुद्धियोगं वा।
पाश्रित्य प्रपत्तिशरणतया स्वीकृत्य मच्चित्तः मय्येव सर्वैश्वर्ये चित्तं यस्य सः
पुत्रदारादिजनश्चित्तं यथा तु स्नेहलतयारावद्विच्छिन्नप्रवाहतया मच्चित्तः
सततं भवेत्यर्थः ५७ ॥

उसमैवजयन्ती टीका ९

यस्मादेवं तस्मात्त्वमपीदृशो भवेत्याह चेतसेति चेतसा हृत्पुरुषोत्तमा।
धीनत्वकारिणमेवेदं सर्वकर्मेति न तु स्वाधीनेनेमे वस्तु स्वमदधीनस्थि
तिप्रवृत्तिकृतं मदत्तमेतं मदीयं सेवानं संपाद्य स्वकर्तृत्वाभिमानादि
रहितेन चित्तेन सर्वकर्माणि सर्वाणि स्वोचितानि नित्यनैमित्तिकयज्ञ
प्रदानादीनि कर्माणि मयि परमपुरुषे स्वस्वामिनि संन्यस्य समर्प्य निवासमत्पू
स्तन्मदेकपुरुषार्थः सन् बुद्धियोगं व्यवसायात्मिकायायोगः संयो
गो यस्य सततं मामुपाश्रित्याश्रित्य सतते कर्मानुष्ठानसमये मच्चित्तो म
यि चित्तं यस्य स तैः शत्त्वं भवमपि सर्वाणि कर्माणि संन्यस्य ध्यानमेव तस्मा

+ यस्मान्मदेकशरणतामात्रं मोक्षसाधनं न कर्मानुष्ठानं वा कर्मसंन्यासो वा तस्मात्त्वत्रियत्नम्

यत्करोषीत्यादिनापूर्वमेवोक्तत्वात् ५७ ॥

मधुसूदनी टीका ९

+ चेतसा विवेकबुद्ध्या सर्वकर्माणि दृष्टादृष्टार्थानि मयीश्वरे संन्यस्य यत्करोषि यदश्नासीत्युक्तन्यायेन समर्प्य मत्परः अहं भगवान्वासुदेव एव परः प्रियतमो यस्य स मत्परः सन् बुद्धियोगं पूर्वोक्तसमत्वबुद्धिलक्षणं योगं बंधहेतोरपि कर्मणो मोक्षहेतुत्वसंपादकं उपाश्रित्य अनन्यशरणतयास्वीकृत्य मच्चित्तः मय्येव भगवति वासुदेव एव चित्तं यस्य स तथा राजनिकामित्यादौ वा समच्चित्तः सततं भव [illegible] ५७

सदानंदी टीका ११

यस्मान्मदेकशरणभावो मोक्षसाधने न कर्मकरणं नापि कर्मसंन्यास एव वा १ तस्माद्विवेकबुद्ध्या त्वं दृष्टादृष्टार्थकान्यपि सर्वकर्माणि मय्येव वासुदेवे समर्प्यैव यत्करोषि यदश्नासीत्युक्तन्यायेन मत्परः भगवान्वासुदेवोहं यस्य प्रियतमः परः ३ समत्परस्त्वदृष्टौ कसमत्वबुद्धिलक्षणं योगं त्वनन्यशरणतया स्वीकृत्य सदा ४ वासुदेवे भगवति यस्य चित्तं मय्येवेश्वरे नान्यत्र राजनिष्ठा । दौ स मच्चित्तः सदा भव ५ इत्येवं कृष्णमनाविलं स्वपदं हास्यकाशोज्ज्वलं करुणाद्रिशोणितं च शोभनशरणं शान्त्यानिलं तं छायया प्रज्ञानां कं जनाय पत्रमेशमनेन सञ्जातकेरर्पितं ब्रह्मानंदपु वर्षणोन्नत्वमहं कृत्स्नाचामेचेद्भये ६ ॥ ५७ ॥

नीलकंठी टीका १२

एवं वर्णाश्रमादिधर्मपुरस्कारेण ससाधनां सफलां च ब्रह्मविद्यां निरूप्य इदानीं मुमुक्षोः परमं साधनं भक्तिमेव विधत्ते चेतसेति चेतसा विवेकबुद्ध्या सर्वाणि कर्माणि नित्यनैमित्तिकानि मयि भगवति वासुदेवे संन्यस्य यत्करोषि यदश्नासीत्युक्तरीत्या समर्प्य मत्परः अहमेव परः प्राप्यो यस्य स मत्परः मत्प्राप्तिर्दीनस्वार्थ्यान्तः बुद्धियोगं दृष्टौ केसिद्ध्यसिद्ध्योः समत्वलक्षणं बंधहेतोरपि कर्मणो मोक्षहेतुत्वसंपादकं उपाश्रित्य मच्चित्तः मदेकशरणः सततं सर्वदा भव ५७

श्री॰
गी॰ टी॰
अ॰

250

आनंदीटीका १३

तदेवंसर्वानुग्रहसाधारणेनगीतार्थोपदेशसर्वस्वमुद्देश
लक्षणपरीक्षाभिरवधार्यस्थिरीकृतम्‌ इतःपरंप्रकरणा
र्थमुपसंजिहीर्षुरर्जुनमेवप्रस्तुतकार्यसाधनार्थंनियो
जयति सर्वाणिकर्माणिक्रियमाणान्येवचेतसाफलनि
स्पृहेणमयिसंन्यस्यनिदिध्यासुर्बुद्धियोगंकर्म
करणयुक्तिंसमाश्रित्यसततंसर्वास्ववस्थासुमच्चित्तोमदेक
शरणोभव ५७ ॥

रामकंठीटीका १४

सततंनित्यमेवसर्वास्ववस्थासुमच्चित्तोमय्येकस्मिंस्तत्प
रब्रह्मणिचित्तमन्तःकरणंयस्यसतथाविधोभव परमार्थ
तोमद्व्यतिरिक्तपदार्थान्तरासंभवात्‌ तेनाव्यवहारभूमावपद
पीदंतयाप्रतिपद्यमानंतत्सर्वंप्रतिपादितोपपत्त्यापरप्रका
शचित्स्वरूपतयाभावयेत्यर्थः किंकृत्वामच्चित्तोभव सर्वा
णिस्वकर्माणिक्रियमाणान्येवचेतसामनसैवतत्फलनिः
स्पृहेणमयियथोक्तस्वरूपेपरमात्मनिसंन्यस्यतत्कृताभि
मानत्यागेननिर्लिप्य कथंचैतत्संपद्यतइत्याह बुद्धियोग
समाश्रित्य बुद्धिर्यथाप्रतिपादितंज्ञानंतत्रयोगःसततम
नुध्यानसमाधिस्तंसमाश्रित्यालंब्यतन्निष्ठोभूत्वामच्चित्तोभ
वेतिवाक्यार्थः ततश्च । ५७ ॥

+एवमर्जुनायश्रीगीताशास्त्रमुपवर्ण्याधु
नाधिकारानुसारेणतंनियोज
यति॥

लासिकी [illegible]गोमीटीका

+सर्वाणिविहितानिशारीरिकाण्यभिचारीणिचकर्माणिवि
वेकयुक्तेनमनसा मयीश्वरेउक्तयुक्त्यासमर्प्य मत्परोमदे
न॰ कशरणःसंबुद्धियोगंकर्मणिक्रियमाणेप्यात्मबोधसमा
धानमुपाश्रित्यस्वीकृत्य मच्चित्तोमयीश्वरात्मनिचित्तंयस्य
तादृशःसततंसर्वास्ववस्थासुव्यावहारिकीष्वपिभव

20.

[illegible] ५७

पैठोलीटीका

चेतसेति यस्माद्देवेनत्स्मात्वंचेतसाविवेकबुध्यासर्वकर्माणिदृष्टा
दृष्टार्थानिमयीश्वरेसंन्यस्यमत्परःमदाश्रयःसन्बुद्धियोगंमयि
समाहितबुद्धित्वंसमाश्रित्यमच्चित्तःसततंसर्वदाभव ५७

रसावीरसमिद्बोधिनी

एवंयथोक्तमुपदेशसर्वस्वंसम्यगवधार्यत्वमप्येवंस्वधर्ममनुति
ष्ठेत्यर्जुनायोपदेष्टुमाह चेतसेति सर्वकर्माणिविहितानि चेत
सांतःकरणेन मय्येवपरमेश्वरे संन्यस्यसमर्प्यफलमनभिसं
धायमत्प्रीणनार्थमेवानुष्ठाय मत्परः अहमेवपरःपालयिता
वाञ्छंप्रदायिताचयस्यसत्वंबुद्धियोगंप्रधानबुद्धिसंबंधंसमाश्रित्य
सततंसर्वास्ववस्थासुमच्चित्तोभव ५७

मधुभाष्य

५७॥

251

२५१

भाषा अनुवाद टीका

जिसहेतु नित्यआदिकर्मके अनुष्ठान से ब्रह्मप्राप्ति होतीहै इससे सर्वकर्मबुद्धिकेद्वारा हमको समर्पण करिकेमत्परकहेमैंहीहौंपरमप्रार्थनीय प्राप्यपरमपुरुषार्थ सर्वस्वरूप जिसके अथवा व्यवसायात्मिकाबुद्धि केद्वारा कर्मयोगकोआश्रयकरके सततकहे कर्म अनुष्ठान काल मेभी मत्चित्तपुरुषब्रह्मार्पणं ब्रह्महविः ब्रह्माग्नौब्रह्मणाहुतं इस४ अध्यायके२४ श्लोकसेकहे ज्ञानके द्वारा मेरेमेचित्तसमर्पित होताहै सो अर्जुन तुम बुद्धियोग सेतद्रूपसमचित्त होउ ५७ ॥

दोहा

चित्तसेंसर्वहिकर्मकों करोसमर्पण मोहुं बुद्धियोगके आ
श्रितमोमे चित नित होहु ५७॥

252

मच्चित्तः सर्वदुर्गाणि मत्प्रसादात्तरिष्यसि अ
थ चेत्त्वमहंकारान्न श्रोष्यसि विनंक्ष्यसि ५८

शंकरभाष्यटीका १

मच्चित्तः सर्वदुर्गाणि सर्वाणि दुस्तराणि संसारहेतुजातानि मत्प्र
सादात्तरिष्यसि अतिक्रमिष्यसि अथ चेत् यदि त्वं मदुक्तमहंकारात्
पंडितोऽहमिति न श्रोष्यसि न ग्रहीष्यसि ततस्त्वं विनंक्ष्यसि विनाशंग
मिष्यसि ५८ ॥

आनंदगिरिकृतटीका २

भीत्यापि प्रवर्तितव्यमिति मन्वानो विपर्यये दोषमाह अथ चेदिति ५८

स्वामिकृतटीका ३

+ अतो यद्भविष्यति तन्न
शृणु ॥ + मच्चित्त इति मच्चित्तः सन् मत्प्रसादात्सर्वाण्यपि दुर्गाणि दुस्तराणि सं
सारिकाणि दुःखानि तरिष्यसि विपक्षे दोषमाह अथ चेद्यदि त्वम
हंकारात् ज्ञातृत्वाभिमानात् मदुक्तमेतन्न श्रोष्यसि तर्हि विनंक्ष्य
सि पुरुषार्थाद्भ्रष्टो भविष्यसि [illegible] ५८ ॥

पिशाचभाष्यटीका ४

सर्वदुर्गाणि सर्वाणि दुःखानि मम प्रसादान्मत्प्रसादात्तरिष्यसि ५८

रामानुजभाष्यटीका ५

मच्चित्त इति एवं मच्चित्तः सर्वकर्माणि सांसारिकाणि दुर्गाणि मत्प्र
१४ सादादेव तरिष्यसि अथ त्वमहंकारादहमेव कृत्याकृत्यविषये सर्वज्ञ
इति मदुक्तं न श्रोष्यसि चेत् विनंक्ष्यसि नष्टो भविष्यसि न हि कश्चि
न्मद्व्यतिरिक्तः कृत्स्नस्य प्राणिजातस्य कृत्याकृत्ययोर्ज्ञाता प्रशासि
ता वास्ति ५८ ॥

अभिनवगुप्तकृतटीका ६

स्पष्टार्थम् ५८ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका ७

अतो यद्भविष्यति तन्न शृणु मच्चित्त इति मायकरीं मां मच्चित्तस्त्वं मत्प्र
सादात्सर्वदुर्गाणि आधिदैविकादीनि सर्वदुःखानि तरिष्यसि अथवि

श्री
गी टी
भा॰

253

पक्षे दोषमाह अथेति अथ चेद्यदि त्वमहंकारात् ज्ञातृत्वाभिमा
नात् मदुक्तमेतन्न श्रोष्यसि तर्हि विनंक्ष्यसि पुरुषार्थात् भ्रश्यसे अथ
र्मयो निर्वाणांमित्य भगवतो हाहं तेजं कुलं स्वलनो येदं वेदो छे
देव निर्वेदयं मन्यते य र्मजनं षेदेस्तु यन्न षेति लोजलिं यस्मादिति ५८

वनमाली टीका ८

भगवदेकनिष्ठचित्तस्य फलमाह मदिति मच्चित्तो नत्वष्टितमस्य कथ
मपि त्वं सर्वदुर्गाणि दुस्तराणि कामक्रोधादीनि संसारदुःखसाधना
नि केवलमत्प्रसादात् स्वव्यापारं विनैव तरिष्यसि अनायासेनैवातिक्रमि
ष्यसि त्वद्व्यापारस्य स्वधर्मानुष्ठानादेर्मत्प्रसादप्रवेशे पक्षीणत्वं संसार
दुःखमोचकत्वं तु मत्प्रसादादेवेति भावः अथ चेत् यदि त्वं मदुक्तं विश्वा
सममकुर्वन्नहं पण्डितोऽहमिति गर्वात् न श्रोष्यसि मद्वचनार्थं न करिष्यसि त
तो विनंक्ष्यसि पुरुषार्थाद्भ्रष्टो भविष्यसि साक्षात्संसारदुःखमोचक
मत्प्रसादार्थं स्वोचितकर्मानुष्ठानं कुर्विति भावः ५८ ॥

ऊ स्वमैवजयंतीस्पर्थः ९

यद्यहं त्वच्चित्तो भविष्यामि तर्हि मम किं फलं भविष्यति नो चेद्वा किं
भविष्यतीत्यपेक्षायामाह मच्चित्त इति यदि त्वं मच्चित्तः उक्तप्रकारेण
कर्म कुर्वन्मन्मना भविष्यसि तर्हि मत्प्रसादान्मदनुग्रहादेव सर्वदु
र्गाणि सर्वाणि कामक्रोधादि दुर्गाणि जन्मान्तरादि वक्ष्यमाणि तथा
न्मिका दिनापत्राणि देहापत्यकलत्रादिषात्मात्मीयाभिमानरूपा
णि च मदर्चनवद्देवार्चनादि संसारदुःखानि दुर्गाणि प्राणान्तपर्यन्तेना
पि दुःखेन गन्तुं शक्यानि तरिष्यसि भक्तप्रियो हं स्वात्मानमपि दत्त्वा
स्वाश्रितस्यार्तिनाशं करिष्यामि नत्वं स्वाविनैव मोक्षं प्राप्स्यसीत्याशयः
विपक्षे दोषमाह अथ चेति अथ पुनश्चेद्यदि त्वमहंकारात् त्वं सकार्या
कार्यविषयकज्ञानाभिमानात् न श्रोष्यसि मदुक्तं श्रुत्वा न करिष्य
सि तर्हि विनंक्ष्यसि मत्प्रसादाभावात्संसारदुःखी भूत्वा संसारे प्राप्स्य
सि मदन्यः कोऽपि संसारादुत्तारको नास्ति नो मदुक्तमेवांगीकुरु इत्यभिप्रा
यः ५८॥

मधुसूदनी टीका ९

ततः किं स्यादित्यत आह मच्चित्तस्त्वं सर्वदुर्गाणि दुस्तराणि कामक्रोधादीनि संसारदुःखसाध
नानि मत्प्रसादात्स्वव्यापारमन्तरेणैव तरिष्यसि अनायासेनैवाति

क्रमिष्यसि अथ चेत्त्वं यदि त्वं मदुक्तं विश्वासमकृत्वाहंकारात्।
इतोहमिति गर्वान्न श्रोष्यसि मद्वचनार्थं न करिष्यसि ततो विने।
ङ्क्ष्यसि पुरुषार्थाद्भ्रष्टो भविष्यसि कामकारेणास्मान्यासाधावरन् ५८

सदानंदी टीका ११

मच्चित्तस्त्वं हि सर्वाणि दुस्तराणि समुद्रवत् संसारदुःखदायीनि।
कामक्रोधादिकान्यपि १ मत्प्रसादात्स्वत्वेनैव स्वव्यापारं विनापि
च अतिक्रमिष्यसि प्रतरवत्स्वज्ञानतरेवेनच २ यदि त्वं मदुक्तेर्वी
ख निःसंदिग्धेपि मोहतः अविश्वासादहंकारान्मदीतोऽसी निगर्वि
तः ३ न श्रोष्यसि वचो मत्तः श्रुत्वापि न करिष्यसि विनंक्ष्यसि
नष्टासम्यक्पुरुषार्थात्मरिच्युतः ४ कामकारेण यत्किंचि
त्कुर्वन्नाप्नोतिशोभने अज्ञानार्कमनापिते भवमरोधावत
मर्थीकृतेरत्नात्सारितापितेंद्रियगणो भोगांधकामाकु
ले वर्षी क्रोधमकरप्रतमसिकतादग्धागमाध्वोऽग्निकेदीनवा
शरणागते यदुपतेर्मामामपेतस्वभोः ६ ५८ ॥

नीलकंठी टीका १२

एतस्य भक्तियोगस्य करणेऽगुणमकरणे दोषं चाह मच्चित्त इति
दुर्गाणि आध्यात्मिकाधिलौकिकादीनि संकटानि अहंकारा
त्स्वपांडित्याभिमानात् न श्रोष्यसि मदीयं तर्हि विनंक्ष्यसि पु
रुषार्थभ्रष्टो भविष्यसि ५८ ॥

आनंदी टीका १३

मच्चित्तो मदेकाश्रितः मम परमेश्वरस्यानुग्रहात्सर्वाणि दुः
खानि मध्यमाध्यात्मिकादीनि तरिष्यसि परमार्थतस्तु
हर्षशोकमोहादीनि संसारबंधकारणानि तीर्त्वा मत्सायु
ज्यमापत्स्यसे अथ चेद्यदि त्वं राजसमसोहंकारेण मत्वाभि
भवान्मदुपदेशं मनो हृत्य अहंकारं न मोदयसि मम मैने बंधवः
युद्धमिति यत्ते ममत्वेन मारणादि हृदयस्थवाविरुद्धे वशनिष्णा

दितियुद्धत्यागपवक्ष्ययानित्येतन्मिथ्याज्ञानंनत्यजसि ततोवि
नंक्ष्यसि स्वधर्मकीर्तिविरहितापापमवाप्स्यसि इतिसमुद्दिष्टम
भयलोकविभ्रंशंप्राप्स्यसीत्यर्थः ५८ ॥

254

रामकंठी टीका १२

मत्प्रसादात्मदनुग्रहान्मूलकारणभूतान्मच्चित्तोमदेकालम्ब
नमानसः सर्वदुर्गाणि सर्वकृच्छ्राणि हर्षशोकमोहमूलानि
बंधकारणानितरिष्यसि लंघयिष्यसि अथचेवमप्युपदिष्टस्त्वं
यदहंकारेणात्माभिमानावच्छिन्नशरीराद्यात्मप्रत्ययेनमोह्यसि
तर्हिनंक्ष्यसि पारमार्थिकस्वरूपाप्रतिपत्तेर्विनाशमभावमेव
प्राप्स्यसि नचैतत्त्वाधीनंतदेवमाह ५८ ॥

लासिकी [illegible] टीका

+यतःपरमस्ततंतमच्चित्ततत्त्वस्यायंप्रभावइत्याह ॥

+मच्चित्तोमयीश्वरात्मनिचित्तंयस्यसएवंविधःसन् सर्वा
णिदुर्गाणिदेहाद्यात्मप्रत्ययादीनिआध्यात्मिकादिदुःखा
निचममेश्वरस्यप्रसादात्स्वस्वरूपप्रकाशनरूपादनुग्रहा
त्तरिष्यसि प्रयत्नंविनैवानायासेनातिक्रमिष्यसि व्यतिरे
केदोषमाह अथचेद्यदिएनत्वमहंकाराद्देहाद्यात्मप्रत्य
याभिनिवेशान्नश्रोष्यसि कृत्वानानुष्ठास्यसि तर्हिविनं
क्ष्यसि प्रमादपिबुद्धियोगाद्भ्रंशसि आत्मबोधपिविस्मृ
तिपथंयास्यसीत्यर्थः [illegible]
[illegible]
[illegible]

पंचोलीटीका

ततोयद्दरिष्यतितच्छृणु मच्चित्तइति मच्चित्तःसर्वदुर्गाणिसं
सारेहमूलानिमत्प्रसादात्तरिष्यसि अथचेत् यदित्वमहंकमहं
कारामेदितिमत्वः सन् नश्रोष्यसितनत्त्वंविनाशंगमिष्यसि ५८

रसावीरसमिद्धोधिनी

ततश्च यश्चित्तस्त्वं सर्वाणि दुर्गाणि दुस्तराणि कृच्छ्राणि मदनुग्र
हात्तरिष्यसि अथेति पक्षांतरे अथैवमस्मदुपदिष्टं त्वं वेदहंकारा
त् कोयंमम महाकुलोत्पन्नस्य पापयुद्धज्ञानस्यवोपदेष्टेत्यभिमा
नात् शास्त्राख्यानलक्षणात्स्वजातेर्वर्त्तमानदेशकालयोश्चो
चितस्यक्रोधस्यपरित्यागाच्छ्रोतिमागीदुःखतादेतोर्मदुक्तं नश्रो
ष्यसि श्रवणस्यानुष्ठानसाधनत्वात्स्वधर्मंयुद्धंमानुष्यास्यसि
तर्हितं नंक्ष्यसि ऐहिकामुष्मिकोभयार्थाशमालोकेस्तीतिसंभावना
भावाद्धिनाशमभावमेवप्राप्स्यसीत्यर्थः ५८॥

मधुभाष्य

५८॥

भाषानुवाद टीका

और समचित्त होने से जो होगा सो सुनो तात्पर्य यह कि मत्
चित्त होके मेरी कृपासे सर्वदुर्गो अर्थात् दुस्तर सांसारिक दुःख स
मूह से तरिजावेगा और इसके विपरीत आचरणमें दोष कहते हैं
कि और जो इस प्रकार कहने परभी तुम अपने अहंकार अर्थात्
हम बड़े ज्ञानी इस अभिमानसे हमारे कहने पर कान न करोगे तो उ
भयको उचित और हित करनेवाला जो धर्म तिससे भ्रष्ट होउगे अर्था
त् विनष्ट हो जावेगे और दुर्गतिभी भोगना पड़ेगा ५८ ॥

दोहा

मोचित होय सब संकटन को मोरि कृपा तरेंगो हि अरु जो तं
हंकारसें सुनहि न नाश हुंगो हि ५८॥

255

यदहंकारमाश्रित्य न योत्स्य इति मन्यसे मि
थ्यैव व्यवसायस्ते प्रकृतिस्त्वां नियोक्ष्यति ५९

शांकरभाष्य टीका १

इदं च त्वया न मन्तव्यं स्वतंत्रोऽहं किमिति परोक्तं करिष्यामीति यदि चैतत्त्वमहंकारमाश्रित्य न योत्स्य इति न युद्धं करिष्यामीति मन्यसे चिन्तयसि निश्चयं करोषि मिथ्यैव व्यवसायो निश्चयस्ते तव यस्मात्प्रकृतिः त्वत्स्वभावस्त्वां नियोक्ष्यति ५९ ॥

आनंदगिरिकृत टीका २

स्वातन्त्र्ये सति भीतेरवकाशो नास्तीत्याशंक्याह इदं चेति इतश्च त्वया गुरुवाक्ये वैमत्यं कर्तुं न उचितमित्याह मिथ्येति ५९ ॥

स्वामिकृत टीका ३

कामं विनंक्ष्यामि न तु बंधुभिर्युद्धं करिष्यामीति चेत्तत्राह यदिति मदुक्तमनादृत्य केवलमहंकारमवलंब्य युद्धं न करिष्यामीति यन्मन्यसे अध्यवससि एष ते अध्यवसायो मिथ्यैवास्वतंत्रत्वात् तव तदेवाह प्रकृतिस्त्वां रजोगुणरूपेण परिणता सती नियोक्ष्यति युद्धे प्रवर्तयिष्यत्येवे[illegible] ५९ ॥

पिशाचभाष्य टीका ४

यत्त्वमहंकारमाश्रित्य मद्वचनमविज्ञाय अहमेव सर्वशास्त्रविदिति मत्वा न योत्स्य इति मन्यसे मिथ्यैष व्यवसायस्ते प्रकृतिस्त्वां नियोक्ष्यति नैवैष निश्चयो मिथ्या वितथीभूतः यतः प्रकृतिस्वभावः त्वां नियोक्ष्यति ५९ ॥

रामानुजभाष्य टीका ५

यदिति यद्यहंकारमात्महिताहितज्ञाने स्वातंत्र्याभिमानमाश्रित्य मद्विगमं मत्वा न योत्स्य इति मन्यसे एष ते स्वातंत्र्यव्यवसायो मिथ्या भविष्यति यतः प्रकृतिस्त्वां युद्धे नियोक्ष्यति मत्त्वात्तेऽतयो हि त्वा मज्ञमदाज्ञया प्रकृतिर्नियोक्ष्यति तदुपपादयति ५९ ॥

अभिनवगुप्तकृत टीका ६

स्पष्टार्थम् ५९ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

श्री गीटी म

250

परमार्थप्रपाती टीका ७

कामेविनेत्वामिनत्वेथभिः सहयोत्स्यइतिचेदित्याह यदि
ति यद्यदिमउक्तमनादृत्य केवलमहंकारमवलंब्ययुद्धंनकरि
ष्यामीतिमन्यासेतर्हिएषव्यवसायस्तेतवोद्योगोमिथ्यानिरर्थकए
वयतःप्रकृतिस्त्वांनियोक्ष्यतिप्रवर्तयिष्यत्येव तस्याप्रापि
मदधीनत्वादितिभावः ५९ ॥

वनमाली टीका ८

तस्याधिकारेकमिडम्बजमित्याह यदिति अहंकारंयामीकोहंयु
द्धाख्यंकर्मनकरिष्यामीतिमिथ्याज्ञानमाश्रित्यनयोत्स्येयुद्धंनक
रिष्यामीतिमन्यसेमिथ्याहृष्याभिष्फलत्वादस्थिरत्वाद्व्यवसायो
निश्चयस्तेनचयतःप्रकृतिःक्षत्रजात्यारंभकोरजोगुणस्वभा
वस्त्वांनियोक्ष्यतिप्रेरयिष्यतियुद्धे यद्वाप्रकृतिःभगवदिच्छाप्र
कृतिर्वीसनेमेवनवेज्ञानेनकथ्यतइतिवचनात् प्रत्यस्यासर्व
स्यास्वतंत्रत्वेनस्वतंत्रतयाप्रेरकत्वासंभवात् ५९ ॥

ऊनमवैजयंतीग्रथः ९

नत्रयद्यहंकारोविनाशहेतुर्भवतितर्ह्योक्तिस्तुसर्वजीवानांकल्या
णरूपाभवतितथापीदृशादहंकारादीदृशीगुरुगोत्रादिमारणा
गर्भिकांन्वउक्तिनश्रृणोमिचेन्ननकार्यतितिचेत्तत्राह यदहं
कारमितियद्यपि अहंकारंयद्यपित्वंद्वियाणांप्रवर्तमधर्मो
स्ति तथापीदृशोगुरुगोत्रादिवधरूपकस्तत्तुनरकप्रापकएवेत्ये
वंस्वातंत्र्येणस्वहिताहितविषयकज्ञानाभिमानरूपकमाश्रित्य
स्वीकृत्याहंनयोत्स्यइति त्वंमन्यसेस्वस्वाभाविकंपरतंत्ररूपंधर्मप
रित्यज्यस्वतंत्ररूपपरधर्मांगीकारेण मितर्हितेतवएषईदृशोव्यव नयोत्स्य
सायोनिश्चयोमिथ्यानिष्फलोभविष्यति कुतएवंयतःप्रकृतिर्म
न्मायादैवीजगन्मोहिनीत्वत्कर्मानुसारिणामद्दत्तयात्वांप्रकृति
जरजोगुणत्वाममानसंस्थातंयाभिमानिनेतिनियोक्ष्यतिनिमित्तम
न्तभूतेगुरुगोत्रादिवधात्मकेयुद्धेप्रवर्तयिष्यत्येवातोमद्वचनमेव
कथंनकरोषीत्यभिप्रायः ५९ ॥

निर्वर्त्यमानलक्षणान्तस्यैवेच्छानियमेनोभयलक्षणाप्रकृति
स्थांस्वधर्मेप्रवर्तयिष्यन्त्येवेत्यर्थः ५९ ॥

मनुभाष्य

५९ ॥

मधुसूदनी टीका १०

अहंकारं धार्मिकोऽहं क्रूरं कर्म न करिष्यामीति मिथ्याभिमानमा
श्रित्य न योत्स्ये युद्धं न करिष्यामीति मन्यसे यत् मिथ्या निष्फल ए
ष व्यवसायो निश्चयस्ते न वयस्मात्प्रकृतिः क्षत्रजात्यारंभकोर
जोगुणस्वभावस्त्वां नियोक्ष्यति प्रेरयिष्यति युद्धे [illegible]
५९॥

सदानंदी टीका ११

धार्मिकोऽहं न च क्रूरं कर्म हिंसादि[illegible]लक्षणं करिष्यामीति मिथ्याभि
मानमाश्रित्य केवलं १ अहं नैव करिष्यामीत्येवं त्वं यदि मन्यसे ए
षते निश्चयो मिथ्या निष्फलः सर्वथैव यतः २ रजोगुणस्वभावस्त्वां क्ष
त्रियत्वनिबंधनः संग्रामे त्वां धार्मिकं क्रूरे प्रेरयिष्यति संगरे ३ अतो
मिथ्याग्रहं त्यक्त्वा मद्वचः शरणं कुरु ४ ॥ ५९ ॥

नीलकंठी टीका १२

स्वतंत्रोऽहं त्वदुक्तं न करिष्यामीत्याशंक्याह यदिति यत् त्वं यदि अहं
कारं गर्वमाश्रित्य न योत्स्ये युद्धं न करिष्ये इति मन्यसे एष ते न व्य
वसायो निश्चयो मिथ्या यतः प्रकृतिः क्षात्रस्वभावः त्वां नियो
क्ष्यति प्रकृतिं यांति भूतानि निग्रहः किं करिष्यतीति चोक्तं ५९

[illegible]री टीका १३

तथा रजस्तमसोः सकाशादुद्भूतः करणनिश्चयोऽपि न पर्यवस्यती
त्याह अहंकारम् यद्यप्येतेन पश्यति कथं न त्वेयमस्माभिरि
त्येवंरूपं मिथ्याभिमानमाश्रित्य न योत्स्ये अहमिति यन्मन्य
से हे धनंजय तसे अयं व्यवसायो निश्चयस्तव मिथ्यैव व्यर्थ एव
यतः प्रकृतिः क्षत्रियजात्यारंभको रजोगुणस्वभावस्त्वां नियो
क्ष्यति युद्धे एवं संप्रेरयतीत्यर्थः ५९ ॥

रामकंठीटीका १४

एवंविधमवस्तुविषयमहंकारं कर्तृत्वाभिमानमाश्रित्य धर्म

श्री॰
गी॰ टी॰
ग्र॰

२५७

मवश्यकरणीयंयुद्धंनकरिष्यामीतियन्मन्यसेत्वध्यासे प
षएवंविधस्तेव्यवसायोबुद्धिर्निश्चयोमिथ्यानिष्फलएव
यतःप्रकृतिःस्वभावःपरमेश्वरेच्छानियमितयुद्धादिकर्त
कस्त्वांनियोक्ष्यतेवर्णस्वभावेकर्मणिप्रवर्तयिष्यते एतदे
वस्फुटयितुमाह ५९ ॥

+नन्वात्मबोधाविध्वंसायत्वच्छित्तएव
कालमतिवाहयेयतिष्टन्बंधुवधा
दिकारणंयुद्धंकरणमि
त्याशंक्याह॥

लासिकी[illegible]टीका

+अहंकारंमयियुध्यमानेमतियुद्धंघटेतेत्येवंकर्तृत्वाभि
मानमवलंब्ययुद्धंनकरिष्यामीतियत्वंमन्यसेध्यवस्यसि
एषतेव्यवसायोनिश्चयोमिथ्यैवनिष्फलएवप्रकृत्यधी
नत्वात्तवतदेवाह यतप्रकृतिरुक्तलक्षणारजोगुणेनप्र
वृत्तिस्वभावानियोक्ष्यति [illegible] ॥
[illegible] ५९

पंचोलीटीका

बंधुभिःसहयुद्धंनकरिष्यामिअतःपंडितोहंत्वमुकंकिमर्थंक
रोमीतिचेत्तत्राह यदहंकारमिति यद्यहित्वमहंकारमाश्रित्य
नयोत्स्ये युद्धंनकरिष्यामीतिमन्यसेतर्हितेतवएषव्यवसायोनि
श्चयोमिथ्यायतःप्रकृतिःतत्रस्वभावस्त्वांनियोक्ष्यतिप्रेरयति ५९

रणवीरसमिद्बोधिनी

नचैतत्स्वाधीनंतवेत्याह यदहंकारमिति मदुक्तमनादृत्यकेव
लमहंकारमाश्रित्यावलंब्यनयोत्स्ये धर्म्यमवश्यानुष्ठेयंयुद्धंनानु
ष्ठास्यामीतियत्त्वंमन्यसे एषस्तेव्यवसायोनिश्चयोविपरीतोमिथ्यै
वनिष्फलएवतवविषयाकांतेरसंभवादस्वतंत्र्यत्वात्त्वेतिभावः अ
तएवप्रागुक्तव्यवसायात्मिकाबुद्धिःसमाधौनविधीयतेइतियतः
प्रकृतिःसत्वपसर्जनरजोगुणरूपेणपरिणतः क्षत्रियप्रतिपरमे
श्वरेणप्रतिनियतस्त्वांक्षत्रियजातिकमस्वतंत्रंनियोक्ष्यतियुद्धेप्र
वर्तयिष्यत्येव यद्वाप्रकृतिःपरमेश्वरसंबंधत्वात्स्वाव्यभिचारिणीः कृ

भाषा अनुवाद टीका

और जो कहा कि अच्छा हम धर्मसे भ्रष्ट होय परंतु तो भी भाई
और बन्धुवों के साथ युद्ध न करेंगे तिस पर कहते हैं कि मेरी कही
सब बातों को अनादर करिके अहंकार के भरोसे जो कहो कि मैं
युद्ध न करूंगा ऐसी जो तुम मनमें निश्चय करते हो तो तुम्हारा
यह निश्चय करना स्वाधीनता के अभाव है तासे अर्थात् तुम स्वा
धीन नहीं हो मिथ्या करे व्यर्थ है सोई कहते हैं कि जो तुम्हा
री प्रकृति कहे क्षत्री को रजोगुण की अधिकाई सो तुमको अवश्य
ही युद्धमे प्रवृत्त करेगी अन्त को तुम मारोगे और लडोगे और इस
पीटने से केवल जगतमे दुर्यश होइ और कुछ हाथ लागता
नहीं है यह जानो ५८ ॥

दोहा

जो अहंकार हि युक्त होय करौं न युद्ध यह मान मिथ्या यह
तव निश्चय जोइ हि प्रकृति तो हि जान ५९॥

258

स्वभावजेन कौंतेय निबद्धः स्वेन कर्मणा
कर्तुं नेच्छसि यन्मोहात्करिष्यस्यवशोपि तत्
६० ॥ व शांकरभाष्य टीका १
यस्माच्च स्वभावजेन शौर्यादिना कौंतेय यथोक्तेन निबद्धो
निश्चयेन बद्धः स्वेनात्मीयेन कर्मणा कर्तुं नेच्छसि यत् क
र्म मोहादविवेकतः करिष्यस्यवशोपि परवश एव तत्कर्मय
स्मात् ६० ॥ आनंदगिरिकृत टीका २
यस्माद्वेति स्वभावजेन कर्मणा निबद्धस्त्वमिति संबंधः
इतोपि त्वया युद्धं कर्तव्यमेवेत्याह यस्मादिति ६० ॥
किंच स्वभावेति ॥ स्वामिकृत टीका ३
स्वभावः क्षत्रियत्वहेतुः पूर्वसंस्कारस्तस्माज्जातेन स्वकीयेन क
र्मणा शौर्यादिना पूर्वोक्तेन निबद्धो यंत्रितः त्वं मोहाद्युद्धमकु मू
र्वन्नतो कर्तुं नेच्छसि अवशोपि तत्कर्म करिष्यस्येव देवतो
[illegible] स्वभावपारतंत्र्य
[illegible] ६० ॥
पिशाचभाष्य टीका ४
स्वभावजेन स्वभावसिद्धेन निबद्धः नियोगतो बद्धस्त्वं स्वेनात्मी
येन कर्मणा क्रियां कर्तुं निवर्तयितुं स्वभावसिद्धेन कर्म ६० ॥
रामानुजभाष्य टीका ५
स्वभावजेनेति स्वभावजं हि क्षत्रियस्य कर्म शौर्यं स्वभावजे
न शौर्याख्येन कर्मणा निबद्धः सन् परैरावर्षणं असम
र्थो वयं [illegible] असहमानः त्वमेव तद्युद्धं करिष्यसि यदिदा
नीं मोहादज्ञानात् कर्तुं नेच्छसि सर्वं हि भूतजातं सर्वेश्वरेण म
या पूर्वकर्मानुगुणेन प्रकृत्यनुवर्तने नियमितं कृत्स्नं ६० रवि
स्याद्धार्थम् ६० ॥ अभिनवगुप्तकृत टीका ६
॥ ॥ ॥ ॥ ॥

श्री-
गी टी
म-
२५१

ब परमार्थप्रपा टीका ७

किंच स्वभावजेनेति स्वभावः क्षत्रियत्वज्ञापकः पूर्वकर्मसंस्कार
स्तस्माज्जातेन ~~स्वभावेन~~ स्वकीयेन कर्मणा शौर्यादिना पूर्वोक्ते
न निबद्धो नियंत्रितः सन् यद्विमोहाद्युद्धलक्षणकर्म कर्तुं नेच्छसि त
दप्यवशः सन् कर्म करिष्यस्येव न ह्युके स्वसंस्कारपरंप
रापरिसमाप्तेः प्रायो मनुः प्राणिनां कस्तस्य प्रकृतिं निरस्य सहजां
कर्तुं समर्थः स्यान्नरः दौर्गंध्यं लशुनादिकस्य सहजं यत्नान्मुक्ता
रयत सौरभ्यं वितनोति कः सुरभितां कर्पूरसंवासवति ६० ॥

वनमाली टीका ८

स्वभावे विहरणीति स्वेति स्वभावजेन पूर्वोक्तक्षत्रियस्वभावजेन।
शौर्यादिना स्वेनानागतकेन कर्मणा निबद्धो वशीकृतः सन् यत्तद्यु
द्धादि निमित्तं युद्धं मोहात्त्वं नो हेय इच्छसि न था से पादयि
ष्यामीति स्वमात् कर्तुं नेच्छसि अनिच्छन्नपि स्वाभाविककर्मप
रतंत्रः परमेश्वरपरतंत्रश्च करिष्यस्येव यद्वेश्वरेच्छायाः प्रभावनि
यमने स्वभावादिकं निमित्तं दृष्टये वं विहरणीति स्वेति स्वभावे
संस्कारस्तज्जन्मेन कर्मणेत्यर्थः ६० ॥

ऊसमवैजयंतीमध्येः ९

उक्तमर्थमुपपादयन्नाह स्वभावजेनेति हे कौंतेय मोहाद् ज्ञानात्
युद्धाख्यं कर्म मदुक्तमपि कर्तुं त्वं नेच्छसि वैच्छामपि न करोषि तत्कर्म
अवशस्सन् अपि शत्रोः वधाशोत्वं करिष्यस्येव कुत एव मित्यपेक्षा
यामाह तत्र भिन्नविशेषणमाह स्वभावेन स्वभावजेन मन्मायोपस्पत्रो।
यो रजोगुणस्तन्मैव योऽय वधिहिंनाविहितकर्मकरणप्रवर्तकः केन ने
प्युपायेनानिवार्यः स्वभावः स्वस्य क्षत्रियस्य भावः पूर्वकर्मसंस्कार
जन्यः उग्रत्वादिरूपस्तस्माज्जातमिति स्वभावजं शौर्यादिलक्षणक
र्म तेन स्वेन स्वकीयेन कर्मणा यस्मात्त्वं निबद्धो मर्कटश्च वशो भि
नस्मान्न करिष्यसि वेत्यर्थः कौंतेयस्य नेनययाकृती स्वस्वभावे नैव
वर्तते तथा त्वमपि वर्तसे ... तिसूचिते ६० ॥

मधुसूदनी टीका १०

प्रकृतिं विहरणीति — स्वभावजेन पूर्वोक्तक्षत्रियस्वभावजेन शौर्यादिना स्वेनानागतकेन।

कर्मणा निबद्धो वशीकृतस्त्वं हे कौंतेय यद्युद्धं वधादिनिमित्तं युद्धं
मोहात् स्वतंत्रोहं यथेच्छामि तथा संपादयिष्यामीति भ्रमात् कर्तुं
नेच्छसि तत् अवशोपि प्रतिच्छिन्नोपि स्वाभाविककर्मपरतंत्रः प
रमेश्वरपरतंत्रश्च करिष्यस्येव [illegible]
[illegible] ६० ॥

स्वहानंदी टीका ११

प्रकृतिविहितेनोत्साहः सर्वतोपि बलीयस्त्वं यस्मात्कौंतेय शौर्यादिना
स्वेन यथोक्तेनात्मकर्मणा १ वशीकृतस्त्वं कौंतेय त्वत्स्वयं विवेकद्दे
तना बंधुहत्यादिहिंसादिनिमित्तमविवेकतः २ स्वतंत्रोहं यथे
च्छामि करिष्यामि नेत्थमिति च भ्रमाविवेकतोपि कर्तुं न कर्तुमिच्छसि यत्
मतेन ३ स्वभावपरतंत्रः सन्नीश्वराधीन एव च करिष्यस्येव तस्मात्
माकार्षीराग्रहं वृथा ४ तस्मात् ग्रहं कुरु सत्पदार्थविदेव किं पुरस्कृत्य
समाप्यकर्म जर्जरं नेतीते तिपराभवं श्रीमद्भिर्दयामेतिनसंशयोत्र ६०

नीलकंठी टीका १२

प्रकृतिस्त्वां नियोक्ष्यतीत्येतदेव व्याचष्टे स्वभावजेनेति स्वभाव
जेन स्वीकेन शौर्यादिना अवशोपि परवशः सन् करिष्यसि ६०

आनंदी टीका १३

यदेवस्फुटमाह अवशोपि सन् मदुपदेशाविषयात्मना
प्रयत्नपीत्युपालम्भः ६० ॥

रामकंठी टीका १४

व्याख्यातमेवैतत् किं बहुनोक्तेनेममुपदेशं सर्वस्वं सिद्धांततन्
यायतिप्रयत्नेनार्थः ६० ॥

नकेवलं यत्र तत्र क लासिकी [illegible] टीका मणि प्रवर्तयिष्यतीत्याव तत्स्वभावनियतं एवेत्याह ॥
हे कौंतेय स्वभावात्प्रकृतेराविर्भूतेन स्वकीयेन शौर्यादिल
क्षणेन कर्मणा प्रकृत्या निबद्धो नियंत्रितस्त्वं यत्कर्म युद्धादि
लक्षणं प्रवृत्तिमोहादविवेकात् कर्तुं नेच्छसि अवशोप्यसंतं
तदेव संस्तत्कर्म करिष्यस्येव प्रकृत्यधीनत्वात् किं बहुनो
क्तेन [illegible]
६०

पंचोलीटीका

नन्वेतदेवमाह स्वभावजेनेति हे कौंतेय स्वभावजेन शौर्या
दिना यथोक्तेन स्वेनात्मीयेन कर्मणा निबद्धः अतिशयेन ब
द्धः मोहादविवेकतः यत्कर्म कर्तुं नेच्छसि तत्कर्म अवशोपि
परवशोपि सन् करिष्यसि ६०॥

श्रणावीरसमिद्धोधिनी॥

एतदेव स्फुटयति स्वभावजेनेति स्वभावो जन्मांतरीय कर्मसं
स्कारो येन तज्जन्मं तेनोद्भवः यद्वा स्वभावः आख्याख्यातलक्ष
णः क्षत्रियोचितः सोत्वयाप्यमनवजः प्रधानः यद्वा स्वभावो ध्या
नमुच्यते इत्यव्याख्यातलक्षणो ध्यात्मशब्दवाच्यः परमेश्वरसं
बंधी इष्टनिग्रहसज्जनपालनलक्षणो सोऽ एव शुक्तोभिप्रायः स्व
भावस्तस्माज्जातेनोचितेन कर्मणा दुष्टनिग्रहादिलक्षणेन नि
बद्धस्त्वमित्यर्थः प्रोक्तं तत्त्वं प्रथमश्लोकाभिप्रायः इष्टनिग्रहा यर्थ
मेवध्यतावतारोहं भवाद्दृशानुत्तरादित्यवानव्यभिचारिणी चत
दिक्षातस्य प्रहृतो भीत्यव यथ भाविनि युद्धे स्वयमेवं प्रवृत्तो भूरि
त्यस्माज्जातेन स्वेन स्वजात्युचितेन कर्मणा युद्धादिलक्षणेन
निबद्धो नियंत्रितोपि संस्त्वं मोहाद्यद्युक्कर्म युद्धलक्षणं कर्तुं ने
च्छसि तदवशोऽमृतं त्वं कं विष्यस्येवानुष्ठास्यस्येवेत्यर्थः
६०॥

मधुभाष्य

६०॥

भाषा अनुवाद टीका

औरहे कौंतेय कुंतीनंदन अर्जुन स्वभावकहे जो पूर्व कर्म्मका संस्कार जिस से जोगुणविशिष्ट क्षत्री के जाता को प्राप्त होय श्रूरता आदिगुणकर्मोसे निबद्ध कहे वशीभूत तू मोह के मारे जो इस तरह मे युद्धकर्म्मकरनेकी इच्छा नहीं करते हो पर इसके बाद अवश होय यही कर्म्म अवश्य ही करोगे इस मे कुछभूलनमानो ६० ॥

दोहा

स्वभावज से निजकर्म से कुंतिसुत बंधाय करनमन इछे मो
हसे अवश्य करेगा भाय ६०॥

261

ईश्वरः सर्वभूतानां हृद्देशेर्जुन तिष्ठति भ्रा
मयन्सर्वभूतानि यन्त्रारूढानि मायया ६१

शांकरभाष्यटीका १

ईश्वरः ईशानशीलो नारायणः सर्वभूतानां सर्वप्राणिनां हृद्देशे
हृदयदेशे अर्जुन शुक्लान्तरात्मस्वभावो विशुद्धान्तःकरण इति
अहश्च कृष्णमहरर्जुनं चेति दर्शनात् तिष्ठति स्थितिं लभते स।
कथं तिष्ठतीत्याह भ्रामयन् भ्रमणं कारयन् सर्वभूतानि यन्त्रा
रूढानीव यन्त्राण्यारूढान्यधिष्ठितानीवेति इवशब्दोऽत्र द्रष्टव्यो य
था दारुकृत पुरुषादीनि यन्त्रारूढानि मायया छद्मना भ्रामयन्
तिष्ठतीति सम्बन्धः ६१ ॥

आनंदगिरिकृतटीका २

अर्जुनशब्दस्योक्तार्थत्वे श्रुतिमुदाहरति अहश्चेति अहश्च कृ
ष्णमहरर्जुनं च विवर्तेते रजसी वेद्याभिः इत्यत्र किंचिदहर्लाव
न् कृष्णमह्नं कलुषितमिव लक्ष्यते किंचित् पुनरहरर्जुनमति
स्वच्छं शुद्धस्वभावमुपलभ्यते एवमर्जुनशब्दस्य शुक्लशब्दपर्याय
तया प्रयोगदर्शनादुक्तार्थत्वमुचितमित्यर्थः यन्त्रारूढानीवेति
कथमुच्यते तत्राह इवशब्द इति तदेव प्रपंचयति यथेति दारुम
यानि यन्त्राणि यथा लौकिको मायावी मायया भ्रामयन्वर्तते
तथेश्वरोऽपि सर्वाणि भूतानि भ्रामयन्नेव हृदये तिष्ठतीत्यर्थः ६१

स्वामिकृतटीका ३

+ ईश्वर इति द्वाभ्यां सर्वभूतानां हृदयमध्ये ईश्वरोऽन्तर्यामी तिष्ठति
किं कुर्वन्सर्वाणि भूतानि मायया निजशक्त्या भ्रामयन् तत्तत्क
र्मसु प्रवर्तयन् यथा दारुयन्त्रमारूढानि कृत्रिमाणि भूतानि सू
त्रधारो लोके भ्रामयति तद्वदित्यर्थः यद्वा यन्त्राणि शरीराण्यारू
ढानि भूतानि देहाभिमानिनो जीवान् भ्रामयन्नित्यर्थः तथा च
श्वेताश्वतराणां मन्त्रः एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूता
न्तरात्मा सर्वाध्यक्षः सर्वभूताधिवासः साक्षी चेताः केवलो निर्गुणश्च

+ तदेवं श्लोकद्वयेन सांख्यादिमतेन प्रकृतिपारतंत्र्यं स्वभावपारतंत्र्यं कर्मपारतंत्र्यं चोक्तं इदानीं स्वमतमाह ॥

श्री- गी० टी० अ-

ति ध्येतर्यामि ब्रह्मणे च यथात्मनि तिष्ठन्नात्मानमन्तरो यमय
ति यमात्मा न वेद यस्यात्मा शरीरं य एष त आत्मान्तर्याम्यमृत इत्या
दि ६१ ॥

पिशाचभाष्यटीका ४

ईश्वरो वासुदेवः सर्वभूतानां सर्वप्राणिनां हृद्देशे हृदयपुंडरीके प्र
ज्वलितेन शुक्रेन निर्मलमनःकरणप्रसादेन पिनस्वैथादर्शनः ईश्वरर्जुन
तिष्ठ सन्निधीयते यथा काष्ठिकशलोदारु चक्रयोगारूढानि भ्रामयं
स्तिष्ठतीति प्रकृष्टः संबंधः ६१ ॥

रामानुजभाष्यटीका ५

ईश्वर इति ईश्वरः सर्वनियमनशीलो वासुदेवो सर्वभूतानां हृदि दे
शे सकलप्रवृत्तिनिवृत्तिमूलज्ञानोदये हृद्देशे तिष्ठति कथं कुर्व
स्तिष्ठति यंत्रारूढानि स्वसर्वभूतानि क्रीडयायाः गुणमय्या मायया आत्मा
मयत्वं सर्वेनेव निर्मितदेहेन्द्रियावस्थं प्रकृत्या मायेन यंत्रारूढानि सर्व
भूतानि सत्वादिगुणमय्या मायया गुणानुगुणं प्रवर्तयं स्तिष्ठतीत्य
र्थः एवं मत्येन तत्कं सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपो
हनं चेति मत्तः सर्वं प्रवर्तते इति च स्मृतिश्च आत्मनि तिष्ठन्नित्यादिका ॥
६१ ॥

अभिनवगुप्तकृतटीका ६

स्पष्टार्थम् ६१ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका ७

तदेवं सांख्यमीमांसकादिमतेन प्रकृतिपारतंत्र्यस्वभावपारतंत्र्यं च
निरूप्य ब्रह्मनादर्शनेनिषिद्धः इदानीं मया यत्तेन प्रकृतिः सूयते
सचराचरमिति स्वमतं महर्षिप्रसाद प्रवर्तिते चाह ईश्वर इति
भोऽर्जुन सर्वभूतानां हृद्देशे ईश्वरोऽन्तर्यामि मित्व न तिष्ठति किं कुर्वन्
सर्वभूतानि सर्वजीवान् यंत्राणि शरीराणि आरूढानि प्रयोष्टितानि
मायया स्वशक्त्या भ्रामयन् सन्निधिमात्रेण व्यापारयन्न तु स्वयमि
त्यर्थः श्रुतिरपि कायवशारावरणाके यो वै स स एव स प्रजापति
यो ऽङ्गशकलोयमेव सपो यमेवं विरूपस्ते सावित्रमेवं पंचदशाक

लाश्चात्मैवास्य षोडशीकला स वित्तेनैवाप्यूर्यते ऽपक्षीयते तदेत
न्नभ्यं यदयमात्मा प्रधिर्वित्तं तस्मात्सर्वज्यानिं जीयत आत्मना चेज्जी
वति प्रधिनागादित्येवाहुरिति भाष्यं यद्वृति पूर्वोक्तः संवत्सरः कालरू
पः सोपि षोडशकलः प्रजापतिः प्रथमपि तन्निर्दिष्टस्समानतद्रूपप्
वत्सर्वोक्त एवं वित्तं पुरुषः सोपि षोडशकलः प्रजापतिः तस्य वित्तं प
च पंचमहाभूतेंद्रियप्राणात्मके लिंगदेहो नाप एवं पंचदशकलाः तथा
तच्छरीरावच्छिन्नश्चात्मैवास्य षोडशीकला स प्राणकेन वित्तेन पूर्यते
पक्षीयते च प्रहृतिमार्गेण पूर्यते निहतिमार्गेण पक्षीयते उपरमे
प्राप्नोति तदा षोडशीकला वशिष्टा भवति तदेतदेतन्नभ्यं नाभौ भ
वे नाभ्यमिति चक्रवर्तादप्तः प्रयोगो नभ्यमिति यद्वा मध्यमदेशोप
स्थितस्थि[illegible]रं वस्तु विवर्ति तेनैतेन नभसि हृदयाकाशेवस्थितं तेनभ्यं
तत्किं यदयमात्मा प्रज्ञसनाभावयेकमर्पितमिति प्रकृतेः प्रथम
र्थः यथा कुलालचक्रस्य मध्यच्छिद्रे स्थितः कीलकश्चक्रचलने
पि न चलति तद्वदेतन्नभ्यं तथा वित्तमाहुः प्रधिनेलिंगदेहः प्रधिः प
रिधिः चक्रपरिधिवत् बाह्यपरिधिस्थानीयं तस्माद्धि तायपि सर्व
ज्यानिं सर्वस्वहानिं जीयते प्राप्नोति तथापि आत्मना चेत्संपद्यते।
तदा जीवति जीवन्मुक्तो भवति अथ प्रधिना शरीरेण चेत्संपद्य
ते तदा [illegible]गात्वगमनागमनं करोति १२ ॥

वनमाली टीका ८

स्वभावाधीनत्वमन्यापरेशाधीनत्वं दर्शयति ईश्वर इति ईश्वर ईशा।
नशीलो नारायणः सर्वान्तर्यामी यः पृथिव्यां तिष्ठन्पृथिव्या अंतरो
यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमंतरो यमयति य
आत्मनि तिष्ठन्नात्मनोंतरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मा
नमंतरो यमयत्येष त आत्मांतर्याम्यमृत इति श्रुतिसिद्धः सर्वभू
तानां सर्वप्राणिनां हृद्देशेतः करणे तिष्ठति सर्वव्यापकोपि सन् रूपा
विशेषेण तत्र नियामकतयाभिव्यज्यते समदीपाधिपतिरिव रा
मउतस्कोशालाधी किं कुर्वन् भ्रामयति क्व तत्राह यंत्र सर्वभूता
नि प्राणिनः यंत्राणि शरीराणि तदारूढानि मायया स्वरूपमूतेच्छ

श्री· गी· टी· ग्रं·

263

या यथादारुमयंत्रारूढानि कृत्रिमाणि भूतानि सूत्रधारो भ्राम
यति तद्वदित्यर्थः अहमात्मा गुडाकेश सर्वभूताशयस्थितः सर्वस्य
चाहं हृदि संनिविष्टः मत्तः प्रवर्त्ततेनान्यदित्यादिना स्वस्य सर्वभूतांतःस्थ
त्वस्य सर्वभूतनियामकत्वस्य सर्वात्मत्वस्य चात्र कृष्णेनैवार्जुनेन
विदितत्वाद्योयोऽसौ न तयोर्भेद इति भावः ६१ ॥

उत्तमवैजयंतीटीका ८

एवमर्जुनेनोपलालितस्य सर्वजीवनिकायस्य प्रकृतिगुणस्वभा
वकर्मादिभिरचेतनवस्तुभिः कर्मकारणत्वात्तेष्वाभावस्य क्वेदानीं
तनेश्वरस्य पारतंत्र्यं दर्शयतीश्वरः प्रपन्नसेवनत्वप्रसादादेव संसार
निवृत्तिरित्याह द्वाभ्यां ईश्वर इति हे अर्जुन ईश्वरो निखिलविट्
विदुस्तन्नियमनशीलः परब्रह्मभूतः पुरुषोत्तमो देवकीनंदन
स्त्वत्सारथिः सर्वभूतानां सर्वेषां ब्रह्मादिस्थावरान्तानां भूतानां चे
तनाचेतनरूपाणां समस्तानां हृद्देशे निखिलभूतप्रवृत्तिनिह
तिमूलज्ञानोदयस्थले हृदयमध्ये तिष्ठति किं कुर्वन् सन् मायया स्व
शक्त्या सत्वादिगुणमय्या प्रकृत्या यंत्रारूढानि तत्तत्कर्मानुगुणैस्स्वे
नैव निर्मिते शरीरे नियंत्राणादिरूपे यंत्रस्मिन्नारूढानि भ्रामयन्
कृतवंति भूतानि चराचररूपाणि भ्रामयन् सन् यथा सूत्रधारो दा
रुयंत्रारूढानि कृत्रिमाणि भूतानि भ्रामयन् स्वयं स्वांतर्गतस्वस्था
ने तिष्ठति तद्वत् एवं श्रुतिरप्याह य आत्मनि तिष्ठन्नात्मानमंतरो यमू
मयतीत्यादिका स्मृतावप्युक्तं सर्वस्य चाहं हृदि संनिविष्टः मत्तः सर्वं
प्रवर्त्तत इत्यादि अर्जुनेनानेन य ईश्वरः परोक्तद्रूपेण तत्र तत्र स्थितः ।
तानि तानि भ्रामयति स एवाहं मद्याथारोदितरूपेणात्र एव स्थितः ।
याद्वन्नौर्जुनेन भ्रामयामसृतत्वस्तु दर्शनकोपि गुणवानिति निरू
पितं ६१ ॥

मधुसूदनीटीका ९

+स्वभावाधीनतामुक्त्वेश्वराधीनतां विवृणोति ॥

+ईश्वर ईशनशीलो नारायणः सर्वान्तर्यामी यः पृथिव्यां तिष्ठन् पृथि
व्या अंतरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमंतरो यमय
ति यच्च किंचिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा अंतर्बहिश्च तत्सर्वं व्याप्य ना
रायणः स्थित इत्यादिश्रुतिसिद्धः सर्वभूतानां सर्वेषां प्राणिनां हृद्दे

शेंतः करणे तिष्ठति सर्वव्यापकोपि तत्राभिव्यज्यते समद्दीपा
धिपतिरिवायमत्र गतकोसलाधीश्वरो जने दृश्यः स्वहृदान्तःकर
णापताट्टशमीश्वरं ते ज्ञानं येपश्यति यो सौ स नियाम्यते किं कुर्वन् तिष्ठति
भ्रामयन् इतस्ततः चालयन् सर्वभूतानि परतंत्राणि मायया बुद्ध्या ।
यन्त्रारूढानीव सूत्रसंचारादियंत्रमारूढानि दारुनिर्मित
पुरुषादीन्यति परतंत्राणि यथा मायावी भ्रामयति तद्वद्
न्वयशेषः [illegible]
[illegible] ६१ ॥

सदानंदी टीका ॥

स्वभावाधीनतां मत्वा स्वपराधीनतामथ ये हरिरीशा वशी लोको
नारायणपदाभिधः १ सर्वान्तर्यामिनाथस्य प्रसिद्धा वेदवाक्यतो
क्ततो तिष्ठन् पृथिव्यां यस्तस्यान्तरो यं न वेद सा २ यस्य श
रीरं यस्यामन्तर्यमयत्यजः यच्च किंचिज्जगत्सर्वं दृश्य
ते श्रूयतेपि वा ३ अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः ३
त्यादिश्रुतिवाक्यानि संति श्रीपरमेश्वरे ४ स सर्वव्यापकोपी
शः सर्वेषां प्राणिनां विभुः अन्तःकरणदेशेषु निर्मलेषु तिष्ठती
त्यसौ ५ सर्वभौमो यथा रामो महाराजो नृपोत्तमः उत्तराको
सलायां वै तिष्ठतीति तथैव च ६ व्यापकोपि परेशानस्तत्राभि
व्यज्यते विभुः स्वहृदन्तःकरणान्तः स्वमीदृशं परमेश्वरं ७ ज्ञानेयो
यपश्यति स एष स्वात्मने जनशङ्कतः किं कुर्वंस्तिष्ठतीशानश्चेत्य
हस्वयं विभुः ८ भ्रामयंश्चालयन् सर्वभूतानीशस्ततस्ततः
दारुनिर्मितपुत्तल्यादीनीवशानियथानवः मायया बुद्ध्या तान
हं सर्वभूतानि सर्वतः स यंत्रारोपितानीव भ्रामयंस्तिष्ठत्
ईश्वरः ९ यंत्रारूढानि मायावी भ्रामयंस्तिष्ठतीनरः यद्वा मा
यामयं यंत्रं शरीरं स्थितं यजरं ॥ तत्राहंताभिमानेन प्राणिना
नेहि तिष्ठति ततस्स भगवानीशो मायया भ्रामयञ्जगत् १२
तिष्ठतीति स्वतंत्रः सन्निर्लेपो निरुपद्रवः नतु केसर्वे विधाना
पारगैरपि योगिभिः १३ देहादिपंजरं येत्र नदारो हो भिमानिना

श्री· गी·टी· अ·

विहितप्रतिषिद्धेषु प्रवृत्तिर्धर्मगा भवेत् ७४ अविद्याकामक
र्मादिसामग्री सकला जडा जीवोप्यज्ञानया भोग्यापरतंत्रोऽज
ज्ञानगः ७५ न किंचित्कर्तुमलमस्य सामर्थ्येच स्वतंत्रतः
अतः श्रीभगवानेवानंतशक्तिर्महेश्वरः ७६ समस्तं स्ववशी
कृत्वा लोके लोकेश्वरेश्वरः मायया भ्रामयन्स्वामी तिष्ठति
प्राणिनां हृदि ७७ समस्तानुपपत्तीनां परिहाराय सर्वथा मा
ययेति स्वयं श्लोके श्रीमद्भगवतेऽप्यभि ७८ हृदिगतममलाभम
र्वलाभाहिलाभेरविशशिनयनाभेरपा मम चोज्वलाभे फणि
विषयरसाभिभूतानाभं सकलमतिमनाभं नौमि कुलस्साभं ७९
समस्तलोककर्तारं गोप्तारं सर्वदेहिनां सर्वभूतानि यंत्रारूढे
दहृदिगमृपे ८० ६१ ॥

नीलकंठी टीका १८

कोसौ परो यद्वशोहमस्मीत्यत आह ईश्वर इति ईश्वर ईशनशी
लोंतर्यामी एषष्याद्यादीनामस्माकं च सर्वभूतानां सर्वप्राणिनां
हृद्देशे बुद्धिगुहायां सर्वप्राणिप्रवर्तकस्तिष्ठति कीदृशः सर्व
भूतानि भ्रामयन् ऊर्ध्वाधोमार्गेषु संचारयन् काष्ठपुत्तलिकाइ
वसूत्रधारः यंत्रारूढानि यंत्रमिव यंत्रं उत्क्रमणादिसाधने
सर्वप्राणाद्यात्मकं लिंगं तदारूढानि मायया स्वशक्त्या भ्रामय
न्निति संबंधः हे अर्जुन शुक्ल विशुद्धांतःकरण ईश्वरोसीति
भावः अत्राहंकारस्यैवकं यः कर्म करोति यश्च ईश्वरपरवशो
हं करोमीति व्याकरोति तयोरन्यतरवैलक्षण्यप्रदर्शनार्थमि
त्रो भाष्य उदाहृतः अहस्तक्रमसमहर्जेनेच विवर्तते रजसीवेया
मितिति भावद्वाजार्थ अहस्पृक्रमसमहर्जे नेच्छानित्यमाकृतस्य
प्रतिपदितिवालोणेनमाप्तानिमाकृतेनेशाब्दविनिमुक्ता प्रथमेय
स्यक यस्मिन्दिवसे सोमः सूयते यागार्थं तदेव नन्नसापत्य
दिनेऽब्दमहः शह वाच्यं अयुतद्दिनमदिनमेव निष्फलता
त् तथा च स्मृतिः दशाभिर्जन्मभिर्वेदाग्राधानेशान्तजन्मभिः स
हस्रैर्जन्मभिः सोमं वाजपेयं पानमर्हतीति सोमयागस्यदौर्लभ्य

५सुनाभं

264

दर्शयति तदयमर्थः शाहुः कालवचनोपि सोम्येकर्मणि वर्तते
यथा दर्शपौर्णमासशब्दो तच्चैवं सति ग्रहः यागः कृत्स्नप्रविष्टया
कृतेऽप्रकाशमिव भवति तथा हृदये तेन स्वच्छे तदेव विष्टया कृते
प्रकाशरूपमिव भवति तेयतेऽभेगुणविहत्कृते ग्रहणीरजसो
प्रकृतिरूपत्वात् रजोगुणकार्यैः प्रविष्टाभिर्विषयाभिः कर्मोणाव
वच्छेपासनारूपा वा परमेश्वरे सर्वकर्मार्पणरूपा वा अहंकारोमी
त्यभिमानरूपा वा क्रिया विज्ञाना विज्ञताभिर्विवर्तते वैपरीत्येनव
र्तते लोपासनेकर्मसेवेते परमात्मतत्त्वप्रकाशकेवेच विवेकेहेतुः
मूढकृतेकर्मफलेस्वरूपावरकेवेच हेतुरित्यर्थः तदेवं भगवान्
पार्थं प्रजानेति सेवोयथनुपनस्य स्वच्छांतःकरणत्वयोतनेन
श्लोकेन धर्मेपिकारं दर्शयति ६१ ॥

आनंदी टीका ६१

एवं प्रकृतिपरवशतामुपदिश्येश्वराधीनतामप्याह एषो
स्मिन्नकरणेऽहृदेशलक्षणपरीताभिर्वक्षशो निरूपितः ई
श्वरः परमात्मा प्राणिनां कर्मविपाकं विदित्वा कर्मफलप्रा
पणसमर्थः मायया दैवी ह्येषा गुणमयी तिलक्षितया तम
प्रचुरया हंकारिका प्रकृत्या या परमेश्वर्या सत्त्वप्रकाशावरणश
क्त्या सर्वाणि भूतानि प्राणिजातानि यंत्रारूढानि रजस्तमसा
चैवसमाविष्टोधमविह भावैरनिष्टैः संयुक्ताः संसारं प्रतिप
द्यते इत्यादि या तव बलकादिस्मरणाज्ञानायोनिषु परिश्राम
कं संसारचक्रमारूढानि भ्रमयन् स्वस्वकर्मफलभोगार्थं
जन्ममरणे पुनः पुनरनुभावयन् सर्वेषां भूतानां प्राणिनां
हृदये चैतन्यादिकरणे देशे वसति नित्यमन्तर्यामितया तत्त
त्कर्मविपाककालस्वरूपेण कलयन् गणयंस्तिष्ठति ग्रवश्य
मनात्मकोरवसैन्यास्त्वयामारयि तीत्यर्थः ६१ ॥

श्री· गी· टी· अ·

265

एषप्रबंधतः पुनःपुनः प्रतिपादितईश्वरः परमात्मा सर्वभू
तानां समस्तप्राणिनां हृदि हृदयेसर्वसंविदधिकरणभूते
देशेवसतिनियमेनतिष्ठति किंकुर्वन्किंचिदेषांसर्वभूताना
ज्ञानात्मकं क्रियात्मकं वा परिस्पन्दितं तत्सर्वसएवैकः पर
मार्थः कुर्वन्नपि मायाशक्त्यावभासितपरस्परविभिन्नरूप
नानारूपाणितानिसर्वभूतानिप्रत्येकमहंकरोमीतिमिथ्या
भिमानविवेशनेनभ्रामयन्मायामोहयन्यंत्रारूढानि यंत्रसू
त्रसंचारादियुक्तिसंपाद्याचेतनवस्तुचेतनक्रियाभिव्यंजक
काष्ठादिसन्निवेशविशेषमारूढानि यथाकेनापियुक्ति
मताविशिष्टसन्निवेशविरचितेयंत्रेधिरूढेष्वचेतनेष्वभाव
श्चचेतनक्रियाविशेषः क्रियते तथापरमेश्वरेणशरीरयंत्र
मारोप्याकर्तृष्वभूतान्यपिभूतानिकर्त्रभिमानावेशभांजिक्रि
यंतेइत्यर्थः एतद्यंत्रारूढावेतिछांदसत्वंसकवकुर्वचन
विवक्षयायात्युपपद्यंति तेचशरीरंरूपत्वेनव्यावर्तते नतुव
स्तुनिनकश्चिद्विशेषः ६१ ॥

+ अथुनोपदेशसर्वस्वंश्लोकद्वयेनाह ॥

लासिकी [illegible]टीका

+ ईश्वरोन्तर्यामीसर्वेषांचतुर्दशविधानांप्राणिनांहृद्देशेस
र्वसंविदधिकरणेदेहैकदेशेतिष्ठति अप्रच्युतज्ञानबल
वीर्यएवस्थितिविभाति किंकुर्वंस्तिष्ठतियंत्रारूढानिदे
हमेवयंत्रंचक्रमारूढानिभ्रामाति सर्वाणिभूतानिजीवा
न्मायया निजशक्त्याभ्रामयंस्तादात्म्याध्यासेनमोहयन् ६१

पंडोलीटीका

तदेवं स्लोकद्वयेन सांख्यादिमतेन प्रकृतिपारतंत्र्यं चउक्त्वेदानीं स्वा
तंत्र्यमाह ईश्वरमिति हेअर्जुन ईश्वरः ईशनशीलः सर्वभूतानां सर्व
प्राणिनां हृदयदेशे विशुद्धांतःकरणे तिष्ठति किंकुर्वन् सर्वभूतानि
मायया भ्रामयन् यंत्रारूढानि यथा दारु निर्मित पुरुषादीनि
भ्रामयति कश्चित्तथा सर्वभूतानि भ्रामयन्हृदि तिष्ठति ६१

रमावीरसमिद्धोधिनी

उक्तमेवार्थं द्रढयति ईश्वरइति ईश्वरोंतर्यामी परमात्मा सर्वभूतानां
समस्तप्राणिनां हृद्देशे हृदयमध्ये तिष्ठति किंकुर्वन् मायया स्व
मायया भ्रांत्या सर्वाणि भूतानि कर्तृमस्वतंत्रत्वाज्ज्ञानि भ्रामयन्
चेतनतासंपादनेन तत्र तत्र कर्मणि प्रवर्तयन् कथमित्याह य
था सूत्रधारो यंत्रारूढानि यन्त्रसूत्रसंचारादियुक्तिसंपाद्याचेतनव
त्सचेतनक्रियाभिव्यंजकं काष्ठादिसन्निवेशमारूढानि तत्कृत्रिमाणि
भूतानि भ्रामयति तद्वदित्यर्थः ६१॥

मधुभाष्य

६१॥

266

भाषा अनुवाद टीका

इससे पिछले दोनो श्लोकमे सांख्य आदिमतानुसारी मनु
ष्योंकी प्रकृतिपारतंत्र्य कहे स्वभावाधीनता कही गई अब
इस श्लोकसे निजकहे अपना मत कहते है कि हे अर्जुन सक
ल भूतोंके हृदयमे नियामक रूपसे अंतर्यामी ईश्वर स्थिति
करतेहैं तो किसप्रकारसे ठिके है इस आकांक्षापर कहते है
कि भूतमात्र कोमाया जो अपनी शक्ति तिसकेजोर से भ्रमण
कहे उपस्थित समस्त कर्मोमे प्रवृत्त करावते भये सबमे टिके
है जैसे कठपुतली को सूत्रधार बाजीगर लोगोके सामनेना
मने नचावे है अथवा यंत्रकहे शरीर आरूढ कहे जीवको
भ्रमण करावते स्थिति करतेहै इसपर श्वेताश्वतर उपनिषद
के मंत्र का प्रमाण देतेहै कि एक स्वयं प्रकाश जोपरमात्मासो
भूतोमे निगूढ भावसे स्थित औ सर्वव्यापी सब का अंतर्यामी
औ कर्मोका नियंता औ भूतोंका आधार रूप औ द्रष्टा देखनेवा
ला औ भूतमात्रको चेतनकारी अद्वितीय औ गुणातीत है औ
र अंतर्यामी जो बुद्धिमे स्थिति करकेबुद्धिका नियम करैहै औ
र जिसको बुद्धि नही जानती और बुद्धिही जिसकी उपाधि है सो
ई तुमारे आत्मा औ अंतर्यामी तथा कैवल्यस्वरूप है ६१ ॥

दोहा

ईश्वर हि सभ जीवके स्थित अर्जुन हृदय देश मायासें सभ
जीवकों भ्रमावे यंत्र निवेश ६०

तमेव शरणं गच्छ सर्वभावेन भारत तत्प्र।
सादात्परां शांतिं स्थानं प्राप्स्यसि शाश्वतं ६२

शांकरभाष्य टीका १

तमेवेश्वरं शरणमाश्रयं संसारार्त्तिहरणार्थं गच्छ आश्रयं सर्व
भावेन सर्वात्मना हे भारत ततस्तत्प्रसादादीश्वरानुग्रहात परां प्र
कृष्टां शांतिं परामुपरतिं स्थानं च मम विष्णोः परमं पदमवाप्स्यसि
शाश्वतं नित्यं ६२ ॥

आनंदगिरिकृत टीका २

ईश्वरः सर्वाणि भूतानि प्रेरयति चेत् तर्हि कैवल्यार्थी सोपि पुरुष
कारस्यानर्थकामित्याशंक्याह तमेवेति सर्वात्मना मनोवृत्त्या वाचा
कर्मणा चेत्यर्थः ईश्वरस्यानुग्राहात् तत्वज्ञानोत्पत्ति पर्यंता दि।
विशेषः मुक्तात्तिष्ठत्यात्मनि स्थानं ६२ ॥

स्वामिकृत टीका ३

यस्मादेवं सर्वेजीवाः परमेश्वरपरतंत्रास्तस्मात् तमिममितस्मादहंकारं
परित्यज्य सर्वभावेन सर्वात्मना तमीश्वरमेव शरणं गच्छ ततस्तस्यैव
प्रसादात् परमामुपशांतिं स्थानं च पारमेश्वरं नित्यं प्राप्स्यसि [illegible]
[illegible] ६२ ॥

पिशाचभाष्य टीका ४

तमेव शरणं सकल दुःखनिवारणमाश्रयं गच्छ भज स्व सर्वभावेन
सर्वैः सकलैरयं मम चास्तिस्वामी श्रयं मम पोषकः श्रयमेवा
चार्य इत्येवमादिभिस्तत्प्रसादात्तस्य शरणागतवत्सलस्यानुग्रहा
त्परां प्रकृष्टां शांतिं मुपरतिं मयि गमस्य स्थानं वैष्णवं प्राप्स्यसि गमि।
ष्यति शाश्वतं नित्यं ६२ ॥

+ एतन्मायानिवृत्तिहेतुमाह ॥ रामानुजभाष्य टीका ५

+ तमेवेति यस्मादेवं तस्मात्तमेव सर्वस्य प्रशासितारं माश्रितवात्स
ल्येन त्राणत्राणेव स्थितं मित्थं ज्ञात्वा विहितं च शासितारं मां सर्वभावेन स
वात्मना शरणं गच्छानुवर्त्तस्व प्रयत्नमन्यायायेनितेनाज्ञेनैव तद्याग्रहा
दिकरणमवर्जनीयं तथा सति तन्नाभविष्यसि ततो मद्दकप्रकारेण

दत्य

श्री
गी टी
प्र

268

ब्रह्मादिकेऽर्वाचीनार्थः एवं कुर्वाणो मत्प्रसादात्परां शान्तिं सर्वक।
र्मोपरमं शाश्वतं च स्थानं प्राप्स्यसि यदभिधीयते श्रुतिशाने
स्तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः ते ह नाकं महिमानः सचे
न्त यत्र पूर्वे साध्याः सन्ति देवा इत्यादिभिः ६२ ॥

अभिनवगुप्तकृतटीका ६

स्पष्टार्थम् ६२ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपा[illegible] टीका ७

एवमन्वयव्यतिरेकाभ्यां प्रकृतेस्तद्द्रूपसंस्काराणां वा ईश्व
राधीनत्वात्सर्वेश्वरप्रपदनमेव शरणमिति मद्भक्तमनुसरन्नाह तमेवेति
तस्मात्तमेव मामीश्वरं सर्वनियामिनं सर्वभावेन सर्वात्मना शरणं
व्रज तत्प्रसादात्परात्प्रकृष्टां शान्तिं निवृत्तिं शाश्वतं नित्यं स्था
नं च प्राप्स्यसि तदुक्तं स्थूलेषु पाणिपादेषु रतेनमसमस्तु मे देवाले
येते नरदिव्हे देवपतिः परात्मा तत्पूजनीयकरणाश्रयविलेन्द्रि
याणि कालात्तमेव शरणं व्रज जीवनाशमिति ६२ ॥

वनमाली टीका ८

तमेवेश्वरं सर्वनियामकं शरणमाश्रय भवसमुद्रोत्तरणा
र्थं गच्छ सर्वभावेन मनसा वाचा कर्मणा साधनान्तरमानाह
त्येश्वरशरणमेवाश्रयेत्यर्थः तत्प्रसादात्तस्येश्वरस्यानुग्रहात्प
रां शान्तिं वैरस्य दैन्य निवृत्तानविधानिवृत्तिं च ततः शाश्वतं तु।
त्पत्तिनाशादिशून्यस्थानं वैकुण्ठाख्यं लोकं नित्यकार्यविग्रहावि
र्भूतस्तेन स्वस्वरूपं प्राप्स्यसि ६२ ॥

ऊसमवैजयन्ती टीका ९

संसारनिस्तरणोपायमाह तमेवेति हे भारत सर्वभावेन देहेन्द्रि
यमनोव्यापारेण तमेवेश्वरं सर्वभूतस्य सर्वनियन्तारं शरणं
मनुवर्तनं गच्छ तेषां हि शरणमनन्तदाज्ञापालनरूपं सेवा
च तत् ब्रह्मादिकं कर्मेत्युक्तं नौ वेत्र मायया कृतां तत्त्वात्तेन तत्राभवि
ष्यसीत्यर्थः तत्करणात्प्राप्य वन मम किं फलं भविष्यतीति वि
वक्षाह तदिति तत्प्रसादात् तस्येश्वरस्यानुग्रहात्परां सर्वोत्क।

शांतिं निखिलकर्मविक्षेपोपशमनलक्षणां प्राप्स्यसि तु नश्वरा।
श्वतं नित्यं कोसस्थानं महाविभूतिविस्तदादिश ह्यापि ये ये वैकुं
ठं प्राप्स्यति तद्विष्णोः परमं पदमित्यादिश्रुतेः परं ब्रह्म परं धाम त
द्धाम परमं मम मेत्यादिस्मृतेश्च प्रसादेवेतस्मान्मदुक्तमार्गोक्तमस्व
धर्मभूतेयत्तद्रह्ययज्ञादिरूपं कर्म कर्तुं विमुखभिप्रायः भारतेन्द्रवेनोक्त
मुक्तलप्रसक्तं तं नवमस्ठचनोंगीकार्य एवो विनोनन्वनंगीकार्य इति
स्वचितं ६२ ॥

ईश्वरः सर्वभूतानि परतंत्राणि प्रे
रयति चेत्तर्हि विधिनिषेधशास्त्र
स्य सर्वकृतघ्नकारस्य
चानर्थक्यमित्याह ॥

मधुसूदनी टीका १०

तमेवेश्वरं शरणमाश्रयं संसारसमुद्रोत्तरणार्थं गच्छ आश्रय सर्वभा
वेन सर्वात्मना मनसा वाचा कर्मणा च हे भारत ततस्तत्प्रसादात्तस्यैवे
श्वरस्यानुग्रहात्तत्त्वज्ञानोत्पत्तिपर्यन्तात् परां शांतिं सकार्याविद्या
निवृत्तिं स्थानं च द्वितीयरहितस्वप्रकाशपरमानंदरूपेणावस्थानं शाश्व
तं नित्यं प्राप्स्यसि ६२ ॥

सदानंदी टीका ११

ईश्वरः सर्वभूतानि परतंत्राणि मायया प्रेरयन्नेव चेत्तथापि मानसी।
कं श्रुतेः स्मृतेः १ विद्यादिप्रतिपादिन्याः पौरुषस्य तथैव च रुप
त्राह तमेवेशं शरणं गच्छ सर्वथा २ संसारजलधेः पारोत्तरणार्थ
तमाश्रय मनसा कर्मणा वाचा सर्वभावेन भारत ३ तस्येश्वरस्य श्री
विष्णोः कल्याणगुणवारिधेः अनुग्रहात्तत्त्वज्ञानोत्पत्यवधेः प
रां ४ सकार्याज्ञानबाधाख्यां शांतिं स्थानं परं पदं स्वप्रकाशपरानंद
रूपेणावस्थानं शाश्वतं ५ नित्यकूटस्थमद्वैतं निर्मलं प्राप्स्यसि ध्रु
वं विद्यादिना स्वस्य पौरुषस्य च सर्वथा ६ इदमेव हि सार्थक्यं पदी
श शरणं व्रजेत् न स्वातंत्र्यात्क्वचित्किंचित्प्राप्नोतीह फलं नरः ७ ईश्व
रानुग्रहादेव सर्वं सर्वस्य जायते ईश्वरानुग्रहेणैव साध्यते तत्त्वमस्मा
दृभिः ८ यथाप्रसन्नो भगवान्प्रपेदे वै कदाचन सर्ववेदेषु गु
णेषु पुराणे भारते तथा ९ सर्वं विहाय कर्तव्यमिदमेव सुनिश्चितं वा
सुदेवैकशरणः सर्वं प्राप्नोति शोभनं १० अतस्तमेव शरणं गच्छेत्सा
हसमाधिनिः ११ ईशावेन हरिं भजस्व निगमप्रोक्तेन मार्गेण भो ह्य

श्री-
गी टी-
अ-

269

स्ततस्य समाश्रयस्व समनोभक्ताभयेनाद्यात् सच्चिसौहृदमाश्र
यस्व नृहरेः प्रेमाणुरक्तेन च त्वात्मानं प्रकटीकरोति भजतामेवं
सर्वेहहरिः १२ ६२ ॥

नीलकंठी टीका १२

तमेव ईश्वरं सर्वभावेन सर्वात्मना शरणमाश्रयं गच्छ प्राप्नुहि त
त्प्रसादात्तदनुग्रहात्परां शांतिं उपरतिं समाधिमिति यावत् त
था च सूत्रे समाधिसिद्धिरीश्वरप्रणिधानादिति स्थानं च परं वि
ष्णोः पदं मोक्षं शाश्वतं नित्यं प्राप्स्यसि ६२ ॥

आनंदी टीका १३

तमेवोक्तलक्षणपरीदितं चतुरंशात्मकं परमेश्वरं सर्वेषां मनो
वाक्कायानां भावेन सात्विकेन स्वकर्मानुष्ठानेन शरणं गच्छ म
दुचनश्रमारोपन संसारबंधमोक्षार्थमाश्रय तस्य परमेश्वरस्या
नुग्रहात्परां शांतिं शोकमोहादिभिः कृतस्य चित्तविक्षेपस्याभा
वं स्थितप्रज्ञत्वं प्राप्स्यसि स्थितप्रज्ञत्वफलं च शाश्वतं स्थानं परस्व
रूपस्वरूपं प्राप्स्यसि ६२ ॥

रामकंठी टीका १४

यतएवं तत्त्वतएव सर्वकर्त्ता परमेश्वरस्ततः सर्वथा निरस्तमि
थ्याभिमानस्तमेवैकं शरणं गच्छात्मत्वेन प्रतिपद्यस्व मिथ्याभि
मानजेभ्यो हर्षशोकादिबंधनेभ्यो विमुक्तः सन्त्प्रसादात्तस्यै
वैकस्येश्वरस्य प्रसादादनुग्रहादभिव्यक्तादात्मस्वाभाविकानिर्म
लपरसिद्धिं निरुत्तरां ज्ञाननिष्ठां तत्फलं च परस्थानं निरुत्तरं
धाम ब्रह्मस्वरूपं प्राप्स्यसि अधिगमिष्यसि [illegible]
[illegible] ६२

+अथतादात्म्याध्याममाड तिनी र्वोरुपाय माह॥

लासिकी … टीका

+हे भारत तमेव हृद्देशे स्थितमीश्वरं सर्वभावेन सर्वात्मना शरणं
गच्छ उपाः स्तुतस्यैवेश्वरस्य प्रसादात्स्वरूपप्रकाशनरूपादनुग्रहा
त्परां शुतिं क्षणशांतिं सर्वविकल्पोपरमं प्राप्स्यसि जीवद्दशायां
देहपाते तु शाश्वतं स्थानं मोक्षाख्यं च प्राप्स्यसि [illegible]
६२

पंचोलीटीका

यस्मात्सर्वेजीवापरमेश्वरपरतंत्राः तस्मात्त्वमिति हे भारत त्वमेव
मीश्वरंशरणमाश्रयसंसारार्तिहरणार्थंगच्छआश्रयसर्वभावेन।
सर्वात्मनातत्प्रसादादीश्वरानुग्रहात्परामुत्कृष्टांशांतिं उपरतिंचप्र
स्नत् स्थानंममविष्णोःपरमंपदंशाश्वतंनित्यंप्राप्स्यसि ६२

रणवीरसमिद्धोधिनी॥

यस्मादेवं सर्वेषांपरमेश्वरपारतंत्र्यंतस्मात्तमेवेति स्पष्टार्थोयं
श्लोकः ६२॥

मधुभाष्य

६२॥

270

भाषा अनुवादटीका

जब कि ईश्वर ही सर्वभूतमात्र का प्रेरक है और उसी की प्रेर
णा से सकल कर्म प्राणी करते हैं तो फेरि अपना अहंकार करना
वृथा है इस अभिप्राय से कहते हैं कि जिस हेतु से जीवमात्र परमेश्व
र के वशीभूत हैं इससे हे भारत अर्जुन तुम अहंकार को परित्या
ग करके सम्यक प्रकार से उसी ईश्वर की शरणग्रहण करो तद
नन्तर तिनकी कृपा से परा कहे उत्तम शान्ति औ परमेश्वर सम्बं
धी नित्य जो स्थान सो पावोगे यह भगवान अर्जुन से कहा ६२

दोहा

ताकी शरणहि जाहु तं सर्वभाव भारभारत ताकी कृपा
परमशांति को स्थान प्रापहि शाश्वत ६२॥

इति ते ज्ञानमाख्यातं गुह्याद्गुह्यतरं मया वि
मृश्यैतदशेषेण यथेच्छसि तथा कुरु ६३

शांकरभाष्य टीका १

इत्येतत्ते तुभ्यं ज्ञानमाख्यातं कथितं गुह्यात् गोप्यात् गुह्यतरम्
अतिशयेन गुह्यं रहस्यमित्यर्थः मया सर्वज्ञेनेश्वरेण विमृश्य वि
मर्शनमालोचनं कृत्वैतद्यथोक्तं शास्त्रमशेषेण समस्तं यथोक्तं
चार्थजातं यथेच्छसि तथा कुरु ६३ ॥

आनंदगिरिकृत टीका २

शास्त्रमुपसंहर्तुमिच्छन्नाह इतीति ज्ञानमिति ज्ञानं करणव्यु
त्पत्त्या गीताशास्त्रं यथेच्छसि तथा कुरु ज्ञाने कर्माणि चोपदिष्टे
तदनुतिष्ठेत्यर्थः ६३ ॥

सर्वगीतार्थमुपसंहरन्नाह

स्वामिकृत टीका ३

इतीति एवमनेन प्रकारेणाते तुभ्यं सर्वज्ञेन परमकारुणिकेन श्रीपरमेश्व
रेण मया ज्ञानमाख्यातं उपदिष्टं कथंभूतं गुह्याद्गोप्याद्रहस्यमंत्र
योगादिज्ञानादपि गुह्यतरमेतन्मयोपदिष्टं गीताशास्त्रमशेषतो वि
मृश्य पर्यालोच्य पश्चाद्यथेच्छसि तथा कुरु एतस्मिन्पर्यालोचिते स
ति तव मोहो निवर्तिष्यत इति भावः [illegible] ६३ ॥

पिशाचभाष्य टीका ४

इति हेत्येतत्तव ज्ञानं ब्रह्मसंबोधलक्षणमाख्यातं कथितं गुह्यतरं
रहस्यतमं विमृश्य विचार्य एतदशेषेण साकल्येन यथेच्छसि त
था कुरु ६३ ॥

रामानुजभाष्य टीका ५

इति ते ज्ञानमिति इत्येवं ते मुमुक्षुभिरधिगंतव्यं ज्ञानं सर्वस्मात्
गुह्याद्गुह्यतरं कर्मयोगविषयं ज्ञानयोगविषयं भक्तियोगविष
यं च सर्वमाख्यातं एतदशेषेण विमृश्य स्वाधिकारानुरूपं यथेच्छ

स्थितयाकृतकर्मयोगेभक्तियोगेवायथेष्टमातिष्ठस्वेत्यर्थः ६३

अभिनवगुप्तकृत टीका ६

स्पष्टार्थं ६३ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपाटी टीका ७

अथसर्वगीतार्थमुपसंहरन्नाह इतीति इत्थमेवंप्रकारेणानेन
धर्मस्याकरुणात्मीवेनज्ञानमात्मानात्मविवेकरूपमाख्यातं
किंभूतं गुह्यान्मंत्रादिरहस्यादपिगुह्यंगोप्यतमं एतदशेषेणाह
वीमृश्यआत्मसंधानंसर्वकंविमृश्यविचार्ययथाइच्छसिमोक्षमा
र्गमथैवोक्तमुपायंकुरु ६३ ॥

वनमाली टीका ८

सर्वगीतार्थमुपसंहरन्नाह इतीति इत्यनेनप्रकारेणतेतुभ्यमति
प्रियायज्ञानंभगवदेकशरणतामात्यादिविषयकर्मेणमयाउक्तं गुह्याद्गु ख॰
ह्यतरं परमरहस्यादपिसंन्यासात्मकर्मयोगाद्रहस्यतरंभगवदे
कशरणत्वज्ञानस्यसंन्यासादिफलत्वात् आख्यातंसम्यक्कथि
तंमयासर्वज्ञेनपरमात्मना एतदशेषेणपर्यालोच्यपतन्मयोप
दिष्टंगीताशास्त्रमशेषेणसामस्त्येनसर्वमेकवाक्यतयाऽऽलोच्य सं॰
धिकारानुरूपेणयथेच्छसितथाकुरुननुतदविमृश्यएवकामका
रेणेत्यर्थः अथवा अत्रकैश्चिदुक्तं करणस्यममतोभगवदर्पणबु
द्ध्यानिष्कामकर्मानुष्ठानेनततःशुद्धचित्तस्यविविदिषोत्पत्तौगुरूप
पत्तिर्ज्ञानसाधनवेदान्तवाक्यविचारापरपर्यायश्रवणस्यकर्मसंन्यासस्त
तोभगवदेकशरणतायदिविक्षेपवादिज्ञानसाधनाभ्यासक्षम
णामननंनिदिध्यासनंभगवदपरोक्षंततस्तत्प्रसादोमोक्षः इति
यादेस्तुसंन्यासानधिकारिणाममहतोरहःकरणशुद्ध्यनेनतत्रापिभ
गवदाज्ञापालनीयत्वात्कर्मस्थानेवगुणाकथयंविकर्माणिकुर्वतो
पिभगवदेकशरणतयाशुद्धेजन्मकृतसंन्यासादिपरिपाकाद्भगव
दनुग्रहमात्रेणैववाभगवदपरोक्षोमोक्षश्चेतिजन्मानिआत्मजन्म।
लाभेनसंन्यासादिसर्वकर्तानोपमावामोक्षोभगवदेकशरणतायानिक
सर्वेषामपेक्ष्यतेनान्वितावनमक्तिरितिविचार्येतेवनास्तिमोहाबका
शइति ६३ ॥

सकलगीतार्थमुपसंहरन्नाह इतीति इति सर्वोत्कृष्टकारकं ज्ञानं।
ज्ञायते न कर्मभक्तिज्ञानान्यनेनेति निरुक्तेर्गीताशास्त्रं गुह्यात्सर्वस्मा
त्सर्वरहस्यात्शास्त्रादपि गुह्यतरमतिगोप्यं मया सर्वेश्वरेणा स्मा
यविदा ते तुभ्यमाख्यातं तत्त्वेनोक्तं एतद्गीताशास्त्रमशेषेण समग्रं
विमृश्य शास्त्रोक्तं सर्वमालोचितं यथा कर्तव्यं भवेत्तत्कर्मभक्तिज्ञाने
वा विचार्य यथेच्छसि यथा तवेष्टं भवेत्तथा कुरु तमहत्त्वनात् प्रदेकु
रु प्रणवात्स्वात्मज्ञानाभि[illegible]मानादिनाटनेकविमर्शः ६३

+ सर्वगीतार्थमुपसंहरन्नाह॥ मधुसूदनी टीका ९

+ इतिख्येनेन प्रकारेण ते तुभ्यमत्यन्तप्रियाय ज्ञानमात्मतत्त्वविषयमेतं।
तस्माद्येनेगृह्याद्गुह्यतरं परमरहस्यादपि संन्यासान्तात्कर्मयोगाद्गुह्य
तरं तत्फलभूतत्वात् आख्यातं समेनात् कथितं मया सर्वज्ञेन
परमाप्तेन अतो विमृश्य पर्यालोच्य एतन्मयोपदिष्टं गीताशास्त्रम।
शेषेण समस्तेन सर्वैरपि वाक्यैः तयालोचनाधिकारानुरूपेणाय
थेच्छसि तथा कुरु तत्त्वेन दृष्टिविमर्शेव कामकारेणाय किं विदिश
यः एवं चैतावदुक्तं शुद्धान्तःकरणस्य मम त्वोपदेशसाधनज्ञा
नोत्पत्तियोग्यता प्रतिबन्धकपापतया धर्मफलाभिसंधिपरित्यागेन
भगवदर्पणबुद्ध्या वर्णाश्रमधर्मानुष्ठानेन ततः शुद्धान्तःकरणस्य
विविदिषोत्पत्तौ गुरुमुपसृत्य ज्ञानसाधनवेदान्तवाक्यविचाराय च
तुर्थाश्रमस्य सर्वकर्मसंन्यासः ततो भगवदेकशरणतया विविक्तदेशसे
वादिना तत्साधनाभ्यासाच्छ्रवणमनननिदिध्यासनैरात्मसाक्षा
त्कारेण मोक्ष इति तद्विद्यादत्र संन्यासानधिकारिणामशुद्धान्तः
करणस्यानेनतरमपि भगवदाज्ञापालनाय लोकसंग्रहाय च यथा
कथंचित्कर्माणि कुर्वतोऽपि भगवदेकशरणतया सर्वजन्मकृतसं
न्यासादिपरिपाकाद्धिरण्यगर्भस्येव तदनपेक्षणाद्भगवदनु
ग्रहमात्रेणैव ज्ञानोत्पत्त्या मोक्षो जन्मान्तरे ब्रह्मलोके जन्मलाभेन
संन्यासादिपूर्वकज्ञानोत्पत्त्या मोक्ष इत्यपि विचारेणैव नास्ति मो
हावकाश इति भावः

[illegible]

श्री
गी॰टी॰

273

इदानीं सर्वगीतार्थमाहेदमुपसंहरन् इत्यनेनप्रकारेणतत्संप्रेमास
हायच १ ज्ञानमात्मैकाविषयेमोक्षसाधनेमोतरे यदेवात्मैतत्संगोप्याद
पिगोप्यतरंमहत् कर्मसंन्यासपर्यंतात्कर्मयोगाद्योगिनात् रहस्यतर
मस्तीदंतत्फलत्वादतन्तमं ३ सर्वज्ञेनेश्वरेणमत्तेमेनागमहेतुना श्री
तमेतान्मयासाक्षात्कथितंपरमेष्ठिना ४ एतन्मयोपदिष्टंतंगीता।
शास्त्रमशेषतः पर्यालोच्यधियासम्यक्कृत्स्नेनविवेकतः ५ य
कवाकतयाज्ञात्वास्वाधिकारानुरूपतः श्रेयोमार्गोविनिश्चित्ययथोक्त
स्तितयाकुरु ६ एतदुक्तंभवत्यवगीताशास्त्रार्थसंग्रहे नरस्यात्महवि
तस्यनमतेतोमोक्षसाधने ७ कर्मयोगोयथाशास्त्रंफलासंगविव।
र्जितः ईश्वरार्पणधियासम्यक्कृतःसत्वविशुद्धिकृत् ८ ज्ञानसम
योतेश्वतात्पामायस्यकर्मणःकषायेकर्मभिःपक्वेततोज्ञानंप्रवर्त।
ते ९ इतिस्मृत्यातथाकृत्यानमेनमितिवाक्यतः निष्कामःकर्मयो
गोसौप्रथमंसाधनंमतं १० ततःशुद्धधियःसम्यग्वैराग्यादिगुणस्य
च सम्यग्विविदिषोत्पन्नावाचार्यमुपसृत्यच ११ ज्ञानसाधनवेदां
तगीर्विचारायशास्त्रतः समस्तकर्मसंन्यासोब्राह्मणस्यविधीयते
१२ ततःकुशलैकशरणतयापूर्वोक्तसाधनैः शमादिनादिभिर्नित्यं।
श्रवणादिपरस्यच १३ ब्रह्मात्मैकावबोधस्यसाक्षात्कारस्यसंभवेतः
प्रादुर्भावेनमोक्षोस्तिसिद्धइत्येवनिर्णयः १४ क्षत्रियादेस्तुसंन्यासा।
नधिकारितयातथा भवतोज्ञितसः शुद्धोज्ञानतायांतदनंतरं १५ ई
शाज्ञापालनार्थंचलोकसंग्रहसिद्धये यथाकथंचित्कर्माण्यनु।
र्वतोपिविरागिणः १६ कुलैकशरणत्वेनपूर्वजन्मकृतादपि सेवा
साद्दैःपरेब्रह्मज्ञानेकृत्स्नप्रसादतः १७ जायतेतेनतसिद्धःस्यान्मोक्ष
लसोपिनिर्णयः एवंविचारितेशास्त्रेपीगीपर्यावरोधनः १८ ना
स्तिमोहावकाशोणुमात्रमिप्यपहरैः सकलनिगमसारेमोक्ष
दोनेत्महारेप्रमतितिमिरविदारेसरितिद्रोःकृशारेदभमतिसविमोर
ब्रह्मविद्याविहारेनिखिलगुणविचारेमोमिलत्स्पैकदारे १५ ६३ ॥

नीलकंठी टीका १८

सर्वगीतार्थमुपसंहरति इतीति इतिएवंप्रकारेणतेतुभ्यंमयास
र्वज्ञेनपरमकारुणिकेनज्ञानेमाख्यातं गुह्यात्गुह्यतरंरसायनरू
तु॥ पांस्तुतरंरहस्यनिगीर्णापि तेरहस्य एतदशेषेणाशास्त्रार्थज्ञानेविमृ
श्यसम्यगालोच्यपश्चेच्छसितथाकुरु ६३ ॥

आनंदी टीका १८

एवंनिरवशेषेणसर्वज्ञानसर्वस्वमुपदिश्यनटस्थीभूयसो
हार्देनसप्रणयकोपमिवप्रस्तुनकार्यसिद्धयेप्रोत्साहयति
इतितेइति इतिचेतसासर्वकर्माणीत्यादिसमनन्तरोक्तप्र
कारेणमयातवगोपनीयादपिपरमगोपनीयंकस्यापिनप्र
काशितं ममेश्वरस्यभूभारभूताःदात्रियाएतेवयंपसंहरणी
याइतिभविष्यदर्थाववोधनमाख्यातंसर्वथाप्रकटीकृतं
एतज्ज्ञाविनोर्थस्यज्ञानमशेषेणसर्वापरार्थानुसंधानेनवि
मृश्यपश्चेच्छसितथाकुरु अस्मद्वचनमात्रेणकरोषीमपाल
म्भः ६३

रामकंठीटीका १८॥ इतिनिरवशेषमनन्तरज्ञानसर्वस्वमुपसंहरन्नाह॥

स्पष्टार्थःश्लोकः ६३ ॥

+सर्वगीतार्थमुपसंहर
न्नाह॥ लासिकी [illegible]टीका
+इत्युक्तेनप्रकारेणमयासर्वज्ञेनपरमकारुणिकेनश्रीपर
मेश्वरेणतेतुभ्यंभक्ताय ज्ञानंगभीकृतबुद्धियोगादिकम॰
हेतलक्षणमाख्यानमुपदिष्टं कथंभूतंकुह्याद्रहस्यान्मंत्र न॰
निरोधयोगादिज्ञानादपिगुह्यतमं नातःपरतरंकिंचिद्रहस्य
वक्तव्यमस्तीति एतन्मयोपदिष्टशास्त्रमशेषतःसामस्त्येन
नत्वेकदेशेन विमृश्यपर्यालोच्यस्वाधिकारानुसारेणयथे
च्छसि तथातेनैवप्रकारेणकुरुस्वन्तिष्ठ

सर्वगीतार्थमुपसंहरति इति हे अर्जुनेन मया सर्वज्ञेनानेन
ज्ञानमिति एतद्गुह्याद्गुह्यतरं रहस्यं ज्ञानमाख्यातं उक्तमेतेन मे
यथोक्तं शास्त्रमशेषेण समस्तं यथोक्तं वाक्यं ज्ञातं विमृश्य
विमर्शनमालोचनं कृत्वा यथा इच्छसि तथा कुरु ६३

रणवीर समिद्धोधिनी

सर्वगीतार्थमुपसंहरन्नाह इतीति एषोपि व्यक्तार्थः परं
यथेच्छसि तथा कुरु इत्युपेक्षाभासः स्वाभ्युदयहेतिताभास
स्वभक्तं प्रत्युपेक्षानौचित्यात् विमृश्यैतदशेषेणेत्यनेन निः
शेषमुक्तार्थविमर्षणस्य प्राप्तिप्रधानानुपपत्तेश्च किंच
शेनोक्तं भवति तदुपदिष्टार्थविमर्शनात्मा कृत्येन
वर्तनमथो त्वत्याः दकन्यान्निषिद्धमेव मयाविमृश्येति तस्मि
न्नवश्यमद्धोरस्य निवृत्तेः संभवात्स्वधर्ममेवाचरसीति स्वाभ्यु
न्नतं तव निरन्तरमालमेवानुमिष्टमिति ६३ ॥

मध्वभाष्य

६३॥

भाषा अनुवाद टीका

अब समस्त भगवद्गीता का अर्थ कहे तात्पर्य कहते हैं कि इसप्र
कार से मैंने दया करके तुमको ज्ञान उपदेश दिया और सो।
ज्ञान कैसा है इस अपेक्षा से कहते हैं कि गुह्य कहे गोपन क
रने योग्य तथा मंत्रयोग आदि से भी जो ज्ञान गुह्यतर अति र
हस्य है सोई मैंने कहा इससे तुम गीताशास्त्र को अच्छी तर
ह आलोचन करके फेर तुमारी जैसी इच्छा होय तैसा करो
भावार्थ यह कि इसगीता के अर्थको विचार करनेसे अवश्य
ही तुमारा मोह विहत हो जायगा यह भगवानने कहा ६३

दोहा

कह्यो ज्ञान यह तोहि कों अतिशयउमदि मेंहु यादि वि
चार अशेषसें जो चाहत कर सेहु ६३॥

सर्वगुह्यतमं भूयः शृणु मे परमं वचः इष्टो
ऽसि मे दृढमिति ततो वक्ष्यामि ते हितं ६४ ॥

शांकरभाष्य टीका १

तथा भूयोपि मया उच्यमानं शृणु सर्वगुह्यतमं सर्वगुह्येभ्योऽत्य
न्तगुह्यतमं रहस्यं उक्तमप्यसकृद्भूयः पुनः शृणु मे मम परमं
प्रकृष्टं वचो वाक्यं न भयात् नाप्यर्थकारणाद्वा वक्ष्यामि किं तर्हि इ
ष्टः प्रियोऽसि मे मम दृढमव्यभिचारेणेति कृत्वा ततस्तेन कार
णेन वक्ष्यामि कथयिष्यामि ते तव हितं परं ज्ञानप्राप्तिसाधनं ६४

आनंदगिरिकृत टीका २

गीताशास्त्रस्य पौर्वापर्येण विमर्शनद्वारा तात्पर्यार्थप्रतिपत्त
मशक्यमर्थं मत्वाह भूयोपीति किमर्थमित्युक्तं पुनःपुनरभि
दधासीत्याशंक्याह न भयादिति ६४ ॥

अतिगंभीरं गीताशास्त्रार्थमशेष स्वामिकृत टीका ३ तः पर्यालोचयितुमशक्नुवंतः कृपया स्वयमेव तस्य सारं संगृह्य कथयति सर्वगुह्यतममिति॥

त्रिभिः सर्वेभ्यो गुह्येभ्यो गुह्यतमं मे वचस्तत्र तत्रोक्तमपि भूयः पु
नरपि वक्ष्यमाणं शृणु पुनः पुनः कथने हेतुमाह इष्टमसि त्वं मे
मत्यंतमिष्टः प्रियोऽसि इति मत्वा ततएव हेतोस्ते हितं वक्ष्यामि यद्वा अ
यमेष्टोऽसि मया वक्ष्यमाणं च दृढं सर्वप्रमाणोपेतमिति निश्चि
ततस्ते वक्ष्यामीत्यर्थः दृढमतिरिति केचित्पठंति [illegible] ६४

पिशाचभाष्य टीका ४

सर्वगुह्यतमं सर्वरहस्यतमं भूयः पुनरपि शृणु मे परमं वचस्तत
स्मात् हितं कुशलम् ६४ ॥

रामानुजभाष्य टीका ५

सर्वगुह्यतममिति सर्वेष्वेतेषु गुह्येषु भक्तियोगस्य श्रेष्ठत्वात् गु
ह्यतमम् इति पूर्वमेवोक्तं इदं तेन गुह्यतमं प्रवक्ष्याम्यनसूयवे इत्या
दौ भूयोपि तद्विषयं परमं मे वचः शृणु इष्टोऽसि मे दृढमिति ततस्
ते हितं वक्ष्यामि ६४ ॥

श्री॰
गी॰टी॰
प॰

276

अभिनवगुप्तकृतटीका ६

ग्राह्यग्राहकभेदविभागनिरूपणस्वभावो वस्य मलिका
मत्वीति तत्रिय स्वभावस्य भवतो निष्कृतोपि शङ्कतिः स्वभावायो
निपोक्तनामव्यभिचारेण भजते केवलेनयानि शक्तस्य उपायपाय
संबंधः अत्रैमद्भिहितविज्ञानप्रमाणशरः सरीकारेण कर्मा
णपनतिष्ठ तथा सति वृथो निवृत्तस्यानीमस्यार्थस्य परिकारं वपघट
नेनास्वर्थमहावाक्यार्थस्य अर्वानरवाक्यानां स्पष्टार्थः सदैवेण
ज्ञानस्याशक्तस्य निशेषवाग्जालपरिहारेण निश्चितमाहत्याधावि
ष्टहृदयमादि सर्वमेतद्व्याख्यातमिति निरवधनरायस्य ते प्रभुरीश्वरः
परमात्मा वश्यंशरणं तेन ग्राह्यः तत्रह्यपिष्टातरिकर्मारिवैद्धरीवा
त्ममये विस्पष्टे न कर्माणि स्थितिभाञ्जि भवंति नहि तिमिर
तरनत्वरकोटिविदारितसमदकरिकरटगलितमुक्ताफलानि
करपरिकरप्रकाशितपनापमहासिमिहरकिशोरकेशग्रहाग्रस्थिति
श्रुतिचपलमनसो विद्रवणमात्रवल्लशालिनो हरिणपोतकाः
तैरेवस्वव्यापारपरिशीलनापटुभावमवलंवंते इति तमेव शरणं
गच्छेत्स्वपक्रमस्य मनस्याद्यादि तिनिर्वाहवाक्यमभिदधुः स्त्रगवानपर
मात्मानमीश्वरंवा स्वदेवं चेकनयायोजयतीति तदेवदर्शनमुक्ते
श्छान्दे दोनादपि गुह्यपरमार्थतत्प्रकाशनात् एतच्चाशेषेणावि
स्पष्टोतितात्पर्यमत्रविचार्यमर्थः तत्र तात्पर्यं यथावसरमस्माभिः
स्वेणिग्राहिकयैव प्रकाशितम् यद्यपि तथापि स्फुटमशेषविमर्शी
नेप्रदर्श्यते उपादेयत्वमेव्यादेः नास्मिन्विरूप्यमाणेसूक्ष्मेणवा
मतिस्तत्पति
[illegible] ॥

परमार्थप्रपा[illegible] टीका ७

अथोक्तप्रकारेणोपायेकत्रैमशात्कर्मजिनेषु तिपरमकारुणि
कः परमात्मा संवेदनेन सर्वगीतार्थसारं वक्तुमपक्रमते सर्वंगु
ह्यतममिति त्रिभिः सर्वभाग्रहेभ्योपि परमगुह्यतमवत्समाणा
मेव चः स्मरण तत्र संगोदासीनसापरमात्मनं तत्त्वमधिकथमेत्ता

वान्ममतात्त्वं प्रियस्त्वमाह इष्ट इति यतस्त्वं दृढमतिरिष्टोऽसि मे क
ल्प इति मे इष्टोऽसीष्टः सम्मतोऽसि ततस्तेन कारणेन ते हितमुप
कारकं वक्ष्यामि ६४ ॥

वनमाली टीका ८

श्रुतिगंभीरस्य गीताशास्त्रस्याशेषतः पर्यालोचनक्लेशनिवृ
त्तये कृपया स्वयमेव तत्सारं संक्षिप्य कथयितुं प्रतिजानी
ते सर्वेति सर्वेभ्यो गुह्यात्कर्मयोगादिभ्यो गुह्यतमं अतिरहस्यं य
स्मै कस्मैचिदकथनीयं परमं सर्वतः प्रकृष्टं मे मम वचो वाक्यं
भूयः तत्र तत्रोक्तमपि त्वदनुग्रहार्थं पुनर्वक्ष्यमाणं शृणु
लाभपूजाख्यात्याद्यर्थं तु न ब्रवीमि किं तु इष्टः प्रियोऽसि मम दृ
ढमतिशयेनेति यतस्त्वं तेनैव हेतुना वक्ष्यामि इष्टोऽपि सन् हि
तेन वक्ष्ये परमं श्रेयः दृढमतिरिति पाठे यतस्त्वं दृढमतिरि
ति पाठे यतस्त्वं दृढमतिरतो वक्ष्यामीत्यर्थः ६४ ॥

ज्ञनमवैजयंती टीका ९

सर्वेभ्यः कर्मज्ञानादिसाधनेभ्यो भक्तेः साधनसाध्यरूपत्वाच्छ्रे
ष्ठत्वं भक्तेः प्रतिजानीते सर्वगुह्यतममिति भूयः इदं तु ते गुह्यतमं
प्रवक्ष्याम्यनसूयव इत्यादिना सर्वं यद्गुह्यतमं मयोक्तं तदेव भूयः
पुनरपि मे मम सर्वगुह्यतमं सर्वेभ्यो गुह्येभ्यो रहस्यमेवादिश्रमध्येः
तिशयितं गुह्यं गोप्यमिति सर्वगुह्यतमं तत्र तद्गुह्यतममुक्त
मत्र तु सर्वगुह्यतममिति गोप्यातिशयः परमं राजविद्या राजगुह्य
पवित्रं मन्मना भवेत्यादिना सर्वं यदुक्तं तत्सारं श्रुत्वा एवं वचः स
र्वगीताशास्त्रसाररूपं वचनं स्मरणसाधनात्तया श्रवणोक्तकथे
इशास्त्रसारमेव तु सर्वगीतासारमिति विशेषः पुनः कथनस्य
विशेषमाह किंप्रयोजनमित्याशंक्याह तत्र सहेतुकं प्रयो
जनमाह इष्ट इति यतस्त्वमेव मे इष्टः परमप्रियोऽसि तत्रापि दृढम
तिर्दृढेन निश्चयेन बुद्धिः नहि प्रियं प्रणामिस्मापनं न्याय्यं लोक
सङ्क्षोषणामिन्द्रियाणामिन्यायविस्मासाभावस्य मत्त्यपि वक्ष्ये
तान् ततोहेतोस्तेन वक्ष्ये हितं योगिनो महोविपरीतं कर्त्तव्यं वक्ष्या

+ अतिगंभीरस्य गीताशास्त्रस्याशेषतः पर्यालोचनेन क्लेशनिवृत्तये कृपया स्वयमेव तस्य सारं संक्षिप्य कथयति ॥

277

मित्र यापि तदेवाक्षेद्रयेनात्मदिग्माशयः ६४ ॥

मधुसूदनी टीका १०

+ सर्वेभ्यो गुह्यात्कर्मयोगात्गुह्यतरं ज्ञानमाख्यातमधुना तु कर्मयोगान्नफलभूतज्ज्ञानाद्वा सर्वस्मादतिगुह्यं रहस्यं गुह्यतममपरमं सर्वतः प्रकृष्टं मे मम वचो वाक्यं भूयः तत्र तत्रोक्तमपि पुनरत्र गुह्यार्थं पुनर्वक्ष्यमाणं शृणु न लाभपूजाख्यात्यर्थं ब्रवीमि किंतु इष्टः प्रियोऽसि मे मम दृढमतिशयेन इति यतस्तेनैव हेतुनैव वक्ष्यामि कथयिष्याम्यहं इष्टोऽपि सन्नहं ते तव हितं परमं श्रेयः [illegible] ६४ ॥

सदानंदी टीका ११

अतिगंभीरभावस्य गीताशास्त्रस्य सर्वतः पूर्वापरपरामर्शाद्बहिः क्लेशनिवृत्तये १ कृपया स्वयमेवेशः संक्षिप्य तस्य कथयत् । मात्मसिद्धान्तं भगवान्कारुणानिधिः २ कर्मयोगात्तु गुह्यात्तु ज्ञानं गुह्यतरं स्मृतं ते इदानीं कर्मयोगज्ञानफलात्तु वचो यतः ३ सर्वस्मादपि संयोगाद्रहस्यमतिदुर्लभं प्रकृष्टं सर्वतो वाक्यं ममातः सर्वरसप्य ४ गुह्यतमं कृष्णेन तत्त्वतस्तत्प्रतीतिकामया वक्ष्यमाणं शृणुत्व

म॰

भोः किमर्थं ते ब्रवीम्यहं ५ न लाभपूजाख्यात्यादिसिद्धये किं त्वमेव हेः प्रियोऽस्यतिशयेनेति यस्मात्तेनैव हेतुना ६ कथयिष्याम्यहं श्रोष्यि श्रेयस्ते परमं हितं ७ भक्तिरेषैव प्रेमलक्षणातिदुर्लभा नन्वस्य सिद्धान्तरतः परं त्वणां प्राप्तिस्ततो मोक्षपदं करोऽस्य तेन तेनाविनाश्रेयउपैति कश्चन ८ ६४ ॥ वाक्ति॰

नीलकंठी टीका १२

एवं यथोक्तं प्रकरणमध्यनन्तरायाविश्वनिवासनत्वात्श्लोकद्वयेनैव कृत्स्नशास्त्रार्थमुपदेष्टुं स्तुवन्‌हृणोपकाग्रमस्यसंपादयितुमाह सर्वेति सर्वेभ्यो गुह्येभ्यः अतिशयितेन गुह्यं सर्वगुह्यतमं मे भूयः उपरमकृतमपि मे मम वचनं शृणु परमं परमार्थविषयत्वात् न लाभान्नापि भयात्तां वक्ष्यामि किं तर्हि मे मम दृढोऽसि परमात्मा मोऽसि इति हेतोर्हि कृष्णतिशयितं तेन तव हितं यतस्ततो वक्ष्यामि न चरुष्टत्वात्विघातं हितत्वात् न हृदयं ते श्रामेन्न विप्रवंचकत्वमितिभावः ६४

सानंदी टीका १३

एवमुपालंभेन सत्रपमभिमुखीकृत्य निराकारादृश्यपरमेश्वरसा
मान्येनोक्तं एवमपि स्वं साकारमीश्वरं प्रसन्नभावस्थितं निर्दिशन् प्रे
मातिशयेन हृदये सन्निवेशयितुं पुनरपि सिद्धान्तयति भूयः पु
नरपि मे प्रस्तुतमीदृशस्य परमेश्वरस्य वचः सर्वगुह्यतममपरम
मुपादेयार्थप्रतिपादनादत्युत्कृष्टं त्वमवधारय इतस्त्वं मे दृढः
प्रियः सखा दृढमतिः मदुपदेशकरणेन निश्चितबुद्धिस्ते हितं व
क्ष्यामि ६४ ॥

रामकंठी टीका ६४

केवलं नार्जुनं प्रति भगवत एवं संभावना नातः परं रहस्यं वक्तव्य
त्य१ मस्तीत्यनेनावगन्तार्यमनेन अर्जुनः साक्षात्परस्वरूपदर्शित्वेनानुगृ
हीतः कथमेवंविधोक्तिविषयः स्यात् तथा सर्वोपदिष्टानामपि दि
ष्टपरमरहस्यज्ञानविषयेऽप्यस्य विशेषोऽर्जुनार्थं भगवतैतदादि
ष्टम् तथा चानुगृहीतानां निजप्रसादेष्वनुत्पन्नपरमेश्वरः पुनः पुनः
प्रतिपादितमर्थमुपसंहारसमये सिद्धान्तनयात् हृदि निवेशयन् स
विशेषप्रशंसामर्थं पुनरप्याह इदं मे परमं निरुत्तरोपादेयार्थप्रति
पादकत्वात्प्रकृष्टं वचो वचनं मत्त एव सर्वगुह्यतमं सर्वेषां गुह्यानां
रहस्यभूतानामर्थानां मन्त्रादीनामतिशयसंभवादिदं निरतिशयार्थ
प्रतिपादकं गुह्यतमं सर्वगुह्यानां निष्ठाभूतं श्रुत्वावधारय यतस्त्व
मे प्रियो दृढमतिश्च स्थिरबुद्धिरतो हेतोस्ते हितमनुत्तरमनु
कूलं वस्तु वक्ष्यामि कथयिष्यामि प्रियायार्थिने स्थिरचित्तायाशि
ष्याय रहस्यपरमपि वक्तव्यमित्यनेनोपदिष्टं तद्वक्ष्ये प्रतिज्ञातमर्थ
माह ६४ ॥

लासिकी [illegible] टीका

+ इति गंभीरं गीताशास्त्रमशेषतः पर्यालोचयितुमशक्तं ततः
कृपया तस्य सारं संगृह्य कथयितुं प्रतिजानीते ॥

+ सर्वेभ्यो गुह्येभ्यो गुह्यतमं परममुत्कृष्टं मे वचः तत्रतत्रोक्तमपि
भूयः पुनरपि वक्ष्यमाणं शृणु पुनः पुनः कथने हेतुमाह दृढ
मत्यन्तं मे मम इष्टः प्रियोऽसीति मत्वा तत एव हेतोस्ते हितं वक्ष्यामि
यद्वा त्वं मम प्रेष्ठोऽसि मया वक्ष्यमाणं दृढप्रमाणोपेतमिति निश्चि
त्य ततस्ते वक्ष्यामीत्यर्थः ६४ ॥

गी॰
टी॰
अ
२२८

पंचोलीटीका

अतिगंभीरं गीताशास्त्रमशेषतः पर्यालोच्य चित्तमशक्नुवतः कृ
पयास्वयमेव तस्य सारं संगृह्य कथयति सर्वगुह्यतममिति सर्वगु
ह्यतमं सर्वेगुह्येभ्यो अत्यंतरहस्यभूतं भूयः अस्मत्कृतउक्तमपि पुनः
मे मम परमं उत्कृष्टं वचो वाक्यं शृणु न भयात् नाप्यन्यकारणात् व
दामि किं तर्हि मे मम दृढमव्यभिचारेण इष्टोऽसि प्रियोऽसि इति कृ
त्वा ननु तेन कारणेन ते तव हितं परं सान शामि साधनं वदामि ६४

रणवीर समिद्बोधिनी॥
अथातिगंभीरार्थं रतिनाशास्त्रमशेषतो विमर्ष्यमशक्नुवतः कृ
पया पूर्वोक्तमतिशयेन सारतः संगृह्य न्यनरम्याह सर्वगुह्यतम
मिति त्रिभिः भूतानामर्थानामनंतोरतत्वातिशायसंभवादिदं निरति
शयार्थप्रतिपादकत्वात्सर्वगुह्यतमं सर्वेभ्योपि रहस्येभ्यो रहस्यत
मं परमं प्राकृहिंसायाप्रवर्तकं परमसिद्धिसंपत्तिहेतुत्वेन प्रकृष्टं वा
से मम वोच वचनं मया बहुशो निगदितमपि भूयोपि कथ्यमानं शृणु
श्रुत्यावधारय दृढमतिः स्थिरबुद्धिर्यतस्त्वं ममेष्टः परमप्रेमास्पद
मसि ततो हेतस्तेहितं वक्ष्यामीत्यन्वयः ६४॥

मधुभाष्य

६४॥

भाषा अनुवाद टीका

अतिगुह्य अर्थसे युक्त जो गीताशास्त्र तिसकी सम्यक आलो
चना करने को असमर्थ जो अर्जुन तिनसे अनुग्रह करके भग
वान आप ही गीता का सारसंग्रह करि इस श्लोकसेले तीन
श्लोकके द्वारा कहतेहै कि उस सब गोपनीयसे भी अतिगुह्यत
म जो हमारे वचन यद्यपि प्रसंग प्रसंग परकेहे भी गये है पर
तो भी फेर कहताहूं सो तुमसुनो और बार बार कहने मे हेतु
कहतेहै कि तुम हमारे दृढ़करके अत्यन्त प्रियहो इसीसे हमारी
प्रीति औ हितके अर्थ फेरभी कहूंगा अथवा मेरी वाक्य को तु
म ने दृढ़ प्रमाण करके जाना इससे तुम हमें अति प्रिय
हो इससे फेर तुमारे हितके जो वचन है सो कहूंगा ६४ ॥

दोहा

सर्वगुह्य अति फिर सुनहुं मोरे वचन हिकोय दृढमति
मोरा मित्र है तातें तोहि कहौं सोय ६४

279

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु मा-
मेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ॥ ६५ ॥

शांकरभाष्य टीका १

न हि सर्वहितानां हिततमं किं तदित्याह मन्मना भव मच्चित्तो भ-
व मद्भक्तो भव मद्भजनो भव मद्याजी मद्यजनशीलो भव मां
नमस्कुरु नमस्कारं मय्येव कुरु तत्रैवं वर्तमानो वासुदेव ए-
व ते सर्वं समर्पितं साध्यसाधनप्रयोजनो मामेवैष्यसि आगमिष्य-
सि सत्यं ते तव प्रतिजाने सत्यां प्रतिज्ञां करोम्येतस्मिन् वस्तुनीत्य-
र्थः यतः प्रियोऽसि मे एवं भगवतः सत्यप्रतिज्ञत्वं बुद्ध्वा भगवद्भक्तेरव-
श्यंभावि मोक्षफलमवधार्य भगवच्छरणैकपरायणो भवेदिति वा-
क्यार्थः ॥ ६५ ॥

आनंदगिरि टीका २

हितमिति साधारणनिर्देशे कथं परमित्यादिविशेषणमित्याशं-
क्याह न हीति तदेव प्रश्नद्वारा विवृणोति किं तदित्यादिना उत्तरा-
र्द्धं व्याचष्टे तत्रेति एवं भक्त्यादिरीत्या वर्तमानस्त्वं तस्मिन्नेव वासुदे-
वे भगवति अर्पितसर्वभावो मामेवागमिष्यसीति सम्बन्धः सत्यप्र-
तिज्ञाकरणे हेतुमाह यत इति इदानीं वाक्यार्थं श्रेयोऽर्थिनां प्रकृतो-
पयोगित्वेन संगृह्णाति एवमिति ॥ ६५ ॥

स्वामिकृत टीका ३

मन्मना इति मन्मना भव मच्चित्तो भव मामेव भक्तो भव मद्याजी मद्यजनशीलो भव
मामेव नमस्कुरु एवं वर्तमानस्त्वं मत्प्रसादाल्लब्धज्ञानेन मामेवैष्यसि
अत्र संशयं माकार्षीः त्वं हि मे प्रियोऽसि अतः सत्यं यथा भवत्येवं तुभ्यमहं
प्रतिजाने प्रतिज्ञां करोमि [illegible] ॥ ६५ ॥

पैशाचभाष्य टीका ४

मन्मना मद्गतमनाः मद्याजी मत्पूजकः मामीश्वरं सकलगुरुं नमस्कु-
रु तत्फलमाह मामेव वासुदेवाख्यं परमेश्वरमेष्यसि प्रतिजाने उपदिशा-
मि ॥ ६५ ॥

रामानुजभाष्य टीका ५

३ मन्मना इति वेदान्तेषु वेदाहमेतं पुरुषं महान्तं आदित्यवर्णं तमसः पर-
स्तात् तमेवं विद्वानमृत इह भवति नान्यः पन्था विद्यतेऽयनायेत्यादिषु

श्री· गी·टी· अ·

२८०

त्वविहितेनवेदनोपासनध्यानादिशब्दवाच्यदर्शनसमानाकारेस्मृ
तिसंतानमत्यर्थप्रियेतस्मिन्मयिमनोयस्येतित्वंमन्मनाभवेतिविधी
यते मद्भक्तः अत्यर्थमत्प्रियः अत्यर्थमत्प्रियत्वेनानवधिकातिशयप्रियो
स्मृतिसंततिरूपेत्यर्थः मद्याजीतत्रापिमद्भक्त इत्यनुषज्यतेयज
नंपूजनंअत्यर्थप्रियमदाराधनपरोभवआराधनंहिपरिपूर्णशेषवृ
इति^ त्तिः मांनमस्कुरुनमोनमंमयिअतिमात्रप्रह्वीभावमत्यर्थप्रियंकुरु।
इत्यर्थः एवंवर्तमानोमामेवैष्यसिएतत्सत्यंतेप्रतिजानेतव
प्रतिज्ञांकरोमिनोपच्छन्दमात्रंयतस्त्वंप्रियोऽसिमेप्रियोहिज्ञानिनोत्यर्थ
महंसचममप्रियइतिपूर्वं मयोक्तेयस्यमय्यतिमात्रप्रीतिर्वर्ततेममा
पितस्मिन्नतिमात्रप्रीतिर्भवति तद्वियोगमसहमानोहंतंमांप्रापयामि
अतः सत्यमेवप्रतिज्ञातंमामेवैष्यसीति ६५ ॥

अभिनवगुप्तकृतटीका ६ ॥ गुह्यतमंयदत्रनिश्चितंतज्ज्ञान
मिदानींस्फुटयत्याह मन्मनाभवेत्यादिनाश्लोकेनब्रह्मार्पणएवसर्वथाप्राधान्यमितिनिश्चितंब्रह्मार्पणएव
कारिणः शास्त्रमिदमर्थ

परमार्थप्रपा[illegible] टीका ७ वदितृक्रमम् ६५

तत्किमित्याह मन्मनाइति यदानर्हेत्येर्भवसितदामन्मनाः अहमेव
मनसियस्यासौमन्मनाः नविषयान्तरेचित्तमभिनोचित्तमन्यस्तमिवमाकु
इत्यर्थः वासुदेवेभक्तोभव नमस्कारभक्तिभक्तोभव कर्माणिकि
यमाणेमद्याजीमद्यजनशीलोभव नत्वकर्मणादेवतान्तरयाजित्वेन।
स्थितंमामेवनमस्कुरु अनेनोपायेनमामेवैष्यसिप्राप्स्यसीतिनप्ररो
चनामात्रंकिन्तुसत्यंयथास्यात्तथाप्रतिजानेप्रतिज्ञांकरोमि यतस्त्वम
हृदयत्वादिप्रियोऽसिपरमप्रेमास्पदमसि तदुक्तंटिप्पणिकायांब्रह्माका
रेमनस्येवत्वंभवतिसहसातन्मदाकारमेतत्कार्यसंवेदसाध्यंसकल
करणेजकर्मममत्यप्रदेहिनोवेत्तिस्तारतम्यप्रणमनत्वमयापिस्थिते
मतज्ज्ञानत्वैकतानंसर्वधर्मान्त्वजनशरणंजे[illegible]पार्थमामेकमेव म^
६५ ॥

वनमालीटीका ८

तदेवाहमदितिमयिसदनेनशोणितरतावबद्धंत्रेमनोयस्यसमन्मना।
नारायणोविषयेष्विवातिप्रीत्यास्वाभाविकमनोहृतीप्रियेवकुर्वित्यर्थः भा^
नत्वकेसादिरपितयातआह मद्भक्तः श्रवणादिसहस्वैर्भिवातिप्रमाणा
मध्यन्तरकः मद्विषयेणानुरागेणसदामांनमस्कुर्वित्तिविधीयतेतत्र

द्विषयीनुरागएवकिंनसादिमतआह मघवजीमायइहइज।
यितेनशीलेयस्यसदा मनरजापरोभवरजोपकरणभावेनमो
नमस्कुरु कायेनवाचामनसावप्रह्वीभव इदंचार्चनवंदनेचा
मेषामपिभागवतधर्माणामुपलक्षणंइकंचयथोभागवते श्रव
णंकीर्तनंविष्णोःस्मरणंपादसेवनं अर्चनंवंदनंदास्यंसख्यमात्म।
निवेदनमिति एवंसदाभागवतधर्मानुष्ठानेनमयावरागोप
त्यामसना:सन्मत्प्रसादादविद्यातद्वारशेषाविद्यादिदोषः श्रुतिर्भ
तस्मणोनेदस्वरूपःसन्मामनंतगुणावैकुंठनाथवासुदेवमेव
प्राप्स्यसि त्वमत्रमेसंशयंमाकृथास्सत्येतनप्रतिजानेसत्यामे
वप्रतिज्ञांकरोम्यस्मिन्नर्थेयतःप्रियोसिमेप्रियस्यप्रतारणानुचि
तमेवेतिभावः अनेनयत्सर्वमुक्तंयतःप्रवृत्तिर्भूतानांयेनसर्व।
मिदंततं स्वकर्मणातमभ्यर्च्यसिद्धिंविंदतिमानवइत्याद्योन
मक्तुद्देनेसारव्यप्रकटनात् ६५ ॥

ऊसमवैजयंतीटीका ९

तदेववचःप्राहमन्मनाभवेतिमदुक्तोमममक्तोदेवान्तरभावना
हितेनसर्वसंवेद्यावच्छिन्नेनमदेकनिष्ठेनविधेयानीदृश
केषुमध्येचिदचिदात्मकजगदनित्याभिन्नवेलेतिचानवानमसे
वकस्त्वंभवकीदृशःसदृशपेक्षायांविशेषणचयेणनलक्षणमा
हमन्मनाइतिमयिवैदांतकवेद्येजगदभिन्ननिमित्तोपादानका।
रणःनन्तगुणशक्तिकेमहाविभूतिपतौजगजन्मादिलीलेज
गद्रक्षकतिमतेहिभजचतुर्भुजरूपेमय्यणामतदितरयोरदि
यालेकारलेकनेगोपीकदाचित्तेनदनेरनेवसदेवस्तनोव
न्माश्वैौसर्वेश्वरकेलमनोःस्वेदतेलयावच्छिन्नक्षवास्ति
लक्षणोध्यानसंतानरूपकेयस्यममन्मनाभव पुनःकोदृ।
शःमघवजीमायशुभविवंशीलेयस्यसमनिरतिशयप्रियत्वेनमदा
रायनपरोभवमांतमस्कुरुतनमोनमनंतमपिनिरतिशयप्रियत्वेनप्र
ह्वीभावेकुरु मन्मनाइत्यनेनानुस्मरणंनामयाजीत्यनेनवाल
करणंना नमस्कुर्वित्यनेनदेहस्यचवहनीमयमेवकुर्वितिसूचितं
एवंमनःकायैर्मविशयसिचनहिंसामेवपवकारेणार्थपवयतद्दै

श्री·
गी·टी·
म·

२८१

रइति वदन्पृथग्योगो व्यवच्छिद्यते तेन मामेव नीलोत्पलश्यामलत्वादि
गुणकं चतुर्भुजमिंदिरालालितपदाब्जं राधाननाब्जचंचरीकेक्ष
प्रा णमेवैष्यसि न तु मम रूपान्तरं सहस्रशीर्षाणमेतदुक्तमात्र
मन्तर्यामिणं वा नृसिंहवाराहादिरूपं वेत्येतत्सत्येन शपथेन
सत्यं तवाग्रे इत्यनिजाने प्रतिज्ञां करोमि यतस्त्वं मे मम प्रियोऽ
सि प्रियस्याग्रे मिथ्याभाषणमनुचितं यस्मात्प्रतिज्ञातिर्भवा
ति तद्धि योगसेवाक्रमहननशक्नोमीति मया प्रयुक्तं मे वोके प्रियो हि
ज्ञानिनोऽत्यर्थमहं स च मम प्रिय इत्यादिनाशसे मदाचित्वि स्वसि १७
द्धिमामेवशाप्यसीत्यर्थः यद्वा मामेवैष्यसीति तेन वाग्रसंस्पप
थं करोमि सत्येन प्रयत्नाप्ययोगितिनानार्थवर्गात् नन्वमायुरा
णां मृत्युकरणादपि मे संशयनाशो नास्तीति चेत्तत्राह प्रतिज्ञा
ने प्रतिज्ञां करोमीत्येपणेकुर्वे यतस्त्वं मे प्रियोऽसि मां प्राप्तस्य समेव वद
६ तिप्रियं न परित्यजेत् पद्गेदीहिंसवाञ्छीर्यन्त्यविशोकलीभवेत्
सुखेनैवागत्यि धिः कृष्णेन मे मोक्षवचो भवेदित्थं योगपर्वणाभारतेम
यैवोक्तत्वात् रामोऽपि द्विर्नाभिभाषत इति श्लोकीयश्रीरामवचनाच्च
६५॥

मधुसूदनी टीका ९

तदेवाह — मय्येव भगवति वासुदेवे मनो यस्य स मन्मनाः भव सदा मां चिन्तय द्वे
षेण कंसशिशुपालादिरपि तथाऽत आह मद्भक्तः प्रेम्णा मय्यनु
रक्तः मद्द्वेषेणानुरागेण सदा मद्विषयं मनः कुर्विति विधीयते
न द्वेषेणानुरागपूर्वकेन स्मरणेन तत्राह मद्याजी मां पूजयितुं
शीलं यस्य स सदा मत्पूजापरो भव पूजोपकरणाभावे तु मां नमस्कु
रु कायेन वाचा मनसा च प्रह्वीभावेनाराधय एतैश्चार्चनवन्दनदा
स्यैरात्मनिवेदनान्तानाम् अपि भगवद्धर्माणामुपलक्षणं तथाचोक्तं श्रीभागवते श्र
वणं कीर्तनं विष्णोः स्मरणं पादसेवनं अर्चनं वन्दनं दास्यं सख्यमा
त्मनिवेदनं इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा क्रियते भ
गवत्यद्धा तन्मन्येऽधीतमुत्तममिति एतच्च भक्तिरसायने व्याख्यातं
विस्तरेण एवं सदा भगवद्धर्मानुष्ठानेन मय्यनुरागोत्पत्त्या मन्मना
स्त्वं मां भगवन्तं वासुदेवमेवैष्यसि प्राप्स्यसि वेदान्तवाक्यजनिते
न महाबोधेन न चात्र संशयं मा कार्षीः सत्यं यथार्थं ते तव प्रतिजाने

सत्यामेव प्रतिज्ञां करोम्यस्मि त्वं यतः प्रियोसि मे प्रियस्य प्रतारणानो
चितैवेति भावः सत्यं तेषामारभ्यकर्माणीति सानमामेष्यसीति वाक्य प्रत्य
दाये त्वया विधास्तदर्थं प्रयोजने प्रथमं व्याख्यानमेव श्रेयः अनेनय
त्पूर्वमर्कं यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततं स्वकर्मणा तमभ्य
र्च्य सिद्धिं विंदति मानवः ३ इति व्याख्याने मच्छेद्वे नेश्वरत्वे प्रकटना
त [illegible]
[illegible] ६५ ॥

सदानंदी टीका ११

तदेवाह कृपासिंधुः स्वभक्तायार्जुनाय वासुदेवो भगवानिति मयि
यस्य मनः स च १ सदा मां चिंतयेत्पार्थ मद्भक्तो भव सर्वदा प्रेम्णा
मय्यनुरक्तः सन्मद्विषयं मनः कुरु २ मामेव श्रीपतिं यष्टुं शीलं य
स्य तत्त्वं भव मद्याजनरागो मत्पूजातत्परो भव ३ सर्वोपकार
णाभावे मामेव केवलं नमस्कुरु कायेन मनसा वाचा प्रह्वीभावेन नमो भ
ज ४ एवं च भगवद्धर्मानुष्ठानेन मय्यीश्वरे अनुरागोद्भवेनैव भवेद्भ
गवतो नमः ५ एवं भागवतो भूत्वा भगवंतं समाहरिं प्राप्स्यसि क्ष
तिर्नास्त्यत्र वेदेनात्मानं मद्धय ६ त्वमत्र मे संशयं तु हृदा मा कार्षीर्मित्युच
यत्नः सत्यामेव प्रतिज्ञां ते सुस्थिरत्वर्थं करोम्यहं ७ यतः प्रियोसि मे
तस्मात्प्रियस्य प्रतारणा उचिता नो इति विश्वासं मद्भक्तोर्थे सदा कुरु ।
८ यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततं स्वकर्मणा तमभ्यर्च्य सिद्धिं ।
विंदति मानवः ९ इत्युक्तस्य यच्छब्दतन्निपाधस्य वस्तुतः मच्छेदे
नाव कथनेन कृतं भगवता स्वयं १० स एव भगवान् कृष्णो वासुदेवाभि
धो विभुः ग्रंथीर्थस्य यस्त्याज्ये यः शरणम् इति निश्चिते ११ नातस्पर
तरं किंचित्वकोपेक्षायनमिष्यते समस्तेश्वरदेवे शुभ्रराणां दिश वास्र
नो १२ ६५ ॥

नीलकंठी टीका १२

तदेव गुह्यतमं हितमाह मन्मना इति अहंब्रह्मात्मानैदैकत्वनः
परिशीलनाकारं मनो यस्य स मन्मनाः भव एतेन ब्रह्मात्माभेदो
पि साक्षात्कारणीय इति उक्तं तत्र षट्कार्थ उक्तः कथमेवंविधा ज्ञाना
निष्ठा लभ्येतेत्यत आह मद्भक्तो भव एतेन भगवदुपासनात्मको मध्य
मषट्कार्थ उक्तः कथमल्पायासमभक्तिर्हेत्यतो मनत्राह मद्या

श्री॰
गी॰ टी॰
ग्र॰

९८५

जीभगवदर्थकर्मकरणशीलोभव एतेनकर्मप्रधानस्यायषड्का
र्योविहितः नचयस्यभगवयाजित्वेनसंभवतितदारिद्र्यान्ध्याप्रभावा
द्वातस्यभगवद्भक्तिदौर्लभ्याद्भक्तिकारणंचेनोक्तमितिदुर्लभत्वेसत्यपिश्रुत्याह
मेनमस्कुरु प्राकृतमनोवृत्तिमादौभगवंतेनसर्वोपचारसमर्पणेन
नमस्कारादिनासम्यगाराधयेत्यर्थः तथाचाश्वलायनोनमस्कारस्ये
वयज्ञत्वमुदाहरति योनमसास्वध्वरइत्ययज्ञोवैनमइतिद्विजालि
ंगोभवतीतिच एवमक्तसोपानत्रयारूढस्यफलमाह मामिति
मामेवतत्पदार्थंसर्वजगत्कारणंसर्वज्ञंसर्वशक्तिमत्त्वैककरसंच
एष्यसिप्राप्स्यसिबिंबइवप्रतिबिंबघटाकाशइवमहाकाशं प्रसिद्धं
र्थेशपथंकरोतितेनवंधुरः सत्येनशपथाभितार्थभूतंप्रतिज्ञातंप्रतिज्ञा
करोमिमामेवैष्यसीति प्रियोसिमे यतस्त्वंममप्रियोसित्रतः स्व
तारणात्तेहितंवच्मित्येवाहंब्रवीमीत्यर्थः ६५ ॥

आनंदी टीका ९

पदार्थोत्रवक्ष्यमाणोत्रहर्षः गतार्थस्तुज्ञानकर्मसम्प्रया
नुष्ठानोपदेशोपसंहारोयमिति मेप्रियोसि अतस्तेसत्यप्र
तिज्ञाने अग्रिमश्लोकोच्यमानांप्रतिज्ञांसत्यांयथार्थामेवक
रोमि ६५

रामकंठी टीका १४

मामेवैष्यसीत्येतदंतेनवमेवितत्यव्याख्यातं किंत्वेतावन्मात्र
ज्ञानसर्वस्वमितिप्रतिपादयितुंभगवान्प्रतिज्ञांवध्नातियतः
स्वभावतएववप्रियोसिमे ततःसत्यमसत्यातवप्रतिज्ञानेप्र
तिज्ञांकरोमि यथानेनभक्तिलक्षणेनपरेणसमाधिनामा
यथात्मस्वरूपमेष्यसिप्राप्स्यसिमदेकभावमितिन किंच ६५

लासिकी टीका

प्रतिज्ञातम र्थमाह ×

× एवंविधोममेश्वरस्यभक्तउपासकोभवकीदृशोमन्मनाम
यिप्रत्तीचिमनोमननात्मकमंतःकरणंयस्यसः तथामद्या
जीमदर्पणार्थमेवोक्तोपतत्पायजनशीलःयजनंमन्त्रसर्वस्य
कायिकस्यकर्मणउपलक्षणं तथामामीश्वरमात्मानमस्य
देहमष्टितूपेणनमस्कुरुनमस्कारोत्रवाचिकस्यकर्मणउपल

त्राणं एवं मनोवाक्कायव्यापारैर्मदेकनिष्ठैर्युक्तस्त्वं मामेवै-
ष्यरमेष्यस्युपैष्यसि अत्र च संशयं माकार्षीः त्वं हि मे प्रियोऽसि प्रि-
यस्य प्रतारणं नोचितमिति भावः अतः सत्यं यथा भवत्येवं तुभ्यं प्र-
तिजाने प्रतिज्ञां करोमि ६५

पंचोलीटीका

किं तर्हि तत्राह मन्मना इति हे अर्जुन त्वं मन्मना मच्चित्तः मद्भक्तः म- मं४
द्याजी मद्यजनशीलो भव मां नमस्कुरु एवं प्रवर्तमानो मामेवैष्यसि
अस्मिन्नर्थे तेन तव प्रतिजाने सत्यं प्रतिज्ञां करोमि यतस्त्वं मम प्रियो-
ऽसि ६५

भगवीरसमिद्धोधिनी

वक्ष्यं प्रतिज्ञातमेवाह मन्मना इति पादत्रयं च नवमे व्याख्यातं य-
तः स्वभावत एव प्रेमातिप्रायास्पदमसि ततः सत्यमेतदव्यभिचा-
रीति तेन तव प्रतिज्ञां करोमि इति सर्वसारसंग्रहणं त्वयो न रुक्मया
दोषः ६५॥

मधुभाष्य

६५॥

283

भाषा अनुवाद टीका

अब समस्त हितों से बढ के हित का है इस शंकापर कहनेको अंगीकार कियेहुयेगीतार्थ सारको कहते हैं कि मन्मना कहे मत्चित्त होउ और मेरहीभक्त कहे आश्रित होउ औ मद्याजी कहे मेरेही पूजनकारी होउ और हमीको नमस्कार करो इस प्रकार वर्तमान रहनेपर मेरी अनुग्रह से आत्मतत्वज्ञानके द्वारा जो हमको प्राप्त होवेगो इस मे कछु संशय न करो क्योंकि तुम हमारे प्रियपात्र हो इसपर तुमको सत्य शपथ कहे प्रतीति जिसमे होय इस से हम तुमको प्रतिज्ञा करके कहते हैं ६५

दोहा

मो मे मन मम भक्त हो पूजहु वंदहु मोहि मोह पावें तो
हि सत करों प्रतिज्ञा प्रिय है तोहि ६५॥

284

सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज अहं
त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ६६

शांकरभाष्यटीका १

स्प॰१ कर्मयोगनिष्ठायाः परमरहस्यमीश्वरशरणतामुपसंहृत्याथेदानीं क
र्मयोगस्यागनिष्ठाफलं सम्यग्दर्शनं सर्ववेदान्तविहितं वक्तव्यमि
त्याह सर्वधर्मान् सर्वे च ते धर्माश्च सर्वधर्माः तान् धर्मशब्देनात्रा
धर्मोऽपि गृह्यते नैष्कर्म्यस्य विवक्षितत्वात् नाविरतो दुश्चरितादिति
श्रुतत इति त्यज धर्ममधर्मं चेत्यादिश्रुतिस्मृतिभ्यः सर्वधर्मान्परि
त्यज्य संन्यस्य सर्वकर्माणीत्येतन्मामेकं सर्वात्मानं सर्वभूतस्थमी
श्वरं अच्युतं गर्भजन्ममरणविवर्जितमहमेवेत्येवमेकं शरणं व्रज न
मत्तोऽन्यदस्तीत्यवधारयेत्यर्थः अहं त्वामेवं निश्चितबुद्धिं सर्वपापे
भ्यः सर्वधर्माधर्मबन्धनरूपेभ्यो मोक्षयिष्यामि स्वात्मभावप्रकाशी
करणेन उक्तं च नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता इत्यतो मा
शुचः शोकं मा कार्षीरित्यर्थः ६६ ॥

आनन्दगिरिकृतटीका २

वृत्तमनूद्यानन्तरश्लोकतात्पर्यमाह कर्मयोगेति धर्मविशेष
णादधर्मानुज्ञां वारयति धर्मेति ज्ञाननिष्ठेन सर्वस्त्याज्या धर्माध
र्मयोस्त्याज्यत्वे श्रुतिस्मृती उदाहरति नाविरत इति मामेकमित्या
देस्तात्पर्यमाह न मत्तोऽन्यदिति अर्जुनस्य तद्विधया दुःखसमासद्वा
रा ज्ञाननिष्ठया मुख्यानधिकारेऽपि परम्पराधिकारित्वस्यापि
विदितत्वादविरोधमभिप्रेत्याह अहं त्वेति उक्तेऽर्थे दार्ष्टान्तिकं वाक्य
मनुकूलयति उक्तं चेति ईश्वरस्य त्वदीयबन्धननिरसनद्वारा त्वत्पा
लयितृत्वान्न ते शोकावकाशोऽस्तीत्याह मा शुच इति ६६ ॥

ततोऽपि गुह्यतममाह स्वामिकृतटीका ३

सर्वधर्मानि
ति मद्भक्त्यैव सर्वं भविष्यतीति दृढविश्वासेन विधिकैंकर्यं त्यक्त्वा मदेकश
रणो भव एवं वर्तमानः कर्मत्यागनिमित्तं पापं स्यादिति मा शुचः शोकं
मा कार्षीः यतस्त्वां मदेकशरणं सर्वपापेभ्योऽहं मोचयिष्यामि ६६ ॥

पिशाचभाष्यटीका ४

सर्वेति स्मृतिस्वाचारसिद्धान्परित्यज्य मां नारायणमाश्रयेत्।
जगत्कर्त्ता हेतुश्च सर्वशक्तिर्वासुदेवस्त्वां सर्वपापेभ्यो मोक्षयिष्यामि
माशुचः माशोकं कार्षीः ६६ ॥

रामानुजभाष्यटीका ५

सर्वेति कर्मयोगज्ञानयोगभक्तियोगरूपान् सर्वान्धर्मान् परमनि
श्रेयससाधनभूतान्मदाराधनत्वेनातिमात्रप्रीत्या यथाधिकारं कु
र्वाण एव उक्त्या फलसंगकर्तृत्वादिपरित्यागेन परित्यज्य मामे
कमेव कर्तारमाराध्यं प्राप्यमुपायं चानुसंधत्स्व एष एव धर्माणां
शास्त्रीयश्च परित्याग इति निश्चयं शृणु मे तत्र त्यागे भरतसत्तम त्यागो
हि पुरुषव्याघ्र त्रिविधः संप्रकीर्तित इत्यारभ्य यस्तु कर्मफलत्यागी
स त्यागीत्यभिधीयत इत्यादौ सहृदमुपपादितः अहं त्वा सर्वपापेभ्यो
मोक्षयिष्यामि एवं वर्तमानं त्वां मत्प्राप्तिविरोधिभ्योऽनादिकालसं
चितानंतानाकृत्यकरणकृत्याकरणरूपेभ्यः सर्वेभ्यः पापेभ्यो मोक्षयि
ष्यामि माशुच शोकं माकृथाअथवा सर्वपापविनिर्मुक्तिःसर्वकर्मभ
क्तियोगारंभस्यात्यर्थभगवत्प्रियत्वरूपत्वान्निर्वर्त्तकत्वात् संयोगस्य त
दारंभविरोधिपापानामानंत्यात् तत्प्रायश्चित्तरूपैर्धर्मैः परिमित
कालकृतैः तेषां दुस्तरतयात्मनो भक्तियोगारंभानर्हतामालो
च्यतोऽर्जुनस्य शोकमपनुदन् श्रीभगवानुवाच सर्वधर्मान्परि
त्यज्येति भक्तियोगारंभविरोध्यनादिकालसंचितनानाविधानंत
पापानुगुणाननंतान्प्रायश्चित्तरूपान् कृच्छ्रचांद्रायणकूष्मांडवैश्वानर
व्रातपतिपवित्रेष्टित्रिवृदग्निष्टोमादिकान् नानाविधानंतान्त्वया
परिमितकालवर्तिनाऽदुरनुष्ठानान् सर्वधर्मान्परित्यज्य भक्तियोगा
रंभसिद्धये मामेकं परमकारुणिकमनालोचितविशेषाशेषलोकश
रण्यमाश्रितवात्सल्यजलधिं शरणं प्रपद्यस्व अहं त्वा पापेभ्यो यथोदि
तस्वरूपभक्त्यारंभविरोधिभ्यः सर्वेभ्यः पापेभ्यो मोक्षयिष्यामि माशुचः
६६ ॥

अभिनवगुप्तकृतटीका ६

[illegible] ग्राह त्वं सर्वध
र्मान्परित्यज्येति यदिदं गुह्यकारणं शास्त्रे गीकं वेध वयादित स्य सर्व
स्याहं कर्तैत्यात्म धर्मेता परित्यज्य तथा चार्यादि हन्तन क्रियानिषेधम
न्यधर्मांश्च विष्यतीति मनसा विहाय मामेवैकं सर्वकर्तारं परमेश्वर
न्तं च शरणं सर्वस्वभावाधिष्ठायकं तया व्रज अतएवाहं सर्वेन्तः
सर्वेभ्यः पापेभ्यस्त्वां मोक्षयिष्यामीति मा शुचः किं कर्तव्यतामो
हे मा गाः ॥ ६६ ॥

परमार्थप्रपा [illegible] टीका

अतो पि गुह्यतममाह सर्वधर्मानिति मय्यैवैसर्वं भविष्यती
ति दृढविश्वासेन विधिकैंकर्यं स्वकामामेकमहितो येशरणं व्रज
मदेकशरणो भव एवं वर्तमानस्य कर्मत्यागभवं पापं भविष्यती।
त्याह मा शुच इति शोकं मा कार्षीः यतो हं त्वां मदेकशरणं सर्व
पापेभ्यो मोचयिष्यामि यथा यथैकशरणस्य चातकस्य घनादेवा
भीष्टसिद्धिरित्यर्थः अनेन स्वसामर्थ्यातिशयो दर्शितः एतदर्थे।
स्माभिः एवमहमेव स्वयमिदं वदामीति श्रुतिरपि दर्शिता यद्वा।
एवंस्वोकेसेव्यसेवकत्वभावेन भक्तानां भवेत्याद्योगमन्यापकास्वता
रीयमोः योर्क्तात् सर्वधर्मान्परित्यज्य अर्वागेव मत्कानतो मामे
कमविवेकरसं शरणं व्रज मत्ता व्यासकलविकाराहं मेन मदाका
रतो भज एवं ज्ञानेन सतिश्च हमात्मैव ब्रूयमहमिति भेदभावनाद्गते
भ्यः पापेभ्यो दुःखहेतुभ्यः मैव मोक्षयिष्यामि तदुक्तं नावलविविधिते
वेधो व स्वभावगतस्य श्रुतिभिरभिहितो लोज्ञानक्षू मस्यंसः प्र
भवति हि चिकित्सा रोगिणां आगमाभाजि प्रसभमितनवादेसिन्
भेषजं व्यर्थमेवेति तथा तदुक्तं दृश्यादिविलविकारस्वेश्च सिज्ञा
नागितनास्तिः वर्तमानः श्रुतेर्नैरपि नैव स्याद्धिपिकिंक रूरतिन
यामाशुचः अनेन शोकः कालीमयीः तदुक्तं सांतेकातेनपा
गतेपद्रुपतैः शोऽत्या समक्रीडितेति विधानेवाहि रतरंगगतिमिलत्य
प्रभिः सात्विकैः आगमागतगनीमनाशुपरेतेस्वानरदुर्गामनः
क्रमागानमनाहतस्वतिभवं नेवनचाहजगत् एतदर्थं यस्मिन्स
र्वाणीमनानिद्रात्मैवाभूद्विजानतः इति श्रुतिः एवं समाप्यादर्शिता

श्री
गी टी
म
२८६

ग्रभृतानीश्वरः सर्वभूतानां हृद्देशे तिष्ठति तमेव सर्वभावेन शरणं ग
छेति यदुक्तं तद्विवृणोति सर्वधर्मानिति वर्णधर्माश्रमधर्माः
सामान्यधर्मास्त्र्यैर्वर्णाद्युद्देशेन श्रौतोऽर्थेनो विहितास्तान्सर्वान्। ता^
धर्मानपरित्यज्य विद्यमानानविद्यमानान्वा नादृत्य मामीश्वरं सर्व
धर्माणामधिष्ठातारं सर्वफलदातारं शरणं व्रज धर्माः सन्तु न सन्तु
वा किं तैरस्मत्तापेक्षैरस्ततेवैः भगवदनुग्रहादेवनस्यनिरपेक्षादहं
कृतार्थो भविष्यामीति निश्चयेन परमानंदघनमूर्तिमनंतगुणस
र्वनियामकं वासुदेवं मामनन्तं भजस्व इदमेव परं तत्त्वं नातोऽधिक
मस्तीति विचारपूर्वकेण प्रेमप्रकर्षेणानन्यविषयप्रावृत्तोहस्ति
लधारावदविच्छिन्नयापासनं न चिंतयेत्यर्थः अत्र मामेकं शरणं व्रजे
त्येतेनैव शरणापत्त्यतिरिक्तधर्मपरित्यागे लब्धे सर्वधर्मान्परित्यज्येति
निषेधानुवादस्तत्कार्यकारितालाभायपत्त्यायते ये सास्त्विपवं कृ
त्वोद्वेगमित्यत्र न गिरा गिरेतिब्रूयादितिवत् तथा च मामेव सर्वध
र्मकार्यकारित्वान्मदेकशरणस्य नास्ति धर्मापेक्षेत्यर्थः न च सर्वध
र्मपरित्यागो विधीयते संन्यासशास्त्रेण निषेधशास्त्रेण वलत्त्वा
त्तेतच्छेदमपि संन्यासशास्त्रं भगवदेकशरणतस्य विधिनस्तित्वा
त् तस्मात्सर्वधर्मान्परित्यज्येत्यनुवाद एव सर्वशास्त्राणां परमं रहस्य
मीश्वरशरणतैवेति तत्रैव शास्त्रपरिसमाप्तिर्भगवता कृतानो विना
संन्यासस्यापि स्वफलापर्यवसायित्वादतः संन्यासादिधर्मश्रवणाद
रेण भगवदेकशरणतामात्रेणात्पर्यभगवतः न न मोक्षहेतुश्च
संन्यासादिधर्मश्रवणादेरणादिप्रवृत्तप्रवाहानादिसंसारणहेतुविद्या
यानिवृत्तिरानंदाविर्भावरूपमोक्षश्च कथं स्यात् नहि स्वधर्मानुष्ठानं
विना चित्तशुद्धिस्तां विना भगवदपरोक्षं तद्विना च मोक्षः संभवतीत्या
ह अहमिति अहं मदेकशरणलक्षणपरमधर्मेण प्रसादितः त्वाम
देकशरणापन्नं पापेभ्यः कृताकृतकर्मकारिभ्यः सवासनेभ्यो मो माये^
चयिष्यामि त्वयि पापानि प्रापदेन सहस्तिः हेतुः कर्ममात्रसंख्याने
य^ तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशादिति सूत्रे त
थाप्रपद्यमपलाशमापोन श्लिष्यते एवंविदि पापं कर्म न श्लिष्यते इति।

यथैषीकातूलमग्नौ प्रोतं प्रदह्यते नैवैश्वानरः सर्वपापानि प्रदह्यते इ
ति श्रुतौ कर्मचयपापपटलीकं ॥ तथा च मदेकशरणस्य सर्वकृतस्या
रभ्यमित्वस्य कर्मणो मत्प्रसादात्त्वाशुः क्रियमाणकरिष्यमाणयोः क
र्मणोरश्लेषो निर्लेपः माशुचो नादिकालप्रवृत्तप्रवाहानादिकर्मरू
पविषानोहं कथं मुक्तो भविष्यामीति शोकं मा कृथाः यावद्भगव
ति स्वाभाविको वरागो नास्ति तावद्दर्शनश्रमधर्माश्रमादेशाननुष्ठे
याज्ञानेत्वनुरागेय धर्माननादृत्य मदेकशरणे नैतलयाशावदवछिं।
नामादेशेण मनो हरति मैत्येव संपाद्यानवनुरव धर्मानुष्ठानफलस्यम
यानरागस्थाम त्वं तानवयानादेशनात् मैन बाधर्माननादृत्य मदेकशर
णपत्वरातिनव्यामितिभावः यत्र तस्यैवाहं मन्मैवासौ समुपवाद मि
ति त्रिविधं भगवच्छरणत्वमिति तन्नायथेः शरणत्वं संभवेपित्वतो ह
शरणपदमहष्ट राजाहमेवेति वदन् भगवादिहिराज्ञोहपपवनन्तवत
णीयः ॥ ६६ ॥

उत्तमनैवेद्यपंक्तौ [illegible] ८

नन्वीदृशास्त्वदुक्तोऽपि भवितमहं कथं शरण्यानि यतः कर्मसिद्धाया।
त्वदुक्ते कर्मत्वे देवताप्रगयरिष्टानाभावान्फलकर्तृत्वादिस्तागकरण
ज्ञानामार्थ्यं कर्मसिद्धान्तश्चरणश्रद्धभावेन तानसिद्धायाशुभावः
स्वपररूपादिज्ञानाभावे विशुद्धगुमतेरेवकथमुपपद्यते इत्येवं विक्ष
बाहुल्येनालभ्यमानकेत्वलतानेकविविधत्वधर्मोचितकर्मादिसाधन
मन्त्रपदिष्टस्यापि मम शोकनिवृत्तिर्न भवेत् तस्मान्निश्चयायच्छेदः
स्यात्रिश्चितेत्वविहितमे शिष्यत्वे हृतायिमांत्वंप्रपत्रामिस्वरूपस्य सु
नश्चोत्तरत्वपसमोपायमेव हरीतिवेत्रहाह सर्वधर्मानिति सर्वधर्मा
न्वोदनात्त्याम्विरिषिरूपान् यद्येवंभूतावेदोक्ता सर्ववर्णाश्रमोवि
तकर्मत्तान भक्त्यादयोपिस्वर्गहितानपिज्ञानिकल विहितान् पिर
मात्मवोदिव्वचनावरणादि रक्षणरूपानप्यखिलान्धर्मान् परित्य
सर्वानप्रतिसभावरूपान कालस्वभावरूपोद्यतनवशाकृतत्स्वभावान्
परित्यज्य स्वरूपतस्त्यक्त्वामामस्यक्कृत्वा बाहुमप्रीवरूपमनंताचि
न्त्यस्वाभाविककल्याणगुणशास्त्रा श्रयदिव्यप्राकृतस्वच्छोपात्तम
गलविग्रहे केशीशाघमरनिकरं विदितपारमीर्वमहाविभूतिपति
परब्रह्मपुरुषोत्तमनारायणादिशब्दाभिधेयमर्वस्वेश्वरं वासु

श्रीः
गी टी
प्रः
२८७

देवपुत्रं त्वत्सारथ्यमेकेन तनुमतो ऽ सेवतस्मैरवित्रिनयनारविन्दजीवात्मा
नेशरणं व्रज मं म परमाराध्यं परमप्राप्यं परमोपायो येन श्रीकृष्णमे यं
वोपायत्वेन स्वीकारय मनन्यपरो भव तत्र सर्वं निःसामान्यपदेन यथेमामत्राणं
त्यागः यामस्त्यक्त्यत्रिविरोधिधर्माणामेवन्त्यागस्य ब्रजेत्तत्वत्तूर्णमिमाणं।
मिति कृतो लभ्यते चेत्त्वमामेकमहमिति त्वमाभगवद्धर्मी ... दितरध
र्माणामेवन्त्यागस्यानुक्तत्वेस्यादतो न दोषः न तत्वत्यागिमाद्यसिद्धये
इति हिंसानां सर्वधर्माणां त्यागे मम मद्धर्मापभविष्यतीति चेत्तद्यो।
हं सुहृत्सद्धर्मशरीभिन्नसर्वज्ञः सर्वं सर्वेश्वरस्त्वादेशात्माने मस्त्वं सर्वशरण्यः^
मच्छरणागतं सर्वपापेभ्यो मत्प्राप्तिविरोधिभ्यो वेदविहितस्ववर्णा
चितधर्मत्यागजन्येभ्यः प्रद्धासर्वपापेभ्यो मत्क्रियाविरोधिभ्यः शरण्या।
पापमिश्रितरूपसंचितक्रियमाणकर्मभ्यः प्राप्यसमस्तारब्धपापकर्मे
नपापाभिधानेचरतपवमोक्षयिष्यामि मोत्क्षापयिष्यामि मा शु
चस्त्वमेतद्विषयेशोकमाकार्षीः अयंभावः आनुकूलस्य संकल्पः प्रा
तिकूलस्य वर्जनं रक्षिष्यतीति विश्वासो गोप्तृत्ववरणं तथा आत्मनिक्षे
पकार्पण्ये षड्विधा शरणागतिः अस्यार्थः आनुकूलस्य संकल्पः श्री
पुरुषोत्तमस्य सर्वात्मत्वेन निश्चितत्वात्सादिश्यावशेत स्त्रपाणिमात्रस्यान
कूलाचरणाध्यवसायः चराचराणि भूतानि सर्वाणि भगवद्वपुः
अतस्तदानुकूल्यमेकं तेष्वामिति निश्चयादिति वचनात् प्रतिकूलस्य व
र्जनं सर्वोक्तविपरीतहिंसामात्सर्यादित्यागः सर्वशेषोऽशाप्यायैस्त
व्र^ रात्मसंपदनिर्णयेउक्तः विश्वासो नाम गान्नत्वादिगुणसागरः स
र्वेशरण्यः प्रपन्नानस्मान् रक्षिष्यत्येवेति निश्चयः रक्षिष्यत्यनुकूलान्
इतियासदृढामतिः सविश्वासो भवेच्छक्रसर्वदुःखनाशनइति
वचनात् गोप्तृत्ववरणं नाम सर्वज्ञः सर्वशक्तो समर्थः सर्वशरण्यः
कारुण्यवात्सल्यादिगुणसागरोपिपुरुषोत्तमः प्रार्थनाप्रियैरा।
त्मपरज्ञविज्ञैः प्रार्थितो न गोपायतीति अयया सर्वमोदप्रसे।
गात् शास्त्रेमेन भगवते स्तुतिनिश्चितबुद्धेः सदैवप्रार्थनाभावशरण
प्राप्त्यर्थं त्वविषयकत रक्षितृत्वाध्यवसायविशेष इति यावत् प्र प्रा
र्थितात्रगोपायेदितियाप्रार्थनामतिः गोप्तायितातभवस्वेति गोप्तृ
त्ववरणांसानेन प्रार्थनारूपेन श्रीकृष्णरूकिणीकान्त गोपीजनमनो
हरमेमारमारगिरमरनेमामहरजगद्गुरोऽस्मादिके प्राप्तात्तेनेपस्य

स्वप्रपन्नस्य माधवस्यासाधारणप्रसादहेतुः प्रपत्तिरेवेति निश्चयः।
येन तेन हृतमाणस्यात्मनोऽहं ममैव फलकलापादीनां भारस्त्वी
भगवत्समर्पणेनात्मात्मीयभरणशोच्यत्वमिति पदेनोच्यते इति वचनात्
आत्मा राज्यं धनं मित्रं कलत्रं वाहनानि च। एतद्भगवते सर्वमिति त-
त्प्रेक्षितं सदेत्य परिचर्यायोगेन राज्यं वाहनं चरामस्य धर्मं वक्ष्यमिह
हैसीति वाल्मीकीये भरतवचनात् व्यक्तेर इव भवेक्षस्व स्थवत्र खेल
शाश्वतमिति भारतवचनात् कार्पण्यं च उपायानामसिद्ध्यानादिपरी-
तानामपायानां स्वतः साध्याच कर्तृत्वाधमितिवेशस्वरूपवर्गहानिः
उपायानिवासिद्ध्येनोसर्वथा विविधास्तथा इति पापवर्गहानेन लैदेन
कर्मण्यप्रच्यव इति वचनादिमं वेष्टितं गरूपिकयाम त्वपरमा सर्वदो-
षविनाशकारिणा उक्तो मत्प्रपन्नो भविष्यसि चेत्तया मद्भक्तो।
माप्यमोहेशाप्यसि सेशाधमाक्षे ६६ ॥ क

+अधुनार्जुन ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति तमेव सर्वभावे केचित्सामान्यधर्माः

मधुसूदनी टीका १-

नध्यवर्णग
ढेलियडकं
नाहिहृणेति॥

+केचिद्वर्णधर्माः केचिदाश्रमधर्माः इत्येवं सर्वानपि धर्मान्परित्यज्य
विद्यमानानविद्यमानान्वा शरणत्वेनानादृत्य मामीश्वरमेकं अद्विती- म
यं सर्वधर्माणामधिष्ठातारं फलदातारं च शरणं व्रज धर्माः सन्तु न
सन्तु वा किं तैरन्यसापेक्षैः भगवदनुग्रहादेव त्वन्यनिरपेक्षादहं कृ-
तार्थो भविष्यामीति निश्चयेन परमानन्दघनमूर्तिमनन्तं श्रीवासु-
देवमेव भगवन्तमनुक्षणं भावनया भजस्व इदमेव परमं तत्त्वं नातो-
ऽधिकमस्तीति विचारपूर्वकेण प्रेमप्रकर्षेण सर्वानात्मचिन्तास्त्य-
यामनोवृत्त्या तैलधारावदविच्छिन्नया सततं चिन्तय इत्यर्थः अत्र
मामेकं शरणं व्रजेत्यनेनैव प्रकारेण सर्वधर्मशरणतापरित्या-
गे लब्धे सर्वधर्मान्परित्यज्येति निषेधानुवादस्तत्कार्यकामिना
कं लाभाय धनाय मीयसाम्निधेः कृतौ क्रियाकृदय मिमन्त्रणगिरा गिरे निव-
यादिनिवत् तथा च ममैव सर्वधर्मकार्यकारित्वान्मदेकशरणत-
या त्वधर्मापेक्षा मास्त्वित्यर्थः एतेनेदमपास्तं सर्वधर्मान्परित्यज्येत्यनेन
धर्माणां परित्यागो लभ्यते अतो धर्मपरं कर्ममात्रपरमिति नापि
कर्मत्यागो विधीयते अपि तु विधमानेऽपि कर्मणि तथा तदेकशरणत्वमभगव-

श्री॰
गी॰टी॰
५

२८८

देकशरणतामात्रेण स्ववाधिरहस्य गदान्तरस्याभिद्रवणस्नायारणे।
नविधीयते तत्र सर्वधर्मान्परित्यज्येति तेषां स्वरूपधर्मादरस्ते भेदेनता।
त्रिवारणार्थं श्रुधर्मे त्वानर्थ्यफले कस्याप्यादरभावात्तन्मरित्यागवत
नमनर्थकमेव शास्त्रोक्तानर्थमन्वाह्व तस्माद्वर्णाश्रमधर्माणामभ्यु
दयहेतुत्वप्रसिद्धेर्मोक्षहेतुत्वमपि स्यादितिशंकानिराकरणार्थ
मेवैतद्वचनं इतिमाप्यं नच सर्वधर्माधर्मपरित्यागोत्र विधीयते।
संन्यासशास्त्रेण प्रतिषेधशास्त्रेणच लब्धत्वादेव नचेदमपि संन्या
सशास्त्रं भगवदेकशरणताविधिपरत्वात्। तस्मात्सर्वधर्मा।
न्परित्यज्येत्यनन्वादयएव सर्वेषां तु शास्त्राणां परमरहस्यमीश्वरशरण
मेवेति तत्रैव शास्त्रपरिसमाप्तिर्भगवता कृता तामन्तेरणे संन्यास।
स्यापि स्वफलपर्यवसायित्वात्। अर्जुनं च तद्विषयसंन्यासानधिका
रिणमति संन्यासोपदेशायोगात्। अर्जुनव्याजेनान्यस्योपदेशेन व
क्ष्यामीति हि तत्त्वां मोक्षयिष्यामि सर्वपापेभ्यस्त्वं मा शुचः इति तवोपक
मोपसंहारो न स्यात्। तस्मात्संन्यासधर्मेष्वप्यनादरेण भगवदेकश
रणतामात्रेणार्थं भगवतः यस्मात्त्वं मदेकशरणः सर्वधर्मानाद
रेण अतोहं सर्वधर्मकार्यकारित्वात्त्वां सर्वपापेभ्यो बन्धवधादिनिमि
त्तेभ्यः संसारहेतुभ्यो मोक्षयिष्यामि प्रायश्चित्तं विनैव धर्मेण पापं
प्रपन्नदितीति श्रुतेर्धर्मस्थानीयत्वाच्च मम अतो मा शुचः अहेश्व
नस्य मम सर्वप्रवर्तयादितिमिन्नप्रव्रजायात् कथंमिन्तारः स्यादिति शो
कं मा कार्षीः भाष्यकारैर्निरस्तानि तु मतानीह विस्तरात् ग्रंथव्या।
ख्यानमात्रार्थीनं नदर्शमह्यते नसेवाहममेवासीसपवाहमिति
त्रिया भगवच्छरणत्वेस्यात्स्वपनाप्यासपाकतः विशेषो वर्णितो।
स्माभिः सर्वा भक्तिरसायने ग्रंथविस्तरभीरुत्वान्नेह प्रावमिहक
थ्यते तत्रापंमद्गुप्याम सत्यपि भेदापगमे नाथ तवाहं न मामको।
नस्त्वं सामुद्रो हि तरंगः क्वचन समुद्रो न तारंगः द्वितीयमप्युप
प्याहृतमवनिपाताभिवलान्नरकस्य किमनुते हृदया यदि नि
र्यासिपातृषंगणायामिते रजोयमविमात्रेयथा सकलमिदमहं
च वासुदेवः परमपुमान्परमेश्वरः स एकः इति मतिरचलाभ

२५५

वचनेनेहदृश्यगतेव्रजनान्विहायहरादिति इतेप्रतियमवचनेन श्री
वरीषब्रह्मास्तोपीप्रश्नतपश्चासांभूमिकायामाश्रहीतव्याः श्रुत्सिन
द्दिगीतासास्रेनिष्ठात्रयंसाध्यसाधनभावापन्नेविवृतिमस्केचवेड
था नत्रकर्मनिष्ठासर्वकर्मसंन्यासपर्यंतोपसंहृता स्वकर्मणातमभ्य
र्च्यसिद्धिंविंदतिमानवः इत्यत्रसंन्यासपूर्वकश्रवणादिपरिपाकसहि
ताज्ञाननिष्ठोपसंहृता ततोमांतत्त्वतोज्ञात्वाविशतेतदनंतरमित्यत्रभ
गवद्भक्तिनिष्ठातूभयसाधनभूताभयफलभूताचभवतीत्येतदुपसं
हृता सर्वधर्मान्परित्यज्यमामेकंशरणंव्रजेत्यत्र भाष्यकृतस्तुसर्वध
र्मान्परित्यज्येतिसर्वधर्मसंन्यासानुवादेनमामेकंशरणंव्रजेतिज्ञाननि
ष्ठोपसंहृतेत्याहुः भगवदभिप्रायवर्णनेकेवयंवराकाः वेदोपवृंहिता
त्वेपरमगुह्यसागममहिरा रहस्यमग्र्युत्थमनतिनिपुणः कोवित
नोतुद्दहेवेतदालयदिहक्रुतवानस्मिकश्चमप्यहेतुः स्वेहानोनदपि
कृतकार्यवमहतो
६६ ॥

सदानंदी टीका ॥

सर्वोक्तभक्तियोगस्यसारंभस्यविरोधिनः पापाद्व्यवतिवेधायनेक
स्व० जन्मार्जितामलाः १ तानिनिर्मिकंश्रुमः स्वाद्भक्तियोगाधिकारिता प्रा
नेन्मार्क्षेवपापानांभक्त्यारंभविरोधिनां २ नत्वापास्त्रिनत्वैपेस्तयधर्मैर्नाना
विधैरपि प्रत्नकालकृतैस्तेषांपापानांउल्सरवता ३ इत्येवमात्मनो
भक्तियोगारंभेप्ययोग्यतां आशोच्यशोचतोजिज्ञासोः शोकेचापनुदन्
तिः ४ श्राहानुग्रहवात्सल्यवारिधिःपार्थसारथिः सर्वधर्मानुत्कारि
शोकायायश्चित्तात्मकान्बहून् ५ कृच्छ्रचांद्रायणादीन्त्वतेनयापदान
हूपिणः नानाविधांस्तुधायधर्मान्स्वल्पकालानुयायिनो ६ उरनुष्ठा
नरूपांश्चपरित्यज्यैवसर्वशः निर्विघ्नभक्तियोगस्यसम्यगारंभसिद्ध
ये ७ मामेकमीश्वरंसर्वसाधारणशरण्यं सर्वापकरुणासिंधुं
शरणागतवत्सले ८ तवास्मीतिधियाभक्त्याप्रपद्यस्वसात्वास्मदं
शरणंदेहरेकृष्णमांरक्षाणास्वसेवकं ९ अनन्यशरणत्वान्मेत्वमेव
शरणंभव इत्येवमनुसंधायसर्वकृत्यविहायमां आश्रयस्वनतोहं

त्वा पापेभ्यो संसारतो किंवे भक्तारं मविरोधिभ्यो मोक्षयिष्यामि माशु
चः ११ सकलमपि विहाय भीतिजालेषु मा कुरु व्रजहरिशरणं श्रीव
त्सविधामिहैतं भजनमपि हरेः श्रीकृष्णचंद्रस्य शास्त्रपूर्णमिह स्व
जनस्य प्रेमयुक्तेनासिध्येत् १२ यद्वाक्यो कदयस्याहं नाम सर्वं भगवा
न्हरिः ईश्वरः सर्वभूतानां हृद्देशे र्जुन तिष्ठति १३ तमेव शरणं गच्छे
त्सर्वेशं गोरितस्य च धर्मः केवलं वर्णानां के विहाय मया स्मिन्नो केचि
न्मामाश्रयधर्मा श्रवेदस्मृतिगिरेरिताः विद्यमानाश्रुता धर्मान्समस्ता
न्सफलानपि १५ अविद्यमानान्वा शास्त्रविहितानपि सर्वशः समस्ते
स्मिन्निरपेक्षं सर्वेशशरणेनेव संमताः १६ श्रासेलो स्वमनादृत्यमामेकं श
रमजे विभे ज्ञानेदं सर्वधर्माणामधिष्ठातारमव्ययं १७ धर्माणां फल
दातारं सदा शरणं व्रज धर्माः सेतन वा से तव किमेतैः परैर्वृकैः
१८ भगवद्वासुदेवस्यानुग्रहादेव सर्वथा कृतार्थोहं भविष्यामीत्य
वेनिश्चितचेतसा १९ वासुदेवमनंतं श्रीपरमानंदविग्रहं करुणा
सागरं सर्वकल्याणगुणाश्रयं २० कृतंत्रेदीनवेभ्रमोभ्रगवे त मनं
नेन भक्तिभावनया सारं भजस्व सततं हरिं २१ इदमेव परं तत्त्वं नान्यो
कमिति स्वयं विचार्य स्वं केशवं परमात्मकोनसर्वथा २२ चिंतयत्वमनो
भूमा स्वमकामनां स्व चिंतया नैलधारावदच्छिन्नरूपयामेतत्रद्धया २३
मदेकशरणास्यास्यना स्ति धर्माधुपेतां तद्भेषामपि शास्त्राणां रह
स्यं परमं विदं २४ यदीशशरणं वस्यान्नापसंततिहैतकं सुत्रवर्गा
नाशास्त स्यसमाप्तिहिं शाणाकृता २५ भगवच्छरणे वेनाविना सर्वस
कर्मणः सेन्यासस्यफलेनाप्तिसतः परिवसायिता २६ मदेकशर
णाय स्मान्नधर्मान्नपेतपतान् मच्चितन परो नित्यं तिष्ठ त्वं नन्यमानसः
२७ अतोहं सर्वधर्माणां कार्यकारित्न चेश्वरः संसारानर्थहेतुभ्यः स
र्वपापेभ्य एव च २८ वेधहिंसादिजन्येभ्यो मोक्षयिष्यामि माशुचः म
मयुद्देश्य बन्धस्यान्न कुलाचार्यचातिनः २९ निस्तारोपाकयेमेस्या
न्माकार्षीरिति शोचने शास्त्रचिंतेविनेवाहं धर्मस्थानीय ईश्वरः ३० पा
पांयतन म स्त्वं वै मोक्षयिष्यामि भास्करः संदेहो नाव कर्तव्यो मा नमो
तोवचसतः ३१ निगमविहितधर्मास्तद्धिहिताधर्माजनिमति

भवन्त्लोस्तत्रयोगान्नपेक्षाभवस्तनिभयस्त्रियोपातमन्तेशरणंप
हरिपद्मकरेदेवित्तमिव्राजयत्व ३२ सर्वधर्मानभित्तजेमवमाश्र
हतोमतं समस्तकर्मसंन्यासान्नवादैनेवमुक्तिभिः ३३ मामेकंश
रणंवैतिज्ञाननिष्ठोपसंहृता श्रीमद्भगवतेन्येवैसमतंसाधुसमत
३४ प्राप्तापमासायोभातिश्रीमद्भाष्यकृतासता गीतास्तवेवदधे
संग्रहकरणानिधिः ३५ शोकवाश्रुरमानायोवोधसोकयेस्मिदध्ये
उक्तमष्टादशाध्यायेतूपसंहृतवान्तते ३६ सर्वधर्मान्वितज्येमधश्लो
केस्माप्तनिः शोकोपांत्रिमपक्रममाश्रवश्रितिसंहृतिः उपक्रमोप
संसारविकस्मिन्नर्थेदृशितो ज्ञाननिष्ठापक्रान्तामग्योगमविदाम
ना ३७ नचापिकारस्मियोर्थकर्मनिष्ठेतिनापरा नचापिकारोस्मिन्धि
भगवद्भक्तिहतमा ३८ श्रेमीरागतपाशोकान्तनीयज्ञानसाधनेय
स्पदेवैपराभक्तिर्यथादेवेतथागुरौ ३९ तस्यैतेकथिताह्यर्थाः प्र
काशंतेमहात्मनः इतिश्वेतकाजिज्ञासोभक्तिःसान्साधनेपरं ४०
प्रधानानगुणामाथाभिनमैतेहरिःस्वयं उपसंहृत्यवाञ्ज्ञाननि
ष्ठामेवससाधनो ४१ नचापिप्रथमेपादेसर्वधर्मपदेनच धर्माधर्म
द्वयंप्रोक्तंत्याज्यतेनात्रसंमतं ४२ तेनोपसंहृतः कर्मसंन्यासोज्ञान
साधने चित्तशुद्धिंविनानासौसानकर्मविनाभवेत् ४३ तेनोपसंहृता
कर्मनिष्ठापिसफलापरा पादेद्वितीयेभगवन्मयीरूपसंहृता ४४
भगवद्भक्तिसहितावहवाच्यैकजन्मभूः उत्तरार्द्धेनव्याख्यातानिष्ठा
याःफलमीरितं ४५ प्रतिबाधाःसकायोयानिहन्ति श्रेयसोहरिः प्र
तिज्ञातजगादेमेश्लोकेगुह्यतमंपरं ४६ इमेवेगुह्यतमान्यधर्मविदि
त्वामयाम्यथा कलापिवान्नेस्वीयदृष्टरोद्घाटनेकृते ४७ केचि
पमत्रसाध्यत्वमिमलेवद्वनाश्रुता नतज्ज्ञानेकस्तर्पीणाश्रीमद्भाष्यकृ
तोश्वरः प्रसादादिजनःस्वतःसर्वंप्रोक्तनयेनेनकिं प्रधानेवंयवस्था
वगाहृद्योपसंहृतौ ४८ साध्यसाधनभावेनगीतानाशास्त्रविवृतिते
निष्ठाद्वयंभगवताध्यायेस्मिन्नुपसंहृते ५० नत्रतस्मात्तपर्येताकर्मनि
ष्ठोपसंहृता स्वकर्मणातमभ्यर्च्यसिद्धिंविन्दतिमानवः ५१ इमात्र

सफलामोगाश्रीमद्भगवतास्वयं सेयासद्वैवेदांतश्रवणादि
निरंतरा ५२ सफलाच सहोपाधेर्ज्ञाननिष्ठोपसेहता नैनोमा।
नवतोज्ञानाविशतेचेति विस्तृता ५३ भगवद्भक्तिनिष्ठातमेफ
ष्ठताद्वयोरपि सेवांनेवास्द्देवेनसम्यगेवोपसेहृता ५४ सर्वधर्मा
न्परित्यज्यमेवैवाशंतपावनी यस्यदेवीपराभक्तिरितिस्फुटाहरेर्वि
भोः ५५ पराभक्तिःपरंब्रह्मज्ञानेनस्वान्तयोरिता सर्वोपायेनभग
वान्सराण्णोभक्तवत्सलः ५६ शरणागतिनामधेयं सर्ववेदविदांस
तां शरणापिनेहरेर्मोक्षदे तत्त्वीवमवानरे भवत्येवफलंतस्मादा
शच्योहरिरीश्वरः इत्यस्यामपिनिर्णीतव्यवस्थायामनागपि ५८
विरोधोनास्तिभगवद्व्याख्याकारावयोरिति निर्विवादाहरेर्भक्तिर्ज्ञा
नमोक्षप्रदायिनी ५९ सर्वोपरिवरीवर्तिसिद्धमित्येवमंगलं ६०
क्वचनिगमशिरोवाग्वैधवैकंरवाणी क्वचपरिमितबुद्धिर्मादृशः
कर्मवश्यः हरिपदशरणायेदुर्लभंनास्तितेषांकिमपिजगतिकृत्स्ने
ह्येषमार्गोविचार्यः ६१ विषयविषयभावंयातिमुक्त्वाविशुद्धंसकला।
निगमवाणीभावगंभ्यस्त्वमस्यहृदिसकलजनानामीशितारंनिवि।
ष्टंयद्दुपतिमभिवंदेसर्वविज्ञानसारम् ६२ ६६ ॥

नीलकंठी टीका १८

एवंतन्मनयजनभजनमननक्रमेणमोक्षोनिष्ठउक्ता पार्थस्य।
ध्यानेनात्मनिपश्यंतीत्यनेनश्लोकेनदर्शिता इदानीमस्यैवसम
ज्ञानेनैःफलावमेवउपासते तेषामपिनेरस्येवमन्त्रस्फुरनिपरायणा
इतिकेवलोपास्तिनिष्ठायोगाख्याकानामाह सर्वेतिसर्वेषांवर्णाना।
माश्रमाणांदेहेंद्रियबुद्धीनांचधर्मानग्निहोत्रादीन्स्वरडःखादीश्च।
न्कामानमेकेसर्वपुंसर्वशक्तिसोपाधिनिरूपाधिवाःस्वेकरससा
नंदघनेपरमात्मनि परगत्मशरणमिहिनस्यविधादीनंत्नेशादीन्
शरणमाश्रयः परायणंगच्छशासहि मदेकशरणोभवेत्यर्थः अत्र
अत्रभक्तैवतत्वज्ञानितःजलमात्रेपीतिनिवर्तहेनवंकाश्रयपार्थः
सर्वधर्मपरित्यागेनमांशरणंब्रजेत्यर्थः यथोक्तं भृगनाग्नदर्शनेनैव

परात्मानमुपास्महे इति एतस्माद्भगवत्कृष्णीकारणस्य फ
लमाह अहं त्वेति अहं परमात्मा सर्वान्तर्यामी नारायणः सक
लपापविनिर्मुक्तः सत्यज्ञानः सन्तुत्वां सर्वपापेभ्यः तेषु चित
क्रियमाणेभ्यो योगात्पापादिभ्यः मोक्षयिष्यामि मा शुचः शोकं मा
कार्षीः तथाहि तत्त्वज्ञानफले पापास्पर्शः शोकनरणे वसर्वे
श्रुतिस्मृतिप्रसिद्ध्यादिमोन्तौ नैनारायणं प्रकृत्य अक्षौ दोष
यते सएष सर्वेभ्यः पाप्मभ्यः उदित उदेति ह वै सर्वेभ्यः पाप्मभ्यो
य एवं वेद तरति शोकमात्मवित् तत्र को मोहः कः शोक एकत्वम
नुपश्यत इति उदितः कर्मविनिर्मुक्तः पापात्मत्वकुत्र गतो निष्पा
प इति श्रुतिपदार्थः वर्णाश्रमधर्मसेवासर्ववेदषष्ठ्यायेनोक्ते
न योगेन देहादीनां धर्मोऽश्रमसक्ता निर्विकल्पमात्मानं साक्षात्कृते
तो न कर्मलेपः इत्यर्थः ६६ ॥

यतिर्नाभवेदाह ।

आनंदी टीका १२

सर्वधर्मान् उत्सीदन्ते जातिधर्माः कुलधर्माश्च नियेत्वया मिषे
वाध्यवसिता धर्मास्तान्सर्वान्परित्यज्य तत्फलशंकां सर्वं तस्यक्त्वा
मामेकं शरणं व्रज मद्भक्तमेवानुतिष्ठ रागद्वेषाभ्यां विनाप्रवृत्तः स्व
जातिविहितमावश्यकं कर्म युद्धं कुर्वाणः शोकमोहवशात्ताप
रित्यज मद्वचनानुरूपप्रवृत्तिर्भवेत्यर्थः अहं त्वां सर्वपापेभ्य उत्सन्न
कुलधर्माणां नरके नियतं वास इति संभाविता न्नरकावासादृष्टपा
पफलान्मोक्षयिष्यामि तथा यद्वा जयेम यदि वा नो जयेयुरिति शं
कितात्पापफलाद्दृष्टान्मोक्षयिष्यामि मा शुचः शोकाक्रान्तो
माभवः सर्वप्रकरणार्थोपसंहारोऽयम् तथाहि स्त्रीषु दुष्टासु
वार्ष्णेय जायते वर्णसंकर इत्येतत्पापशंका मया स्वधर्मपरत्वेन वी ता
र्यवतो माभैरिति सहायेन भावनावश्यकारेण विजयफलं पाण्डवा
नां स्फुटमेव सम्पादितः ६६ ॥

291

इति प्रतिपादितज्ञानसद्भावोपदिष्टस्वकर्मानुष्ठानरूपा
न्सर्वान्विशेषधर्मानाचारान्परित्यज्य परित्यज्य मामेवात्मस्व
त्वप्रतिपादितस्वरूपमेकमद्वितीयपरमात्मलक्षणं परं तत्त्वं
शरणमाश्रयं परां गतिं व्रज गच्छ मत्समापन्नो भवेत्यर्थः य
द्वानुष्ठेयत्वेनोपदिष्टानां सर्वधर्माणां संगादिदोषरहितत्वे
फलानभिसंधानमेव परित्यागः न त्वयथोक्तस्वभाव
परमात्मसमापत्तिमात्रैकफलालम्बनमनस्तया भवतीति
सर्वधर्मानुत्सृज्यापि मदेकशरणमानसो भवेत्युक्तम् न
थाचानस्य शरणतया दृढमाश्रितः संस्त्वां सर्वपापेभ्यः संप्र
तिपापबुद्ध्यावृहीतेभ्यो ज्ञातिगुरुवधादिभ्यो निःशेषेभ्यः
पापेभ्यो मोक्षयिष्यामि मोचयिष्यामि अतो यथोक्तज्ञान
शिथिलमतित्वात्माशोकं कार्षीः इदमत्र तात्पर्यम् एकस्मि
न्परमार्थे सति मत्स्वरूपे परस्मिंस्तत्त्वे यदा पश्यन्नेव स्पृशंजिघ्र
न्नित्यादिना प्रतिपादितक्रमेण निर्विकल्पावधानलीनचित्तत्वात्त
देकभावमापन्नो भविष्यसि तदा सर्वा सक्रियाः सज्ञानेषु वचने
षु च पुण्यपापविकल्पाः पल्लवाः स्वयं विगलिष्यतीति निःशेषं
परं रहस्यमुपदिष्टं गुह्यानुपदेष्टृपुरुषपरिहारद्वारेण संग्रह
नउपदेशफलत्वेन प्रतिपादयितुमाह ॥ ६६ ॥

लासिकी टीका

त्या

किंच सर्वान्वर्णाश्रमविभागेनोक्तान्धर्मानाचारान्परित्यज्य म
वहापतेधर्मा एवेत्येवं शरणत्वेन विहाय मामेकमीश्वरं शर
णं व्रज मत्यर्थं भक्त्या उपास्व यथा हि जिजीविषोः पुरु
षस्य मूर्च्छा सर्वान्भोगान्विहायान्नेन सर्वथाभाव्यमित्येको
जीवनहेतोरन्नस्यावश्यकता गम्यते नान्येषां सर्वभोगानां

नन्वत्र यदुक्तोपनतानां स्वदृष्टभोगानां परिहारोत्र विवक्षितः एव
मत्र श्रुतो भगवद्रूपासनमवश्यानुष्ठेयतयोपदिष्टं ननु सर्व
स्यात्यागो विवक्षितः एवं वर्तमानस्य मे कदाचित्कर्मत्यागनि
मित्तं पापं स्यादिति माशुचः शोकं माकार्षीः यतस्त्वां मदेकश
रणं सर्वपापेभ्योहमीश्वरो मोचयिष्यामि [illegible]
[illegible] ६६

पंचोलीटीका

एवं ततोपि गुह्यतमं कर्मयोगनिष्ठाफलं सम्यग्दर्शनं सर्ववेदांतसं
गृहं विहितं सर्वकर्मसंन्यासहितमुपदिशति सर्वधर्मानिति सर्वध
र्मानः धर्मांश्च सर्वकर्माणि नित्यनैमित्तिककाम्यनिषिद्धानि परित्यज्य
संन्यस्य मामेकं सर्वाभ्यंतरं सर्वभूतस्यमात्मत्वेन शरणं व्रजन मत्तो
यत्किंचिदस्तीत्यवधारय अहं त्वामेवं निश्चितबुद्धिः सर्वपापेभ्यः सर्व
धर्माधर्मबंधरूपेभ्यः स्वात्मभावप्रकाशीकरणेन मोक्षयिष्यामि मा
शुचः शोकं माकार्षीः ६६

रत्नावीर समिद्बोधिनी॥

ततोपि गुह्यतममाह सर्वधर्मानिति सर्वधर्मान्कृच्छ्राचरणादी
न्परित्यज्य मामेकं परमेश्वरं शरणं व्रज अहं च त्वां सर्वपापेभ्यो
गुरुपुत्रपितृमित्रवधजेभ्यो मोक्षयिष्यामि अतस्त्वं माशुचः क
थं मे पापविशुद्धिः स्यादित्येवं शोकं माकार्षीरित्यर्थः यद्वा सर्वान्ध
र्मान्धर्मप्राप्यान्स्वर्गादिभोगान्परित्यज्यानभिसंधाय मामेकं शर
णं व्रज मयि कर्मफलानि समर्प्य स्वधर्मं समाचर इति एवं चेत्तन पाप
संबंध इति एतेन च संन्यासत्यागौ संदर्शितौ बोध्यौ ६६॥

मधुभाष्य

६६॥

292

भाषा अनुवाद टीका

एवं कही गुह्यतम बातसे भी जो गुह्य कहै गोपनीय सो कहते हैं कि हमारी भक्तिही से सकल सिद्धि होती है इसप्रकार दृढ़ विश्वास करिके विधि कहे प्रारब्ध औ वेद शास्त्र के विधान का भरोसा छोड़ि एक हमारी ही शरण लेव अर्थात् मेरे कहे पर विश्वास करो तो ऐसे हमारी शरणागत रूप मे वर्तमान तुमको कर्म्मयोगसे जो फेरि और पाप होयगे ऐसा शोच करना क्योंकि एक मेरे शरण मे प्राप्त तुमको मै यावत पापसे उद्धार औ मुक्त करूंगा इसनसे शोक हर करो औ अपना काम देखो ६६ ॥

दोहा

सर्वधर्म को त्यागके मोरी शरणहुं होहु मैं तोहि सब
हि पापसें न शोच छुड़ावों तोहु ६६ ॥

इदं ते नातपस्काय नाभक्ताय कदाचन नचा
शुश्रूषवे वाच्यं न च मां योभ्यसूयति ६७ ॥

शांकरभाष्य टीका १

अस्मिन् हि गीताशास्त्रे परं निःश्रेयससाधनं निश्चितं किं ज्ञानं
किं कर्म वा आहोस्विदुभयमिति कुतः सन्देहः यत् ज्ञात्वामृत
मश्नुते ततो मां तत्वतो ज्ञात्वा विशते तदनन्तरमित्यादीनि वाक्या
नि केवलात् ज्ञानात् निःश्रेयसप्राप्तिं दर्शयन्ति कर्मण्येवाधि
कारस्ते कुरु कर्मैव तस्मात्त्वमित्यादीनि कर्मणां अवश्यकर्तव्यतां द
र्शयन्ति एवं ज्ञानकर्मणोः कर्तव्यतोपदेशात् समुच्चितयोरपि
निःश्रेयसहेतुत्वं स्यादिति भवेत् संशयः किं पुनरत्र मीमांसाफ
लं ननु एतदेव एषामन्यतमस्य परमनिःश्रेयससाधनत्वावधारणं
अतो विस्तीर्णतरं मीमांस्यमेतत् आत्मज्ञानस्य तु केवलस्य निःश्रे न४
यसहेतुत्वं भेदप्रत्ययनिवर्तकत्वेन कैवल्यफलावसानत्वात्
क्रियाकारकफलभेदबुद्धिरविद्ययात्मनि नित्यप्रवृत्ता मम क
र्माहं कर्ता अमुष्मै फलायेदं कर्म करिष्यामीतीयमविद्या अना
दिकालप्रवृत्ता अस्याश्चाविद्याया निवर्तकमयमहमस्मि केव
लोऽकर्ताक्रियोऽफलो न मत्तोऽन्योस्ति कश्चिदित्येवं रूपमात्म
विषयं ज्ञानमुत्पद्यमानं कर्मप्रवृत्तिहेतुभूताया भेदबुद्धेर्निवर्त
कत्वात् तुशब्दः पक्षद्वयव्यावृत्त्यर्थः न केवलेभ्यः कर्मभ्यः न
च ज्ञानकर्मभ्यां समुच्चिताभ्यां निःश्रेयसप्राप्तिरिति पक्षद्वयं
निवर्तयति अकार्यत्वाच्च निःश्रेयसस्य कर्मसाधनत्वानुपपत्ति
र्नहि नित्यं वस्तु कर्मणा ज्ञानेन वा क्रियते केवलं ज्ञानमपि
अनर्थकं तर्हि न अविद्यानिवर्तकत्वे सति दृष्टकैवल्यफला
वसानत्वादविद्यातमोनिवर्तकस्य ज्ञानस्य दृष्टं कैवल्यफला
वसानत्वं रज्ज्वादिविषये सर्पाद्यज्ञानतमोनिवर्तकप्रदी
पप्रकाशफलवत् विनिवृत्तसर्पादिविकल्परज्जुकैव

स्यावसाने हि प्रकाशफले ज्ञाने तथा दृष्टार्थायां च छिदिक्रि-
याग्निमन्थनादीनामारब्धकर्त्रादिकारकाणां द्वैधीभावाग्निदर्श-
नादिफलादन्यफले कर्मान्तरे वा व्यापारानुपपत्तिर्यथा तथा
ज्ञाननिष्ठाक्रियायां दृष्टार्थायां आरब्धज्ञानादिकारका-
यामात्मकैवल्यफलादन्यफले कर्मान्तरे वा प्रवृत्तिरनुपपन्नेति
न ज्ञाननिष्ठा कर्मसहितोपपद्यते ज्ञाननिष्ठा अग्निक्रियाग्नि-
होत्रादिक्रियावत् स्यादिति चेत् न कैवल्यफले ज्ञाने क्रियाफला- प॰
र्थित्वानुपपत्तेः कैवल्यफले हि ज्ञाने प्राप्ते सर्वतः संप्लुतोदके
का॰ फले कूपतडागादिक्रियाफलार्थित्वाभाववत् फलान्तरे तत्सा-
धनभूतायां वा क्रियायामर्थित्वानुपपत्तेः न हि राज्यप्राप्तिफले
कर्मणि व्यापृतस्य क्षेत्रमात्रप्राप्तिफले व्यापारोपपत्तिस्तद्वि-
षये वार्थित्वं तस्मान्न कर्मणोस्ति निःश्रेयससाधनत्वं न च ज्ञा-
नकर्मणोः समुच्चितयोरपि ज्ञानस्य कैवल्यफलस्य कर्मसाह-
प॰ यापेक्षा अविद्यानिवर्तकत्वेन च विरोधात् न हि तमस्तमसो निवर्तक-
मतः केवलमेव ज्ञानं निःश्रेयससाधनमिति न नित्याकरणे
प्रत्यवायप्राप्तेः कैवल्यस्य च नित्यत्वात् यत्तावत् केवलज्ञानात्
कैवल्यप्राप्तिरित्येतदसत् यतो नित्यानां कर्मणामनुष्ठाना-
मकरणे प्रत्यवायो नरकादिप्राप्तिलक्षणः स्यात् ननु एवं तर्हि
कर्मभ्यो मोक्षो नास्ति इत्यनिर्मोक्षप्रसंग एव नैष दोषो नित्य-
त्वान्मोक्षस्य नित्यानां कर्मणामनुष्ठानात् प्रत्यवायस्याप्राप्तिः
प्रतिषिद्धस्य चाकरणादनिष्टशरीरानुपपत्तिः काम्यानां च प्रव-
र्जनादिष्टशरीरानुपपत्तिः वर्तमानशरीरारंभकस्य च कर्मणः
फलोपभोगक्षये पतितेऽस्मिन् शरीरे देहान्तरोत्पत्तौ च कार-
णाभावादात्मनः रागादीनां चाकरणात् स्वरूपावस्थानमेव
कैवल्यमित्ययत्नसिद्धं कैवल्यमिति अतिक्रान्तानेकजन्मान्तर-
कृतस्य स्वर्गनरकादिप्राप्तिफलस्यानारब्धकार्यस्योपभोगानुप-
पत्तेः क्षयाभाव इति चेन्न नित्यकर्मानुष्ठानायासदुःखोपभोगस्य
तत्फलोपभोगत्वोपपत्तेः प्रायश्चित्तवद्वा पूर्वोपात्तदुरितक्षयार्थ- न॰
त्वे नित्यकर्मणामारब्धानां च उपभोगेनैव कर्मणां क्षीणत्वात्

पूर्वाणां च कर्मणामनारम्भोऽपवर्गे हि कैवल्यमिति न तमेव
विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनायेति विद्याया अन्यः
पन्था मोक्षाय न विद्यत इति श्रुतेश्चर्मवदाकाशवेष्टनासंभवद्
विदुषो मोक्षासंभवश्रुतेः ज्ञानात् कैवल्यमाप्नोति इति च पुराण
स्मृतेश्चानारब्धफलानां पुण्यानां कर्मणां क्षयोपपत्तेश्च यथा
पूर्वपापानां दुरितानामनारब्धफलानां सम्भवस्तथा पुण्यानाम
प्यनारब्धफलानां सम्भवस्तथा पुराणस्मृतेरनारब्धफलनाशस्या
त् सम्भवस्तेषां च देहान्तरमकृत्वा ज्ञानानुपपत्तेर्मोक्षानुपपत्तेः
धर्माधर्महेतूनां च रागद्वेषमोहानामप्यनुत्पन्नात्मज्ञानानां दुरुच्छे।
दानुपपत्तेः धर्माधर्मोच्छेदानुपपत्तेः नित्यानां च कर्मणां पुण्य
लोकफलश्रुतेर्वर्णाश्रमाश्च स्वकर्मनिष्ठाः पुण्यलोका भवे
न्ति इत्यादि स्मृतेश्च कर्मक्षयानुपपत्तिः येनाहुर्नित्यानि कर्माणि
दुःखरूपत्वात् पूर्वकृतदुरितकर्मणां फलमेव न तु तेषां स्वरूप
व्यतिरेकेणान्यत् फलमश्रुतत्वात् जीवनादिनिमित्ते विधा
नादिति नापूर्वमानां च फलदानासम्भवात् दुःखफलविशेषानु
पपत्तेः कर्मणां स्यात् ~~यदुक्तं पूर्वजन्मकृतदुरितानां कर्मणां फ~~
~~ल~~ यदुक्तं पूर्वजन्मकृतदुरितानां कर्मणां फले नित्यकर्मानुष्ठा
नायासदुःखं भुज्यत इति तदसत् नहि मरणकाले फलदानायाने
कीभूतस्य कर्मणः फलमन्यमारब्धे जन्मन्युपभुज्यत इत्युपपत्तेः
अन्यथा स्वर्गफलोपभोगायाग्निहोत्रादिकर्मारब्धे जन्मनि नरका।
फलोपभोगानुपपत्तिर्न स्यात् तस्य दुरितदुःखविशेषकफलत्वानुप
पत्तेश्च एकैकेन हि दुरितेन सम्भवत् स्वभिन्नदुःखसाधनफलेषु
नित्यकर्मानुष्ठानायासदुःखमात्रफलेषु कल्प्यमानेषु देहरोगा
दिबाधानिमित्तं दुःखं नहि शक्यते कल्पयितुं नित्यकर्मानुष्ठाना
यासदुःखमेव पूर्वपापदुरितफलं न शिरसा पाषाणवहनादिदुः
खमिति यच्चोक्तं चेदमयुक्तं नित्यकर्मानुष्ठानायासदुःखं पूर्वकृ
तदुरितकर्मफलमिति कथमश्रुतफलस्य हि पूर्वकृतदुरितस्य
क्षयो नोपपद्यत इति प्रकृते नयाश्रुतफलस्य कर्मणः फले नि
त्यकर्मानुष्ठानायासदुःखमाह भवांश्च अश्रुतफलस्याप्यस्य सर्व

गी॰ टी॰ भा॰

295

मेव पूर्वकृते दुरिते तत्प्रसक्तफलमेवेति मन्यते भवांस्तु तो
नित्यकर्मानुष्ठानायासदुःखमेव फलमिति विशेषणमयु
क्तं नित्यकर्मविधानवैयर्थ्यप्रसंगाच्चोपभोगेनैव प्रसक्तफल
स्य दुरितकर्मणः क्षयोपपत्तेः किंच कृतस्य दुःखस्यैव
फले नित्यकर्मानुष्ठानायासादेव तत् दृश्यते व्यायामादिवत्
द्रष्टव्येति कल्पनानुपपत्तिः जीवनादिनिमित्तेन च विधानाद्वि
यमानो कर्मणा प्रायश्चित्तवत् पूर्वकृतदुरितफलत्वानुपपत्तिः य
स्मिन् पापकर्मनिमित्ते यद्विहितं प्रायश्चित्तं तत् तस्य पापस्य
तत्फलमस्य तस्यैव पापस्य निमित्तस्य प्रायश्चित्तदुःखं फलं जी
वनादिनिमित्तमपि नित्यकर्मानुष्ठानायासदुःखं जीवनादिनि
मित्तस्यैव तत्फलं प्रसज्येत निमित्तप्रायश्चित्तयोर्नैमित्तिकत्वाविशे
षात् किंचान्यन्नित्यस्य काम्यस्य चाग्निहोत्रादेरनुष्ठानायासदुः
खस्य तुल्यत्वान्नित्यानुष्ठानायासदुःखमेव पूर्वकृतदुरितस्य फ
लं न तु काम्यानुष्ठानायासदुःखमिति विशेषो नास्तीति तदपि
पूर्वकृतदुरितफलं प्रसज्येत तथा च सति नित्यानां फलाश्रव
णात्तद्विधानसामर्थ्यानुपपत्तेश्च नित्यानुष्ठानायासदुःखं पूर्वकृत
दुरितफलमित्यर्थापत्तिकल्पना चानुपपन्ना एवं विधानसामर्थ्या
नुपपत्तेरनुष्ठानायासदुःखव्यतिरिक्तफलत्वानुमानाच्च नित्या
नां विरोधाच्च विरुद्धं चेदमुच्यते नित्यकर्मणानुष्ठीयमानेनान्य
स्य कर्मणः फलं भुज्यत इत्यभ्युपगम्यमाने स एवोपभोगोऽनि
त्यस्य कर्मणः फलमिति नित्यस्य कर्मणः फलाभाव इति विरु
द्धमुच्यते किंच काम्याग्निहोत्रादावनुष्ठीयमाने नित्यमप्यग्नि
होत्रादि तन्त्रेणैवानुष्ठितं भवतीति तदायासदुःखेनैव काम्या
ग्निहोत्रादिफलमुपक्षीणं स्यात्तन्त्रत्वाद्य काम्याग्निहोत्रादिफ
लमन्यदेव स्वर्गादि तदनुष्ठानायासदुःखमपि नित्ये प्रसज्येत
न चैतदस्ति दृष्टविरोधात् नहि काम्यानुष्ठानायासदुःखात् केव
लनित्यानुष्ठानायासदुःखं भिद्यते किंचासदविहितमप्रतिषि
द्धं च कर्म तत्कालफलं न तु शास्त्रचोदितं प्रतिषिद्धं वा तत्त
त्कालफलं भवेद्यदि भवेत् तदा स्वर्गादिष्वप्यदृष्टफलशासने

वोधमेव स्यात् अग्निहोत्रादीनामेव कर्मस्वरूपाविशेषेऽनु
ष्ठानायासदुःखमात्रेणोपरतयः काम्यानि च स्वर्गादिमहाफ
ल त्वमेवेतिकर्तव्यताद्याधिक्ये त्वसति तत्फलकामित्वमात्रे
णेति न शक्यं कल्पयितुं तस्मान्न नित्यानां कर्मणामदृष्टफ।
लाभावः कदाचिदुपपद्यते अतश्चाविद्यापूर्वकस्य कर्मणो
विद्यैव शुभस्याशुभस्य वा लयकारणं अशेषतोऽव नित्यकर्म।
त्वष्टानमविद्याकाममवीजं हि सर्वमेव कर्म तथाचोपपादिते अ
विद्वद्विषया सर्वकर्मसन्न्यासपूर्विका ज्ञाननिष्ठा उभौ तौ न वि
जानीतो वेदाविनाशिनं नित्यं ज्ञानयोगेन सांख्यानां कर्मयो
गेन योगिनामज्ञानां कर्मसंगिनो तत्त्ववित्तु गुणागुणेषु वर्तंत
इति मत्वा न सज्जते सर्वकर्माणि मनसा सन्न्यास्यैव नैव किं
चित्करोमीति अक्तोममेतततत्त्वविदर्थोदज्ञः करोमीमातत्कृतोः
कर्मकारणमारुरुक्षो योगस्य शमएवकारणमुदारास्त्वयोप्य।
ज्ञानी त्वात्मैव मे मतमज्ञाः कर्मिणो गतागतं कामकामा
लभंते अनन्याश्चिंतयंतो मां नित्ययुक्ता यथोक्तमात्मानमाका
शकल्पमल्पमुपासते ददामि बुद्धियोगं तं येन मामुपयांति
ते अर्थान्न कर्मिणोऽज्ञा उपयान्ति इति भगवत्कर्मकारिणो ये
युक्ततमा अपि कर्मिणोऽज्ञास्ते उत्तरहीनफलत्यागावसाना।
साधना अनिर्देश्याक्षरोपासकास्त्वद्वेष्टा सर्वभूतानामित्याद्या
यपरिसमाप्तकसाधनाः क्षेत्राध्यायाद्युपदर्शितज्ञानसाध
नानां चापि ज्ञानादिषु च हेतुकसर्वकर्मसन्न्यासिनामात्मैकत्वा
कर्तृत्व ज्ञानवतो परस्यां ज्ञाननिष्ठायां वर्तमानानां भगवत्तत्त्ववि
दामनिष्टादिकर्मफलत्रयं परमहंसपरिव्राजकानामेवलब्ध
भगवत्स्वरूपात्मैकत्वशरणानां न भवति भवत्येवमेषामज्ञा
नां कर्मिणामसन्न्यासिनामित्येवं गीताशास्त्रोक्तस्य कर्तव्याकर्तव्या
र्थस्य विभागः अविद्यापूर्वकत्वं सर्वस्य कर्मणोऽसिद्धमिति चेन्न ब्र
ह्महत्यादिलक्षणवत् यद्यपि शास्त्रागतं नित्यं कर्म तथाप्यवि

श्री॰
गी॰टी॰
अ॰
२९८

यावत एव भवति यथा प्रतिषेधशास्त्रावगतमपि ब्रह्महत्यादिल
क्षणं कर्मानर्थकारणं अविद्याकामादिदोषतो भवति अन्यथा।
प्रवृत्त्यनुपपत्तेस्तथा नित्यनैमित्तिककाम्याद्यपीति व्यतिरिक्तात्म
मज्ञाने प्रवृत्तिर्नित्यादिकर्मस्वनुपपन्नेति चेन्न चलनात्मकस्य क
र्म्मणोऽनात्मकर्तृकस्याहं करोमीति प्रवृत्तिदर्शनात् देहादिसंघा
ते अहं प्रत्ययो गौणो न मिथ्या इति चेन्न तत्कार्य्येष्वपि गौणत्वो
पपत्तेरात्मीये देहादिसंघाते अहंप्रत्ययो गौणो यथात्मीयपुत्रे
आत्मा वै पुत्रनामासीति लोके चापि मम प्राण एवायं गौरिति
तद्वन्नैवं मिथ्याप्रत्ययो मिथ्याप्रत्ययस्तु स्थाणुपुरुषयोरग
गृह्यमाणविशेषयोर्न गौणप्रत्ययस्य मुख्यकार्य्यार्थत्वं अधिकर
णस्तुत्यर्थत्वाल्लोपमाशब्देन यथा सिंहो देवदत्तोऽग्निर्माणव
क इति सिंह इवाग्निरिव क्रौर्य्यपैङ्गल्यादिसामान्यवत्त्वात् दे
वदत्तमाणवकाधिकरणकस्तुत्यर्थमेव न तु सिंहकार्य्यमग्नि
कार्य्यं वा गौणशब्दप्रत्ययनिमित्तं किञ्चित् साध्यते मिथ्याप्र
त्ययकार्य्यं त्वनर्थमेव भवति गौणप्रत्ययस्य विषयञ्च जानाति
नैवं सिंहो देवदत्तः सात्त्याग्निर्माणवक इति तथा गौणेन दे
हादिसंघातेनात्मना कृतं कर्म न मुख्येनाहंप्रत्ययविषयेणा
त्मना कृतं स्यात् हि गौणसिंहाग्निभ्यां कृतं कर्म मुख्यसिंहा
ग्निभ्यां कृतं स्यात्र च क्रौर्य्येण पैङ्गल्येन वा मुख्यसिंहाग्न्योः का
र्य्यं किञ्चित् क्रियते स्तुत्यर्थेनोपक्षीणत्वात् स्तूयमानौ च जानी
तो नाहं सिंहो नाहमग्निरिति न सिंहस्य कर्म ममाग्नेश्चेति त
था न संघातस्य कर्म मम मुख्यस्यात्मन इति प्रत्ययोऽयुक्ततरः सा
त्र पुनरहं कर्त्ता मम कर्म्मेति यच्चाहुरात्मीयैः स्मृतीच्छाप्रयत्नैः
कर्म्महेतुभिरात्मा करोतीति तेषां मिथ्याप्रत्ययपूर्वकत्वात् मि
थ्याप्रत्ययनिमित्तेष्टानुभूतक्रियाफलजनितसंस्कारपूर्वका हि
स्मृतीच्छाप्रयत्नादयो यथास्मिन् जन्मनि देहादिसंघाताभिमा
नरागद्वेषादिकृतौ धर्म्माधर्म्मौ तत्फलानुभवश्च ततोऽती

तेऽतीतेतरेऽपि जन्मनोऽस्यानादिरविद्याकृतः संसारो नीतो नागत
श्चानुमेयः ततश्च सर्वकर्मसन्न्यासात् ज्ञाननिष्ठाया आत्यन्ति
कः संसारोपरम इति सिद्धं अविद्यात्मकत्वाच्च देहाभिमान
स्य तन्निवृत्तौ देहाद्यनुपपत्तेः संसारानुपपत्तिः देहादिसंघाते
आत्माभिमानोऽविद्यात्मकः न हि लोके गवादिभ्योऽन्योऽहं मत्त।
श्चान्ये गवादय इति जानन् तेष्वहमिति प्रत्ययं मन्यते कश्चिद्
जानंस्तु मन्येत स्थाणौ पुरुषविज्ञानवत् अविवेकतो देहादिसं
घाते कुर्यादहमिति प्रत्ययं न हि विवेकतो जानन् यस्त्वात्मा वै
पुत्रनामासीति पुत्रेऽहंप्रत्ययः स तु जन्यजनकसम्बन्धनिमित्तो गौ
णो गौणेन चात्मना भोजनादिवत् परमार्थकार्यं न शक्यते क
र्तुं गौणसिंहाग्निभ्यां मुख्यसिंहाग्निकार्यवत् अदृष्टविषय।
चोदनाप्रामाण्यादात्मकार्यं गौणैर्देहेन्द्रियात्मभिः क्रियत इति
चेन्न अविद्याकृतात्मकत्वात् तेषां गौणा आत्मानो देहेन्द्रियादयः
किं तर्हि मिथ्याप्रत्ययेनैवानात्मन आत्मत्वमापाद्यन्ते
तद्भावे भावात् तदभावे चाभावात् अविवेकिनां ह्यज्ञानकाले बाला
नां दृश्यते स्थूलोऽहं गौरोऽहमिति देहादिसंघातेऽहंप्रत्ययो भवति
न तु विवेकिनामन्योऽहं देहादिसंघातादिति जानतां तत्का
ले देहादिसंघातेऽहंप्रत्ययो भवति तस्मात् मिथ्याप्रत्ययाभावे
ऽभावात् तत्कृत एव न गौणः पृथग्गृह्यमाणविशेषसामान्य
योर्हि सिंहदेवदत्तयोरग्निमाणवकयोर्वा गौणः प्रत्ययः शब्दप्रयो
गो वा स्यात् नागृह्यमाणसामान्यविशेषयोः यथा शुक्तिरजतयोः यत्तू
क्तं श्रुतिप्रामाण्यादिति तन्न तत्प्रामाण्यस्यादृष्टविषयत्वात् प्रत्यक्षादि
प्रमाणानुपलब्धे हि विषयेऽग्निहोत्रादिसाध्यसाधनसम्बन्धे श्रु
तेः प्रामाण्यं न प्रत्यक्षादिविषये अदृष्टदर्शनार्थविषयत्वात् प्रामा
ण्यस्य तस्माच्च दृष्टमिथ्याज्ञाननिमित्तस्याहंप्रत्ययस्य देहादिसं।
घाते गौणत्वं कल्पयितुं शक्यं न हि श्रुतिशतमपि शीतोऽग्निरप्रकाशो
वेति ब्रुवत्प्रामाण्यमुपैति यदि ब्रूयात् शीतोऽग्निरप्रकाशो वेति त

श्री
गी टी
प्र॰

297

याप्यर्थान्तरे कृते विवक्षिते कर्तृत्वे प्रामाण्यमन्यथानुपपत्तेः न तु
प्रमाणान्तरविरुद्धे स्ववचनविरुद्धे वा कर्मणो मिथ्याप्रमयवत्
कर्तृकत्वात् कर्तुरभावे श्रुतेरप्रामाण्यमिति चेत् न ब्रह्मविद्याया
मर्थवत्त्वोपपत्तेः कर्मविधिश्रुतिवत् ब्रह्मविद्याविधिश्रुतेरप्रामा
ण्यप्रसंग इति चेन्न बाधकस्यान्यथानुपपत्तेर्यथा ब्रह्मविद्याविधि ग्र
श्रुत्यात्मस्वरूपगते देहादिसंघातेऽहंप्रत्ययो बाध्यते तथात्मन्येवा
त्मावगतिर्न कदाचित् केनचित् कथंचिदपि बाध्यते शक्याफला
व्यतिरेकावगतेर्यथाग्निरुष्णः प्रकाशश्चेति नच कर्मविधिश्रु
तेरप्रामाण्यं पूर्वपूर्वप्रवृत्तिनिरोधेनोत्तरोत्तरापूर्वप्रवृत्ति
जननस्य प्रत्यगात्माभिमुख्यप्रवृत्त्युत्पादनार्थत्वात् मिथ्यात्वेऽप्यु
पायस्योपेयसत्यतया सत्यत्वमेव स्याद्यथार्थवादानां विधिशे
षाणां लोकेऽपि बालोन्मत्तादीनां पयआदिपाययितव्ये चूडावर्ध
नादिवचनं प्रकारान्तरस्थानां च साक्षादेव प्रामाण्यसिद्धेः प्रा
गात्मज्ञानात् देहाभिमाननिमित्तादिप्रामाण्यवत् सत्त्वमप्यतिस्व
यमव्याप्रियमाणोऽप्यात्मा संनिधिमात्रेण करोति तदेवं च मुख्य
कर्तृत्वमात्मनो यथा राजा युध्यमानेषु योधेषु युध्यत इति प्र
सिद्धं स्वयमयुध्यमानोऽपि संनिधानादेव जितः पराजित
श्चेति तथा सेनापतिर्वा नैव करोति क्रियाफलसम्बन्धश्च रा
जसेनापतेश्च दृष्टः यथा च ऋत्विक्कर्म यजमानस्य तथा दे
हादीनां कर्म आत्मकृतं स्यात् तत्फलस्यात्मगामित्वात् यथा
कु॰ वा भ्रामकस्य लोहभ्रामयितृत्वाद्यात्मत्वस्यैव [illegible] मुख्य
मेव कर्तृत्वं तथात्मन इति तदसदकुर्वतः कारकत्वप्रसंगा
त् कारकमनेकप्रकारमिति चेन्न राजप्रभृतीनां मुख्यस्यापि
कर्तृत्वस्य दर्शनात् राजा तावत् स्वव्यापारेणापि युध्यते योधाना पान
योधयितृत्वेन धनदानेन च मुख्यमेव कर्तृत्वं तथा जयपराज
यफलोपभोगेन तथा यजमानस्यापि धनत्यागेन दक्षिणादाने
न च मुख्यमेव कर्तृत्वं तस्मादव्यापृतस्य कर्तृत्वोपचारः यः सौ

णा इत्यवगम्यते यदि सत्वमसत् करिष्यति स्वव्यापारलक्षणं नो
पलभ्यते राजयजमानप्रभृतीनां तदा सन्निधिमात्रेणापि क
र्तृत्वं सत्वे परिकल्प्यते यथा भामणेन तथा राजयजमाना
दीनां स्वव्यापारेणोपलभ्यते तस्मात् सन्निधिमात्रेणापि क
र्तृत्वं गौणमेव तथा च सति तत्फलसम्बन्धोऽपि गौण एव स्या
त्तद्गौणेन सत्वे कार्यं निवर्त्यते तस्मादसदेवैतद्दूषणं देहादीनां
व्यापारेणाऽप्यात्मा कर्ता भोक्ता च स्यादिति भ्रान्तिनिमित्त
त्वं सर्वमुपपद्यते यथा स्वप्ने मायायां चैवं न च देहाद्यात्मप्रत्य
यभ्रान्तिसन्तानविच्छेदेषु सुषुप्तिसमाध्यादिषु कर्तृत्वभोक्तृत्वा
द्यनर्थ उपलभ्यते तस्मात् भ्रान्तिप्रत्ययनिमित्त एवायं संसारभ्र
मः न परमार्थ इति सम्यग्दर्शनादत्यन्तमेवोपरम इति सिद्धं सर्व
गीताशास्त्रार्थमुपसंहृत्यास्मिन्नध्याये विशेषतश्चान्ते इह शा
स्त्रार्थदार्ढ्याय संक्षेपत उपसंहारं कृत्वाथेदानीं शास्त्रसं
प्रदायविधिमाह इदं शास्त्रं ते तव हिताय मयोक्तं संसारवि
च्छित्तये अतपस्काय तपोरहिताय न वाच्यमिति व्यवहितेन
सम्बध्यते तपस्विनेऽप्यभक्ताय गुरुदेवभक्तिरहिताय कदाचन क
स्मिंश्चिदप्यवस्थायां न वाच्यं भक्तस्तपस्व्यपि सन्नशुश्रूषुर्यो
भवति तस्मा अपि न वाच्यं न च यो मां वासुदेवं प्राकृतमनुष्य
मत्वा अभ्यसूयति आत्मप्रशंसादिदोषाध्यारोपणेन ममेश्वरत्व
मजानन्न सहते सोऽप्ययोग्यस्तस्मा अपि न वाच्यं भगवत्यनसू
यकाय तपस्विने भक्ताय शुश्रूषवे तस्यैव च वाच्यं शा
स्त्रमिति सामर्थ्याद्गम्यते तत्र मेधाविने तपस्विने वेत्यनयो
र्विकल्पदर्शनात् शुश्रूषाभक्तियुक्ताय तपस्विने भक्ताय मेधावि
ने वा वाच्यं शुश्रूषाभक्तिवियुक्ताय न तपस्विने नापि मेधाविने वा
च्यं भगवत्यसूयकाय समस्तगुणवतेऽपि न वाच्यं गुरुशुश्रूषा
भक्तिमते च वाच्यमित्येष शास्त्रसम्प्रदायविधिः ६७ ॥

पूर्वापरालोचनातो गीताशास्त्रे आद्योयोपसंहृत्य तत्तात्पर्यार्थं
निर्धारितमपि विचारद्वारा निर्धारयितुं विचारमवतारयति अ
स्मिन्निति किंशब्दार्थमेव द्वेधा विभजते ज्ञानमिति निमित्ताभावे
संशयपक्षाभावत्वान्न निरस्यतामिति मत्वा शङ्कते कुत इति तत्त
त्वार्थविद्योतकानेकवाक्यदर्शनेन तन्निमित्तमित्याह यज्ज्ञात्वेति क
र्मणामवश्यकर्तव्यत्वोपलम्भात्तेभ्योऽपि निःश्रेयससिद्धिर्भाविनीत्या
ह कर्मण्येवेति तथापि समुच्चयसाधके नास्तीत्याशङ्क्याह एव
मिति तयोः सामग्र्याः कार्यमवश्यम्भावीत्युपसंहरति इति भवे
दिति संदिग्धे सफलेच विचार्यमिति स्थिते सति फले संदिग्ध
मपि न विचार्यमिति उच्यते शङ्कते किं तदिति प्रश्ने के ज्ञान
कर्मणोः समुच्चितयोर्वा मुक्तिं प्रति परमसाधनत्वेनावधारणमे
व विचारफलमिति परिहरति नन्विति सन्देहप्रयोजनयोर्विचा
रप्रयोजकयोर्भावात् विचारद्वारा परममुक्तिसाधने निर्धारणी
यमिति निगमयति अत इति एवं विचारमवतार्य सिद्धान्तं संगृ
ह्णाति ज्ञानेति संगृहीतं विशदयन् आदावात्मज्ञानापोह्याम
विद्यां दर्शयति क्रियेति आश्रयोऽस्या तदनादित्वमाह आत्मनी
ति तामेवाविद्यामनाद्यविद्योपाधामनर्थात्मिकां प्रपञ्चयति ममे
ति अनाद्यविद्याकार्यत्वात् प्रवाहरूपेणानादित्वमस्या विवक्षित्वा
विशिनष्टि अनादीति तत्र कारणाविद्यानिवर्तकत्वमात्मज्ञानस्यो
पपश्यति अस्यामिति न च वेदस्यापि ज्ञाने निवर्तयितुं विरोधेनास्य
त्वेनान्न वा वस्तुत्वमनर्थात्मकस्यार्थक्रियाकारित्वाभावात्तत्राह
उपपद्यमानमिति कथं तस्य कारणाविद्यानिवर्तकत्वमित्याशङ्क्य
१८ का कार्याविद्यानिवर्तकत्वं दृष्टमित्याह कर्मेति आत्मज्ञानस्यैवा
दिसंगृहवाक्येन शब्दयोग्यविशेषाभावादानर्थक्यमाशङ्क्याह त
था इति पदद्वयव्यावर्तकत्वमेवास्य स्फुटयति नेत्यादिना इतश्च
कर्मसाध्यता मुक्तेरित्याह अकार्यत्वाच्चेति एतन्नियोगमहिमेति
मुक्तेः नित्यत्वेन मोक्षस्याकार्यत्वाच्च न च हेत्वन्तरमुपपादयति

नहीति ज्ञानेनापि मोक्षो न क्रियते येन हि केवलमपि ज्ञानं मुक्त्यै।
न पुष्कलमिति ऊनेत्यस्य तत्र हेत्वन्तरीयमाशंकते केवलेति ज्ञाना
नर्थक्ये हेषयतिनेनेति तदेव प्रपंचयति शुविद्येति यज्ञात्मविद्या।
निवर्तकज्ञानस्य कैवल्यफलावसायित्वं दृष्टमिति तत्र दृष्टान्तमा
ह रज्ज्वादीति उक्ते विषये तमोनिवर्तकप्रकाशस्य कस्मिन्नु फले
पर्यवसाने तमाह विनिवृत्तेति प्रदीपप्रकाशस्य सर्पभ्रमनिवृ
त्तिद्वारा रज्जुमात्रे पर्यवसानवदात्मज्ञानस्यापि तदविद्यानिवृत्त्या
त्मकैवल्यावसानमिति दार्ष्टान्तिकमाह तथेति ज्ञानादीनां ज्ञान
निष्ठाहेतूनां कर्मान्तरे प्रवृत्तिसंभवात् कर्मसहितैव सा कैवल्या
वसायिनीति चेत्तत्राह दृष्टार्थायामिति कर्मसाहित्यं ज्ञाननिष्ठा
या दृष्टान्तेन साधयन्नाशंकते भजीति भजिक्रियायां लौकि
क्यां वैदिक्यामग्निहोत्रादिक्रियायाः सहायदृष्टान्तवदग्निहो
त्रादिक्रियायां ज्ञाननिष्ठायाश्च साहित्यमित्यर्थः भजिफले तृ
प्त्याख्येऽपि स्वर्गादौ तद्धेतौ चाग्निहोत्रादावर्थित्वदृष्टेऽपि
तत्र साहित्यं न तथा मुक्तिफलज्ञाननिष्ठालाभे स्वर्गादौ तद्धेतौ
वा कर्मण्यर्थित्वेन ज्ञाननिष्ठाकर्मणोर्न साहित्यमिति परि
हरति नेत्यादिना सेत्यत्र स्वाकांक्षाविहीनेति केवलेति ज्ञाने फलव
ति लब्धे फलान्तरे तद्धेतौ च नार्थित्वमत्र दृष्टान्तमाह सर्वत इति
सर्वत्र संप्लुते ग्राममध्योदकमिति समुद्रादिके तत्फले स्नाना।
दि तस्मिन्ग्रामे तडागादिनिर्माणक्रियायां तदर्थित्वं च स्नाना
दौ कस्यचिदर्थित्वं तथा प्रकृतेऽपीत्यर्थः निरतिशयफले ज्ञाने
लब्धे सातिशयफले कर्मणि नार्थित्वमित्येतद्दृष्टान्तेन स्फुटयति
नहीति कर्मणः सातिशयफलत्वमकृतमुपजीव्य फलितमाह त
स्माच्चेति ज्ञानकर्मणोः साहित्यसंभवमपि पूर्वोक्तं निगमयति न
चेति नहि प्रकाशतमसोरिव मिथो विरुद्धयोस्तयोः साहित्यमेक
स्मिन्फले साहित्यमित्यर्थः ननु ज्ञानमेव मोक्षं साधयदात्मस
हायत्वेन कर्मापेक्षते करणस्योपकरणापेक्षत्वात्तत्राह नापी
ति ज्ञानस्यात्मनो यज्ञाद्यपेक्षत्वमपि नोत्पन्ने फले तदपेक्षे मोक्ष

त्तिनान्तरीयकत्वेन मुक्तेस्तत्साधनत्वादित्यर्थः यदुक्तमिति कर्तव्यत्वे
न ज्ञाने कर्म्मापेक्षमिति तत्राह अविद्येति ज्ञानस्याज्ञाननिवर्तकत्वा
त्तत्र कर्म्मणो विरुद्धत्वया सहकारित्वायोगात्र फलेतदपेक्षेत्यर्थः क
र्म्मणोपि ज्ञानवदज्ञाननिवर्तकत्वे कथं विरुद्धत्वमाशंक्याह नहीति
केवलस्य समुच्चितस्य वा कर्म्मणो मोक्षे साक्षादनन्वय फलितमाह
अतइति केवलज्ञाने मुक्तिसाधनमित्युक्तं तद्विशेष[illegible]त्वं शंकते नेत्या
दिना निषेध्यमनूद्य तन्निषेधमाह एतावदिति नित्याकरणे प्रत्यवायप्रा
प्तेरिति हेतुं प्रपंचयति यतइति ज्ञानवतोपि नित्यानुष्ठानस्यावश्य
कत्वाच्च केवलज्ञानस्य कैवल्यहेतुतेत्यर्थः कैवल्यस्य च नित्यत्वादि
त्यस्य व्यावर्त्यं दर्शयति नन्विति यदि नित्यनैमित्तिककर्म्माणि श्रोताम
करणे प्रत्यवायकारीण्यवश्यानुष्ठेयान्येवं तर्हि तेभ्यः समुच्चितेभ्योऽस
मुच्चितेभ्यश्च मोक्षो नेमकृतत्वात् केवलज्ञानस्य वा तदहेतुत्वादनित्य
ता मुक्तेर्न सिध्येदित्यर्थः कैवल्यस्य चेत्यादि व्याकुर्वन्न निर्म्मोक्षप्रसं
गप्रसादित्याति नैषदोषइति मुक्तेर्नित्यत्वेनायत्नसिद्धेर्न तदभावशं
केत्येतत्प्रपंचयति नित्यानामिति काम्यकर्म्मवशाद्देहशरीरापत्ति
शंकित्वोक्तं काम्यानां चेति प्रारब्धकर्मवशात्तर्हि देहान्तरं नेत्याह व
र्त्तमानेति तर्हि देहान्तरं शेषकर्म्मणां स्यादित्याशंक्य कर्म्माशयस्यै
कभविकत्वान्नेत्याह पतितेस्मिन्निति रागादिना कर्म्मान्तरं ततोदे
हान्तरञ्च भविष्यतीत्याशंक्याह रागादीनां चेति आत्मनः स्वरूपावस्था
नमिति सम्भवः अतीतानेकजन्मभेदार्जितस्य कर्म्मणो नानाफल
स्यानारब्धस्य भोगेनाक्षयात् ततो देहान्तरारंभादेकभविकत्वस्याप्रमा
णिकत्वात्र मुक्तेरयत्नसिद्धतेति चोदयति अतिक्रान्तेति नैककर्म्मनि
मित्ते देहान्तरं शंकितव्यमित्याह नेति नित्यनैमित्तिककर्म्माणि श्रोता
मवश्यमनुष्ठेयानि तदनुष्ठानेन च महानायासस्ततो दुःखोपभोगा
त्तस्योक्तानारब्धकर्म्मफलभोगत्वोपगमात्र ततो देहान्तरमित्याह नित्ये
ति नित्यादिना दुरितनिवृत्तावश्यविरोधात्र सुकृतनिवृत्तिस्ततो देहान्तर
मित्याशंक्य सुकृतस्य नित्यादेरप्यनारब्धस्य च न्यायविरुद्धत्वं तस्याभि
हत्वात्ततो देहान्तरायोगान्नित्यादेरनुष्ठाने च न तस्य फलान्तरमिति स

ता यथा प्रायश्चित्तस्यानन्तरितनिबर्हणार्थं न फलान्तरापेक्षन्ते एवं
सर्वमपि नित्यादिकर्म्मोपात्तपापनिराकरणार्थं तस्मिन्नेव पर्य्यवस्यन्न
देहान्तरारम्भकमिति यद्यान्तरमाह प्रायश्चित्तवदिति तथापि प्रारब्ध
वशादेव देहान्तरे शकनेनार्जितमारम्भकाणामपि तेषां यावदपि
कारम्भाघेन सम्भवादित्याशंक्याह आरब्धानां चेति स्वीकार्जितकर्म्मा
णामेव क्षीणत्वेपि कानिचित्सर्वकर्म्माणि देहान्तरमारभेरन्नित्या
शंक्याह प्रक्षीणांचेति विनाज्ञानं कर्म्मणैव मुक्तिरिति पक्षं श्रु
त्यवष्टम्भेन निरावष्टे नेत्यादिना विद्यतेयनायेति श्रुतेरिति सम्बन्धः
एवकारार्थं विवृणोत्तेत्यादिभागे व्याकरोति ध्रमस्ति यदा चर्म्मव
दाकाशं वेष्टयिष्यन्तिमानवाः तदा देवमविज्ञाय दुःखस्यान्तो भवि
ष्यतीति श्रुतिमर्थतोनुवदति चर्म्मवदिति श्रोतार्थे स्मृतिं संवादय
ति ज्ञानादिति किंच तदीयमायस्यानुग्राह्यमानहीनत्वेनाभासतया
प्रणकर्म्मणामनारब्धफलानां तत्पाभावे देहान्तरारम्भसम्भवान्न
ज्ञानं विना मुक्तिरित्याह अनारब्धेति तथापि पानां कर्म्मणां नाशि
सम्भावनेत्याशंक्याह यथेति अनारब्धफलपुण्यकार्म्मोभेवेपि क
थं मोक्षानुपपत्तिरित्यत आह तेषांचेति रतश्च कर्म्मत्त्यानुपपन्ना
मोक्षानुपपत्तिरिति तत्राह यम्मेति कर्म्मणापितृलोकइति श्रुति
मश्रित्यकर्म्मान्तरे हेत्वन्तरमाह नित्यानामिति स्वस्यापि यथोक्तार्थे
समर्थयते वर्णाइति श्रम कर्म्मफलमनुभूय ततः शेषेण विशिष्ट
जात्यादिभाजोजन्म प्रतिपद्यन्तइत्येतदादिपदार्थः पत्र नित्यानु
ष्ठानायासदुःखभोगस्य तत्फलभोगत्वमिति तदिदानीमनुवदति
यदितिति नित्यानुष्ठीयमानानामायासरूपत्वान्नोतिशेषः तथापि
नित्यानां काम्यानामिव स्वरूपातिरिक्तं फलमाशंक्य विश्वदेशेन
दृष्टव्यमेवमित्याह नत्विति विश्वदेशे फलाश्रुतौ तत्काममनाप
तितिनतथाभावान्न नित्यानिविधीयरन्नित्याशंक्याह जीवनेति न
नित्यानां विध्यसिद्धिरितिशेषः श्रुतभाषिते इत्यत्रति तेत्यादिना न
देव विहितव्यविशेष्यमन्तरेण तदर्थमाह यदुक्तमिति प्रक्षमानामित्या
दिहेतं प्रपंचयतिनहीति कर्म्मान्तरारब्धेपि देहे दुरितफले नित्या
नुष्ठानायासदुःखं भुञ्जानोकानुपपत्तिरित्याशंक्याह अयथेति

श्रीं
गीटीं
प्र

300

यदुक्तं दुःखफलविशेषानुपपत्तिश्च स्यादिति तदुपपादयति त
थेति सेभाविनानि तावदनन्तानि संचितानि दुरितानि च नानादुः
खफलानि यदि तानि नित्यानुष्ठानायासरूपे दुःखे तन्मात्रफला
नि कल्प्येरन् तदा तेष्वेवं कल्प्यमानेषु वनस्थनित्यस्यानुष्ठितस्यायासमा
मादयतो योऽदुरितकृतो दुःखविशेषोऽन तत्फले दुरितफलानां दुःखा
नां बहुत्वादेतो नित्यकर्म यथा विशेषे ते दुरितकृते दुःखविशेषफ
लकमित्यशक्यमित्यर्थः किंच नित्यानुष्ठानायासदुःखमात्रफलानि
चेत् दुरितानि कल्प्येरंस्तदा देहस्थाहितरोगादिबाधस्य रोगादिबाधाया
श्च दुरितनिमित्तत्वानुपपत्तेः सकृतफलत्वस्य चासम्भवादनुपपा
तिरेवेति दुरितबाधायाः स्यादित्याह देहेति इतश्च नित्यानुष्ठानायास
दुःखमेव दुरितफलमित्यशक्यमित्याह नित्येति दुःखमिति तथा
काले कल्पयितुमिति शेषेण सम्बन्धः यदि तदेव तत्फलं न तर्हि
शिरसा पाषाणवहनादिदुःखं दुरितकृतं न च तत्कारणं सकृते दुः
खस्यातत्कार्यत्वादतस्तदाकस्मिकं स्यादित्यर्थः नित्यानुष्ठानायासदुः
खस्य पापदुरितफलमित्येतदप्रकृततत्त्वाश्रयं वक्तुमित्याह अप्रकृ
तेचेति तदेव प्रपंचयितुं पृच्छति कथमिति तत्रादौ प्रकृतमाह प्र
प्रसक्तेति तथापि कथमस्माकमप्रकृतत्वादिति तत्राह तेचेति प्रसक्त
तफलत्वमप्रसक्तफलत्वमिति प्राचीनदुरितगतविशेषानुपगमादवि
शेषेण सर्वस्यैव तस्य प्रसक्तफलत्वान्नित्यानुष्ठानायासदुःखफलत्वस
म्भवान्नाप्रकृतत्वादिनेति शंकते अथेति शेषपापदुरितस्यापि शेषेण
खफलत्वे विशेषणानर्थक्यमिति परिहरति तत्रेति दुरितमात्रस्य
खफलत्वे नानाखफलस्य तस्यैकफलविशेषवत्त्वानुपपत्तेरित्यर्थः
शेषपापदुरितमात्रखफलत्वे चेद्रोगेणैव तत्तत्यसम्भवात्तन्निहत्यर्थं
नित्यं कर्म न विधातव्यमिति दोषान्तरमाह नित्येति इतश्च नित्यानु
ष्ठानायासदुःखं तेषां दुरितफलमित्याह किंचेति तदेव स्फोरयति
कृतमिति यथा यागमगमनादिकृते दुःखे नामस्य दुरितस्यैव न त
तफलत्वसम्भवात्तथा नित्यस्यापि कृत्यकृष्णानुष्ठितस्यायासदुःखे नास्य
फलान्तरमनुपपत्तमाह तत्र नित्यानुष्ठानायासदुःखमेव चेत् फलं तर्हि तस्मादेव
तद्दर्शनात्तस्य तदुरितफलत्वे कल्प्ये नित्यफलत्वसम्भवादित्यर्थः दुः

त्वफलत्वे नित्यानामननुष्ठानमेव श्रेयः स्यादित्याशंक्याह जीवनादि
ति नित्यानां दुरितफलत्वानुपपत्तौ हेत्वन्तरमाह प्रायश्चित्तवदिति
दृष्टान्तं प्रपंचयति यस्मिन्निति तथा जीवनादिनिमित्ते विहितानां
नित्यानां दुरितफलत्वासिद्धिरिति शेषः सत्यं प्रायश्चित्ते न निमित्त
स्य पापस्य फले किंतु तदनुष्ठानाभावप्रयुक्तत्वं तस्य पापस्य फलमि
ति शंकते यद्यपीति प्रायश्चित्तानुष्ठानाभावप्रयुक्तत्वस्य निमित्तभूतपा
पफलत्वे जीवनादिनिमित्तनित्याद्यनुष्ठानाभावप्रयुक्तत्वमपि जीवनादे
रेव फले स्यात्तेषां तद्दुरितस्येति परिहरति जीवनादीति प्रायश्चि
त्तप्रयुक्तत्वस्य तन्निमित्तपापफलत्ववज्जीवनादिनिमित्तनित्यादिकर्म
कृतमपि प्रयुक्तत्वं जीवनादिफलमित्यत्र हेतुमाह नित्येति इतश्च
नित्यानुष्ठानाभावप्रयुक्तत्वमेवैषां तद्दुरितफलमित्याशंक्य वक्ष्यमित्या
ह किंचेति काम्यानुष्ठानाभावप्रयुक्तत्वमपि दुरितफलमित्यभ्युपगमा
त् प्रसंगस्येष्टत्वमाशंक्याह तथा चेति विहितानि तावन्नित्यानि न
च तेषु फलं श्रुतं न च विना फलं विधिः तेन दुरितनिवर्हणार्थानि नि
त्यानीत्यर्थापत्त्या तेषु च सा श्रुता काम्यानुष्ठानादपि दुरितनिवृत्ति
सम्भवादित्यर्थः किंच नित्यानुष्ठानाभावप्रयुक्तत्वातिरिक्तफलानि
विहितत्वात् काम्यवदित्यनुमानान्नेषां दुरितनिर्हरणार्थत्वमाहत्य
वमिति काम्यादिकर्म दृष्टान्तयितुमेवमित्युक्तं स्यात्क्रियाया आनन्त्या
नित्यानुष्ठानात् दुरितफलभोगोक्तिरयुक्तेत्याह विरोधाच्चेति तदेव
प्रपंचयति विरुद्धश्चेति इदंशब्दार्थमेव विशदयति नित्येति प्रत्या
स्य कर्मणो दुरितस्येति यावत् सप्त्वेति यदनन्तरं यद्भवति तत्तस्य
कार्यमिति नियमादित्यर्थः इतश्च नित्यानुष्ठाने दुरितफलभोगो न
सिध्यतीत्याह किंचेति काम्यानुष्ठानस्य नित्यानुष्ठानस्य च यौगपद्या
न्नित्यानुष्ठानाभावप्रयुक्तत्वेन दुरितफलभोगवत् काम्यफलस्यापि भु
क्तत्वसम्भवादिति हेतुमाह तत्त्वतादिति नित्यकाम्यानुष्ठानयोर्यौ
गपद्येपि नित्यानुष्ठानाभावप्रयुक्तत्वादन्यदेव काम्यानुष्ठानफलं कृता
न्तत्वादिति शंकायां प्रयेति काम्यानुष्ठानफले नित्यानुष्ठानाभावप्रयुक्त
त्वादित्यत्रेत्यनर्हि काम्यानुष्ठानाभावप्रयुक्तत्व नित्यानुष्ठानाभावप्रयुक्तत्व

०च मिश्रोमिति स्यादित्याह तदनुष्ठानेनेति प्रसंगात्सिद्धवन्माशंक्य निरा
चष्टे नचेति दृष्टविरोधमेव स्पष्टयति नहीति आत्मज्ञानवदग्निहो
त्रादीनां मोक्षे साक्षादन्वयो नेष्यत इत्यपि कारणमस्तीत्याह किंचात्म
ज्ञेति तदेव कारणं विवृणोति प्रविहितमिति यत्कर्ममर्दनभोजनादि
तत्र शास्त्रे विहिते निषिद्धे वा तदनंतरफले तथानुभवादित्यर्थः शास्त्री
ये कर्मणि त्वानन्तर्यफलमानन्तर्येणाश्रितत्वादज्ञानेन दृष्टफलेना
दृष्टफलकर्मसहकारि भवति नापि स्वयमेव दृष्टफले मोक्षे कर्म
प्रवृत्तिः तमेतं विवृणोति नचेति शास्त्रीयस्याग्निहोत्रादेरपि फ
लानन्तर्यं स्वर्गादीनामनन्तरमनुपलब्धेर्विरुध्यते ननलेशेऽपि तथा
विधफलापि तया प्रवृत्तिरग्निहोत्रादिषु तस्यादित्याह तदेति किंच
नित्यानामग्निहोत्रादीनां नादृष्टफले तेषामेव काम्यानां नादृष्टफ
ले न च हेतुं विनाऽपि विभागो भागीत्याह अग्निहोत्रादीनामिति फ
लकामित्वमात्रेणेति न स्यादिति पूर्वेणान्वयः यानि नित्यान्यग्नि
होत्रादीनि यानि च काम्यानि तेषामुभयेषामेव कर्मस्वरूपविशे।
षाभावेऽपि नित्यानां तेषां प्रत्यवायदुःखमात्रेण तयोन फ
लान्तरमस्ति तेषामेव काम्यानामंगाधिकाभावेऽपि फलकामित्व
मधिकारिणस्तीत्येतावन्मात्रेण स्वर्गादिमहाफलत्वमित्यर्थं विभा
गेन प्रमाणाभावादित्यर्थः उक्तविभागायोगे फलितमाह तस्मादिति
काम्यवन्नित्यानामपि पितृलोकाद्यदृष्टफलवत्त्वे उक्ते तन्निवृत्त्यर्थं त्वा
योगादर्थो नाम्य विधेरानुपपन्नत्वेत्याह उक्तत्वेति शुभाशुभात्मके
कर्म सर्वमविद्यापूर्वकं चेद्दोषं तत्स्तर्हि तस्य तद्युक्तकारणं विधेयस्या
पपद्येत न तत्र सर्वं कर्माविद्यापूर्वकमिति सिद्धमित्याशंक्याह अवि
द्येति तत्र हिंसादृष्टान्तेनात्रापि दर्शयति तद्येति इत्यत्राविद्वद्विष
ये कर्मेत्याह अविद्वदिति अधिकारभेदेन निष्ठाद्वयमित्यत्र वाक्यो
पक्रममनुकूलयति आत्मानि कर्तृत्वे कर्मत्वमारोपयन् न जाना
त्यात्मानमिति वदता कर्माज्ञानमूलमिति दर्शितमित्याह उभावि
ति आत्मानं याथात्म्येन जानन् कर्तृत्वादिरहितो भवतीति ब्रुवता
कर्मसंन्यासे ज्ञानवतोऽधिकारित्वं सूचितमित्याह वेदेति निष्ठाद्वय।

यमप्यधिकारिभेदेन बोद्धव्यमित्यत्रैव वाक्यान्तरमाह ज्ञानेति न बु
द्धिभेदं जनयेदित्यत्र चाविद्यावत्त्वेन कर्म्मिणः सूचयता कर्म्मनि
ष्ठाविद्वद्विषयानमोदितेत्याह अज्ञानामिति यदुक्तं विद्वद्विषया
सन्न्यासपूर्व्विका ज्ञाननिष्ठेति तत्र तत्त्ववित्तु महाबाहो गुणकर्म्म
विभागयोरित्यादि वाक्यमुदाहरति तत्त्वविदिति तत्रैव वाक्यान्तरं
पठति सर्व्वेति विदुषो ज्ञाननिष्ठायामत्रैव पांचमिके वाक्यान्तरमाह नै
वेति तत्रैवार्थसिद्धमर्थं कथयति अज्ञ इति समन्तत इति तस्यान्वयः
अज्ञस्य चित्तशुद्ध्यर्थं कर्म्म शुद्धचित्तस्य कर्म्मसन्न्यासो ज्ञानयोगो हेतु
स्तत्र वाक्यान्तरमाह आरुरुक्षोरिति यथोक्ते विभागे षाष्ठमिके वा
क्यमनुगुणमित्याह उदारा इति एवं त्रयीधर्म्ममित्यादि नावमिके वा
क्यं विद्वद्विषये कर्म्मत्यागं प्रमाणयति अज्ञा इति विदुषः सन्न्यास
पूर्व्विका ज्ञाननिष्ठेत्यत्रैव नावमिके वाक्यान्तरमाह अनन्या इति
मामित्येतद्व्याचष्टे यथोक्तमिति तेषां सततयुक्तानामित्यादि दा
शमिके वाक्ये तत्रैव प्रमाणयति ददामीति विद्यावतामेव भग
वत्प्राप्तिनिर्द्देशादितरेषां तदप्राप्तेः सूचितेत्यर्थसिद्धमर्थमाह
अर्थादिति तत्र भगवत्कर्म्मकारिणा युक्ततमत्वात् कर्म्मिणोपि
भगवन्तं यान्तीत्याशङ्क्याह भगवदिति ये मत्कर्म्मकृदित्यादिवा
येन भगवत्कर्म्मकारिणस्ते यद्यपि युक्ततमाः तथापि कर्म्मिणो
ऽज्ञाः केनेन भगवन्तं सहसा गन्तुमर्हन्तीत्यर्थः तेषामज्ञत्वे ग
मकं दर्शयति उत्तरोत्तरेति चित्तसमाधानमारभ्य फलत्यागप
र्य्यन्ते पाठक्रमेणोत्तरोत्तरं हीनसाधनोपादानादभ्यासासमर्थ
स्य भगवत्कर्म्मकारित्वाभिधानाद्भगवत्कर्म्मकारिणामज्ञत्ववि
ज्ञानमित्यर्थः येषां त्वक्षरमनिर्द्देश्यमित्यादिवाक्यावष्टम्भेन विद्वद्वि
षयत्वं सन्न्यासपूर्व्वकज्ञाननिष्ठाया निर्द्धारयति अनिर्द्देश्यमिति उ
क्तसाधनास्ते सन्न्यासपूर्व्वकज्ञाननिष्ठायामधिक्रियन्त इति शेषः
किंच त्रयोदशे यान्यमानित्वादीनि चतुर्द्दशे च प्रकाशश्च प्रवृत्तिश्च
इत्यादीनि पंचदशे च यान्यसंगत्वादीनि उक्तानि तैः सर्व्वैः साध
नैः सहिताना भ वत्प्राप्तिनिर्द्देशात्तेषामकामत्वेऽपि ते ज्ञाननिष्ठा

श्री·
गी·टी·
अ·

302

याभेवापि क्रियेयत्रिमाहत्तेवेति निष्ठाद्वयमधिकारिभेदेन प्रति
ष्ठाप्य ज्ञाननिष्ठानामनिष्टमिष्टं मिश्रं चेति त्रिविधं कर्मफलं न
भवति किं तु मुक्तिरेव कर्मनिष्ठानां तु त्रिविधं कर्मफलं न मुक्ति
रिति शास्त्रार्थविभागमभिप्रेत्य तमुपसंहरति अधिष्ठानादीति य
दुक्तमविद्याकामबीजं सर्वं कर्मेति तत्र शास्त्रावगतस्य कर्मणोऽ
विद्यापूर्वकत्वानुपपत्तेरित्याक्षिपति अविद्येति दृष्टान्तेन समाध
त्ते नेति तत्राभिमतां प्रतिज्ञां विभजते यद्यपीति उक्तं दृष्टान्तं व्या
चष्टे यथेति अविद्यादिमतोऽपि ब्रह्महत्यादि कर्मात्र हेतुमाह अ
मध्येति दार्ष्टान्तिके गमयति तथेति नास्त्यविद्यादिमतो भवं
तीत्यविद्यादिपूर्वकत्वं तेषामेषितव्यमित्यर्थः पारलौकिक
मसु देहाद्यतिरिक्तात्मज्ञानं विना प्रवृत्त्ययोगान्न तेषामविद्या
पूर्वकत्वमिति शंकते व्यतिरिक्त इति सत्यपि व्यतिरिक्तात्मज्ञा
ने पारमार्थिकात्मज्ञानाभावान्मिथ्याज्ञानादेव निष्पादितक
र्मस्य प्रवृत्तेरविद्यापूर्वकत्वं तेषामप्रतिहतमिति परिहरति
तेनेत्यादिना कर्मणां चलनात्मकत्वादात्मकर्तृत्वे तस्य निष्क्रि
यत्वात् देहादिसंघातस्य तु सक्रियत्वात्तत्कर्तृके कर्मण्युक्ते
ऽपि संघातेऽहंममाभिमानद्वाराहं करोमीत्यात्मनो मिथ्या
धीपूर्विका कर्मणि प्रवृत्तिर्दृष्टा तेनाविद्यापूर्वकत्वं तस्य
युक्तमित्यर्थः यदुक्तं देहादिसंघातेऽहमभिमानस्य मिथ्या
ज्ञानत्वं तदाक्षिपति देहादीति अहंप्रत्ययो गौणत्वे तत्पूर्वक
कर्मस्वपि गौणत्वापत्तेरात्मनोऽनर्थाभावात्त्विष्टमर्थं हे
त्वन्वेषणं तस्मादिति दूषयति तेनेति एतदेव प्रपंचयन्वादी
वोक्तं उपचयति आत्मीयेति तत्र क्रमदृष्टमेव दृष्टान्तमाह यथेति
दर्शितं कलत्रादावात्मीये अहमिति प्रत्ययो गौणस्तथा संघातेऽप्यात्मीयेऽहंप्र
त्ययस्तथा युक्तस्तथार्थः भेदस्य पूर्वकत्वं गौणत्वे इत्येतल्लोके प्रसिद्धमित्याह लो
के प्रसिद्धमित्याह लोके चेति लोकवेदानुरोधेनात्मीये संघातेऽहंधीरपि
गौणी स्यादिति दार्ष्टान्तिकमाह तद्वदिति मिथ्याधियोऽपि भेदधीपूर्वकत्व
सम्भवादात्मीयसंघातेऽहंधियो मिथ्याज्ञानमेव किं न स्यादित्याशंक्याह नैव

मिति भेदधीपूर्वकत्वाभावे कथं मिथ्याधीरुदेतीत्याशङ्क्याह मिथ्येति
शुक्तिष्ठानादेरुभयोरविवेकाद्रजतादेरुत्पत्तिरित्यर्थः देहादावहंधियो गौण
नेति चोद्यं विहन्तुं तत्कार्यविपरीत्यादि परिहारं विघटयति नेत्यादि हे
तुभागं विभजते यद्येति सिंहो देवदत्त इति वाक्ये देवदत्तः सिंह इवेत्यु
पमया देवदत्ते क्रौर्याद्यधिकरणे स्ताते प्रवृत्ते श्रुतिर्माणवकश्चापि
वाक्यं माणवकोऽग्निरिवेत्युपमया माणवकस्य पैङ्गल्याधिकरणस्यस्त
मर्थमेव न तथा मनुष्योऽहमिति वाक्यस्याधिकरणत्वमस्ति तत्र भातीत्य
र्थः देवदत्तमाणवकयोरधिकरणत्वे कथमित्याशङ्क्याह क्रौर्येति किंच
गौणशब्दे तत्त्वस्यैव निमित्तीकृत्य सिंहकार्यं न किंचिद्देवदत्ते सा।
ध्यते नापि माणवके किंचिदग्निकार्यं मिथ्याधीकार्यं तु तथैमान्यानु
भवसिद्धेन देहादावहंधीर्गौणीत्याह नाविति इतोऽपि देहादौ नाहं
धीः गौणीत्याह गौणीति यो देवदत्तो माणवको वा गौणधियो वि
षयस्तं परो नेयं सिंहो नायमग्निरिति जानाति नैवमविद्वानात्मनः सं
घातस्य च सत्यपि भेदे संघातस्यानात्मत्वे प्रमेयत्वेन संघातेऽहंशब्द
प्रत्ययौ गौणाविव्यर्थः संघाते तयोर्गौणत्वे दोषान्तरं समुच्चिनोति
तथेति तथा समानाम्नाति करत्वादि प्रतिभासासिद्धिरिति शेषः गौणेन
कृते तत्त्वेन कृतमित्युदाहरणेन स्फुटयति नहीति यद्यपि देवदत्तो
माणवकाभ्यां कृते कार्ये मुख्याभ्यां सिंहाग्निभ्यां न क्रियते तथापि दे
वदत्तगतक्रौर्येण मुख्यसिंहस्य माणवकनिष्ठपैङ्गल्येन मुख्याग्नेरिव
च संघातगतेनापि जडत्वेनात्मनो मुख्यस्य किंचित्कार्यं कृतं भविष्य
तीत्याशङ्क्याह नचेति देहादावहंधियो गौणत्वायोगे हेत्वन्तरमाह सत्
यमात्राविति देवदत्तमाणवकयोः सिंहाग्निभ्यां भेदधीपूर्वके तथा
धारत्वाभाववीवदात्मनोऽपि मुख्यस्य संघातादेदधीद्वारा तदीयधर्मा
ध्याहि समानान्मानिदृष्टं स्यादित्यर्थः आवर्त्य दर्शयति नत्विति संघा
तेऽहंधियो मिथ्याधीत्वमपि न तत्कृतमानाम्नाति करत्वे किंचात्मा य
ज्ञाने क्षायन्त्रेऽस्य कर्तृत्वं वास्तवमिति मतमनुवदति यद्येति ज्ञा
नादिकृतमपि कर्तृत्वं मिथ्याधीकृतमेव ज्ञाने मिथ्याधीकार्यत्वादिति
दूषयति तत्तेषामिति तदेव प्रपञ्चयति मिथ्येति मिथ्याज्ञाने निमित्त
कृताकिंचिदिष्टं किंचिदनिष्टमित्यारोप्य तदुपादत्ते नास्मिन् प्रेप्सा

श्री॰
गी॰टी॰
अ॰

303

जिहासाभ्यां क्रियां निर्वर्त्यतयेऽस्मिन्निष्टे च फले भुंक्ता तेन संस्कारेण
तत्तत्पूर्विकाः स्मरणाद्यः स्मरति क्रियां हर्वन्तीति प्रकृतं कर्तृत्वस्य च
मिथ्यात्वमित्यर्थः अतीतानागतजन्मनोरिव वर्तमानेपि जन्मनि कर्तृ
त्वादिसंसारस्य वस्तुत्वमाशंक्याह यथेति विमतो कालो अविद्याकृतसं
सारवान् कालत्वाद्वर्तमानकालवदित्यर्थः संसारस्याविद्याकृतत्वे फलि
तमाह ततश्चेति तस्याविद्यकत्वेन विद्यापोह्यत्वे हेत्वन्तरमाह अविद्येति
जनितस्याविद्याकृतत्वं धर्माधर्मकृतत्वसंभवादित्याशंक्याह देहादी
ति आत्मनो धर्मादिकर्तृत्वस्याविद्यकत्वात् अविद्यां विना कर्मिणो दे
हाभिमानः संभवत्यतश्च आत्मनः संघातेहमभिमानस्याविद्यया विद्य
मानत्वमित्यर्थः आत्मनो देहाद्यभिमानस्याविद्यकत्वमन्वयव्यतिरेकाभ्यां
साधयन् व्यतिरेकं दर्शयति नहीति अन्वयं दर्शयन् व्यतिरेकमनुवद
ति पुत्रानीति पुत्रे पितरं हेधीः स्वात्मीये देहादावहंधीर्गौणी मुख्य
मनुवदति यत्त्विति तत्र दृष्टान्तेन गौणात्मविषयत्वमङ्गीका
रोति स्यादिति नहि देहादावपि तथैव स्वकीये स्यादहंधीर्गौणीत्याशंक्या
ह गौणेनेति नहि स्वकीयेन पुत्रादिना गौणात्मना पितुर्भोजनादिकार्यं
क्रियते तथा देहादेरपि गौणात्मत्वे तेन कर्तृत्वादिकार्यमात्मनो न वा
स्तवं सिद्ध्यतीत्यर्थः गौणात्मना मुख्यात्मनो नास्ति वास्तवं कार्यमित्य
त्र दृष्टान्तमाह गौणेति नहि गौणेन सिंहेन देवदत्तेन मुख्यसिंहका
र्यं क्रियते नापि गौणाग्निना माणवकेन मुख्याग्निकार्यं दाहपाका
दि तथा देहादिना गौणात्मना मुख्यात्मनो न वास्तवं कार्यं कर्तृत्वादिक
र्तुं शक्यमित्यर्थः स्वर्गकामादिवाक्यप्रामाण्यात् आत्मनो देहाद्यतिरेकज्ञा
नस्य च केवलस्याकर्तृत्वात्तत्कर्तव्यं कर्म गौणेनैव देहादिनात्मनेति संभा
व्यते न किं सत्यमेव योगानामतिरेकज्ञाने देहादावात्मत्वमात्मनो मुख्यत्वमुक्त
मिति चोदयति अदृष्टेति न देहादीनामात्मत्वं गौणं तदीयात्मत्वस्य विध
त्वेन सिद्धत्वादतो न गौणात्मभिरात्मकर्तव्यं कर्म क्रियते किं तु मिथ्या
त्मभिरिति परिहरति नाविद्येति तदेव विवरणवर्णनेन स्फुटयति गौणा
त्मेति कथं नहि देहादिविषयात्मत्वप्रत्ययस्याशंक्याविद्याकृतत्वमादि देहे
विभजते किं तदीति देहादीनामनात्मनामेव सतामात्मत्वं मिथ्याप्रत्ययकृ
तमित्यन्वयव्यतिरेकाभ्यामवधारयति तज्ज्ञाव इति उक्ते न्याये शास्त्रीयं स

स्कारमूलमनुभवं प्रमाणयति अविवेकिनामिति व्यतिरेकेपि दर्शि
ते पश्वादिभिस्तानामनुभवमनुकूलयति न त्विति अन्वयव्यतिरेकाभ्या
मनुभावात्तसादिभ्यो सिद्धमर्थमुपसंहरति तस्मादिति ततः कृत एव दे
हादावहं ममेत्ययमिति शेषः किंच व्यवहारभूमौ भेदग्रहस्य गौणत्व
व्यापकत्वात्तस्य प्रकृतेऽभावात् देहादावहं शब्दप्रत्ययौ गौणाविना
ह इत्यपास्तमिति अदृष्टविषयचोदनाप्रामाण्यात् कर्तुरात्मनो व्यतिरे
कावधारणात्तस्य देहादावहं ममाभिमानस्य गौणत्वेऽक्रमनुवद
ति यदपीति श्रुतिप्रमाणस्याज्ञातार्थविषयत्वात् मानान्तरसिद्धे व्यति
रिक्तात्मनि चोदनाप्रामाण्याभावान्न तदवष्टम्भेन देहादावात्माभि
मानस्य गौणत्वेनस्यत्तरमाह न तावदिति श्रुतिप्रमाणस्यादृष्टविषयत्वे
स्पष्टयति अपव्यादीति अज्ञातार्थज्ञापकं प्रमाणमिति स्थिते तज्ञा
ते श्रुतिप्रामाण्यमित्याह अदृष्टेति अज्ञातत्वासाध्यसाधनसम्बन्धबो
धिनः शास्त्रस्यातिरिक्तात्मगोचरत्वसीमाफलितमाह तस्मादिति अन्व
यव्यतिरेकाभ्यां दृष्टो मिथ्याज्ञाननिमित्तो देहादिष्वात्माहं ममेत्यल
सेति यावत् अनुविषयत्वाच्चोदनाया नातिरिक्तात्मविषयत्वेन श्रुतमि
दानीं तद्विषयत्वाङ्गीकारेपि न तन्निर्वोढुं शक्यमध्यासविरोधादित्या
ह नहीति अपौरुषेयाः श्रुतेरप्यस्याविततदोषायाः मानान्तरविरोधे
पि प्रामाण्यमप्रमाणवाधितमिति भावेनाभिप्रेत्याह यदीति स्वार्थबोधकमाः श्रु
तेरविरोधोपि चत्वारि तदार्थवादिके तत्परिहाराय विवक्षितमर्थान्त
रमविरुद्धं तस्यास्वीकर्तव्यं विरोधे तत्प्रामाण्यानुपपत्तेरित्याह तथा
पीति श्रुतिविरोधमवधार्य श्रुत्यर्थकल्पना न युक्तेति व्यावर्त्यमाह न
त्विति अविद्यावत्कर्तृत्वे कर्मेति त्वयोपगमादन्यथा विद्यायामवि
द्यायाम् अविद्याभावे तदधीनकर्तृत्वाभावात् तेन कर्तारमनुशासनाभि
हैः कर्मकाण्डप्रामाण्यमित्यध्ययनविधिविरोधः स्यादिति शंकते क
र्म्मणा इति कर्मकाण्डश्रुतेर्विरोधात् एवं व्यावहारिकप्रामाण्यस्य
तात्त्विकप्रामाण्याभावेपि सम्भवाद्ब्रह्मकाण्डश्रुतेश्च तात्त्विकप्रामाण्य
स्य ब्रह्मविद्याजनकत्वेनोपपत्तेर्नाध्ययनविधिविरोध इति परिहर
ति नवलेति कर्मकाण्डश्रुतेस्तात्त्विकप्रामाण्याभावे ब्रह्मकाण्डश्रु
तेरपि तदसिद्धिरविशेषादिति शंकते कथमिति उत्पन्नाया ब्रह्मविद्या
या बाधकाभावेन प्रामाण्यात्तद्धेतुश्रुतेस्तात्त्विकं प्रामाण्यमिति दृष

श्री
गीटी
मु

304

यति न बाध्यकेति ब्रह्मविद्याया बाधकानुपपत्तिं दृष्टान्तेन साधयति
यथेति देहादिसंघातवदित्यपरोर्थः लौकिकाद्वागतेरिवात्मावगतेर
पि फलाव्यतिरेकमुदाहरणेन स्फोरयति यथेति फलमज्ञाननिवृत्तिः
कर्म्मविधिश्रुतिवदित्यत्र दृष्टान्तं विघटयति नेवेति अनादिकालप्र
वृत्तस्वाभाविकप्रवृत्तिप्रकृतीनां प्रतिबंधेन योगाद्यलौकिकप्रवृत्तिप्र
कृतिजनयति कर्म्मकाण्डश्रुतिस्तज्जननं च विनश्यद्विद्याप्रमाणमा
भिमताख्यप्रवृत्तिमुत्पादयति तथा च कर्म्मविधिश्रुतीनां पारंपर्येण
कृ१ प्रमाणान्तरानार्थत्वात्तासां निःप्रामाण्यमस्ति हीत्यर्थः नन्वेवमपि श्रुतेर्मि
थ्यात्वादाभासवदप्रामाण्यमिति चेत्तत्राह मिथ्यात्वेपीति स्वरूपेण
सत्यत्वेपि सत्योपायद्वारा प्रामाण्यमित्यत्र दृष्टान्तमाह यथेति मन्त्रार्थ
वादेतिहासपुराणानां श्रुतेर्थे प्रामाण्याभावेपि शेषविध्यनुरोधेन प्रा
माण्यवत् प्रकृतेपि श्रुतेः स्वरूपेण सत्यायाविषयस्सत्यतया समन्व
यतायाः प्रामाण्यमविरुद्धमित्यर्थः वाक्यस्य शेषिविध्यनुरोधेन प्रामा
ण्यं नालौकिकमित्याह लोकेपीति कर्म्मकाण्डश्रुतीनां मुक्तरीत्या पर
म्परया प्रामाण्येपि साक्षात्प्रामाण्यं व्यवहितमित्याशंक्याह प्रकारान्त
रेति प्रात्मज्ञानोदयात् प्रागवस्था प्रकारान्तरं तत्र स्थितानां कर्म्मका
ण्डश्रुतीनामज्ञातसंबंधबोधकत्वेन साक्षादेव प्रामाण्यमिष्टमित्यर्थः
ज्ञानात् पूर्वं कर्म्मश्रुतीनां व्यावहारिकप्रामाण्ये दृष्टान्तमाह प्रागि
ति प्रतीचि कर्तृत्वस्याविद्यकत्वेपि श्रुतिप्रामाण्यमप्रत्यूहमित्युक्ते
संप्रति कर्तृत्वस्य प्रकारान्तरेण पारमार्थिकत्वमुत्थापयति यन्विति
स्वव्यापाराभावे सन्निधिमात्रेण ऊनेतन्मुख्यकर्तृत्वमित्याशंक्य दृष्टान्त
माह यथेति स्वयमयुध्यमानत्वे कथं तत्फलवत्त्वमित्याशंक्य प्रसिद्धि
वशादित्याह जितइति कायिकव्यापाराभावेपि कर्तृत्वस्य सद्भावे दृ
ष्टान्तमाह सेनापतिरितिजितस्यापि फलत्वेराजवद्विशिष्टमित्याह
क्रियेति प्रयाजकर्म्मणा प्रयाजस्य सन्निहितस्य साध्ये कर्तृत्वे वैदिकमु
दाहरणमाह यथा चेति कथमृत्विजां कर्म्म यजमानस्येत्याशंक्याह
तत्फलस्येति स्वव्यापारादृते सन्निधेरवान्यव्यापारहेतोर्मुख्यकर्तृत्वे
दृष्टान्तमाह यथा चेति क्रियामकुर्वत कारणं कारकमित्यंगीकारवि
रोधाच्चैतदिति दूषयति तदसदिति कारकविशेषविषयत्वेनाङ्गी
कारोपपत्तिरितिशङ्कते कारकमिति स्वव्यापारमन्तरेणानकिंचिद।

पि कारकमिति परिहरति न राजेति दर्शनमेव विशदयति रा
ज्ञेति यथा राजा युद्धे योद्धृभिरनेन धनदानेन च स्वयं कर्तृत्वेन तथा
फलभोगेपि स्वयमेव न तथा कर्तृत्वमित्याह तथेति यदुक्तं स्मरति कृक
र्म यजमानस्येति तत्राह यजमानस्यापीति स्वव्यापारादेव स्वयं क
र्तृत्वमिति स्थिते फलितमाह तस्मादिति तदेव प्रपंचयति यदीति त
र्हि सन्निधानादेव स्वयं कर्तृत्वे राजादीनामप्यागतमिति चेत्राह तथा।
थेति राजादीनां स्वव्यापारगते स्वीके सिद्धमित्याह तस्मादिति रा
जप्रभृतीनां सन्निधेरेव कर्तृत्वस्य गौणत्वे जयादिफलवत्तस्यापि सि
द्धे गौणत्वमित्याह तथा चेति तत्र स्वीके हेतुत्वेन स्मारयति नेतिह्य
मव्यापारेणास्य स्वयंकर्तृत्वाभावे फलितमुपसंहरति तस्मादिति
कथं तर्हि तथात्मनि कर्तृत्वादि स्वीकृतं तर्हि बुद्धेस्तद्विवेकतोयाग्रहा
ग्रहत्वादिति व्याख्यानत्राह भ्रान्तीति कर्तृत्वाद्यमात्मनि भ्रान्तमित्यत्र दा
हरणेन स्फोरयति यथेति मिथ्याज्ञानकृतमात्मनि कर्तृत्वादीत्य
त्र व्यतिरेकं दर्शयति नेवेति उक्तव्यतिरेके फलं कथयति तस्मादिति
संसारभ्रमस्याविद्याकृतत्वे सिद्धे परमप्रकृतमुपसंहरति इति सम्य
गिति शास्त्रतात्पर्यार्थं विचारद्वारा निर्धार्य तत्तरश्लोकमवतारय
ति सर्वमिति प्रकृते त्वष्टादशाध्याये गीताशास्त्रार्थं सर्वं प्रतिप
त्तिसौकर्यार्थमुपसंहरतान्ते च सर्वधर्मान् परित्यज्येत्यादौ विषय
तत्त्वस्य संक्षेपेणोपसंहारं कृत्वा संप्रदायविधिवचनस्यावसरे स
तीदानीमिति योजना किमिति विस्तरेणोपसंहृतः शास्त्रार्थः संक्षि
प्योपसंक्रियते तत्राह शास्त्रार्थेति संक्षेपविस्ताराभ्यां प्रकृतेर्थे सर्वो।
हा रूढतया बुद्धिमधिरोहतीत्यर्थः स्थितायेप्येतदेव व्याचष्टे सं
लोरेति कदाचनेति सर्वैः संबध्यते प्रतिषेधसामर्थ्यसिद्धमर्थं क
थयति भगवतीति गुर्वीसिद्धेर्थे सत्यन्तरमनुसृत्य मेधाविना।
मन्तर्भावयति नेत्रेति विकल्पदर्शनाच्चित्र मेधाविनामपि प्र
विशतीत्यर्थः विकल्पपदे कथमधिकारित्वं निषेधतीति तत्राह
शुश्रूषेति ताभ्यां प्रकाय भगवत्यसूयारहिताय तपस्विने वाच्यमि
ति संबंधः तद्युक्ताय शुश्रूषाभक्तियुक्ताय भगवति प्रतनस्यासहि
तायेत्यर्थः तपस्वित्वमेधावित्वे वानिरपेक्षमधिकारिविशेषणमि।

श्री गी टी ५

305

ति शंकां शांतयति सुश्रूषयेति भगवद्विषयासूयारहितेन तात्पर्यं
सूचयति भगवतीति कस्मै तर्हि वाच्यमेतदित्याशंकाह स्वीकृतसर्व
गुणसम्पन्नायेत्याह गुरुसुश्रूषवेति सुश्रूषुकेनात्र विशेषणोपलक्षणं
र्थे सम्भवग्रहणे सेयथाविवक्षयापहिते तातीवाधिकते सर्वसमहाय
काभावादयोग्यत्वमेवेति भावः ६७ ॥

स्वामिकृतटीका ३

एवं गीतार्थतत्त्वमुपदिश्य तत्संप्रदायप्रवर्तने नियममाह इद
मिति इदं गीतार्थतत्त्वं ते त्वया अतपस्काय स्वधर्मानुष्ठानहीनाय न वाच्यं
न च अभक्ताय गुरावीश्वरे च भक्तिशून्याय कदाचिदपि न वाच्यं न चाशु
श्रूषवे परिचर्यामकुर्वते श्रोतुमनिच्छते वा वाच्यं मां परमेश्वरं यो ऽभ्य
सूयति मनुष्यदृष्ट्या दोषारोपेण निंदति तस्मै च न वाच्यं अपि तु दोष
विरहितेभ्यो भक्तेभ्यो [illegible] ॥

पिशाचभाष्यटीका ४ ॥

इदं शास्त्रं त्वद्धिताय मयोक्तं संसारविच्छित्तये न विद्यते तपः स्वधर्म इति
लक्षणं यस्यासावतपस्कस्तस्मै न वाच्यं न विद्यते भक्तिर्भजनं सेवा यस्या
सावभक्तस्तस्मै कदाचन कदाचिदपि न चाशुश्रूषवे यो गुरोः शुश्रू
षां न करोति मां ईश्वरं सर्वप्राणिहृदये यो ऽभ्यसूयति द्वेष्टि इदं शास्त्रं त्वया अ
तपस्काय शिष्याय न वाच्यं तथाशिष्यो ऽप्यभक्ताय न वाच्यं मां यो द्वेष्टि
तस्मै न वाच्यं ६७ ॥

रामानुजभाष्यटीका ५

इदमिति इदं ते परमगुह्यं शास्त्रं मया व्याख्यातं नैवातपस्कायानतमर्थं न०
सेत्वया न वाच्यं त्वयि विकारिणस्यापि चाभक्ताय कदाचन न वाच्यं न मत
येसेवाभक्ताय न वाच्यमित्यर्थः न वाशुश्रूषवे भक्तायाप्यशुश्रूषवे न
वाच्यं न च मां यो ऽभ्यसूयति मत्स्वरूपे मदैश्वर्ये निर्गुणे च कथितेऽपि
यो दोषमाविष्करोति तस्मै न वाच्यं असमानविभक्तिनिर्देशेन या
संतपरिहारितामीयतातापनाय ६७ ॥

अभिनवगुप्तकृतटीका ६

इदं ते इत्यादिना अस्य शास्त्रस्य गोप्यमानत्वेन सिद्धिं दर्शयति सर्वजनाविषयत्वात् तपसा
तानत्याय ग्रंथो विष्णीर्णं कष्टात् परिपाकोऽस्य ज्ञानं भवतीति पूर्वेन तपसा तप
सः श्रद्धा जायते सैवात्र भक्तिः श्रद्धाप्युपजाता कदाचिन्न प्ररोहति सौदामिनी
वत्क्षणदृष्टनष्टत्वात् ततस्तत्प्ररोहे श्रोतुमिच्छा भवति इयदपि च कस्यचि
दनीश्वरेवत्तु निशुद्धसंख्यादित्तानेभवति सेश्वरेऽपि वा कस्यचित्फलार्थीतया
फलमेव प्रधानीकृत्य भगवंतं च स्वात्मानं तदुपकरणपात्रीकरणेन न्यक्कृत
त्यभवेत् यदुक्तं प्रकृतस्त्रकर्मार्थत्वात्कर्मणोऽपि फलार्थत्वादिति एवमभय
यापि भगवत्यसूयेता नादरइत्यर्थः ६७ ॥

एवं गीतार्थतत्त्वमुपदिश्य तत्संप्रदायप्रवर्त्तननियममाह इदमिति
इदं गीतातत्त्वं ते त्वयाऽतपस्काय स्वधर्मानुष्ठानहीनाय न वाच्यं न
चाभक्ताय परमेश्वरभक्तिशून्याय न चाशुश्रूषवे परिचर्यामकुर्वते
न यो मां परमेश्वरमभ्यसूयति मनुष्यदृष्ट्यादोषारोपेण निंदति त
स्मै च न वाच्यं श्रुतिरपि नैकस्मै विद्या ह वै ब्राह्मणमाजगाम गोपाय
मा शेवधिष्टेऽहमस्मि असूयकायानृजवेऽयताय न मा ब्रूया वी
र्यवती तथा स्यामिति भाष्ये विद्याश्रेयोपनिषदध्यात्मविद्याप्रदं ब्रा
ह्मणं ब्रह्मनिष्ठं प्रतिश्रीभिमुखेन समन्तं जगाम मद्यामानकिं मा इति मां
वेगोपाय वदन्माणायत्रकृषायेतिचनत्वीहितीयोक्ता नेत्रलक्षण
निष्ठं मां कुरु न कथयमित्यर्थः यतो हेतेः शेवधिर्निधिः स्मि च न विप्रगुत
वाहुसायनत्वात् यथा निर्धिरन्मः क्रियतत्स्मर्थः किंलक्षणायेत्या
ह असूयकायानिंदकाय अनृजवेऽसदावक्राय अयताय नियमशून्
याय मा मामात्मविद्यां न ब्रूयाः न कथय यद्येवं सति यदि कुर्वीत तर्हि
वीर्यवती स्यां त्वय्यपि सामर्थ्येन स्यामित्यर्थः ६७ ॥

वनमाली टीका ८

समाप्तः शास्त्रार्थोपदेशः शास्त्रसंप्रदायमिदानीं कथयति इदमि
ति इदं गीतारूपं सर्वशास्त्रार्थरहस्यं ते त्वया संसारोच्छित्तये परमगोप्यं नात
पस्काय संयतेन्द्रियाय न वाच्यं कदाचन कस्यामप्यावस्थायामित्यर्थः
येऽपि संवत्सरं तपस्विनोऽप्यभक्ताय गुरौ देवे च भक्तिरहिताय न देयं कदा
चन तपस्विने भक्तायाप्यशुश्रूषवे परिचर्यामकुर्वते न देयं कदाचन न
च मां योऽभ्यसूयति मामीश्वरं वासुदेवं मनुष्यमसर्वज्ञत्वादिगुणकं म
त्वाऽभ्यसूयति आत्मप्रशंसादिदोषाध्यारोपणेनेश्वरत्वमसहमा
नो द्वेष्टि च तस्मै श्रीकृष्णोत्कर्षासहिष्णवे तपस्विने भक्ताय शुश्रूषवे
ऽपि न वाच्यं कदाचनेत्यत्रकर्षार्थश्चकारः तपस्विने भक्ताय शुश्रूष
वे श्रीकृष्णानुरक्ताय च वाच्यमित्यर्थः एकैकविशेषणाभविष्यो
ग्यताप्रतिपादनाय चत्वारो नकाराः मेधाविने तपस्विने वा समत्व
विकल्पदर्शनात् शुश्रूषायां गुरुभक्तिं भगवद्भक्तिं च त्रकायान्तप
स्विने तेऽभक्ताय मेधाविने वाच्यम् ६७ ॥

कृ समन्वेजपमी टीका ९ ॥

श्री
गी.टी.
श्रु.

306

एवेनतुपदिश्येयद्गीताशास्त्रंतत्रयावधिकारिभ्योदेयंतत्रनधिकारिभ्यइ
तिसूचयन्ननधिकारिस्वरूपमाह इदमितियत्परमंगुह्यंमयाख्यातंत
दिदंगीताशास्त्रंतेत्वया अतपस्कायदेवद्विजगुरुप्राज्ञपूजनंशौच
मार्जवक्षमादिनोक्तंपश्चहारीरादितपस्तद्रहितायपुरुषायनवाच्यंनव
क्तव्यंनचाप्यभक्तायशास्त्रोपदेष्टरिशास्त्रेचयतिपायेमयिसर्वेश्वरेगुरौ
षोनमेभक्तिवर्जितायनकदाचनकदापिनवाच्यंचपुनर्नचाप्यशुश्रू
षवेइदंश्रोतुमनिच्छवेजनायनवाच्यंयःपुरुषोनमेसर्वेश्वरंमामभ्य
सूयतिमयिनिंदाभाविकानंतकल्याणात्मकगुणारत्नाकरेमायि
कगुणानविग्रहादिकंनमारोपयतिचावधारणेतस्मैनकदापिनवयंदं
नैववाच्यंचनभिनेकारिः अतपस्कायनवाच्यमितितयदिसमक्त
नर्हितस्मैवाच्यमेव अशुश्रूषवेनवाच्यमितितयदिसोऽनसूयुस्तर्हि
तस्मैवाच्यमेवेतिसूचितम् भिन्नयाविभक्त्याऽतपस्कायाभक्तायाशु
श्रूषवेकदाचिन्नयदंवाच्यमपिमांयोऽभ्यसूयतितस्मैनकदापिनैव
वाच्यमितिसूचितम् भिन्नयाविभक्त्यायद्वा अतएवब्रह्मैवतपोया
स्यतस्मैअनन्तानांचेतनाचेतनयोर्ब्रह्मणामसहस्वाभाविकभिन्नाभि
न्नस्वरूपमनभवंकंतंनयदंनवाच्यमितितनकिंतुवाच्यमेव अस्व
व मितिश्रुतेः अस्मैवासुदेवस [illegible] भक्तस्तस्मैनवाच्यमितितिनवाच्यमे
वअवासुदेवंतद्गुणादिकंवाश्रोतुमिच्छतीत्यशुश्रूषुस्तस्मैनवाच्य
मितिनवाच्यमेवअकारोवासुदेवःस्यात् अदनात्मकारोऽस्मीति
स्मृतेः यस्त्वतपस्कादीनजीनूचपुनर्मामभ्यसूयतितस्मैनैववाच्यमि
+समासः शास्त्रार्थः शास्त्रसंप्रदायविधिंअधुनाकथयति ॥ त्यर्थः ६७ ॥

मधुसूदनीटीका १-

नोयावानप्रस्थामितत्वनंइमंत्रोदाहृतानांविजरेकामममप्रभवानामो
नोभवति यथाचश्रूयते स्मृतिलंभेसर्वग्रंथीनांविप्रमोक्षइति तच

श्री
भी टी
अ

330

सादात्मयाच्युत स्मृतिर्लब्धेति संबंधः स्थितोस्मि त्वच्छासने इति
शेषः गतसंदेहो नष्टसंदेह इत्यनेनानात्मन्यात्मधीरूपो मोहो न
ष्ट इति दर्शितं करिष्ये वचनं तवेत्यनेन स्वधर्मे युद्धे चाधर्मधीरूपो
पि मोहो नष्ट इति दर्शितम् ७३ ॥

आनंदी टीका १२

अथ प्रसन्नमर्जुन उवाच हे अच्युत मोहः अनात्मन्यात्मबुद्धिः
प्रथमाध्यायोक्तकश्मलहेतुः नष्टः त्वत्प्रसादात् परमार्थोपदेश
लक्षणात्तवानुग्रहात् स्मृतिर्लब्धा शोकपरमात्मस्वरूपानु
सन्धानं प्राप्तं अत एव गतसन्देहः स्थितोस्मि यद्यपि शास्त्रं मम
मत्यपि युद्धं अधर्मं मन्यमानो निरुत्साहो भवं ससंशयो गतवर
मर्षः तव परमेश्वरस्य वचनमनुलंघनीयं स्वकर्मणो युद्ध
स्यानुष्ठानात्मकं निःश्रेयसप्राप्तिफलकं करिष्ये संपादयिष्या
मि ७३ ॥

+ अत्र प्रसन्नतरमर्जुन उवाच ॥

रामकंठी टीका १४

+हे भगवन्नच्युत परब्रह्मस्वरूप स्वात्मैकनिष्ठेति विज्ञातैश्वर्यं
भगवंतमच्युतेनाभिधानेनामंत्र्याह त्वत्प्रसादात्परस्वरूपप्र
दर्शनलक्षणान्मम मोहो विनष्टः अनात्मन्यात्मप्रत्ययादि
रूपमज्ञानं प्रध्वस्तं यतः स्मृतिर्लब्धा सत्यात्मानुस्मरणं प्राप्तं
अत एव गतसन्देहो निवृत्तसंशयः स्थितोस्मि यद्यपि शास्त्रं ममप्य
धर्मत्वेन युद्धं प्रतिपद्यमानो निरुत्साहो मास ससंशयो
विगलितः तत त्वद्वचने यथोक्तज्ञाननिष्ठतया स्वकर्मानुष्ठा
नोपदेशात्मकपरब्रह्मसमापत्तिफलं वाक्यं करिष्ये क्रियया
संपादयिष्यामीति [illegible]
[illegible]
[illegible]
७३

+ अत्र प्रसन्नतरमर्जुन उवाच ॥

लासिकी [illegible]टीका

+हे अच्युत तवानुग्रहान्मोहो देहाद्यात्मप्रत्ययो नष्टः ध्वस्तः
स्मृतिरद्भुतस्यापि केनचिदंशेनापि येन विस्मृति पद्मसुपनतः

स्यात्मनोनुसंधानरूपा लब्धा अधुनागतसन्देहो नष्टदेहाहम्भा-
वः स्थितोस्मि आत्मनि विश्रांतोस्मि तववचनं यथोक्तस्यात्मज्ञा
ननिष्ठतया युद्धलक्षणस्वधर्मानुष्ठानोपदेशात्मकं करिष्ये [illegible]
[illegible]
[illegible] ॥ ७३

पंचोली टीका

कृतकृत्यमर्जुन उवाच नष्टेतिहे अच्युत मोहः अज्ञानजः समस्त
संसारानर्थ हेतुः सागर इव दुरुत्तरस्त्वत्प्रसादात् नष्टः स्मृतिश्च आत्मनि
लब्धा यस्याः प्रसादात् सर्वबंधविमोक्षः त्वत्प्रसादान्मया त्वा
माश्रितेन दासेन अनेन मोहनाशं स्मृतिलब्धिवचनेन सर्वशास्त्रार्थज्ञा
नफलं एतावदेवेति निश्चितं भवति यद्ज्ञानसंमोहनाशः आत्मस्मृ
तिप्रतिलाभः ७३

रसावीरसमिद्बोधिनी ॥

अथ प्रत्युत्तरमर्जुन उवाच नष्टइति हे अच्युत परब्रह्मस्वरूपप्रतिज्ञा
तसर्वहितनिष्ठेति विज्ञाते स्मर्थ भगवंतस्मृतिनाभिधानेन सम्बो
ध्याह मया हृदयनुग्रह मोहे धर्मेधर्मत्व प्रतिपत्तिरूपः कथमहं स्व
बन्धून् निघ्ये इत्येवं भीष्मा पुत्रबन्धुहाभिमानरूपश्च नष्टः स्मृतिः कोहं
किमर्थं वदेहमाश्रित इत्येवमनुसन्धानलक्षणा लब्धा आगतः सन्देहः
वत हेतुर्हिंसने धर्म्यमधर्म्यं वेति निश्चयाभावो यस्य तथाविधः सन्
तववचनमाज्ञां करिष्ये संपादयिष्यामीत्यर्थः ७३॥

मधुभाष्य

७३॥

भाषा अनुवाद टीका

तबतो भगवानकी वाणीसे परमकृतार्थ होय अर्जुन कहतेहैं किहे अच्युत
श्रीकृष्ण आपकी कृपासे अबमेरा आत्मज्ञानके विषयमे मोहनष्ट होगया
औस्मृतिजोज्ञानसोपाया औआत्मस्वरूपके अनुसंधानमे स्थितिभई अर्था
त् आत्मस्वरूपकाज्ञानप्रकाशभया औरधर्मके विषयमे संदेहमेरे चित्तसे
चली गई ऐसाजोमैहूं सोअबआपकी आज्ञाप्रतिपालनकरूंगा औरयु
द्धकरनेके लियेतयार खड़ाहूं जोआज्ञा होयसोकरूं यहअर्जुनने कहा
७३॥

दोहा

नष्ट मोह स्मृति लब्ध भइ तव कृपा अच्युत मोहि संदेह रहि
त हो स्थित भयो तोरवचनकरौंहि ७३॥

332

संजय उवाच इत्यहं वासुदेवस्य पार्थस्य च महा।
त्मनः संवादमिममश्रौषमद्भुतं रोमहर्षणम् ॥ ७४

शांकरभाष्यटीका १

परिसमाप्तः सकलाम्नायशास्त्रार्थोऽथेदानीं कथासम्बन्धप्रदर्श
नार्थं संजय उवाच इत्येवमहं वासुदेवस्य पार्थस्य च महात्मनः सं
वादमिमं यथोक्तमश्रौषं श्रुतवानस्मि अद्भुतमत्यन्तविस्मयकरं रोम
हर्षणं रोमाञ्चकरं ७४ ॥

आनंदगिरिटीका २

शास्त्रार्थे समाप्ते तमस्यामवस्थायां संजयवचनं उक्तोपयुक्तमिति त
दाह परिसमाप्तमिति वासुदेवस्य सर्वज्ञस्य सर्वेश्वरस्य कृतार्थस्य पार्थ
स्य तथा सतस्यार्जुनस्य महात्मनोऽक्षुद्रबुद्धेः सर्वाधिकारिणः स
म्बन्धस्य सम्यग्वादं संवादं गुरुशिष्यभावेन प्रश्नप्रतिवचनाभिधान
मिममनुक्रान्तमद्भुतं विस्मयकरं रोमाणि हर्षन्ति पुलका भवन्त्यनेने
ति रोमहर्षणमाह्लादकरं यथोक्तं श्रुतवानस्मीत्याह इत्यादिमिति ७४

+ तदेवं धृतराष्ट्रं प्रति श्रीकृष्णार्जुनसंवादं इतीति ॥

स्वामिकृत टीका ३

कथयित्वा प्रस्तुतां कथां अनुसंदधानः संजय उवाच
+ रोमहर्षणं रोमाञ्चकरं संवादं अश्रौषं श्रुतवानहं स्पष्टमन्यत् ७४ ॥

पिशाचभाष्यटीका ४

संजय उवाच व्यासो भगवान् कृष्णद्वैपायन इमं यथोक्तं परं प्रकृष्टं प
७५ रमात्मविषयत्वात् योगं सम्यग्ज्ञानं योगेश्वरात् योगिनः तेषामीश्वरात् सा
क्षात् स्वयं कथयतः स्वयं स्वमुखेन ७४ ॥

+ धृतराष्ट्राय सव पुत्राः पांडवाश्च युद्धे किं करिष्यंतीति ॥

रामानुजभाष्य टीका ५ ॥

+ संजय उवाच इतीति इत्येवं वासुदेवस्य वसुदेवसूनोः पार्थस्य च तत्
पितृष्वसुः पुत्रस्य च महात्मनो महाबुद्धेः तत्पदद्वन्द्वमाश्रितस्य इमं रोमह
र्षणमद्भुतं संवादमहं यथोक्तं अश्रौषं श्रुतवानहं ७४ ॥

अभिनवगुप्तकृत टीका ६

स्पष्टार्थं ७४ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपा[illegible] टीका ७

तदेवं धृतराष्ट्रं प्रति श्रीकृष्णार्जुनसंवादं कथयित्वा प्रस्तुतां कथामनु

श्री॰
गी॰टी॰
अ॰

सं दयानः संजयः प्राह इममद्भुतमपूर्वमाश्चर्यकरं पुलकप्रवरोमहर्षणं रोमांचकरं संवादमश्रौषं श्रुतवानहं स्पष्टमर्थः ७४ ॥

वनमाली टीका ८

अद्भुतं चेतसो विस्मयकरं लोकेष्वसंभाव्यमानत्वात् लोमहर्षणं शरीरे रोमांचाद्यविकारकरम् ७४ ॥

333

उत्तमवैजयंती टीका ९ ॥

एवं शास्त्रं परिसमाप्याथ कथासंबंधमनुदधानः संजयोऽधृतराष्ट्रं प्रत्याह इत्याह इतीत्येवमुक्तप्रकारेण महात्मनो महानपरिमितः आत्मा स्वरूपगुणशक्त्यादि यस्य तस्य वासुदेवस्य वसुदेवपुत्रस्य च पुनर्महात्मनो महाबुद्धेः पार्थस्य तन्मित्रस्य च तत्पृष्टस्य तच्छरणागतस्य इमं संजयस्य व्यासकृपया सम्यग्दर्शित्वादहमिति निर्दिष्टं अद्भुतं चेतसो विस्मितं विस्मयकरम् रोमहर्षणं शरीरे पुलकजनकं संवादं प्रश्नोत्तरगर्भं केवचनविशेषमश्रौषं यथोक्तमहं श्रुतवान् ७४ ॥

+ समासः शास्त्रार्थः कथासंबंधमिदानीमनुसंदधानः ॥

मधुसूदनी टीका १०

+ अद्भुतं चेतसो विस्मयाद्यविकारकरं लोकेष्वसंभाव्यमानत्वात् रोमहर्षणं शरीरस्य रोमांचाद्यविकारकरं तेनातिपवित्रत्वं विस्मयस्पदर्शितं स्पष्टमन्यत् [illegible] ७४ ॥

सदानंदी टीका ११

शास्त्रार्थोऽयं समाप्तो यक्कथासंबंधमनुसमे इदानीं संजयः प्राह धृतराष्ट्रं प्रति १ इति शब्दः समाप्तौ स्याच्छास्त्रार्थस्येति तस्य च रोमांचनकरं बुद्धेर्विस्मापकतयाद्भुतं २ लोके संभाव्यमानत्वात् स्पष्टमन्यत्तयार्थितः ३ ७४

नीलकंठी टीका १२

समाप्तः शास्त्रार्थः इदानीं कथाप्रबंधमेवानुवर्तयन् संजय उवाच इत्यादीति अद्भुतं चेतसो विस्मयकरं रोमहर्षणं रोमांचोद्रेकजनकं शेषं स्पष्टम् ७४ ॥

आनंदी टीका १३

एवं श्रीकृष्णार्जुनसंवादद्वारा परमात्मज्ञानमुपसंहरन्नस्तत

कथाप्रसंगमनुसंधानः संजयउवाच स्पष्टम् ७४ ॥

रामकंठी टीका ७४॥ धृतराष्ट्रपरिपृष्टसैन्यसन्निवेशकथनप्रसंगेकृष्णार्जुनसंवादद्वारेणपरमरहस्यज्ञानमर्थप्रकरणमिदंयेनेवप्रक्रांतंतत्परिसमाप्तसदुपसंहरन्सपएवसंजयउवाच॥

स्पष्टार्थः श्लोकः ७४

लासिकी [redacted] टीका

तदेवंधृतराष्ट्रंप्रति श्रीकृष्णार्जुनसंवादंकथयित्वा प्रस्तुतांकथामनुसंदधानःसंजय॥

उवाच— रोमहर्षणंरोमांचकरं संवादमश्रौषंश्रुतवानहं स्पष्टमन्य
त[illegible]
[illegible] ७४

पंचोली टीका

शास्त्रार्थंपरिसमाप्यकथाप्रसंगप्रदर्शनार्थंधृतराष्ट्रंप्रतिसंजयउवाच इत्यहमिति अहंतोवासुदेवस्यचश्रमतः पार्थस्य महात्मनः इदंयथोक्तंसंवादंअद्भुतंअसंतविस्मयकरंरोमहर्षणंअश्रौषंश्रुतवानस्मि ७४

ग्रावीरसमिद्बोधिनी

अथैवंधृतराष्ट्रंप्रति श्रीकृष्णार्जुनसंवादरूपं परमरहस्यरूपकमुपरिसमाप्यतदुपसंहरन्संजयउवाचेति व्यक्तार्थोयंश्लोकः ७४॥

मधुभाष्य

७५॥

334

भाषा अनुवाद टीका

सोई श्रीकृष्णअर्जुनकासंवादराजाधृतराष्ट्रसेसंजयकहतेहैं किम
हात्मावासुदेव श्रीअर्जुनका यह अद्भुत संवाद रोवां खड़े करनेवालामें
नेजोसुना सोआपको कहसुनाहै ७४ ॥

दोहा

ऐसें मे श्रीकृष्णका अरुपार्थमहात्मकोहि संवादसुनत
हिअद्भुत हर्षमहोयमोहि ७५

व्यासप्रसादाच्छ्रुतवानेतद्गुह्यमहंपरं योगंयो
गेश्वरात्कृष्णात्साक्षात्कथयतः स्वयम् ७५

शांकरभाष्य टीका १

तंचेमं श्रीकृष्णः व्यासप्रसादात् ततो दिव्यचक्षुर्लाभात् श्रुतवान् ज्ञान
वानेतं संवादं गुह्यमहं परं योगं योगार्थत्वात् ग्रन्थोपि योगस्तं सम्वा
दमिमं योगेश्वरात् कृष्णात् साक्षात्कथयतः स्वयं नपरम्परया ७५ ॥

आनंदगिरिकृत टीका २

प्रकृष्टं संवादं कथमश्रौषीरिति चेत्तत्राह तंचेति एतत्पदं संवादपर
त्वात् लिंगत्वेन नेतव्यमित्याह एतमिति परमपुरुषार्थोपयिकत्वात्
परत्वंपरं गुह्यमतिशयेन गुह्यं रहस्यमिति वा योगोक्तानं कर्म च तद
र्थत्वादयं संवादो योग उक्तः अथवा चित्तवृत्तिनिरोधस्य योगस्योक्त
त्वादयं सम्वादो योगः इत्याह संवादमिति योगानामीश्वरो योगेश्वर
स्तदनुग्रहहेतुत्वाद्योगानां तत्फलयोः ततः साक्षादव्यवधानेन श्रुतवा
न् न परम्परयेत्याह योगेश्वरादिति स्वयं स्वेन परमेश्वरेणाविरहि
तज्ञानैश्वर्यरूपेण कथयतो वाचकात्मनादित्यर्थः ७५ ॥

स्वामिकृत टीका ३

आत्मनस्तत्त्वश्रवणे संभावनामाह व्यासेति भगवता व्यासेन दिव्यं च
क्षुः श्रोत्रादि मह्यं दत्तं अतो व्यासस्य प्रसादादेतदहं श्रुतवान् किं त
दित्यपेक्षायामाह परं योगमिति परत्वमाविष्करोति योगेश्वरादिति
श्रीकृष्णात्स्वयमेव साक्षात्कथयतः श्रुतवानिति ७५ ॥

पिशाचभाष्य टीका ४

स्पष्टार्थं ७५ ॥ ॥ ॥ ॥ ॥ ॥ ॥

रामानुजभाष्य टीका ५

व्यासेति व्यासप्रसादात् व्यासानुग्रहेण दिव्यचक्षुःश्रोत्रलाभात् ए
तत्परं योगेश्वरात् ज्ञानबलैश्वर्यवीर्यशक्तितेजसां निधेर्भगवतः कृ
ष्णात् स्वयमेव कथयतः साक्षाच्छ्रुतवानहं ७५ ॥

अभिनवगुप्तकृत टीका ६

स्पष्टार्थम् ७५ ॥ ॥ ॥ ॥ ॥ ॥ ॥

श्री
गीटी॰
प्र॰

336

परमार्थप्रपाटीका ८

श्रोतात्मन ईदृशश्रवणसंभावनामाह व्यासेति नन्वेवं यामस्तत्रैव भग
वता व्यासेन मह्यं मालौकिकशक्तिमद्भ्यः श्रवणादिके स्तत्रैव नाहं श्रु
तवानस्मि किंतदित्याह परं योगं यत्र तमेवाह योगेश्वरात्कृष्णात्स्व
ये स्वरूपं स्वयमेव वासता तात्पर्यं स्वेनार्जुनेप्रति कथयतः श्रुतवान् तदुक्तं
महाभारते भीष्मपर्वणि संजयोऽष्टराष्ट्रंप्रति नमस्तस्मै भगवते पारा
शर्याय धीमते यत्प्रसादादिदं मेप्राप्तं विज्ञानमुत्तमं दृष्टिश्चातीन्द्रिया
राजन् दूराच्छ्रवणमेव हि परचित्तस्य विज्ञानमतीतानागतस्य च व्युत्थानप्र
जविज्ञानमाकाशे च गतिः सदा शस्त्रैरसंगो युद्धेषु वरदानान्महात्मनः प्र नॅ
भवेयं मया दृष्टं स्वयं योगबलेन च श्रुणु तन्मे विचित्राणि लमाश्चर्याणि मनः
कृष्याः ७५ ॥

वनमाली टीका ८

तां॰ व्यवधानेपि तच्छ्रवणस्य योग्यतामाह व्यासेति श्रीव्यासदत्तदिव्यचक्षुःश्रो
त्रादिरूपाद्व्यासप्रसादादेतत्परं गुह्यं योगं योगाव्यभिचारिहेतुं संवादं योगे
श्वरात्कृष्णात्स्वयं स्वेन पारमेश्वरेण कथयतो न तु मन्वादिद्वारा साक्षादि
वाहं श्रुतवानस्मि न परंपरयेति स्वभाग्यमभिनंदति ७५ ॥

ज्ञानमवैजयंती टीका ९

नन्वेवं वासुदेवार्जुनयोः संवादो गुह्यतमस्त्वया कथं श्रुत इत्यपेक्षायां देशा
दिभिर्व्यवहितस्यापि गुह्यतमस्यापि तत्संवादस्य श्रवणस्य योग्यतामाह
व्यासेति व्यासप्रसादाद्व्यासेनानुग्रहात् दत्तदिव्यचक्षुःश्रोत्रादिलाभरूपा
धू॰ देतं गुह्यमतिरहस्यं परं सर्वोत्कृष्टं योगं कर्मयोगं ज्ञानयोगं भक्तियोगं च ज्ञा
पतं कर्मयोगं गुह्यं ज्ञानयोगं परं ब्रह्मज्ञानाभ्यामपि केभक्तियोगं परत्वमे
वसंवादं निर्योगेश्वरात् ज्ञानैश्वर्यतेजोबलवीर्यशक्त्यादीनां निधेः यद्वा
कर्मज्ञानभक्तियोगानामीश्वरान्नियंतुः साक्षात्स्वमन्ये विनैव न तु नारदादि
परंपरया कथयतो भुवनस्वयं रूपात्कृष्णात् स्वविदानंदस्वरूपादहं प्रतिलो
मजोपि श्रुतवानस्मि अहमिमनेनाशेषं महाकुलप्रसूतानामननुलोम
जानां शास्त्रविदां भीष्मादीनामेतच्छ्रवणे ऽधिकारो ऽस्ति प्रतिलोमजस्य
मम तु पत्नपपैव नास्मिन्नधिकारो ऽतो धन्यो ऽस्मीति स्तुवितन्म ७५ ॥ दे॰१

मधुसूदनी टीका १०

व्यवहितस्यापि भगवदर्जुनसंवादस्य श्रवणस्य यो
ग्यतामात्मन आह — व्यासदत्तदिव्यचक्षुःश्रोत्रादिलाभरूपात् व्यासप्रसादात् इमं परं गुह्यं योगं।

योगाव्यभिचारिहेतुंसंवादंयोगेश्वरात्कृष्णात्स्वयंस्वेनपारंपर्येणान्वेयो
कथयतः साक्षाद्देवाहंश्रुतवानस्मिनपरंपरयेतिस्वभाग्यमभिनंदति श्रुतेम
मितिपुंलिंगपाठोभाष्यकारैर्व्याख्यातः एतदितिनपुंसकलिंगपाठस्तेव
योगशास्त्रसामानाधिकरण्येनव्याख्यानमिदमितितद्व्याख्यातारः ७५ ॥

सदानंदी टीका ॥

हरेरीशस्यार्जुनस्यापिसंवादस्तत्पवीद्वयोः श्रवणयोग्यनामाहृत्यात्मनः संजयो
भृता १ चक्षुःश्रोत्रादिकरणंदिव्यंव्यासेनवेधसा प्रदत्तंसंजयायाद्योश्रुतवां
भयतस्ततः २ व्यासप्रसादतोगुह्यंसंवादंयोगमाथवं स्वयंसंजयेनैवगोव
रूपेणामततेजसा ३ साक्षात्कथयतोहृष्टःश्रुतवानस्मिनासतः इतिहृ
षितमेमानः स्वभाग्यमभिनंदते ४ संजयोपवेमहोभाग्यंमदीयंयमस्य
यान् योगेश्वराद्भगवतः श्रीकृष्णाच्छ्रुतवानहम् ५ ७५ ॥

नीलकंठी टीका १२

कथमयंत्वयाहृतस्त्वयोरपिवासुदेवार्जुनयोःसंवादःश्रुतइत्यतआह व्या
सप्रसादादिति भगवताव्यासेनदिव्यंचक्षुःश्रोत्रादिकंमह्यंदत्तंयेनाहंव्य
वहितेविप्रकृष्टेवासर्वंकरतलामलकवद्विजानामि अतोव्यासप्रसादादे
तद्गुह्यंपरंगुह्यंगोप्यमहंश्रुतवान् योगेश्वरस्यमेयोगमैश्वरमितिप्रति
ज्ञायसर्वैकप्रदर्शितेश्वररूपेणसमपिदृष्टवानितिविशेषः स्वयंकथयतइत्यने
नैवमहतोभूतस्यास्यनिःश्वसितमेतद्यदृग्वेदइतिश्रुतेःस्वनिःश्वसितंवेदं
शिष्याचार्यपरंपरयाकथयतइत्यायाति तदर्थंसाक्षात्कथयतइतिह
ष्यादेर्व्यलाभेप्रतीवरइदानीमर्जुनेप्रतिसाक्षात्कथयतःश्रुतवानहमि
त्यर्थः तेनभगवद्रूपग्रहणाद्भगवत्प्रसादलक्षणासमत्वेस्वस्ययोग्यत्वे अत्रएतद्यो
गमितिमभेदेनान्वयेनगुह्यपदापेक्षयाएतद्योगमितिनपुंसकलिंगयो
रपिसामानाधिकरण्यंशक्यंचयत्किंचिदस्मतापित्वअपदेहंतमित्यादाविव
विशेषणलिंगसंस्कारप्राबल्यादुत्तरत्रभिन्नलिंगविशेष्यलाभेपिपूर्वसंस्का
रोननिवर्ततइतिसामानाधिकरण्यंविलिंगयोरपिवक्तुंशक्यमितिज्ञेयं ७५

आनंदी टीका १३

अद्भुतस्यास्यपरमार्थरहस्यस्यश्रवणाधिकारप्राप्तिमाह योगंय
थावस्थितंयावदितत्त्वाननिष्ठतया स्वकर्मानुष्ठानलक्षणंचित्तनिरो

पलक्षणं चार्जुनेश्वनिकथयतः साक्षा[illegible]श्वराद्योगस्यास्य हि वि
षयस्येश्वरात्प्रवर्तकात्कृष्णादेतं रहस्यमहं स्वयमात्मनैव श्रुतवानस्मी इं
त्यन्वयः ७५ ॥

रामकंठी टीका

इत्याश्चर्यभूतपरमरहस्यश्रवणेकृतसत्वाकारस्याह एतदसंनरह
स्यं भगवतोपुण्यकलावतीर्णात्कृष्णाभिधानात्परमेश्वरात्स्वयमात्मा हि
न योगिना योगिनः सहजसिद्धनिरतिशयसमाधेः स्वयमात्मनैव
साक्षादव्यवधानेन योगं यथाप्रतिपादितज्ञाननिष्ठ नयास्वकर्मानु
ष्ठानलक्षणं निरतिशयं समाधिमर्जुनायोपदिशतोहमश्रुणवं
कृतोहं तो व्यासप्रसादाद्भगवत्कृष्णद्वैपायनानुग्रहात् तेन हि त
स्मै ताद्दृग्रहस्यायोगश्रवणपरमेश्वरस्वरूपदर्शनादियोग्यताधानाय
दिव्यं ज्ञानमयं चक्षुर्वितीर्णम् अत्रैतद्विमादिपदानां सामान्योपक्र
मविवक्षयानपुंसकत्वं वाक्यस्य विशेषाभिधानपर्यवसितत्वाद्यो
गशब्दः पुंस्येव वाच्यः योगं कर्मयोगाख्यं समाधिं कथयतो भगव
त एतत्प्रकरणं गुह्यतरमहं श्रुतवानिति व्याख्येयम् अत एवाह
७५ ॥

लासिकी [illegible] टीका

व्यवहितस्यापि भगवदर्जुनसंवादस्य श्रवणयोग्यता मात्मनश्चाह ॥

व्यासमहर्षेर्दिव्यचक्षुःश्रोत्रादिदानरूपात्प्रसादादेतत्परमरह
स्यमहं श्रुतवानस्मि किं तदित्यपेक्षायामाह परं निरतिशयं यो
गं कर्मानुष्ठाने ध्यानसमाधानरूपं कस्मात् श्रुतवानित्याह यदु
कुलावतीर्णात्कृष्णात्परमेश्वरात्कृष्णाभिधानाद्योगेश्वराद्योगदात
शक्तात् स्वयमेवात्मनैव साक्षादव्यवधानेन कथयतोर्जुनायोप
दिशतः केचित्साक्षादेवाहं श्रुतवानस्मि न परम्परयेति व्याचक्षते
इममिति पुल्लिंगपाठमप्याहुः [illegible] ७५

पंचोली टीका

आत्मनः तत् श्रवणे संभावनामाह व्यासेति गुह्यं परमं रहस्यं यो
गं योगार्थत्वात् योगं स्वादं योगेश्वरात् कृष्णात् स्वयं साक्षात् कथ
यतः न परंपरातः व्यासप्रसादात् ततो दिव्यचक्षुर्लाभात् श्रुतवान्
स्मीषे ७५

रसवीरसमिद्धोधिनी

नन्वीदृशपरमरहस्य श्रवणे कृतस्तवाधिकार इत्यत आह व्यास
प्रसादादिति व्यासस्य कृष्णद्वैपायनस्य प्रसादो भवद्बोधनार्थमी
दृशपरमाद्भुतव्यवहारावलोकनसमर्थदिव्यचक्षुर्वितरणरूप
स्तस्माद्धेतोरेतदुक्तलक्षणं परमं गुह्यं रहस्यं योगिनां यथा प्रतिपा
दितलक्षणोभयविधयोगानुष्ठानामीश्वरादधीपितः श्रीकृष्णा
त्मकापादतः श्रुतवानस्मि कथंभूतात् कृष्णात् स्वयमात्मनैव सा
क्षाद्व्यवधानेनार्जुनं प्रति योगं स्वधर्मानुष्ठानलक्षणं कथयतः
प्रतिपादयत इत्यर्थः ७५॥

मध्वभाष्य

७५॥

338

भाषा अनुवाद टीका

अब संजय यह हमारा अपने श्रवण करने का समाचार कहते हैं कि भगवान व्यासदेव ने हमको दिव्य चक्षु श्रोत्र दिया है कि उनकी कृपा से परम योगरूप जो परम गुह्य अर्जुन के प्रति साक्षात् योगमाया के ईश्वर श्रीकृष्ण ने आप कहा सो मैंने श्रवण किया और आपसे कहा ७५ ॥

दोहा

व्यासप्रसाद सें सुणनहों परमगुह्य यह योग योगेश्वर श्रीकृष्ण
ने जो आप कह्यो यह लोग ७५ ॥

339

राजन्संस्मृत्य संस्मृत्य संवादमिममद्भुतं के
शवार्जुनयोः पुण्यं हृष्यामि च मुहुर्मुहुः ७६

शांकरभाष्य टीका १

हे राजन् धृतराष्ट्र संस्मृत्य संस्मृत्य संवादमिममद्भुतं केशवार्जुनयोः
पुण्यं श्रवणादपि पापहरं कृत्वा हृष्यामि च मुहुर्मुहुः प्रतिक्षणं ७६

आनंदगिरिकृत टीका २

यथोक्ते संवादे भगवतः कृत्वा किमपेक्षसे तेनाह राजन्निति पु
ण्यत्वं साधयति श्रवणादपीति ७६ ॥

स्वामिकृत टीका ३

किंच राजन्निति हृष्यामि रोमांचितो भवामि हर्षं प्राप्नोमीति वा स्पष्ट
मन्यत् किंच तच्चेति विस्मयरूपं निर्दिशति स्पष्टमन्यत् ७६ ॥

पिशाचभाष्य टीका ४

संस्मृत्वा पुण्यं पापहरं हृष्यामि च नमामि च मुहुर्मुहुः भूयो भूयः ७६

रामानुजभाष्य टीका ५

राजन्निति केशवार्जुनयोरिमं पुण्यमद्भुतं संवादं साक्षात्कृतं स्मृत्वा मु
हुर्मुहुर्हृष्यामि ७६ ॥

अभिनवगुप्तकृत टीका ६

स्पष्टार्थम् ७६ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपा[illegible] टीका ७

अथ व्यासप्रसादसामर्थ्यमेवानुवदति राजन्निति राजन्धृतराष्ट्र इम
मद्भुतं केशव वार्जुनयोः संवादं संस्मृत्य सकृच्छ्रवणमपि स्मरणात्पुण्यं
कृत्वा पुनर्यथावत्संस्मरणमपि निष्क्रान्तो यं गीतार्थसंग्रहस्तु निहृष्या
मि संरोमांचितो भवामि एतावतैव कृतो मयानीति हर्षं प्राप्नोमि ७६ ॥ कृत

वनमाली टीका ८

त्रातै पुण्यं कृतनमात्र सर्वपापहरं केशवार्जुनयोरिमं संवादमद्भुतं केव
लं कृतवानस्मि किंतु संस्मृत्य संस्मृत्य स्थिमे हि किं मुहुर्मुहुर्वारं
वारं हृष्यामि हर्षं प्राप्नोमि तात रोमांचितो भवामीति वा ७६ ॥

श्री. गी. टी. ग्र.

340

ऊरुमवेजयंती टीका ९

संवादस्मरणात्रानंदातिशयमाह राजन्निति हेराजन् ध्रुतराष्ट्र के
न्या शवार्जुनयोः पुण्यंभगवत्स्वरूपावत्वेनातिपवित्रंयद्वास्रोत्रविषया।
पंरुथ्थत्ताखिलदोषनाशकत्वेनाध्यात्मादिजन्ममरणादिसांसारिकदुः
खविनाशकत्वेनसंचितक्रियमाणकर्मबाहकत्वेनचजीवशुद्धिकरंश्र
गुणेमघृतिमेवेयमोचकत्वेनमोक्षप्रापकत्वेनात्मासुखंध्रूपमिमंसं
वादंसमककवादकथनमसंस्मृत्यसंस्मृत्यसाक्षात्कृतस्वस्वाथ्स्वाचयन
मेउभंउभीरवारंप्रतिक्षणंहृष्यामिरोमांचितोऽस्मि ७६ ॥

मधुसूदनी टीका १०

पुण्यश्रवणेनापिसर्वपापहरंकेशवार्जुनयोरिमंसंवादमद्भुतंनके
वलंश्रुतवानस्मिकिंतुसंस्मृत्यसंस्मृत्यसंभ्रमेद्विरुक्तिः मुहुर्मुहु
र्वारंवारंहृष्यामिचहर्षयामोमिचप्रतिक्षणंरोमांचितोभवामीतिवा ७६
[illegible]
[illegible] ॥

सदानंदी टीका ११

पुण्यश्रवणमात्रेणसर्वपापहरंशुभंकश्चप्रजापतिः सोकईश्वरःश्री
शंकरस्ततः १ तयोरपिपितावर्यः स्वामीचात्मनिकेशवः तदुक्तंह
कृ रिवंश्रीशंभुनाकेशवेप्रति कइतिब्रह्मणोनामईशोहंसर्वदेहिनां आ
वांतवांगसंभूतौतस्मात्केशवनामवान् २ गुडाकेशपतेतमास्तुकेनः
सहितायाद्यहंतोर्जुनः संवादोयस्तयोः साक्षात्तमिमंपरमाद्भुतं ४ न
केवलमहंसम्यक्श्रुतवानस्मिविस्मयात् किंतुसंस्मृत्यसंस्मृत्यहिकृ
तिरितिसंभ्रमे ५ वारंवारंपरंहर्षमवाप्नोमिप्रतिक्षणं रोमांचि
तोभवामीहप्राप्नोहं विस्मयावधिं ६ ॥ ७६ ॥

नीलकंठी टीका १२

केशवार्जुनसंवादश्रवणजंविश्वरूपाद्योगदर्शनजंचाह्लादंश्लोके
णश्लोकद्वयेनाह राजन्निति हेराजन्हेधृतराष्ट्र पुण्यंपापक्षयक
पहर्षंवमयीत् संस्मृत्यसंस्मृत्येतिसंभ्रमेद्विरुक्तिः शेषंस्पष्टार्थं
॥ ७६ आनंदीटीका १३
स्पष्टार्थश्लोक ॥

स्पष्टार्थम् ७६ ॥

लास्वी[illegible]टीका

किंच हेराजन्धृतराष्ट्रकेशवार्ज्जुनयोः पुण्यंपापहरमिममत्यद्भुतं संवादंसंस्मृत्यसंस्मृत्यवारंवारंहृष्यामिरोमांचितोभवामि हर्षंप्राप्नोमीतिवा[illegible] ७६ दृ॰

पंचोलीटीका

किंच राजन्निति हेराजन्धृतराष्ट्रकेशवार्ज्जुनयोरिममद्भुतंविस्मयकारिपुण्यंश्रवणेनापिपापहरंसंवादंसंस्मृत्यसंस्मृत्यमुहुर्मुहुर्वारंवारंहृष्यामिरोमांचितोभवामिहर्षंप्राप्नोमिच ७६

रामवीरसमिद्धोधिनी

अतएवराजन्निति हेराजन् धृतराष्ट्रकेशवार्ज्जुनयोरिमंपुण्यवदंमद्भुतंसंवादमतिप्रायेन वारंवारं संस्मृत्यसंस्मृत्यहृष्यामि हर्षभरितत्वेनप्रोद्भिन्नरोमांचोभवामीत्यर्थः ७६ ॥

मधुभाष्य

७६ ॥

341

भाषा अनुवाद टीका

सोहे महाराज धृतराष्ट्र यह परम पवित्र केशव औ अर्जुन का अद्भु
त संवाद स्मरण करके मै बारबार हर्षित होता हूं अथवा बारबार
मेरे रोम खडे होतेहैं ७६ ॥

दोहा

सिमर सिमर के हे राजन अर्जुन यह संवाद कहहि केशव
पार्थको पुनपुन होहिं अह्लाद ७७॥

342

तच्च संस्मृत्य संस्मृत्य रूपमत्यद्भुतं हरेः विस्म
यो मे महान् राजन् हृष्यामि च पुनः पुनः ७७ ॥

शांकरभाष्य टीका १

तच्च संस्मृत्य रूपमत्यद्भुतं हरेर्विश्वरूपं विस्मयो मे महान् हे राजन्
हृष्यामि च पुनः पुनः ७७ ॥

आनंदगिरि टीका २

यत् विश्वरूपाख्यं रूपं सगुणमर्जुनाय भगवान् दर्शितवान् ध्या
नार्थं तदिदानीं स्तौति तच्चेति ७७ ॥

स्वामिकृतटीका ३

अतस्त्वं पुत्राणां राज्यादिशंकां परित्यजेत्याशयेनाह यत्रेति यत्र येषां प
क्षे योगमायेश्वरः श्रीकृष्णो वर्तते ७७ ॥

पिशाचभाष्य टीका ४

तच्च रूपं विग्रहमत्यद्भुतं हरेर्नारायणस्य विस्मयः उत्हृले ७७ ॥

रामानुजभाष्य टीका ५

तदिति अर्जुनाय प्रकाशितमैश्वरं हरेरत्यद्भुतं रूपं मया साक्षात्कृतं सं
स्मृत्य हृष्यतो मे महान् विस्मयो जायते पुनः पुनश्च हृष्यामि किं बहुनो
क्तेन ७७ ॥

अभिनवगुप्तकृत टीका ६

स्पष्टार्थम् ७७ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परमार्थप्रपा[illegible] टीका ७

किंच तच्चेति तच्चात्यद्भुतं हरेः स्वरूपं विश्वरूपमभयवाक्यैः श्रुतं न
च दृष्टं तथापि यमपि संजयममत्तरमः संस्मृत्य पुनः पुनर्यत्तस्य संस्मृत्य मे
महान् विस्मयो भवति अहो कथमर्जुनस्य भाग्यं यद्दैवैरपि दुष्प्रम
शाक्यं परमात्मनः समष्टिरूपेण साक्षात्कृतवान् तथा सकलागमा
गोचरोपि परमात्मा कृपया पारमार्थिकं स्वरूपं दर्शितवानिति ।
स विस्मयवेनाद्भुतमस्याविर्भावेन रोमहर्षो पुष्टसात्विकोद्रेकशाली
पुनः पुनर्भवामीत्यर्थः ७७ ॥

वनमाली टीका ८

तद्विश्वरूपं हे राजन् मम महान् विस्मयो न एव च हृष्यामि सम्भ्रमात् ७७

श्री· गी·टी· ५·

343

कसमवैजयंती टीका ९

भगवतो विश्वरूपं स्तनाह नत्वेति हे रे अर्जुन शोकमोहहरते। तिहरि
स्तथा भगवतः सर्वैश्वर्यस्य जगदभिन्ननिमित्तोपादानकारणस्य चि
दचिदात्मकजगद्विश्वाभिन्नस्वरूपस्य केशवशेषाद्यमरवंदितचरण
कमलस्य देवकीपुत्रस्य पार्थसारथेः चतुर्भुजस्य यत्पार्थायोपदर्शि
तं रूपं सर्वविषमयमैश्वर्यमद्भुतमलौकिकत्वेनाश्चर्यं तस्य स्मृत
संस्मृत्य पुनः पुनः प्रतिक्षणं संस्मृत्य स्मृत्वाहं महाराजमे हृष्यामि वि
स्मयो हो किमेतदाश्चर्यमिति चकितचित्तो जायते च पुनरहं पुनः पुनर्वी
रेवारं हृष्यामि निरतिशयानंदेन पुलकितांगो भवामि ७७ ॥

+ यदि विश्वरूपाख्यं सगुणं रूपमर्जुनाय यथानार्थं भग
वान्दर्शयामास तदिदानीम तुसंदधानश्चाह ॥

मधुसूदनी टीका १०

+ तदिति विश्वरूपं हे राजन्मम महान्विस्मयः अतएव हृष्यामि चाहे
स्पष्टमन्यत् [illegible]

सदानंदी टीका ११

यत्सर्वं विश्वरूपाख्यं सगुणं रूपमद्भुतं अर्जुनाय हरिः साक्षाद्दर्शयामा
सत्सर्ववित् १ आह तत्संदधानः सन्निदानीं ध्येयमैश्वरं तच्चेति वि
श्वरूपं भो राजन् संस्मृत्य चेतसा २ स्मारं स्मारं महान्नाक्षिविस्मयो मे
पुनः पुनः अतएव महाभाग्यफलं हृष्यंगतो स्म्यहं ३ ७७ ॥

नीलकंठी टीका १२ ॥

तच्चेति रूपं विश्वरूपं पातदर्शनेऽदि बलाणामीशमिति देशतो विप्रकृष्टं
वस्तूनि तत्त्वरमाणा विशिनोति कालतो व्यवहितं भीष्मादिसंपचक्रकरत
५४ लामलकवत् दृष्टवान् तच्च जगतो मिथ्यात्वमंतरेण न संभवतीति प्रति
पादितं वेदांतकृतके अतीतानागतं वस्त्वीक्षते करविल्ववत् यो
गी संकल्पमात्रेणास्य मिति शास्त्रेषु श्रुतिडिमः १ मायामात्रसर्वदा सर्वं सर्वी
वस्थामिदं जगत् अतीतानागतं पापि श्रित्वा सर्वात्मा सर्वमीक्षते २ आरे
भयं रत्ना मा भ्यासेन रूपेण यन्नसत् अतीतानागतं वस्तु योगी तद्वीक्ष
ते कथं ३ संकल्पमात्रभाते वस्तुनीनादियदीक्षते न हस्ती दर्शनाभ
तस्या योगिज्ञानमप्रमा ४ योगि संकल्पमात्रेण तस्यान्यनिरीक्षते
ईशसंकल्पमात्रेण सर्वाग्रनिखिलं देहिनां ५ आरंभे परिणामे वादे शका
लाद्यतिक्रमः नेवहष्टः कचिन्मोघसमायादिषु स्फुटः ६ जगत्पकृत

383

नेऽत्रभोनानादेशस्थयोगिभिः जलसूर्यद्रवासाभिव्यक्तेनासौ कल्पि
तः स्मृते ७ योगिभिर्दिव्यमाणत्वाद्बहिः सर्वत्र सर्वदा सत्त्वेवास्तीति
चेत्कार्यंकथमीदृग्विधं भवेत् ८ बाह्यं तेहीप्सितेकार्ये युगपद्भित्ति दे
शता चेत्कल्पते विनासेष्टा दृष्टांतस्तत्र नास्ति वः ९ तस्मात्त्वाणाभि
रारब्धमिति वक्त्रापि गवा वत् प्रकृतेः परिणामोवा जगत्कि विंद्रजा
लवत् १० सम्यक्द्दहशामिंद्रजाले विषयपराक्दृशो ग्रपिद्यानादैतस्य
६४ द्दष्टशोनास्येव तेद्वयमिति ११ स्पष्टार्थो मूलश्लोकः ७७ ॥

आनंदी टीका १३

स्पष्टार्थम् ७७ ॥

रामकंटीटीका १४

निगदव्याख्यातोश्लोकः [illegible] ७७ ॥

ल्लासिकी [illegible]टीका

किंच तत्त्वेति विषयरूपंनिर्दिशति स्पष्टमन्यत् [illegible] ७७

पंचोलीटीका

किंच तत्त्वसंस्मरणसंस्मरणरूपमिति वपुनः हेराजन् हरेर्नोरा
यणस्य विश्वरूपमद्भुतं देवानामपि विस्मयकरं संस्मृत्य संस्मृत्य
मेमम विस्मयो वर्तते वर्तमानः पुनः पुनः हृष्यामि हर्षं विस्मयं वा प्राप्नो
मि ७७

रणवीर सत्सिद्धोधिनी

किंच तच्चेति निगदव्याख्यातमेतत् ७७ ॥

ਸਪੁਸਾਬ

੮੮॥

344

भाषा अनुवाद टीका ॥

श्रीमत् शब्दसे भगवान के विश्वरूप का निर्देश करते अर्थात् कहते हैं कि हे महाराज हरि श्रीकृष्णके उस अद्भुत विश्वरूपका स्मरण करकरके हमको अत्यन्त विस्मय होती है अर्थात् आश्चर्य होता है और बारंबार रोमांच होता है ७७ ॥

दोहा

सिमरसिमरके तेहिकों रूपअद्भुत हरिकोहि महाराजमोहि
विस्मय पुनपुन हर्ष हि होहि ७७॥

345

त्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः तत्र श्री
र्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ७८ इति श्री
महाभारते शतसाहस्र्यां संहितायां वैयासि
क्यां भीष्मपर्वणि श्रीभगवद्गीतासूपनिषत्सु ब्रह्म
विद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे मो
क्षयोगो नामाष्टादशोऽध्यायः १८ ॥ ॥

शंकरभाष्यटीका १

किं बहुना यत्र यस्मिन् पदे योगेश्वरः सर्वयोगानामीश्वरस्तत्प्रभ
वत्वात् सर्वयोगबीजस्य कृष्णो यत्र पार्थो यस्मिन् पदे धनुर्धरो गा
ण्डीवधन्वा तत्र श्रीस्तस्मिन् पाण्डवानां पदे विजयस्तत्रैव भूतिः श्रि
यो विशेषविस्तरो भूतिर्ध्रुवाऽव्यभिचारिणी नीतिर्नय इत्येवं मतिर्ममे
ति ७८ इति श्रीगोविंदभगवत्पूज्यपादशिष्यपरमहंसपरिव्राजका
चार्यस्य श्रीमच्छंकरभगवतः कृतौ गीताभाष्येऽष्टादशोऽध्यायः १८ ॥

श्रीधरस्वामीकृत टीका २

द्वयोरपि कृष्णार्जुनयोः नरनारायणयोः संवादस्य माहात्म्यं परमुत्क
र्षं दर्शयति किं बहुनेति कथं सर्वेषां योगानामीश्वरो भगवानिति तदा
त्त्यभवनादेति सर्वयोगज्ञाने कर्मैव तस्य बीजं शास्त्रीये ज्ञाने वैरा
ग्यादि तद्धि भगवदधीनं तदनुग्रहविहीनस्य तदयोगात्ततो योगतत्फल
योर्भगवदनुग्रहायत्तत्वाद्भगवतो योगेश्वरत्वमित्यर्थः श्रीर्लक्ष्मीर्विजयः
परमुत्कर्षः रात्रोऽप्रतराष्ट्रस्य सपुत्रस्य विजयाशां शिथिलीकृत्य पाण्डवे
षु जयश्रामिमकान्तिकीमुपसंहरति इत्येवमिति उपायोपेयभावेन निष्ठा
द्वयस्य प्रतिष्ठापितत्वात् कर्मनिष्ठापरंपरया ज्ञाननिष्ठाहेतुः ज्ञाननिष्ठा
तु साक्षादेव मोक्षहेतुरिति शास्त्रार्थमुपसंहृतमितीत्यर्थः काण्डत्रया
त्मके शास्त्रे पदवाक्यार्थगोचरे आदिमध्यान्तषट्केषु व्याख्या गोचरी
कृते संक्षेपविस्तराभ्यां योऽलक्षणीरूपपादितः सोऽर्थोऽन्तिमेन संक्षि
प्य लक्ष्यतां न विवक्षितः गीताशास्त्रमहार्णवोऽस्यमहत्तं वेकुण्ठक।

श्री०
गी० टी०
श्र०

३४६

एवोक्तं श्रीकण्ठापरनामवक्त्रा निकृन्ते विशाच्छ्योतिते निशायत्रम
ति प्रसादजननी सा तात कृते ऊर्वनी मोदे पर्यवसास्यति प्रतिदिने
सेवध्वमेतद्बुधाः प्राचां वामार्यपादानां पदवीमनुगच्छता गीताभा
ष्ये कृता टीका टीकतां पुरुषोत्तमे ७८ ॥ इति श्रीमत्परमहंसपरिव्रा
जकाचार्यशुद्धानंदपूज्यपादशिष्यभगवदानंदगिरिविरचिते श्री
गीताभाष्यविवेचनेऽष्टादशोऽध्यायः १८ ॥

स्वामिकृतटीका २ ॥

यत्र च पार्थो गांडीवधन्वधरः तत्रैव श्रीः राज्यलक्ष्मीः तत्रैव च विजयः तत्रै
व च विभूतिः उत्तरोत्तराभिवृद्धिश्च नीतिर्नयोऽपि तत्रैव ध्रुवा निश्चितेति म
वेत्रसेवध्याने इति मे मतिर्निश्चयः अतः इदानीमपि तावत्पुत्रस्य श्रीकृ
ष्णशरणमुपेत्य पांडवाः सम्राज्यं सर्वं स्वेभ्यो निवेदय पुत्रप्राणरक्षणं कुर्वि
त्यर्थः ७८ भगवद्भक्तियुक्तस्य तत्प्रसादात्मबोधतः सुखं बंधविमुक्तिः
स्यादिति गीतार्थसंग्रहः तथाहि पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया २
या भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन इत्यादौ भगवद्भक्तेर्मोक्षं प्रति
साधकत्वश्रवणात् तदेकान्तभक्तिरेव तत्प्रसादात्मज्ञानावांतरव्या
पारमात्रयुक्ता मोक्षहेतुरिति स्फुटं प्रतीयते ज्ञानस्य च भक्त्यवांतरव्यापार
त्वमेव वक्ष्यते तेषां सततयुक्तानां भजतां प्रीतिपूर्वकं ददामि बुद्धियोगं
तं येन मामुपयांति ते मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते इत्यादि
न च ज्ञानमेव भक्तिरित्युक्तं समः सर्वेषु भूतेषु मद्भक्तिं लभते परां भक्त्या
मामभिजानाति यावान्यश्चास्मि तत्त्वतः इत्यादौ भेदेन निर्देशात् न चैवं सति
तमेव विदित्वातिमृत्युमेति नान्यः पंथा विद्यतेऽयनाय इत्यादि श्रुतिवि
रोधः शंकनीयः भक्त्यवांतरव्यापारत्वात् ज्ञानस्य नहि काष्ठैः पचतीत्युक्ते
ज्वालानामसाधनत्वमुक्तं भवति यस्य देवे परा भक्तिर्यथा देवे तथा गु
रौ तस्यैते कथिता ह्यर्थाः प्रकाशंते महात्मनः देहांते देवः परं ब्रह्म ता
रकं व्याचष्टे यमेवैष वृणुते तेन लभ्य इत्यादि श्रुतिस्मृतिपुराणवचना
न्येवं सति समंजसानि भवंति तस्माद्भक्तिरेव मोक्षहेतुरिति सिद्धं तेनैव
दत्तया मत्या गीता विवृतिः कृता स एव परमानंदस्तया प्रीणातु माधवः
परमानंदपादाब्जरजःश्रीधारिणाधुना श्रीधरस्वामियतिना कृता गी
तासुबोधिनी स्वप्रागल्भ्यबलाद्धि लोकभगवद्गीताः तदेनां ते तं वेष्ट

हृष्येति किंतु कृष्णपापी पुष्टदृष्टिविना श्रुतं संजलिनानिरस्तज्ञ
लयेरादिस्वरं तन्मर्णानावमेषु नकिंनिमज्जतिजनः सत्कृपया
इविना ॥७२॥ इतिश्रीमहाभारतेशतसाहस्र्यांसंहितायांवैया
सिक्यांभीष्मपर्वणि श्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्या
यांयोगशास्त्रे श्रीकृष्णार्जुनसंवादे योगशास्त्रे निर्णयसंन्यासादि
नवनिर्णयपद्योरितिश्रीभगवद्गीताटीकायांसुबोधिन्यांश्रीधरस्वा
मिकृतौमोक्षयोगोनामाष्टादशोऽध्यायः १८ ॥ रामः

पिशाचभाष्यटीका ४

किंबहुनायत्रममयस्मिन्पक्षेयोगेश्वरःकृष्णस्थितःयत्रपार्थः
धनुर्धरः उपतगांडीवः तत्रतस्मिन्पक्षेश्रीर्दैवनाविजयार्थः
विजयः शत्रूणांपराभूतिः नीतिर्नयः प्रज्ञाजयसाधिकाइ
तीत्येममतिर्निश्चयः इतिकरणेगीताशास्त्रपरिसमाप्त्यर्थं ७८
इतिश्रीपिशाचभाष्येऽष्टादशोऽध्यायः १८ ॥ ॥

स्थाः^ रामानुजभाष्यटीका ५

यत्रेति यत्रयोगेश्वरःकृष्णः कृत्स्नस्योच्चावचरूपेणावस्थितस्यचेत
नाचेतनस्यवस्तुनोयेयेस्वभावयोगास्तेषांयोगानामीश्वरः स्वसंक
ल्पायत्तस्वेतरसमस्तवस्तुस्वरूपस्थितिप्रवृत्तिभेदः कृष्णोवसुदेव
सूनुर्यत्रचपार्थोधनुर्धरः तत्पितृष्वसुःपुत्रः तत्पदद्वंद्वैकाश्रयः
तत्रश्रीर्विजयोभूतिर्नीतिर्ध्रुवाइतिमतिर्ममेति ईश्व
रेकन्त्रिताबुद्धिः सर्वोपादेयतोनिर्वाह्यकर्मपरिणामसम्पाद्यस्वमा
राध्यउच्यते ७८॥ इतिश्रीभगवद्गीतारामानुजविरचितभ ना^
गीताभाष्येऽष्टादशोऽध्यायः १८ ॥ ॥ रामः

अभिनवगुप्तकृतटीका ६

संजयवचनेनसंवादमुपसंहरन्नेतदर्थस्यागाढप्रवेशक्रमेणानिरं
तरचिंतासंतानोपकृतनैरंतर्येदेवचेतसिस्वपरिस्फुटनिर्विकल्पा
त्मभवद्रूपनामामाध्यमानेस्मरणमात्रमेवपरब्रह्मप्रदायकमित्यु
च्यते एवंभगवदर्जुनसंवादमात्रस्मरणादेवतत्त्वावाप्त्याश्रीविज
यविभूतयइतिशिवम् ७८ संगृहीतमर्थंकाशाज्ञानविमोहमयरक

श्री-
गी टी
म्र-

347

यीसत्वादिभिन्नोऽपि येनाप्यस्यात्मविबोधसंदरनयाविसृज्यविकल्पा
निराम् यत्किंचित्स्वरसोद्यदिंद्रियनिजव्यापारमात्रस्थितेर्हेलातः
ऊरुतेनदस्यसकलं संपद्यते शंकरे इति श्रीभगवद्गीतार्थसंग्रहे
अष्टादशोऽध्यायः १८ ॥ श्रीमान्कात्यायनोऽभूद्वररुचिसदृशः
प्रस्फुरद्बोधरम्यो हि शालंकृतो यः स्थिरमतिरभवत्सोऽपि का
त्योऽनिविद्वान् विप्रः श्रीभूतिराजस्तदनुसमभवत्तस्य सूनुर्म
हात्मा येनामी सर्वलोकास्तमसि निपतिताः प्रोद्धृता भानुनेव
तस्माच्चरणकमलमधुपो भगवद्गीतार्थसंग्रहं व्यदधात् अभिन
वगुप्तः सद्विजलोटककृतवेदनावशात् । अतद्दमयथा।
र्थं वा यथार्थमपि सर्वथा नैव विद्धि मामहं यतो ये कृतामिदं
बोधवार्थिहि परिपूर्णोऽयं श्रीभगवद्गीतार्थसंग्रहः ॥ इति
श्रिनयनचरणचिंतनलब्धप्रसिद्धेरभिनवगुप्तस्येति शिवे
अभिनवरूपाशक्तिस्तद्गुप्तो यो महेश्वरो देवः तदुभयया
मलरूपमभिनवगुप्तं शिवं वंदे ॥ ॥ ॥ ॥

परमार्थप्रपा टीका ७

तदेवं विश्वरूपदर्शने द्रोणं च भीष्मं च जयद्रथं च कर्णं तथा
न्यानपि योधवीरान् मया हतांस्त्वं जहि मा इति भगवद्वाक्या
नि तस्य श्रुत्वा धृतराष्ट्रस्य पुत्राः सहस्रपते चूर्णिते रुत्त
मौ गौ दिव्याय र्जुनस्य वाक्यानि वयाय मत्वा बहुनामेव श्रुते
नैतेन पुत्राणां जीवनसंदेहः किं पुनराज्यप्राप्तिरिति मन
सा विचार्य पांडवेभ्यः सर्वस्वं दत्वा श्रीकृष्णं शरणं गत्वा प्रा
णरक्षणं कार्यमित्याशयेनाह यत्रेति यत्र येषां पक्षे
योगेश्वरः कृष्णो वर्त्तते तद्भक्ते टिप्पणिकास्य कथ
तेन मनोभूमेर्निवृत्तिः फलमाप्यते कृष्णनाम्नास्मा
त्तातः सर्वात्मनात्मार्थी इत्यत्र इति यत्रैव तत्पदपानसाधि
तसकलपुरुषार्थः पार्थो यन्वर्थरोगांडीवधन्वा परमेश्व
रस्य विभूतिर्वर्त्तते तत्रैव श्री राज्यलक्ष्मीस्तत्रैव विजयस्त
त्रैव भूतिरुन्नतोत्तरोत्तरैश्वर्यं तत्रैव ध्रुवा अचला नीतिर्नयमार्गे

नतुमायिनां तव पुत्राणां लालाटस्य हृदयदानमात्र जायावस्था हरणा
दिकूटकारिणामिति मे मतिर्निश्चयः तदुक्तं भरतश्रादिपर्वणि यथ
तराष्ट्रं प्रति संजयवचनं तव पुत्रा दुरात्मानः प्रत्याख्येयं भवन्नाम्
धात्मजैस्तु भूयिष्ठानतानुशोचितुमर्हसीति तथाश्वारण्यकेऽपि द्रौप
दी हृदयेऽभगनायुधिराजा जयद्रथः शिवं प्रसाधयत्प्रसायया चैव जय
मर्जुनात् इति राजाब्रवीद्देवं नेति देवस्तमब्रवीत् ऋते तैर्जुनं महाबाहुं दे
वैरपि दुरुत्सहं यमाहुरजितं देवं शंखचक्रगदाधरं प्रधानं सोऽस्त्रवि
दुषं तेन कृष्णेन गोपितमिति ॥ यद्यसंजयस्य धृतराष्ट्रस्य च हार्दमाप
घते ॥ योलुब्धावेशमदाहार त्रिविषमविषाद्विप्रशापाद्धतानां तेद्वैष्यं
तामस्वभावात्पाण्डवतिपरीभवान्स्तेजगोपस्वभक्तान् हृतः स्वजनस्त्वभ्रूला
सद्व्यपि निजजनैः किं करिष्यन्नुपेक्षां इमे वेनावकानां द्विगुणाहतानपि
यांजीविते ख्यातरा पा उपनिषदुपदेशानीहद्वारौ दिवसनोपिज
वानपः सपत्नान् स्वचरणाशरणास्पदं तस्तैः स च किं तन्न प्रभवेत्त्रि
हेतव मेतान् कालेविलयलयहेतव विस्मशाक्तिः शक्तेनतनत्पा
त्र किया तत्पुमर्थः पार्थस्य वा निहतमारणा कर्तैरात्मनौ पार्थ शोभव
ति संजय नाजीवेन रणे मरणमस्ति वेष्टरणामागतेः किं भवेत्तत्तो
पि यदि जीवनं किमत्र तद्भुतो न किंचित् अथापि यदि जीवनेवरम
तोस्तिर्भस्त्रजामिदं मनसि चिंतयन्नकुरुपिता यत्नस्तीमभूत् अथा
ध्यायनार्थं ॥ अथ पापैश्चिषु समाधिकदशभिरभिप्रायउक्तः क्रमेण
संग्राम समागम सर्वविशिष्ट विषमतिस्पष्टतिज्ञान कर्तृ कियादिः तत्प्रमित
पायः अवतरणि गदितो द्वादशे संग्रहार्थश्लोकैर्निश्चय समरक्तेनस्य पार्थ
सोऽजवैना वस्तुस्मरणा भुवि निहतानामप्राप्तडुपतानोपडुपति वि
श्वावानांरावः कौरवाणां रणाग्निरस्मि शयो वैर्याते राज्ञानमो हेतद्व
राजपभीष्मद्रोणकर्णांश्च हत्वा फलितविजयपलस्मीर्याद्देवशोपदेशा
दयि गत परमार्थं पार्थ आसीन्कृतार्थः कुरुवंशजकृत तत्कृत देवश्च
रं हरिं सदसदनिसमरे कृतदेवज्ञ मज्जेन ९ अनाहता पराणामि
वगीतेतिभावय निजेनेतामवस्यापवनी विषयीकृत प्तावानेव

प्रागल्भ्याद्धि भवतामिह कतुकरतः स्वंतु मर्ह्यनुसत्तः ॥ मुनिप्रायः
प्रायः सकलनिगमानामधिगतः सुधीभिर्वैर्यैस्तु भगवदनुकं

श्री· गी· टी· श्री·

३४८

गीतार्थः पार्थप्रति निवेदितः चतुर्दशप्रकारैः श्रीकृष्णेन परा
त्मनः २ श्रेसमारुह्य केसारैः सेमारागाधिविलेचय हंसोनेसप्रशंसेये
परमार्थप्रबोधिना ३ क्षैदःसंदर्भगर्भप्रभुगाहनगिरामस्पृज्ञःसा सी म
मामीमांसामांस लोलनरकारणपरिणामक्षुंगतोनागतिः कासाके क
धीरधीरा नदपिरचयिते भाष्यमेयोगभाजो पाग्रयवशात् विरेसा
शनेयानुभवरसिकास्केत्रहृन्ननाः स्वविष्णोनियातिश्रमम परेते
हविहृतो गभीराभिप्रायान् स्मामववनेस्य ४ नवनौकवीनोस्वश्रेये २
भवति वहुविस्तारजभये कृतसत्र पायेद्वरधिगमनाह्वणमनःस
विस्तारःश्लाघ्यः शमयति हियः संशयभरं ५ विद्विद्वावेदार्थ दृशा।
वदनवाणीपरिणतेशतस्लोकव्याख्यापरमरणी मे पामकरवे नतो
गीताभाष्यनिविल निगमार्थकनिलयेविपश्चितार्थैः स्पृष्टीनहरिकरु
णापांगशरणः ६ वेदव्यासमतंकृत्वेवेदव्यासः सएवहि भेदव्या
सेजहामेषवेदविमासस्वैकेशोदोदक्तदश्णानीर्थानिकदेपार्थाभि
धानेश्रंतंनव्ज्योतिषिकानवेसमभवच्छ्रीज्ञानराजाभिधः तस्यूत
निगमागमार्थनिपुणः सूर्याभिधानःकविः कृतप्रेरणयानदर्थ।
णाधियागीतार्थभाष्यंवाधात् ७८ इतिश्रीमदेवज्ञपंडितसूर्यविर
चितायांभगवद्गीताटीकायांपरमार्थप्रपा यांसकलगीतार्थसंग्रहे
न्यां ब्रह्मार्पणसंन्यासयोगोनामाष्टादशोध्यायः १८ ॥ ॥

ब्रह्मलीटीका ८

एवंचसति तत्रैव विजयसंभावनामर्जुनस्याह यत्रेति यत्रेति यत्रयत्र पि
योगेश्वरः सर्वयोगसिद्धीनामीश्वरः सर्वज्ञः सर्वशक्तिर्भगवान्कृष्णो
भक्तद्वुःखकर्षणोनारायणोविष्णोदयादिकर्तीतिष्ठति यत्र पार्थो
यतुर्द्धरोगांडीवधन्वार्जुनस्तिष्ठतिनरनारायणोतिष्ठतोयत्र तत्रैव
श्रुष्टिरयतेश्रीराज्यलक्ष्मीःविजयःशत्रुपराजयनिमित्तकउत्क
र्षः भूतिकत्तरोत्तरेराज्यलक्ष्म्यादिहर्द्धिः ध्रुवावश्यंभाविनीतिनेयः नी
एवंममनिश्चयः तस्माद्भयाद्वविचर्यात्यक्त्वा भगवदनुग्रही
तेलक्ष्मीविजयभागभिःपांडवैःसहसंधिरेवक्रियतामितिमभिप्रायः
वेदश्रीहयकंधरंस्फरतिशाखाभिर्मीनकीर्तिहरिर्योगीद्रैःपरिमा

वितेमनसितिस्मानेदवेहेसमेहेषाभिः परिकंपयंतमसृत्रोस्राने
दयंतेसृरानस्वोग्रीचिंतयतेगिरेमलततराविद्याणायेतेमदा १
विजयरथमरक्तयोरथ्यांगदयानः परिभवतिहिभीकेपार्थसेनो
सवाश्या विगलितकदिवासाप्रतयत्पादयानेर्भुवमतिष्टतपादेतो
८ वतोज्ञेतेन २ भगवतीगिरिकेजसश्रीगोपालसरेणवः क्रियासृवै।
भवेवाचामंभुराशेस्रशोयनं ३ भुक्त्वाशर्पमाकमृष्टिंविपदमपास
[illegible]यद्दीनवंधुर्हिजातेः इत्याभूतेः परः स्वाष्टनकरइतिमादेहि
मोयो[illegible]नयोग्यः शैपयाः शाकलेशात्रिभुवनमहाघयजनोडः स
साघः स्थितोनः कामितानस्रोक्तिविवरणानोमेहरिः प्रीयतोसः ४
श्रीगोविंदविहारभूषितमवोद्वेदावनात्यादिशिकोयांतामृदुरोड
रेम्यतिभरहानानयायेदितः श्रीसेनाहमचोवसेतिवनमालीन
तकुलेमद्भुधः श्रीगीताशयचंद्रिका परिसमाप्ताविद्वज्जनस्तान्।
हता ५ ॥१८॥ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायांयो
गशास्त्रे श्रीकृष्णार्जुनसंवादे गीतार्थनिगूढार्थचंद्रिकायांवनमा
लीविरचितायांमोक्षसंन्यासयोगोनामाष्टादशोऽध्यायः १८ ॥

ॐममवैजयंती टीका १

नन्वयमयोक्तेनसर्वं[illegible]मयाकृतेपरंत्वमन्वतसविजयोभविष्य
तिनवेतिनन्वमवदेत्याशंक्यसत्त्वविजयाशांपरित्यजे साह यत्रे
ति यत्र[illegible]शहादोकर्मणायोगेश्वरोतिविलासेनतनाचेतनानोव
स्तुतोयसभावालेयोगशद्ववाच्यास्तेषामीश्वरोनियंताश्रहादिस्या
वरोतात्विलभाणिस्वरूपस्थितिमहानिकोः नेतागणशक्तिकः श्रीकृ
सोयत्रक्नलोस्त्वेवमदेवष्टः सारथ्यादिपर्थनसखमित्रसाहाय्यकारि
तयावर्ततेयत्रचपनुर्द्दरोः स्तितोः त्वरलोदाणमानत्विजात्वंत्वंगोज्ञी
वकोदंडपाणिः हस्तानयः केशिकेसायम[illegible]मित्रोनरावताः पा
र्थः कस्यपिनरघसः शत्रः पिनाकिनोपिनवीर्यीनारायणसहायः
हसमारथिः कृतोवर्ततेनतेवेवामयकस्यापिश्टतयमेवत्वपदेश्रीवा
जलस्मीर्धर्कवास्थिराभवेत् नैवेवविजयः शत्रुवशीभवदेतकःपरमे
कर्षोधकवलत्वेवचभूतिरुजनेोनैरभ्यधिविहादिर्धवातेवेवनोनिसी
ययहतिर्मवेतिममध्यासकृपापात्रसमनिर्निक्षयातिकाउहिमेव

श्री॰
गी॰टी॰
प्र॰

349

नीतिर्म ७८ कल्पभूमिसमुद्भूता कल्पवृक्षसमाश्रिता अद्वैताङ्कुरभा
वबीजामलविज्ञानमल्लिका १ कर्मशाखोरुविस्तारा समाधानैकप
ल्लवा प्रपन्नजनसंसेव्या विविक्तकलिकामालिकान्विता २ प्रेमानन्दात्मिका
भक्तिकुसुमालंकृता सन्निसेरभसेवकाभक्तभ्रमरसंकुला ३
श्रुनरागपरागाढ्य नवनिश्चयसान्विता तत्त्वत्रयविहंगालिभेदाभेदाम
नप्रदा ४ भगवद्भावसंप्राप्तिमुक्तिस्वादुफलालिता गीताकल्पल
तातस्याः स्वार्थदृष्टिविनिर्मिता ५ कल्पभावरताभिरिह सत्कैकदृष्टि
तामया मालावैजयंताख्या कल्पकेन समर्पिता ६ यारपिपाद्य
ये केशवे सर्वशास्त्रार्थसंमतो ज्ञानभक्तिरतास्मैवयासं निभगवत्पदे
७ सकलभुवनबीजं सर्वशास्त्रार्थबीजं नतममरेशैः कुवलयरु स्व॰ ८ उद्ध मवे
चिदेहं कोटिकंदर्पगेहं त्यागगीतशास्त्रसिद्धचौमिकृष्णमस्य वेद्यं ८
रागरूपेणि जगयोनिं गोपीकांतरमापतिं परमयोगमनिलयं पार्थसूतं स
माश्रये ९ विपिरसभगुलाष्ट श्लोकसंख्या वमानाविजयस्य कृष्णस्य ची
१५ नयवैजयंती अगानवस्था केकाति केशणिवंदे स्वरगुरुकृष्णभवाव
णीनामेनिटीका १० वैशंपायनः गीता सुगीता कर्तव्या किमन्यैः शा
स्त्रविस्तरैः याचवेयपद्मनाभस्य मुखपद्माद्विनिःसृता सर्वशास्त्र
मयी गीता सर्वदेवमयो हरिः सर्वतीर्थमयी गंगा सर्ववेदमयो मनुः
गंगागीताचगायत्रीगोविंदेच हृदिस्थिते चतुर्गकारसंयुक्ते पुनर्जन्म
नविद्यते षट्शतानि सविंशानि श्लोकानां प्राह केशवः अर्जुनः सप्त
पंचाशत्सप्तषष्टिस्तु संजयः एकेनाष्टश्लोकमेकं गीतायामानमुच्य
२० ते भारतामृतसर्वस्वं गीतायां मथितस्य च सारमुद्धृत्य कृष्णेन अर्जुन
स्य मुखे हुतं मंगलं रामपिकाकोतनानमतं ध्यानमेवच मंगलं निपमाने द्रू ५
दनामैवेतत्व बोध्यते १ इति श्रीमन्नवादीन्द्रकरीन्द्रकदम्बदम्भकुम्भ
दमनातिप्रबलकेलीरवातिशयसुकुमारनारदनियमानंदसंतति
प्रवरप्रबलप्रतापपार्थसरलसमस्तिमाभिलक्षणदासस्यान्तेवासि
नागिरिधारिदासेन विरचितायां श्रीमद्भगवद्गीतार्थकृष्णवैज
यंत्यां मोक्षसंन्यासयोगो नामाष्टादशोऽध्यायः १८ ।१।
+ एवं मतानि सत्पुत्रे विजयादि संभावनां परित्यज्य त्याह॥ मधुसूदनी टीका १०
+ यत्र यस्मिन् युधिष्ठिरपक्षे योगेश्वरः सर्वयोगसिद्धीनामीश्वरः स

र्वेत्तः सर्वशक्तिर्भगवान् श्रीकृष्णः भक्तदुःखकर्षणात्कृष्ण इति
नारायणः यत्र पार्थो धनुर्धरः यत्र गांडीवधनुर्धरः पृथात्मजोर्जुन
नरः तत्र नरनारायणाधिष्ठिते तस्मिन्युधिष्ठिरपक्षे श्रीराज्यल
क्ष्मीः विजयः शत्रुपराजयनिमित्त उत्कर्षः भूतिरुत्तरोत्तरं रा।
ज्यलक्ष्म्यादिवृद्धिः ध्रुवाव्यभिचारिणीति सर्वत्र संबंधः नीतिर्न।
यः एवं मम मतिर्निश्चयः तस्माद्यावत्र विजयाशां मत्वा श्रीभग
वदनुग्रहीतैर्लक्ष्मीविजयादिभाग्भिः पांडवैः सह संधिरेव विधीय
तामित्यभिप्रायः ७८ वंशीविभूषितकरान्नवनीरदाभात् पीतां
बरादरुणबिंबफलाधरोष्ठात् पूर्णेंदुसुंदरमुखादरविंदनेत्रात् कृ
ष्णात्परं किमपि तत्त्वमहं न जाने कौतुकयात्मकेशास्त्रे गीताख्ये येन
निर्मिते आदिमध्यान्तषट्केभ्यस्तस्मै भगवते नमः श्रीगोविंदमुखा
रविंदमधुना मिष्टे महाभारते गीताख्यं परमं रहस्यमृषिणा व्या
सेन विख्यापिते व्याख्याते भगवत्पादैः प्रतिपदं श्रीशंकराख्यैः
प्रत्नैर्विस्पष्टमधुसूदनेन मतिना स्वज्ञानशुद्ध्यै कृतम् इह योऽस्ति
विमोहयन्मनः परमानंदघनः सनातनः गुणदोषमदेषपथ्यवन
स्तरणात्तलोचयदयेस्वयजनः श्रीरामविश्वेश्वरमाधवानां प्रसाद
मासाद्य मया गुरूणां व्याख्यानमेतद्विहितं स्वबोधं समर्पितं तच्च
रणांबुजेषु ७८॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीवि
श्वेश्वरसरस्वतीश्रीपादशिष्यश्रीमधुसूदनसरस्वतीविरचिता
यां श्रीभगवद्गीतागूढार्थदीपिकायां मोक्षयोगो नामाष्टादशोऽध्यायः १८

सनातनी टीका ॥

एवं च सति युद्धे विजयस्याशां वलीयसीं त्यज त्वं सर्वथा राजन् भ
गवंतं हरिं स्मर १ यस्मिन्योधिष्ठिरे पक्षे योगमायेश्वरो हरिः समस्त
योगसिद्धीनां योगसाध्यस्य योगिनां २ ईश्वरो भगवान्कृष्णः स
र्ववित् सर्वशक्तिमान् भक्तदुःखहरः श्रीशो विभुर्नारायणोऽच्युतः
३ तिष्ठत्यात्मीयरूपेण गृहीत्वा पांडुनंदनान् यत्र गांडीवधन्वा च ति
ष्ठत्येवार्जुनो नरः ४ तस्मिन्योधिष्ठिरे पक्षे नरनारायणाश्रिते श्री
राज्यलक्ष्मीर्विजयः शत्रुहानिनिमित्तकः ५ समुत्कर्षस्तथा भूतिः

श्री·
गीटी·
७-
350

श्रीविशेषोतिविस्तरः राज्यलक्ष्म्याविहृद्दिक्ष्वाद्रष्टभाविनीक्ष
वा ६ एवेमस्माचयोतैयः सर्वैश्चवाविशेषतः नीतिर्नियोयथाशा
स्त्रमेवेमेनिश्चयोन्नप ७ तस्मात्वेसर्वथाराजन्वृथाउत्तजयाशिष्ठे
नकाश्रीभगवत्कृष्णात्मा नरहरीनेश्रपांडवैः ८ लक्ष्म्यादिभागिभिः
साकंसेव्यैरेवविधीयते शुभमिशायपवासंसंजयस्यात्तगम्यते ९
यतोधर्मस्ततःकृष्णोयतःकृष्णस्ततोजयः इत्युक्तेमाधर्मोया
संयुयस्माद्वलीयसी १० तस्मात्वजयस्तस्माद्दर्शयात्तत्पराजयः
महामोहोऽनवासेपत्राशिमद्यासमेपरा ११ साधर्मम्रूलिकायस्मा
त्कृष्णपत्तावलेविनी आसुरीकृष्णविमुखोवलहीनतयाधमा १२
श्रतोथर्मसमाश्रित्यकृष्णपादरतोभवेत् नैनैवमेस्तेः ध्रुमोनिस्ता
रः स्वल्भः स्वयं १३ इत्येवेत्रूपकस्योपसंहारोमुनिनाकृतः ध्रुवः
सर्वस्वमुपन्नेकृष्णयादानुरागिणां १४ नैवास्तिदुर्लभंकिंचित्
नकदात्वैकभागिनां सिद्धमिमेवशास्त्रीयेरहस्यसर्वमंगलं १५ १८
इतिश्रीमहाभारतेशतसहस्र्यांसंहितायांवैयासिक्यांभीष्मपर्व
णिश्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णा
र्जुनसंवादेमोक्षसंन्यासयोगोनामअष्टादशोध्यायः १८ ॥
स्वाभाविकानवधिकातिशयेशितोजस्तेजोवीर्यवलैश्वर्यगुणौ
कवार्द्धिः वेदांतवाक्यपरिशीलनतत्वनिष्ठैर्योगिभिरंतरयदे
वतनोमुकुंदः १ शुद्धोबुद्धोविमुक्तः प्रकृतिशिरवरागीतमस्त्वेमा
नर्यैभूमिर्यस्मात्तातेसमस्तंजगदिदममस्ताद्याप्यसर्वस्थितोयः
यस्यांशांशावतारैः स्वरनरवनजैरद्वितेसर्वमेतत्तंभक्त्यानेमकुं
देहृदिगतमममलंकृष्णमेवप्रपद्ये २ श्रुत्यंतगंभीरमतीवविस्त
तेनिमेष्यवेदार्थमिदंविलसिभिंतं सथारसंशास्त्रमगाधगोचरं।
स्वबोधमिष्टंकिलयेनतंश्रये ३ यत्रयांतिमपिवमेसर्वविश्राम
धामाभयपदमकामंवामदेवादिधामं सकलसुरललामंश्यामकाम
मारामम्रूर्तिभवजलधिविरामंनौमिकृष्णंसुरामं ४ कृष्णस्तुगी
नोरविहरिमवसरोजाक्षिगलितंनेकवाप्याकैबुद्धिर्विषयविषयंके
निपतिता नयापिश्रीकांतप्रकरगणलक्ष्मीविरचितेंकटात्स्व

24

च्छाब्धेः प्रवस्तनवतो किंतु सुलभे इदं गीताशास्त्रं परमगुरुणा
र्थेकृतिलयं त्रिकांडवेदार्थं सकलमिह संगृह्य कथितं स्वयं श्री
कृष्णेन कृतिविशदतत्त्वेन विभुना जपाद्यानां ज्ञानाच्छ्रुतमपि
फलमेवस्य पिबो ६ कृतिभिरपि कृतेयत्र प्रशंसेति लोके किम
मितमतिनेहाहं प्रहृतस्तथापि ममभवतु कर्णो विनम्रकृत्स्नपादे
म्पतु सज्जनो मे ^ नुरागः क्षितिमनसि निपापदत्तं ^ ७ ॥ ॥ ॥

नीलकंठी टीका १२

यस्मादेवं तेषां भगवांस्तदनुग्रहीतोर्जुनश्चापि स्थिरपदे स्थि
तस्तस्मात्तयोर्जयाशा न कार्येत्याह यत्रेति यत्रपदे उभे वर्तते सर्व
त्र संबध्यते श्रीर्दिव्यसभादिशोभा विजयः प्रसिद्धः भूतिरैश्वर्यं
ध्रुवेति नियतत्वे नीतिर्नयश्च एतत्सर्वं तत्रैव नान्यत्रेत्येवमिति
मम मतिः अतः पांडवैः सह संधिरेव कर्तव्य इति भावः ७८
इति श्रीमत्पदवाक्यप्रमाणज्ञमर्यादाधुरंधरचतुर्धरवंशावतं
स श्रीगोविंदसूरिसूनोः श्रीनीलकंठस्य कृतौ भा
रतभावदीपे भीष्मपर्वणि गीतार्थप्रकाशे अष्टादशोध्यायः १८

॥ ॥ ॥

॥

351

341

अथ स्वपरजयपराजयाभिप्रायेण धृतराष्ट्रो यदपृच्छत्तं निश्च न॰
यमाह । कृत्स्नसाक्षात्कारेण नारायणो यत्र योगेश्वरः योगस्य
कार्यकारणयोरभेदन्यायात् योगसाध्यानामनंतर्थानं स्फ
र्त्तिः कात्तिरिमादीनां याज्ञवल्क्यादिप्रोक्तानां सिद्धीनां वक्तृशा
वैश्वरूप्यदर्शने युक्त तद्दृष्टापूर्वाणामीश्वरः संपादकः अत
एव योगानां पाण्डवानां जयार्थं युक्तीनां संपादकः तथैव ते
षु परमयुक्तानामपद्रवयुक्तीनां निग्राहकश्च यत्रास्ति तथा
पार्थः पृथिव्यां मुनिसादेनेंद्राज्जातः नरावतारोर्जुनः धनु
र्धरः धनुर्निर्वातकवचादिवधेष्वप्रतिहतं विजयसाधनं गाण्डीवा
ख्यं चापं धारयन्नायुधान्तरमप्रयोक्तास्ति तत्रैवं नरनारायणपरि
पालिते युधिष्ठिरपक्षे श्रीः सर्वार्थसम्पत्तिः विजयः सकलवि
पक्षक्षपणेनोत्कर्षोतिशयः भूतिरनवच्छिन्ना पुत्रपौत्रादिस
ना तथाध्रुवा चिरस्थायिनी नीतिः अर्थतो राजनीतिसम्भवा
कीर्तिश्च स्यात् मम मत्सनीकृतकृत्स्नार्जुनप्रभावस्यैवं ममेति
निश्चय इति सिद्धम् ७८ ॥ इति श्रीआनंदीभगवद्गीताटीका
समाप्तम् ॥

रामकंठी टीका १४ ॥ +अयमयेनाभिप्रायेण कुरुपांडवसैन्ययोर्जयपराजय जिज्ञासारूपेण धृतराष्ट्रः पृष्टवांस्तत्र निश्चयमाह

+ यत्र येदेवैश्वरूप्यदर्शनादिना प्रकटितानन्यसाधारणयोगैश्वर्य
महिमा भगवान्हरिस्तिष्ठति यत्र चाप्रतिमनिजपराक्रमपरितो
ते॰ षितपशुपतिः पार्थः पृथासूनुः कार्मुकभृत्तिष्ठति तत्रपक्षे श्रीर्ल
क्ष्मीर्विजयः सकलविपक्षक्षपणेन सर्वातिशायित्वं भूतिर्विभवः समा
चस्थिरेति मत्तदह कृत्स्नार्जुनप्रभावातिशयस्य मे मम बुद्धिरिति मे
म् अथायाश्वनगेन्द्रवः कविवरस्यायं प्रयोगेनैव निर्व्यूढः फलि
तं बिभर्ति सज्जनो यस्मिन्वराम्बुजन्मम श्रद्धाभक्ति सद्धीसमर्पितन
वाकल्पक्रियाचरासिंनी सर्वैश्वर्यसमागमाभ्युदयदामासाद्य संविह

श्री० गी० टी० ग्र०

352

धूम् शास्त्रार्थाभिनवप्रकर्षसरसामेषाकवीन्द्रस्यवाग्विस्तब्धेः परि
चर्यतांसहृदयैस्तत्कान्तरामादरात् दिव्यामोदरसान्नभूरिकुसु
मस्फीतानवोद्यानभूर्भृङ्गाणेवयतस्ततोनयतिवानैषापुनस्ताद्द
शान् दधतिवस्तवः प्राज्यैकर्मण्यएवप्रपमहोनवंकविदपिपुनस्त
न्निर्वाहः कथंप्रतिपद्यते नियतिनियतंतेजोभाजः स्फुरन्तिसह
स्वशक्तिभिरविदलंथान्त्रः सर्गा विधातुमलंरविः भावैर्कापिवि
जृम्भतेनिजगुणौचित्येनजित्वाजगद्दुर्वारः स्वमनोविशेषविद्वषां
वीनव्यपेतान्तरः यन्नूषेविविधौषधीरसगुणास्वादैकहेवाकिनो
धावंत्येवहिपंकजेमधुलिहोलुब्धान्यपुष्पस्पृहाः आमोदामलय
द्रुमस्यपवनैर्विस्तार्यतेदक्षिणैराज्ञायाप्यलयोयमन्यविषयं स्याय
मार्यंतिमंदादराः स्फीतोपिस्वगुणैः स्वयंगुणवतावक्रैकथंशक्य
ते तेनावर्जयितुंजयंतसुजनाः केचित्तु नाम्रद्रुमाः येनारायण
इत्यभूद्गततिथिः श्रीकर्न्यकुब्जेद्विजस्तद्वंशेस्वगुणप्रकर्षरवचि
तोमुक्ताकणाख्योभवत् तस्यैषासहशान्तुजेनरचितारामेणवि
द्वज्जनश्लाघ्यत्वात्सफलश्रमेणभगवद्गीतापदार्थप्रथा येसम
पीनकतारानिकरमणिशिखादीपकादिप्रकाशैसंतोप्यन्तर्मो
हस्यान्धकचनविनिगमनायांतिनाशंनिशायाम् तेप्यकुकारप्रगल्भ
स्वगुणविलसितेनाशुविद्योतयन्तान्सर्वान्सम्यक्पदार्थान्जयति
दिनपतेर्ज्योतिरिस्मर्जितंतत् ७८ इतिश्रीराजानकरामविरचि
तेवाक्यार्थान्वयमात्रेसर्वतोभद्रनाम्निभगवद्गीताविवरणेष्टाद
शोध्यायः १८ ॥ लौकिकी टीका

येनाभिप्रायेणकुरुपाण्डवां सैन्ययोर्जयपराजयजिज्ञासाहृपेणधृतराष्ट्र एष्टवां स्तत्रनिश्चयमाह ॥

श्वरो

यत्रपदेयोगेशमायेश्वरः श्रीकृष्णोवर्तते यत्रचपार्थोगाण्डीवधनु
र्धरः तत्रपदेश्रीराज्यलक्ष्मीस्तत्रैवविजयः सकलविपक्षाभिभ
र्त
वकर्त्व तत्रैवविभूतिरुत्तरोत्तराभिवृद्धिर्नीतिर्नयोपि तत्रैवध्रु
वानिश्चितेतिसर्वत्रसंबध्यते इतिममप्रत्यक्षदृष्टकृष्णार्जुनप्रभा
वातिशयस्यमतिर्निश्चयइत्यर्थो गीताशास्त्रंसमस्तंयोग्यमसर्थो

वगाहितं संक्षिप्य वक्तुमर्थयः शाहतेनौमिमाथवं शास्त्रात्
स्तत्वाविहूतलुकवितर्कवित्साशात्कृतेः काप्यनुमानतोत्रहि
प्रामाणिकीत्याश्रियतांत्रुयाः सदाटीकानचैषास्वकपोलक
ल्पिता नास्मिन्कार्यकोशलोमीलनायव्योत्यर्थवालोभतोवा
प्रवृत्तः किंतुश्रीमन्माधवेनैवसोहमस्यातन्त्यः प्रेरितोतः स्य
तेन तस्मादुक्ताव्याकृतोकाप्यवीत्यपूर्वोक्तोकीदोषदृष्टिर्न
कार्या प्रेक्षावद्भिस्तत्समाधेयमतेपर्यालोच्यकापिवेदितस्तं
स्यात् ७८ इतिश्रीमहाभारतेशतसाहस्त्र्यांसंहितायांवैयासक्यां
भीष्मपर्वणिश्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशा
स्त्रेश्रीकृष्णार्जुनसंवादेटीकायां मोक्षयोगोनामाष्टादशोध्या
यः १८

तिकीति

+लक्ष्मी राम इति द्विजोत्तमेव
तन्काश्मीरभूमंडले नेत्रेमी
नुत पान्नदेहजननो राजानगो
पालकात् श्रीशाके द्वितुणाद्रि
भूपरिमिते मासे स्थिता वाश्वि
ने शुक्लायां प्रतिपद्यजां चित्रिनि
तोगीतात्रुटीकांव्यधात +

पंचोलीटीका

ज्याँ

तत्स्त्रायाणं राज्याभिषेकादिशंकां परि[illegible]मं शयन्नाह यत्रेति किं
बहुनायत्रयेषांपक्षेयोगेश्वरः सर्वयोगि नामीश्वरः सर्वयोगबीज
भूतः कृष्णो राजते यस्मिन्पक्षेधनुर्धरोगांडीवधनुर्धरोपार्थोर्जुनो व
र्ततेतत्रपांडवानांपक्षेविजयः तत्रश्रीर्विभूतिः राज्यलक्ष्मीस्तत्रैवविं
जयः भूतिश्रियोविशेषः उत्तरोत्तराभिवृद्धिः ध्रुवाअव्यभिचारिणी।
नीतिः इतिमेमतिः ७८ इतिपंचोलटीकायामष्टादशोध्यायः १८

+
[illegible]
[illegible]

[illegible] सन्निहोयिनी

अथयेनपुत्रजीवितजयोभयाशासानृपेणाभिप्रायेणमामकाः पां
डवाश्चैवकिमकुर्वतेति धृतराष्ट्रः पृष्टवांस्तेतस्याभिप्रायंव्यर्थमेव
मेवनिरूपयन्नाह यत्रेति यत्रपक्षेयोगिनामीश्वरः श्रीकृष्णोवर्तते
यत्रचपक्षेधनुर्धरोगांडिवधनुर्धारीपार्थोप्रतिमपराक्रमपाण्डितोवि
तः पशुपतिस्तिष्ठति तत्र श्रीर्लक्ष्मीर्विजयसकलविपक्षपरा
स्तव्यातप्राप्यितिविभूतिरुत्तरोत्तराभिवृद्धिर्विभूतिश्च नीतिर्नयोपि तत्रै

353

वध्रुवास्थिरनीतिप्रत्ययोहदृढोस्माकंनप्रभावातिपार्थस्यममेतिहृद
निश्चय इतिभद्रंपश्येमप्रचरेमभद्रमिति ॥ इतिश्रीभगवद्गीतासु
वणावीरसमिद्धोपचिन्त्यांमष्टादशोध्यायः ॥१८॥ शुभमस्तु ग्रन्थ
प्र.१ स.१४ ३९

मधुभाष्य

१८ इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचिते श्रीम
द्भगवद्गीताभाष्ये अष्टादशोध्यायः ॥१८॥ श्रीकृष्णार्प
णमस्तु संवत् ॥[illegible]॥ चैत्रवदि १४ ॥

343

भाषा अनुवाद टीका

इसतेहेमहाराज अवतम अपने अर्थोके राज्यलाभकीशंकाभीत्य
दिमागकरो इस आशय परकहतेहै किजिसके पक्षमे योगेश्वर
श्रीकृष्ण वर्तमानहै और जहा गांडीव धनुर्धारी अर्जुन तयारहै
तहांई श्रीकहे राज्यलक्ष्मी औविजय तथा भूति कहे उत्तर उत्तर
अभिवृद्धि कहे वढती औनीतिजो न्याय सो सब निश्चयसेहै ऐसी
मेरी मति है इससे अव तम अर्थोको त्यागके श्रीकृष्णकीशरण
जायके श्री पांडवोंको अपना सर्वस्वदेप्रसन्न करावते हुये
अपने अर्थोकी प्राण रक्षामात्र करावहु संजय नेधृतराष्ट्र
कोकहा ७८ इतिश्रीजगन्नाथसुकुलविरचितमन
भावनीभाषाटीकायां अष्टादशोध्यायः १८ ॥

अतिपावनि है अनपावन

दोहा

जहां योगेश्वरकृष्ण है धनुर्धरपार्थ जहांहि तहां जीत वि
भूति नीति स्थिर यह मति मोरी आहि ७८ इति शुभम्

सं १९३९ भाद्र प्र० ५॥